
LITHOGRAPH No 2
MEDLEY OF K
(with PROSE COMMEN
ATTRIBUTED to V
& TANTRAS
CAS & MANTRAS
RY here & there)
RAS PURĀṆAS
NGALI (MOV

LITHOGRAPH No 2

MEDLEY OF KAVACAS & MANTRAS
(with PROSE COMMENTARY here & there)
ATTRIBUTED to various PURĀṆAS
& TANTRAS

BENGALI (mos

[illegible]

No 30

[illegible]

No. 30

॥ श्रीगणेशाय नमः ॥

॥ अथ प्रथमखण्डारंभः ॥ १ ॥

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥अथमौद्गलपुराणारंभः॥ध्यायेत्स्थिरेणचित्ते
नगणेशंसुवेसिद्धिं॥बुद्धिप्रकाशकंपूर्णंयोगिनांहृदिसंस्थितं॥१॥जितंतेनाखिलंनानाब्रह्मवर्णेन
वर्णितं॥नानाजगत्समूहंवैगणेशेनोभयंकृतं॥२॥भक्तसंरक्षणार्थायनिर्गुणःसगुणस्तथः॥नाना
वतारवान्स्वेपिनानाभेदधरोबभौ॥३॥तस्मैनमोगणेशायनरकुंजररूपिणे॥सगुणेनररूपायनि
र्गुणेगजवक्त्रिणे॥४॥नमःशिवायशांतायविघ्नवेत्रभविघ्नवे॥तृतीयशक्तयेचैवचतुर्हस्तेनमोनमः
गिने॥५॥ब्रह्मणेशेषनागेचनरनारायणंसदा॥नमामिभावयुक्तोहंपुराणंपुरुषंपरं॥६॥दे
वानांयोगिनांचैवमहर्षीणांमहात्मनां॥ब्रह्मामिशरणंनित्यंपुराणज्ञानमिच्छया॥७॥पुराक
ल्पेभवन्विप्राःशौनकाद्याःससाधनाः॥कलिदोषभयत्रस्तानैमिषारण्यमाश्रिताः॥८॥तत्रकलि
युगावासंज्ञात्वादोब्रह्मणोमुखात्॥मुनिधर्मप्रसिध्यर्थंकर्मज्ञानप्रसिद्धये॥९॥अन्यच्चब्रह्मण

प्रोक्तं पुराणश्रवणं सदा ॥ कलिमलहरं पुण्यं तदर्थमभवन्यतः ॥ २० ॥ कस्मिंश्चित्समये सूतो लोम
हर्षण आययौ ॥ मुनीनां दर्शनार्थाय पुराणज्ञो विचक्षणः ॥ २१ ॥ नैमिषारण्यशोभां च पश्यंस्तत्र
सुविस्मितः ॥ अहो धन्यं महारण्यं कलिदोषविवर्जितं ॥ २२ ॥ दृष्ट्वा वै मुनयस्तेन सुप्रसन्नाननांबुजाः ॥
नित्यनैमित्तकर्त्तारः स्वधर्माचरणप्रियाः ॥ २३ ॥ पंचयज्ञरतास्तत्र वेदाध्ययनकारिणः ॥ ब्रह्मतेजस
मायुक्ता ज्वलंतः पावका इव ॥ २४ ॥ विनास्तेन यथा सूर्या योगिनो वेदवादिनः ॥ तारकाः सर्वजंतूनां
शौनकाद्या महर्षयः ॥ २५ ॥ तत्रागत्य महाभागः स सूतो रोमहर्षणः ॥ साष्टांगेन ततः पूर्वं परमाल्हा
दसंयुतः ॥ २६ ॥ अभिवाद्य मुनीन्सर्वान्भक्त्या नम्रात्मकंधरः ॥ प्रांजलिः प्रयतो भूत्वा प्रोवाच मधुरं
वचः ॥ २७ ॥ सूत उवाच ॥ वंशो धन्यो मदीयोद्य पितरौ च कुलं वयः ॥ विद्याव्रतं तपो ज्ञानं धन्यं सर्वं मुनी
श्वराः ॥ २८ ॥ भवतां पादपद्मं च सर्वाशुभविनाशनं ॥ कांक्षितं यत्सदा देवैर्मया दृष्टं सुपुण्यतः ॥ २९ ॥

मुद्गलपु॰
२

साक्षाद्ब्रह्मस्वरूपा वै ब्राह्मणा ब्रह्मवित्तमाः ॥ तेषां दर्शनमात्रेण कृतकृत्याश्च जंतवः ॥ २० ॥ कृतार्थोहं कृ
तार्थोहं कृतार्थोहं न संशयः ॥ भवतां दर्शनेनैव मुक्तोहं भवसागरात् ॥ २१ ॥ इति ब्रुवंतं साधुं ते सूतं तं रो
महर्षणं ॥ प्रत्यूचुर्ब्राह्मणाः सर्वे भक्तियुक्तं तपोधनाः ॥ २२ ॥ ब्राह्मणा ऊचुः ॥ सूत सूत महाभाग स्थीयतां
पुण्यवर्द्धन ॥ तव दर्शनमात्रेण संतुष्टास्मो वयं खलु ॥ २३ ॥ इत्युक्तः स सूतस्तत्र मुनिदत्ते शुभासने ॥ स
मासीनो महाबुद्धिः सांजलिः सन्प्रतापवान् ॥ २४ ॥ सुखासीनं च सूतं तं दृष्ट्वा तत्र महामुनिः ॥ भृगुप्रव
रमुख्यो सौ मुनीनां प्रत्युवाच ह ॥ २५ ॥ शौनक उवाच ॥ सूत सूत महाभाग सर्वज्ञ सुखदायक ॥ त्वया
३ कृष्ण
ह्याराधितः प्राज्ञः कृष्णद्वैपायनो महान् ॥ २६ ॥ नारायणावतारश्च साक्षान्नारायणः स्वयं ॥ वेदविभाग
कारी स पुराणानां विभागकृत् ॥ २७ ॥ त्वं वै तस्मात्पुराणानि सेतिहासानि वेत्सि च ॥ तेन सर्वज्ञता जा
ता तवापि पुण्यवर्द्धन ॥ २८ ॥ वयं भीताश्च कालेन कलिकल्मषरूपिणा ॥ नैमिषारण्यमास्थाय

रामः
२

स्थिताज्ञप्ताः स्वयंभुवा॥२९॥तत्रविश्रांतिदातावैत्वंप्राप्तोसिमहाद्युतिः॥पुराणानांप्रवक्ताचपुण्य
वान्पुण्यवर्द्धन॥३०॥यत्रपौराणिकीगाथाकलिस्तत्रनतिष्ठति॥तस्मात्कारुण्यभावेनपुराणंप्रब्र
वीहिभो॥३१॥तवयद्दर्शनंजातंमहापुण्येनसत्तम॥धन्यंधन्यंमहाभागसाक्षात्संशयछित्स्व
यं॥३२॥छेदेनसंशयानांवैसतांत्वंरोमहर्षणं॥करोषितेनतेनामरोमहर्षणइत्यहो॥३३॥इति
पृष्टोमहात्मासशौनकेनमहर्षिणा॥संहृष्टःसन्नुवाचेदंवचनंधर्मसंस्कृतं॥३४॥सूतउवाच॥अ
द्याहंकृतकृत्योभोकृत्वानुग्रहकारिणा॥सकलंकथयिष्यामिव्यासेनकथितंमहत्॥३५॥इत्यु
क्त्वाकथयामासपुराणानिसकृत्स्नशः॥नानाख्यानविभक्तानिनानाधर्मयुतानिच॥३६॥सर्वार्थ
साधनानिचदुःखनाशकराणिच॥ब्रह्मभूतप्रदानिवैनानामतयुतानिच॥३७॥पुराणोपपुराणा
निसेतिहासानिभागशः॥धर्मार्थकाममोक्षाणांप्रदानिपुण्यदानिच॥३८॥श्रुत्वाश्रुत्वामुनिजना

मुद्गलपु॰
३

हर्षयुक्ता बभूविरे॥ नित्यं प्रमुदितास्तेन प्रीताः संपूर्णभावतः॥३९॥ युगस्योत्क्रमणं तस्य चक्रुस्ते मुनयोः
खिलाः॥ पुराणश्रवणेनैव परमाल्हादसंयुताः॥४०॥ पुराणेषु च सर्वेषु सेतिहासेषु सर्वतः॥ नाना
भेदमतादीनां श्रुत्वा भ्रांता मुनीश्वराः॥४१॥ निश्चयं नाधिगच्छंति परं किं सर्वसंमतं॥ तदर्थं मुनिवर्यः
स्म पर्यपृच्छत्स शौनकः॥४२॥ शौनक उवाच॥ भो भो सूत महाभाग शृणु मे वचनं लघु॥ पुराणानि
च संश्रुत्वा भ्रांता जाता महाद्युते॥४३॥ इदं परमिदं नेति सर्वत्र वर्णितं त्वया॥ भिन्नं भिन्नं महाबुद्धे तेन नो
निश्चयो भवेत्॥४४॥ कुत्रापि शंकरश्रेष्ठः कुत्र विष्णुस्तथा रविः॥ शक्तिश्चैव गणेशश्च कुत्र वैराटरूपकं
॥४५॥ कुत्र ब्रह्म च योगश्च ज्ञानं कर्म च कुत्र वै॥ आत्मा प्राणोन्नमित्युक्तं मनो वै परतः परं॥४६॥ कुत्र बु
द्धिर्महाभाग सांख्यं स्वानंद एव च॥ इत्यादिमतभेदेन निश्चयो नैव जायते॥४७॥ अतस्त्वं कृपया ब्रूहि वेद
शास्त्रार्थसंमतं॥ सर्वेषां मान्यमेकं च सर्वसंशयनाशनं॥४८॥ इति पृष्टो महातेजाः शिष्यो व्यासस्य सत्त

रामः
३

मः॥ एकं श्रुतिस्मृतीनां यत्सारं कथितुमारभत्॥४९॥ सूत उवाच॥ शृणुध्वं मुनयः सर्वे सारं मुद्गलभाषितं॥
सर्वश्रुतिस्मृतीनां च सर्वमान्यं विशेषतः॥५०॥ पुरा दक्षाध्वरे जातं यज्ञविध्वंसनं महत्॥ रुद्रेणागत्य क्रुद्धेन
कृतं विघ्नं महत्तरं॥५१॥ देवाः पराजिताः सर्वे रुद्रैः परमदारुणैः॥ दक्षमस्तकसंछेदो वीरभद्रेण वै कृतः॥
ग८ ॥५२॥ ब्रह्मणा [illegible]त्य तत्रासौ सांत्वितो बहुलोक्तिभिः॥ शंकरो जीवयामास दक्षं योगेन तत्वतः॥५३॥ यज्ञ
विध्वंसशोकार्त्तो दक्षः शापेन मोहितः॥ अज्ञानावरणेनापि न किंचिन्निश्चयं ययौ॥५४॥ जगाम भगवां
स्तत्र साक्षात्सूर्य इवोदितः॥ वेदशास्त्रार्थतत्वज्ञो योगींद्रो मुद्गलो मुनिः॥५५॥ गणेशभक्तिमहा
त्म्यात्सर्ववंद्यो महायशाः॥ तपसां कर्मणां साक्षान्निधिरेषः सनातनः॥५६॥ तं दृष्ट्वोत्थाय दक्षोसौ
प्रणनाम महामुनिं॥ आसनाद्यैः सुसंपूज्य वक्तुं समुपचक्रमे॥५७॥ दक्ष उवाच॥ भो भो मुनींद्र वं
द्य त्वमांगिरस महाद्युते॥ यज्ञविध्वंसदुःखार्त्तं मां पालय जडीकृतं॥५८॥ मुद्गल उवाच॥ मा चिंतां

कुरुभोदक्षप्रजापतींद्रसत्तम॥विघ्नराजस्मरत्वंवैतेनसर्वंनदुर्लभं॥५९॥ ॥इतिश्रीमदांत्येमौद्गलेम
हापुराणेप्रथमखंडेवक्रतुंडचरित्रेमुद्गलदक्षसमागमनंनामप्रथमोध्यायः॥१॥सूतउवाच॥
दक्षेणमुनिशार्दूलएश्रुतंमुद्गलभाषितं॥प्रणिपत्यपुनःसोपिपप्रच्छहितकारकं॥१॥शौनकउवाच॥
मुद्गलदक्षसंवादंश्रोतुमिच्छामहेवयं॥विस्तरेणसमाचक्ष्वसूतसंतोषकारक॥२॥सूतउवाच॥
शृणुध्वंमुनयःसर्वेकथांलोकैकपावनीं॥यांश्रुत्वापुरुषस्येहनान्यत्कृत्यंप्रविद्यते॥३॥मुद्गलदक्ष
संवादंसमासेनविवर्णय॥सारंसर्वत्रसंपूर्णंभवरोगविमोचनं॥४॥मुद्गलोक्तंवचःश्रुत्वादक्षःप्रो
वाचधर्मवित्॥प्रांजलिःप्रयतोभूत्वाहृष्टरोमामहायशाः॥५॥दक्षउवाच॥पुण्यंमहन्मेक्तिपुरा
तनंयत्तेनैवजातंतवदर्शनंभो॥मोक्षप्रदंतत्परलोकदंचभोगप्रदंधर्म्ममनंतपुण्यं॥६॥शापेन
नष्टोहृदिसर्वबोधःश्रेष्ठंमुनींद्रेषुगतंमदीयं॥यज्ञस्यभंगोविविधंहिकष्टंतत्रैवतेदर्शनमत्रचि

त्रं॥७॥तवदर्शनमात्रेणकिंचित्स्फूर्त्तिः समागता॥धन्योसियोगिनांमध्येपावनमीदृशंत्वयि॥८॥
कोसौविघ्नपतिःपूर्णःकीदृशःकःस्वभाववान्॥कतितस्यावताराश्चकस्यांशेवापिकिंस्तवः॥९॥कैः
पूजितश्चविधिवत्किंफलंदत्तवान्परं॥किंविहारश्चकस्मिन्वैलोकेवसतिसप्रभुः॥१०॥एतत्सर्वंसवि
स्तार्यप्रब्रूतेब्रूहिसादरं॥ज्ञात्वातंदेवदेवेशंभजिष्यामिहितावहं॥११॥इत्येवंकथयंतंतंमुनयोविस्मया
न्विताः॥पप्रच्छुंसकलंतद्वैदक्षचेष्टितमादरात्॥१२॥शौनकाद्याऊचुः॥दक्षःप्रजापतिःसाक्षात्कथंमूढ
त्वमागतः॥प्रजापतित्वंतस्यापिकथंनष्टंमहात्मनः॥१३॥यज्ञध्वंसःकथंप्राप्तःशंभुःप्ररूषितःकथं॥
एतत्सर्वंसुविस्तार्यब्रूहिसूतमहामते॥१४॥श्रुत्वामुनिवचोरम्यंकृष्णद्वैपायनस्यच॥शिष्यःप्रोवाचमाधु
र्यंवचनंसंप्रहर्षयन्॥१५॥सूतउवाच॥शृणुशौनकयत्नेनकथांभुवनपावनीं॥कथयामियथातथ्यां
श्रुतांव्यासमुखेनयां॥१६॥ब्रह्मणोदशपुत्रायेतत्रदक्षोमहान्प्रभुः॥अतःप्रजापतित्राताकृतःसत्रेन

मु॰पु॰
५

वेधसा॥१७॥ सराज्यंप्राप्यमत्तोभूद्गर्वेणैवपरिप्लुतः॥अहंप्रजापतीनांचश्रेष्ठोराजानमत्समः॥१८॥
एकदागिरिवर्येतेकैलासेशंकरस्यच॥दर्शनार्थंगतादेवामुनयःसिद्धकिन्नराः॥१९॥गंधर्वानाग
मुख्याश्चविद्याधराप्सरोगणाः॥ब्रह्माविष्णुश्चइंद्रश्चसर्वेतेनसुसंस्कृताः॥२०॥सभामध्येसमासी
नःशंकरःसर्वपूजितः॥वामभागेस्थितोविष्णुर्दक्षिणांगेपितामहः॥२१॥क्रमेणसर्वदेवा
श्चयथायोग्यंस्थितामुने॥गणानंदीमुखास्तत्रसमीपेसंस्थिताबभुः॥२२॥तत्रतेमुनयोहृष्टा
वसिष्ठाद्याःप्रतुष्टुवुः॥नारदःप्रमुखाःसर्वेगंधर्वाललितंजगुः॥२३॥नृत्यमप्सरसश्चक्रुरेवं
सर्वेपुपूजिरे॥शंकरंसपरिवारमानंदेनसमन्वितं॥२४॥कथानानाविधास्तत्रकुर्वंतिभावपूर्वकं॥
तत्राजगामदक्षःस्मप्रजापतिःपतिःस्वयं॥२५॥शिवेनमानितस्तत्रवचसापूर्णसत्कृतः॥नमनंनकृ
तंतस्माईश्वरेणप्रभावतः॥२६॥तेनसंकुपितोत्यंतमुवाचगर्वमोहितः॥शृणुध्वंयेसभाश्रेष्ठायथा

रामः
५

तथ्यानुवर्त्तिनः ॥२७॥ रुद्रस्यश्वसुरोहंवैपुत्रतुल्योनमेयदि ॥ नमनंनकृतंयस्मात्तस्मात्याज्योमहेश्व
रः ॥२८॥ ऐश्वर्यगर्वयुक्तोयंस्वधर्महीनतांगतः ॥ देवपंक्तौकथंयोग्यः पिशाचानामधीश्वरः ॥२९॥
वर्णाश्रमविहीनोयंनग्नोभिक्षाशनेरतः ॥ सर्पभूषणसक्तश्चचिताभस्मांगलेपनः ॥३०॥ व्याघ्राजि
नपरिधानोमुंडमालाधरःसदा ॥ इत्यादिदोषयुक्तत्वान्नस्पृश्योयंमहात्मभिः ॥३१॥ अशिवःशिव
नामावैवृथेश्वराभिमानवान् ॥ अतोनभाषणीयोयंदोषाकरःपिशाचराट् ॥३२॥ इतिब्रुवंतमत्यं
तंस्वयंभूस्तंनिराकरोत् ॥ नगृहीतंपितुर्वाक्यंक्रोधावेशेनतेनतत् ॥३३॥ नानानिंदायुतंवीक्ष्य
भगवान्नंदिकेश्वरः ॥ उवाचसर्वसान्निद्धेक्रोधेनारक्तलोचनः ॥३४॥ नंदिकेश्वरउवाच ॥ धिक्त्वंव्य
र्थंप्रजापालशिवनिंदापरायणः ॥ शिवतत्वंनजानासिमदेनासिक्तदुर्मते ॥३५॥ मायाखेलकवा
नेषतथातद्दोषवर्जितः ॥ तेनायंशिवतांप्राप्तःकथंनिंदांकरोषिरे ॥३६॥ शिवनिंदाकराःशास्त्रेतार

मु॰पु॰
६

काज्ञानवर्जिताः॥अतस्त्वंज्ञानहीनोभवितासिमेघवाक्यतः॥निंदायेनैववक्त्रेणकृताशंभोर्महात्मनः॥
प्रजास्योभवितासित्वंभ्रष्टराज्योभविष्यसि॥३८॥इतिश्रुत्वावचःसोपितंपुनःप्रत्युवाचह॥नत्वंजानासि
दुर्बुद्धेशंकरंकर्मदूषितं॥३९॥वर्णाश्रमविहीनेनयास्तिष्ठेत्पुरुषःकदा॥पादेपादेमहान्पापीनारकीम
रणेभवेत्॥४०॥तस्माद्यूयंमहापापाःशैवाःस्पृश्यानकुत्रचित्॥भुवियेशांकरानित्यंज्ञानहीना
भवंत्विति॥४१॥कलौप्राप्यचपाखंडाभविष्यंतिजटाधराः॥शूद्रावेदंपठिष्यंतिनग्नाभस्मांगलेप
नाः॥४२॥स्त्रीमांसमदिरासक्तानानाभोगकरास्तथा॥नरकेवैपतिष्यंतिशंभुमार्गपरायणाः॥
॥४३॥प्रजापतिःप्रभुःसाक्षाद्ब्रह्मातंनिरभर्त्सयन्॥ततोजगामस्वगृहंदक्षःक्रोधपरिप्लुतः॥४४॥
सर्वेतेस्वस्थलंजग्मुर्दुःखितातेनवैकृताः॥शिवोपिदुःखसंयुक्तोम्लानतांपरमांगतः॥४५॥ ॥
इतिश्रीमदांत्येमौद्गलेमहापुराणेप्रथमखंडेवक्रतुंडचरित्रेदक्षनंदीविवादोनामद्वितीयोध्या

रामः
६

यः॥२॥सूतउवाच॥शृणुध्वंमुनयः सर्वेस्थिरीकृत्यमनश्चलं॥विघ्नेशभक्तिहीनायेविघ्नाकुलाभवंति
ते॥१॥दक्षोभूत्स्वगृहंगत्वाक्रोधामर्षसमन्वितः॥नकिंचित्सुखवान्विप्राः शूलयुक्तोयथानरः॥२॥
शिक्षाशिवस्यकर्त्तव्याहृदिव्यवसितोभवत्॥नकिंचित्प्राप्तवांस्तत्रविचारंभृशदुखितः॥३॥एत
स्मिन्नंतरेतत्रनारदोदिव्यदर्शनः॥आजगाममहातेजादक्षेणैवसुसत्कृतः॥४॥आसनंपाद्यमर्घ्यंच
दत्वासम्यक्प्रपूजितः॥पृष्टःकुशलप्रश्नेनप्रसन्नोनारदोब्रवीत्॥५॥नारदउवाच॥दक्षकिंदुःखि
तस्त्वंतेमुखंम्लानेनसंयुतं॥कथयस्वमहातेजाःप्रजापतिपतिर्भवान्॥६॥दक्षउवाच॥शृणुनारदये
नाहंदुःखितोम्लानतांगतः॥शिवेनासत्कृतस्तत्रसभायांसर्वसन्निधौ॥७॥दर्पेणैवावृतःशंभुस्त
स्यदर्पंहराम्यहं॥तादृशंब्रूहिभोशीघ्रंसर्वार्थविद्विचक्षणः॥८॥नारदउवाच॥बृहस्पतिसवंदक्षकु
रुत्वंसर्वभावतः॥यज्ञभागविहीनंतंतत्रशंभुंकुरुष्वभो॥९॥यज्ञभागेनहीनोयंदेवपंक्तिबहिष्कृ

तः॥पिशाचेशोभवेच्छंभुर्देवत्वंतत्रसंस्थितं॥२०॥प्रजापतिपतिःसाक्षाद्भवान्सर्वत्रसंमतः॥यत्कृतंभवतांपू
र्वंजनेघुतादृशंभवेत्॥२१॥एवंपरंपराप्राप्तंतेनैश्वर्यंप्रनाशितं॥शंभोर्मनसिप्राप्तंयथेच्छसित्तयाकृ
रु॥२२॥इत्युक्तानारदस्तस्माज्जगतोब्रह्मांडमंडले॥वीणागानरतोभूत्वायोगीसंपूर्णत्रिलोकि॥२३॥
दक्षोपिऋषितोजातःसत्संमानितवानभूत्॥बृहस्पतिसवंयज्ञंसमारेभेसतत्क्षणात्॥२४॥जगामभ
गवांस्तत्रविष्णुर्देववरःप्रभुः॥आजग्मुर्देवगंधर्वानानावाद्यशोभिताः॥२५॥तत्रजग्मुर्द्विजाःसर्वे
नानातत्वार्थकोविदाः॥जामातरःस्त्रियायुक्ताःकश्यपप्रमुखास्तथा॥२६॥यथायोग्यंचकारासौ
दक्षःपरमऋषितः॥गणनाथविहीनंतंयज्ञंशंकरवर्जितं॥२७॥सगोशस्यास्मृतिर्जातासर्वेषांभावि
गोस्वान्॥दधिचिप्रमुखास्तत्रशैवाःक्रोधेनपूरिताः॥२८॥उवाचदधिचिस्तत्रक्रोधावेशसमन्वि
तः॥शृण्वदक्षमदाघाज्ञहितंवचनमुत्तमं॥२९॥शंकरेणविहीनोयंयज्ञोनैवप्रशोभते॥शृण्

हीनोयथादेहस्तथापश्यनराजति॥२०॥इतिश्रुत्वावचस्तस्यदक्षोरोषसमन्वितः॥उवाचगर्वमोहेन
शापेनैवविमोहितः॥२१॥शिवोशिवस्वरूपश्चपिशाचानामधीश्वरः॥वर्णाश्रमविहीनत्वान्नयोग्यो
यज्ञकर्मणि॥२२॥यत्रलक्ष्मीपतिःसाक्षाद्भगवान्मंगलालयः॥तत्रकिंन्यूनतांयातिमिथ्यावा
क्त्वंतुमावद॥२३॥श्रुत्वातस्यवचःक्रूरंदधिचिःपुनरब्रवीत्॥शिव[illegible]
[illegible]निंदांकरोषित्वंमज्ञानेनविमोहितः॥२४॥यज्ञनाशोभवेद्दक्षशं
करेणविहीनतः॥नसिद्धिंलभसेत्वंतुनष्टभाग्योनसंशयः॥अत्रयेब्राह्मणाद्यावैवर्णानानास
मागताः॥सर्वेकलियुगेपापाःपाखंडिनोभवंतुते॥२६॥स्वधर्महीनतांप्राप्यनरकेतेपचंतु
वै॥विष्णुःप्रमोहयुक्तोत्रसर्वेपाखंडकारकः॥२७॥कलौदेवोभवेन्नित्यंपाखंडिनांसहायवा
न्॥पाखंडप्रियवज्जंतुकलिमलकरःसदा॥२८॥शिवहीनेतथायज्ञेमुख्योजातोहिकेशवः॥वेद

मु॰पु॰
८

बाह्यंकृतंकर्महरिणातेनशापितः॥२९॥सर्वेदेवाश्चशीघ्रेणभवितारःपराजिताः॥मुनयोदुःखसं
युक्ताएवंशप्त्वागतोमुनिः॥३०॥तमनुप्रययुःसर्वेशैवाःपरमधार्मिकाः॥गौतमोगालवश्चै
ववामदेवोद्वितस्त्रितः॥३१॥मार्कंडेयोह्यगस्त्याद्याःक्रोधयुक्तामहर्षयः॥यज्ञोयंनावलो
क्योवैवेदबाह्यक्रियात्मकः॥३२॥विष्णुनान्येततःसर्वेसांत्विताःसंस्थिताःपदे॥देवतामुनयो
वर्णादृष्टुंयज्ञेप्रहर्षिताः॥३३॥भृग्वादिमुनिभिस्तत्रयज्ञारंभःकृतोभवत्॥यथाविधियथाभागं
देवास्तत्राश्रितामखे॥३४॥दक्षोहृष्टोभवेत्तत्रयजमानःसुमंदधीः॥वेदकल्पानुसारेणमुनयस्त
न्विरेमखं॥३५॥एतस्मिन्नंतरेतत्रकैलासेनारदोगतः॥शिवयासहशंभुंचप्रणतोभूत्सभाविकः॥
॥३६॥सतींप्रतिप्रहस्याहनारदःकलहप्रियः॥देविदक्षाध्वरेकस्माद्गमनंनत्कृतंत्वया॥३७॥हृष्ट
पुष्टजनाःसर्वेमहदुत्सवमोदिताः॥भगिन्यस्तत्रतेरेजुःपतिभिःसहमोदिताः॥३८॥पितृपतिगृ

रामः
८

गृहे स्त्रीणां मान्यामान्यं न विद्यते ॥ इत्युक्त्वा नारदस्तस्मात्प्रययौ कौतुकी मुनिः ॥ ३९ ॥ गते मुनौ सती
तत्र मनसि दुःखिता भृशं ॥ शंकरं प्रणिपत्याह हृदयेन विदूयता ॥ ४० ॥ नीलकंठ नमस्तुभ्यं शिवाय शं
कराय च ॥ सगुणाय मृडायैव निर्गुणाय नमो नमः ॥ ४१ ॥ गंतुमिच्छा त्वया सार्द्धं ममास्ति दक्षमंदिरे ॥
तत्र यज्ञोत्सवो नाथ प्रसीद प्रार्थये विभो ॥ ४२ ॥ भारतीमेव श्रुत्वा तां सतीं शंभुः सुबोधयन् ॥ स्मय
मानश्च होवाच किमिदं भाषसे प्रिये ॥ ४३ ॥ मद्द्वेषी जनको दक्षस्तव तेन निमंत्रितः ॥ नाहं तस्मा
न्न गंतव्यं विपरीतं भविष्यति ॥ ४४ ॥ भवती च महामाया मायिकोहं न संशयः ॥ सृजत्वं मुनिदेवा
दीनत्र यज्ञं करोम्यहं ॥ ४५ ॥ श्रुत्वा शंभुवचो रम्यं हृदयेन विदूयता ॥ उवाच दुःखिता देवी ममा
ज्ञां देहि शंकर ॥ ४६ ॥ किंचिदुवाच नो शंभुर्देवीं तत्र पितुर्गृहे ॥ न प्रयोजनमाज्ञाया विचार्य निर्ज
गाम सा ॥ ४७ ॥ एतज्ज्ञात्वा महाश्चर्यं विस्मितेन शिवेन च ॥ भावि यद्भविता तद्वै विमानं प्रेषितं वरं

मु॰पु॰
९

विमानेस्थापिताशक्तिराजगामविहायसा॥४७॥पितुर्गृहेमहाभागामानितासर्वबंधुभिः॥४८॥मात्रा
पित्राभगिनिभिर्मानिताहर्षितात्मभिः॥दक्षस्तत्रप्रमोदेनजगादतनयांप्रति॥५०॥आगतात्वंमहाभा
गेयज्ञोयंशोभितस्त्वया॥मृत्वापितृवचोरम्यंतंसाप्रोवाचदुःखिता॥५१॥सत्युवाच॥शोभयामिकथं
यज्ञंनाहुताकथमत्रभो॥अनाहूतागतागेहेत्वदीयेजनकप्रिये॥५२॥ततःसंकुपितोदक्षउवाचशृणु
पुत्रिके॥मदीयोबहुलोदोषस्तेनत्वांप्रददौभ्रमात्॥५३॥भूतपिशाचराजायपित्रामेवेधसाकृतं॥
वर्णाश्रमविहीनायवृधेश्वराशिवायच॥५३॥तस्यदोषेणत्वंदेविनाहुतायज्ञकर्मणि॥स्वागतंते
महाभागेतिष्ठस्वमत्समीपगा॥५५॥सूतउवाच॥पितुर्वचनमाकर्ण्यशिवनिंदायुतंमहत्॥क्रोध
संतप्तगात्रासापश्यतीयज्ञमंदिरं॥५६॥अरुद्रभागसंयुक्तंयज्ञंदृष्ट्वाचुकोपह॥उवाचकिंकृतंतातवे
दवाह्यक्रियात्मकं॥५७॥रुद्रभागविहीनोयंयज्ञोनैवफलप्रदः॥[illegible]निंदांकरोषित्वंह्यशिवोसिन

शिव

रामः
९

संशयः ॥५८॥ शिवेति द्व्यक्षरं ब्रह्म निर्गुणं गुणधारणं ॥ न जानासि यतस्त्वं भो तेनाहं दुःखिता भृशं ॥५९॥
तव देहात्समुद्भूतो मम देहस्त्वयं पितः ॥ न योग्यं शिवनिंदस्य कारणात्तत्त्यजाम्यहं ॥६०॥ इत्युक्त्वा हृदि
संध्याने नीत्वा तं शंकरं प्रभुं ॥ योगाग्निना समुज्वाल्य देहं धाम्नि गता भवत् ॥६१॥ पुनः स्वमायया देवी हि
माचलसुता भवत् ॥ शिवध्यानपरा साक्षात्तं लेभे सा पुनः पतिं ॥६२॥ तपः कृत्वा सुतीव्रं यत्तेन स्वा
त्मवशेन सा ॥ लेभे मुदं शिवेनापि पार्वती प्रेमविह्वला ॥६३॥ ॥ इति श्रीमदांत्ये मौद्गले महापुराणे
वक्रतुंडपार्वतीदेहत्यागो नाम तृतीयोध्यायः ॥३॥ ॥ सूत उवाच ॥ कैलासशिखरे रम्ये शिवचिंतापरो भ
वत् ॥ अनाहूतागता देवी किं भविष्यति द्विट्ग्रहे ॥१॥ वटमूले समासीनो नांदिकेशादिभिर्वृतः ॥ योगिभिः
सेवितस्तत्र कथां नानाप्रवर्त्तयत् ॥२॥ नानापशकुनं तत्र बभूवातिभयानकं ॥ क्षुभितास्तेन सर्वे तउत्पा
तशंकया भृशं ॥३॥ एतस्मिन्नंतरे तत्र जगाम नारदो मुनिः ॥ तं प्रणम्य स्थितो योगी शिवं कल्याणदं परं

॥४॥ कथावसरमासाद्य प्रोवाच कठिनं वचः ॥ त्रिभुवने सती धन्या न समा कामिनी तथा ॥५॥ सतीत्येव स्व
कं नाम कृतं तत्सार्थकं परं ॥ शिवनिंदां समाकर्ण्य तृणवज्ज्वालितं वपुः ॥६॥ नारदस्य वचः श्रुत्वा वज्र
सारमयोपमं ॥ उवाच तमृषिं शंभुः ॥ किं मृता देवि नारद ॥७॥ न किंचिदुक्तवांस्तत्र शंभुः क्रोधभयाकुलः
शोकाग्निर्मा दहेत्किं वा ततो देवोन्वबुध्यत ॥८॥ शोकसागरमग्नोभूत्किं मां त्यक्त्वा गता शिवे ॥ शक्तिही
नः कृतोहं किमशक्तः सर्वकर्मणि ॥९॥ निःश्वासपरमोप्यासीदर्द्धमंगं गतं महत् ॥ जीवितेन च किं कार्यं
देहं त्यागं करोम्यहं ॥१०॥ योगिभिः सांत्वितो देवो न किंचित्सुखवानभूत् ॥ शिवश्चिंतापरो भूत्वा वि
चारं कृतवान्हृदि ॥११॥ अहो विघ्नाकुलोहं वै कृतो विघ्नकरेण च ॥ गर्विता परमैश्वर्यात्कृतं गर्वस्य
खंडनं ॥१२॥ अतुला शक्तिरर्द्धांगे जगन्माता स्ति मे सदा ॥ अर्द्धनारीश्वरोहं च न वियोगो लभेत्क्वचित् ॥
॥१३॥ शक्तियुक्तस्तया नित्यं शक्तोहं प्रभुरीश्वरः ॥ अखंडैश्वर्यमोहेन विघ्नराजं च नास्मरत् ॥१४॥ इति

+ विघ्नकर्त्रेगणेशायविघ्नानांपतयेनमः ५

मत्वास्वयंशंभुर्मनसागणयंततः॥भक्त्यैकचेतसाचैवध्यात्वारूपमनुत्तमं॥१६॥चतुर्भुजंमहाकायं
गजवक्त्रंमहोदरं॥मुकुटेनविराजंतंकर्णकुंडलधारिणं॥१६॥रत्नमालाधरंपूर्णंनाभिशेषविभू
षितं॥लघुकिंकिणिकंपादंक्वणच्चरणनूपुरं॥१७॥सिद्धिबुद्धियुतंचिंतामणिहृदयशोभितं॥एक
चित्तेनसंध्यात्वासमाधिनास्वसाधियत्॥१८॥तुष्टावविविधैर्वाक्यैर्गणेशंब्रह्मरूपिणं॥निराका
रंस्मसाकारंविघ्नराजंहृदिस्थितं॥१९॥शिवउवाच॥नमस्तेविघ्नराजायनमस्तेविघ्नहारिणे॥स
गुणेनजगद्रूपायनानाभेदप्रधारिणे॥२०॥निर्गुणेनचवैसाक्षाद्ब्रह्मरूपधरायच॥नमोनमो
वंधहंत्रेभक्तानांपालकायते॥२१॥+लंबोदरायसर्वायवक्रतुंडस्वरूपिणे॥सगुणेनजगद्रूपा
यनानाभेदप्रधारिणे॥२२॥अभक्तेभ्यस्तमोदायनानाभयकरंमहत्॥हेरंबायनमस्तुभ्यंवे
दवेद्यायशश्वते॥२३॥अनंताननरूपायानंतबाह्वंघ्रिकायच॥अनंतकरकर्णायानंतोद

मु॰पु॰
२२

रधरायच॥२४॥नमोनमस्तेगणनायकायतेअनादिपूज्यायचसर्वरूपिणे॥अखंडलीला
करपूर्णमूर्त्तयेमहोत्कटायास्तुनमोमहात्मने॥२५॥आदौचनिर्मायविधिंरजोंगंतेनै
वसृष्टिंविदधासिदेव॥सत्वात्मकंविष्णुमथोहिमध्येनिर्मायपासित्वमखंडखेलिन्॥
॥२६॥अंतेतमोरूपिणमेवसृष्ट्वाशंभुंस्वशक्त्याहरसित्वमाद्य॥एवंविधंत्वांप्रवदंतिवेदा
स्तंवैगणेशंशरणंप्रपद्ये॥२७॥मायामयंवैगुणपंसुसृष्ट्वातस्मात्परस्त्वंगणराजचादौ॥स्वा
नंदनाम्निनगरेविभासिसिध्याचबुध्यासहितःपरेश॥२८॥तंवैगणेशंशरणंप्रपद्येस्थि
तंसदाहृत्सुचयोगिनांवै॥वेदैर्नविद्यंमनसानलभ्यंतंवक्रतुंडंहृदिचिंतयामि॥२९॥अर्द्ध
नारीश्वरोहंवैतद्गतंमेधुना[illegible]मभो॥शक्तिहीनत्वभावेननष्टवत्कर्मणाकृतः॥३०॥नानैश्व
र्ययुतादेवीसागतागणपप्रभो॥अनीश्वरपदंप्राप्तंममापिदेवदेवभो॥३१॥निर्गुणोहंसदा

रामः
२२

शंभुः सगुणः सर्वभाववित्॥ शक्त्यायुक्तो यदा स्वामिन्नधुना किं करोमि वै॥३१॥ शक्तिहीनः प
दा गंतुं न शक्नोमि गणेश्वर॥ अतस्त्वं कृपया देव शक्तं मां कुरु कर्मणि॥३२॥ ततः प्रादुरभूत्तस्य
पुरतः सगणाधिपः॥ उवाच शंकरं तत्र हर्षयन्श्लक्ष्णया गिरा॥३४॥ अहो पश्य च मां शंभो किं
शोचसि महेश्वर॥ भविता सि स शक्तिस्त्वं मद्वाक्यान्नात्र संशयः॥३५॥ अहमेवेश्वरो देवो ह्येको
ब्रह्मांडमंडले॥ तेन [illegible] गर्वेण युक्तत्वात्स विघ्नः सहसाकृतः॥३६॥ अधुना ते गतो मोहो मदी
या स्मृतिरागता॥ ध्यातः स्तुतश्च तेनाहं प्रसन्नोस्मि न संशयः॥३७॥ हिमाचलसुता देवी भवि
ष्यति न संशयः॥ त्वं सती त्वां वृणोसि वै पार्वती च पुनः शिव॥३८॥ रमसि संस्तया सार्द्धं मद्भक्ति
र्भावभावितः॥ ईश्वरः शिवशक्तस्त्वं मत्प्रसादात्सदा भव॥३९॥ स्मृतमात्रस्तवाग्रे हं प्रत्यक्षः स्या
सदाशिव॥ इति दत्वा वरं देवस्तत्रैवांतरधीयत॥४०॥ ततश्च शंकरः क्षुब्धः शक्तो जातः स्वकर्मे

मु॰पु॰
१२

णि॥जटामास्फालयामासगणेशंमनसास्मरन्॥४२॥तस्माज्जातोमहाबाहुर्वीरभद्रस्त्रिमस्तकः॥
त्रिपदःशूलवान्साक्षान्मृत्युरूपोमहाद्युतिः॥४३॥शंकरंप्रणनामाथप्रांजलिःसन्पुरस्थितः॥
आज्ञांकुरुमहादेवदासोहंतेवशेस्थितः॥४४॥वचनंतस्यसंश्रुत्वाप्रहृष्टःशंकरोब्रवीत्॥सयज्ञ
स्यचदक्षस्यहरणंकुरुसांप्रतं॥४४॥तदाज्ञांशिरसावंद्यआदृहासमथाकरोत्॥तेनत्रिभुवनं
सर्वंकंपितंभयविह्वलं॥४५॥ततोनिर्गम्यवेगेनशरीरान्निर्ममेमहान्॥नानारुद्रानपारां
श्चतैर्वृतःसंगतोमखं॥४६॥तमन्वयुर्गणाःशंभोर्नंदिकेशादयोपरे॥क्षुभिताःक्रोधसंयु
क्ताब्रह्मांडाशनसन्निभाः॥४७॥दुर्निमित्तानिसर्वाणिदक्षगेहेभवंस्तदा॥शंकितामुनयो
देवाःकिंभविष्यंतिविह्वलाः॥४८॥एतस्मिन्नंतरेतत्रदक्षयज्ञेमहाबलः॥आजगामावृतो
रुद्रैर्वीरभद्रोभयानकः॥४९॥नंदीभृंगरिटीभृंगीपुष्पदंतमुखास्तथा॥आगताःक्रोधदीप्ता

रामः
१२

स्तेभक्षयंतोयथांतकाः॥५०॥सहसावेगतःसर्वेमारयंतइतस्ततः॥अपलंदशदिक्प्रांतेदक्ष
स्यानुचरास्तदा॥५१॥यज्ञमंडपमासाद्यबभंजुस्तत्क्षणेनच॥देवान्सर्वान्मुनींश्चैवपीडांचक्रुः
सुदारुणाः॥५२॥ऋषिपत्नीर्दधुस्तत्रदेवपत्नीःसहस्रशः॥अताडयन्महावीर्याहाहाका
रवाकुलाः॥५३॥असाधुपतयोमूढाभवतीभिर्वृताःखलाः॥शिवद्वेषकरादुष्टास्तेषांप्राप्तं
फलंमहत्॥५४॥हुतद्रव्याणिसर्वाणिबभक्षुस्तेप्रहर्षिताः॥वेदिकायांप्रचक्रुस्तेमेहनंमू
त्रणंतथा॥५५॥जगामभगवांस्तत्रशंकरःक्रोधसंयुतः॥धनुर्बाणधरःसाक्षात्प्रलयाग्नि
रिवोत्थितः॥५६॥तत्रयुद्धमभूद्घोरंदेवानांरुद्रचारिणां॥स्वयंप्रयुयुधेशंभुःशस्त्रास्त्रैर्म
र्मभेदिभिः॥५७॥पुष्णोदंतांश्चनाराचैर्भेदयामासशंकरः॥भगस्यनेत्रमुन्मूल्यपाटयामा
ससंयुगे॥५८॥धर्मंधृत्वामहावीरोनंदिकेशोजवीत्तदा॥कोधर्मोवदरेदुष्टशिवहीनोमखः

खलु॥५९॥कश्यपंधृतवांस्तत्रभृंगीतेजस्विनांवरः॥वरुणंताडयामासपुष्पदंतश्चवीर्यवान्॥
॥६०॥भैरवेणधृतस्तत्रदेवेंद्रोमूर्छितःकृतः॥वीरभद्रोबलाद्दक्षंपातयामासभूतले॥६१॥एवंप्रमथि
तेयज्ञेशंखचक्रगदाधरः॥युयुधेविष्णुरव्यग्रोमहाबलसमन्वितः॥६२॥शस्त्रास्त्रैर्बहुभिस्तेनम
र्दितावलवत्तरं॥रुद्राभूतपिशाचाद्याहाहाकारंप्रचक्रिरे॥६३॥तंदृष्ट्वासहसाशंभुर्गणेशंहृदिचिंत्य
च॥बाणेनहृदिसंविध्यपातयामासभूतले॥६४॥पुनःसंज्ञांसमासाद्यस्वास्त्रंनारायणात्मकं॥
मोचयामासगोविंदोजगत्संहारकारकं॥६५॥ततःशंभुर्मुमोचापिस्वास्त्रंपाशुपतंमहत्॥तेउ
भेव्योम्निचात्यंतंयुयुधातेपरस्परं॥६६॥तस्माज्जातोमहानग्निर्ददाहपृथिवीमिमां॥त्रिभुव
नंभयक्रांतंजातंतत्रमृतोपमं॥६७॥एतस्मिन्समयेतत्रवीरभद्रेणकल्पितं॥पशुरूपंशिर
श्छित्वादक्षस्याग्नौहुतंततः॥६८॥रुद्रैर्नानाविधैःकोलाहलस्तत्रप्रवर्तितः॥छिन्नभिन्नांसुरा

जातास्त्रातारं लेभिरे नते ॥ ६९ ॥ मुनयोपि भयोद्विग्ना व्यद्रवंस्तु दिशो दश ॥ पिशाचादिभिरा
कृष्टाश्चुक्रुशुरतिदारुणं ॥ ७० ॥ विष्णुना तत्र चक्रं वै भ्रामितं क्रोधधारिणा ॥ कृतांतसदृशं सक्तं
शंभोः सामिष्यतद्गतं ॥ ७१ ॥ चक्रं तच्छंकरं दृष्ट्वा तं नत्वा तत्र संस्थितं ॥ तेन क्रोधपरीतांगः शिवः शूलं
समादधे ॥ ७२ ॥ शूलमुद्यम्य तं विष्णुं हंतुं यावत्प्रवर्त्तते ॥ तत्राकाशोद्भवा वाणी वारयामास शंकरं
॥ ७३ ॥ न हंतव्यो हरिः शंभो त्वया पाल्योयमच्युत ॥ जहि कोपं महादेव शिवाय सततं नमः ॥ ७४ ॥
जगाम सहसा तत्र स्वयंभूस्तं न्यषेधयत् ॥ मा कुरुष्व वधं शंभो विष्णोः संहारकारक ॥ ७५ ॥ न
मः शिवाय शांताय मृडाय शंभवे नमः ॥ महादेवाय रुद्राय पशूनां पतये नमः ॥ ७६ ॥ संहार
स्वरूपी साक्षादकाले किं प्रवर्त्तसे ॥ जहि कोपं महाबाहो नमस्ते परमेश्वर ॥ ७७ ॥ ब्रह्मणा संस्तु
तो देव प्रशांतोभून्महामुने ॥ तस्मिन्काले स्वयं विष्णुर्ब्रह्मणा ज्ञापितः प्रभुः ॥ ७८ ॥ शिवाय नमनं कृ

त्वास्थितः संलज्जितो भृशं॥ प्रोवाच मधुरं ब्रह्मा शंकरं वृषभध्वजं॥७९॥ शांत उर्वरितं यज्ञे हुतद्रव्यं
च यत्प्रभो॥ रुद्रभागः स विज्ञेयो गृहाण त्वं सदाशिव॥८०॥ विघ्नेशमायया भ्रांता दक्षाद्याः स
ततं शिव॥ मोहितानां विशेषेण द्रष्टव्यं न प्रचेष्टितं॥८१॥ अतस्त्वं कृपया देव प्रसन्नो भव शंकर
॥ सर्वेभ्यः सुखदाता वै यज्ञं तं पुनरारभत्॥८२॥ देवानां च मुनीनां च स्त्रीणां दासादिभाविनां॥ य
था पूर्वं स्थितं रूपं तादृशं कुरु शंकर॥८३॥ भगः सनेत्रसंयुक्तः पूषा वै पिष्टभुक्कृतः॥ देवाश्च मु
नयः सर्वे स्त्रियो दासादयस्तथा॥८४॥ यथा पूर्वं कृतास्तेन रूपेण तेजसा परं॥ गतदुःखाश्च
सर्वे ते ववंदुः शंकरं पुनः॥८५॥ दक्षस्य मस्तकं तत्र दग्धं वै जातवेदसि॥ न ज्ञात्वा शंकरो देवो भृंगि
नं प्रत्युवाच ह॥८६॥ आनय गच्छ तं हत्वा य आदौ दृश्यते त्वया॥ तस्य मस्तकयोगेन दक्षस्य मस्तकं
भवेत्॥८७॥ तदा तेन पुरो दृष्टोत्यजः परमशोभितः॥ तं हत्वा तच्छिरस्तत्र समानीतं च शृंगिणा॥

॥१८॥ तदेव योजयित्वा तं समजीवतु शंकरः ॥ स सद्य उत्थितस्तत्र दक्षो जमुखतां गतः ॥१९॥ ब्रह्म
णा प्रेरितो दक्षस्तुष्टाव शंकरं पुनः ॥ गतमानो महाबाहुर्भक्त्या सर्वेश्वरं ततः ॥२०॥ दक्ष उवाच ॥
नमामि शंकरं साक्षाद्यदाधारमयं जगत् ॥ कालरूपं यथा कालं बोधयामास तं शिवं ॥२१॥ का
लेन फलमूलानि जायंते नादिकानि च ॥ शीतोष्णसमभावश्च कालेन जायते सदा ॥२२॥ सूर्य
स्तपति कालेन ज्योतिषां गण एव च ॥ कालेन जायते वृष्टिरनावृष्टिस्तथा विभो ॥२३॥ कालेन
सृज्यते सृष्टिर्ब्रह्मणा वै पुनः पुनः ॥ कालेन पालनं तत्र करोति विष्णुरव्ययः ॥२४॥ कालेन स्ते
च्छया शंभुः संहारं प्रकरोति च ॥ यत्किंचिदिह तत्सर्वं कालाधीनं न संशयः ॥२५॥ स एव भगवा
न्काल ईश्वरो ब्रह्मसंज्ञितः ॥ शिवः साक्षाच्च वेदेषु कथ्यते वेदवादिभिः ॥२६॥ क्षमस्व मे पराधं
त्वं त्वन्मायागर्वितस्य च ॥ यत्कृतं तद्दयासिंधो नमस्ते परमेश्वर ॥२७॥ सगुणाय नमस्तुभ्यं निर्गु

णायनमोनमः॥सृष्टिकर्त्रेचसंहर्त्रेपात्रेनानास्वरूपिणे॥९८॥अनंतगुणराशिस्त्वंवर्णनीयंकिमप्य
हो॥नांतंब्रह्मादयोजग्मुर्मादृशानांचकाकथा॥९९॥नमोनमोब्रह्ममयायदेवादयेशिवायाथच
पूर्णमूर्त्ते॥अनादिमध्यांतविहीनभूम्नेनमोनमोभक्तभयापहंत्रे॥१००॥इत्येवंस्तुवतस्तत्रप्रेमगद्ग
दयागिरा॥अजवत्तस्यसंजातंभाषणंलललल्ललं॥१॥तेनहृष्टोमहादेवस्तंपुनर्नरमस्तकं॥भग
वान्कारयामासयथापूर्वंमुनीश्वराः॥२॥प्रोवाचमधुरंवाचंशिवस्तंसर्वसंन्निधौ॥प्रजापतिपतिर्द
क्षंसर्वमान्योभविष्यसि॥३॥त्वयायस्तोत्रितंस्तोत्रंमदीयंमत्प्रियंभवेत्॥यस्तोष्यतिप्रदास्यामित
स्मैकामाननेनमां॥४॥इहभुक्त्वाखिलान्भोगानंतेमल्लोकतांलभेत्॥ममप्रीतिकरश्चासौभविष्य
तिनसंशयः॥५॥त्वयायदजवद्वाक्यंकृतंमेंतेप्रसन्निधौ॥तद्वद्योमत्समीपेवैकरिष्यतिनरःसकृ
त्॥६॥तेनहृष्टोभविष्यामिवांछितंपुरयामिच॥एवंदत्वावरंशंभुस्तत्रैवांतरधीयत॥७॥सर्वेस्वस्व
स्थलंजग्मुर्हर्षिताधर्षितास्तथा॥दक्षश्चस्वगृहेविप्रदुःखितस्थितवान्स्वयं॥८॥तदादिशिवभक्ता

येतेकुर्वंतिशिवालये॥अजवद्भाषणंतेनहृष्टोभवतिशंकरः॥९॥इतिसर्वंसमाख्यातंदक्षशापादिकं
चयत्॥यज्ञभंगस्यमाहात्म्यंकिंश्रोतुमिच्छथद्विजाः॥१०॥इतिश्रीमदांत्ये॰ मौ॰ प्रथ॰ वक्रतुं॰ दक्षच
रित्रंनामचतुर्थोध्यायः॥४॥शौनकउवाच॥श्रुतंदक्षस्यचारित्रंयज्ञध्वंसादिकंमहत्॥मुद्गलस्यच
दक्षस्यसंवादंकथयस्वभो॥१॥सूतउवाच॥शृणुशौनकसंवादंमुद्गलंदक्षसंभवं॥ब्रह्मभूतकरंपू
र्णंभावेनसंधृतंहृदि॥२॥दक्षप्रश्नंपरंश्रुत्वामुद्गलोगणपप्रियः॥तंप्रत्युवाचभावेनमहर्षेर्योगिनां
वरः॥३॥मुद्गलउवाच॥सर्वेषांगणपोमातापिताचैवनसंशयः॥तेनसर्वादिपूज्योयंसर्वपूज्यः
सदेवराट्॥४॥ज्येष्ठराजमितिवाक्यंवेदेनप्रतिपादितं॥ज्येष्ठाभावाच्चतस्यापिज्ञातव्यंसर्वसंम
तं॥५॥तस्यसर्वेकलांशावैकलांशांशाश्चकेचन॥नकलातस्यसंपूर्णाजगतिकुत्रदृश्यते॥६॥तेन
विनायकोनामाजातोसौभगवान्खलु॥विशेषेणचसर्वेषांनायकोयंगणाधिपः॥७॥विगतोनाय

मु॰पु॰
२६

कोयस्यस्वेच्छाचारीविनायकः॥स्वानंदलोकवासीसस्वसुखेनप्रभावतः॥८॥ब्रह्मविष्णुशिवाद्यैश्चदेवै
र्योगिभिरेवच॥सर्वैःसंपूजितोदेवोधर्मकामार्थमुक्तये॥९॥अहंब्रह्मेतिमाहात्म्याद्गर्वोभवतिशा
श्वतः॥शिवादीनांमदाधारादिदंसर्वंप्रवर्त्तते॥१०॥तदामदहरोयंवैतेषांज्ञानार्थसिद्धये॥विघ्नक
र्त्तामहाराजःस्वयंभवतिविघ्नपः॥११॥पदभ्रष्टाःकृतास्तेनसर्वेदेवादयःप्रभो॥कस्याधारमिदंस
र्वंविचिन्वंतिसमाधिना॥१२॥तेनपश्यंतियोगेनचित्तस्यपंचवृत्तयः॥तासांप्रकाशकोयंवैचिंताम
णिर्निगद्यते॥१३॥वेदैःसंपादितेज्ञात्वाशरणंतंव्रजंतिते॥ततोविघ्नहरोजातस्तेषांसर्वार्थदः
स्मृतः॥१४॥सर्वसत्तात्मकोयंवैविघ्नराजःप्रकीर्त्तितः॥अतएवगणेशाद्धिपरंकिंचिन्नविद्यते॥
सविघ्नस्त्वंप्रजातोसितमेवशरणंव्रज॥चिंतामणिंविघ्नहरंगणेशंचविनायकं॥१६॥सूतउवा
च॥प्रजापतिरितिश्रुत्वादक्षोहृष्टमनाःपुनः॥पप्रच्छविनयेनैवकथांपापप्रणाशिनीं॥१७॥

रामः
२६

॥दक्षउवाच॥कोयंस्वानंदवासीवैकथंज्ञेयोभवन्मया॥तत्रमार्गंवदविभोभजामितेनतंसदा॥
॥१८॥मुद्गलउवाच॥अत्रतेकथइष्यामीतिहासंयत्पुरातनं॥शिवपार्वतीसंवादंयथाजातंशृणु
ष्वतत्॥१९॥कैलासेगिरिवर्येतुसुखासीनंमहेश्वरं॥पार्वतीप्रणताभूत्वापृच्छत्पतिमुदाहृता॥
॥२०॥पार्वत्युवाच॥शिवत्वंसर्वदेवानांनागानांरक्षसांतथा॥मानवानांचसर्वेषांपूज्यःस्वामी
नसंशयः॥२१॥तेभ्यःपदप्रदातात्वंसर्वाधीशःपुरातनः॥मायाविकारहीनश्चशिवस्तेनप्रकी
र्तितः॥२२॥त्वंकिंसमाधिनादेवध्यायसिमांवदप्रभो॥त्वत्तःपरतरंकिंचिन्नदृष्टंनैवसंश्रुतं॥
॥२३॥इतिपृष्टोमहादेवस्तांप्रत्युवाचसादरं॥सारंवेदादिमान्यंचब्रह्मभूतकरंपरं॥२४॥महादे
वउवाच॥शृणुप्रियेप्रवक्ष्यामियंध्यायामिदिवानिशं॥गणेशंहृदिसंस्थंचस्वानंदवासिनंप
रं॥२५॥साकारंचनिराकारंतस्मिन्देविनविद्यते॥मनोवाणीविहीनंनमनोवाणीमयंनवै॥२६॥

मु॰पु॰
२७

शिवस्यवचनंश्रुत्वापार्वतीप्रेमसंयुता॥उवाचमधुरंवाक्यंवाक्यज्ञाभावपूर्वकं॥२७॥पार्वत्युवाच॥
कोसौगणेशनामाचैकथंसहृदितिष्ठति॥स्वानंदवसतिकाचयत्रतिष्ठतिसप्रभुः॥२८॥साकारोन
निराकारःकथंसज्ञायतेजनैः॥मनोवाणीमयोनैवहीनस्ताभ्यांनचक्वचित्॥२९॥तस्यध्यानंम
हेशानकर्तुंनैवप्रशस्यते॥ध्यायसिकेनमार्गेणभवान्मेकथयप्रभो॥३०॥अहंदासीत्वदीयावैशि
ष्यभावेनसंस्थिता॥कथयस्वमहादेवध्यानंगणेशकंमहत्॥३१॥तमहंसाधयिष्यामिसाक्षा
त्कारेणसन्यथा॥कृतकृत्याभविष्यामिप्रसादात्तेनसंशयः॥३२॥मुद्गलउवाच॥इतिपृष्टोम
हादेवोदेव्याभक्त्यादरेणच॥पात्रंगणेशमार्गस्यदृष्ट्वाप्रेमयुतोब्रवीत्॥३३॥ततेहंशृणुवक्ष्या
मिगुह्याद्गुह्यतमंमहत्॥रहस्यंवेदशास्त्राणांयस्मात्परतरंनच॥३४॥दक्षउवाच॥तववाक्या
मृतेनाहंप्रीतोमुद्गलसांप्रतं॥महेशशक्तिसंवादंयोगींद्रकथयस्वमे॥३५॥सूतउवाच॥द

रामः
२७

क्षस्यभावयुक्तंतद्वचनंमुद्गलेनवै॥श्रुतंतेनसुसंतुष्टोवक्तुंतमुपचक्रमे॥३६॥मुद्गलउवाच॥
शंभुःस्मृत्वागणेशंचहृदिध्यात्वामहायशाः॥प्रत्युवाचमहादेवींगाणपत्यःप्रतापवान्॥
॥३७॥शिवउवाच॥सर्वंमायामयंवेद्धिज्ञायतेयच्चचेतसा॥चित्तप्रवेशहीनंतन्मायातीतं
निगद्यते॥३८॥रचितंद्विविधंयेनसएवगणनायकः॥स्वसंवेद्यंमहःप्रोक्तंवेदेषुतद्विशेष
तः॥३९॥तत्रैवदृश्यतेदेवोयोगिभिर्योगपारगैः॥तेनस्वानंदवासीसकथ्यतेवेदवादिभिः॥
॥४०॥चित्तस्यपंचभूमीनांप्रकाशकारकःस्मृतः॥चिंतामणिरितिख्यातोहृदिसंतिष्ठतिप्रभुः॥
॥४१॥समूहेगणधातुश्चतेषांस्वामीगणेश्वरः॥अभेदयोगमार्गेणधातुंसशक्यतेसदा॥४२॥
श्रुत्वाशिववचोरम्यंपार्वतीविनयान्विता॥चकिताप्रत्युवाचेदंवचनंहितकारकं॥४३॥पार्वत्युवा
॥भगवन्कथितंकूटंवचनंयोगभावितं॥नबुद्धंतन्मयास्वामिंस्तस्माच्चसुलभंवद॥४४॥ब्रह्ममाया

मु॰पु॰
१८

मयंप्रोक्तंकीदृशंकथयप्रभो॥मायाहीनंकथंज्ञेयंविस्तरेणवदस्वमे॥४५॥मुद्गलउवाच॥शक्तिप्रश्नं
चसंश्रुत्वाहृष्टःशंभुःसुयोगवित्॥साश्रुनेत्रःसरोमांचोभक्त्याजातोमहायशाः॥४६॥आदिमायां
प्रशंसन्सवक्तुंतामुपचक्रमे॥योगमार्गस्यसिध्यर्थंविस्तरेणवदाम्यहं॥४७॥ ॥इतिश्रीमदां
त्यमौ॰प्रथमखं॰वक्रतुं॰पार्वतीप्रश्नविचारोनामपंचमोध्यायः॥५॥ ॥शौनकउवाच॥शिवपा
र्वतीसंवादंकथयस्वमहामते॥पाराशर्यस्यसर्वज्ञःशिष्यःसर्वार्थतत्ववित्॥१॥सूतउवाच॥मु
द्गलेनयथाप्रोक्तंदक्षायशांतिकारकं॥शिवयोस्तेनमार्गेणसंवादंकथयामिभो॥२॥शिवउवाच॥
धन्यादेविमहाभागेत्वत्समानानविद्यते॥महापुण्येनतेबुद्धिर्गणेशज्ञानलालसा॥३॥तारितो
हंत्वयाशक्तेसस्त्रियानात्रसंशयः॥ममैवेदंमहाभाग्यंगाणपत्याप्रियाग्रहे॥४॥गणेशायनमस्कृ
त्वाकथयामिकथानकं॥आदौमायामयंविद्धिमायातीतंततःपरं॥५॥स्वस्वरूपमयंसर्वंज्ञातव्यंयो

रामः
१८

गिभिः सदा ॥ द्विविधं योगमार्गेण साधनेन विशेषतः ॥ ६ ॥ आदौ ब्रह्मस्थितं देवि एकानेकादिवर्जितं ॥ स्वतः
परतउत्थानात्तदेव द्विविधं बभौ ॥ ७ ॥ स्वतउत्थानकेनैव विकल्पः स्वदृशः कृतः ॥ अहमस्मीति भावेन विं
बं भिन्नं विनिःसृतं ॥ ८ ॥ सकलाभेदरूपं तन्निराकारं स्वभावतः ॥ अहमस्मि सदा प्रोक्तं ब्रह्मरूपं च शा
श्वतं ॥ ९ ॥ तेनापि स्वस्वरूपं तद्दृष्टमात्मात्मकं परं ॥ कीदृशोहं विकल्पश्च कृतो मोहेन तत्क्षणात् ॥
॥ १० ॥ चतुश्चतुःपदार्था ये योगरूपेण संस्थिताः ॥ तेषामभेदरूपं च दृष्टं सर्वात्मकं परं ॥ ११ ॥ मा
यया विविरूपोयं जातः सद्यैव नामतः ॥ मायाबिंबं द्वितीयं तत्तत्र मोहप्रधारणात् ॥ १२ ॥ मोहधारण
मात्रेण विस्मृतं स्वस्वरूपकं ॥ मायासुखे श्रुता जाता तस्य देवस्य तत्क्षणात् ॥ १३ ॥ सर्वाकारा नि
राकारा माया जाता द्विधा परा ॥ बुद्धिरूपा महाभागा तया सर्वं प्रबुध्यते ॥ १४ ॥ निराकारं च साकारं
बुध्या संबुध्यते जनैः ॥ बुध्या यत्बुध्यते देवि तं देव बुद्धिरूपकं ॥ १५ ॥ तत्र साकारमोहश्च निराका

मु॰पु॰
१२

रः स्वयं प्रभुः ॥ मोहहीन इति भ्रांतिर्द्विविधा सुसमुत्थिता ॥ १६ ॥ सा सिद्धिर्मोहकर्त्री वै नानाभ्रांति
प्रकाशिका ॥ एका बुद्धिश्च सर्वत्र तया द्वैधं प्रवर्त्तते ॥ १७ ॥ सिद्ध्या संमोहिता बुद्धिर्भ्रांता जाता च
पार्वति ॥ साकारमोहसंयुक्ता निराकारविमोहिता ॥ १८ ॥ मोहधारकबुद्धिश्च सिद्धिर्मोहप्रदायि
नी ॥ तयोः प्रकाशदाता वै गणेशश्चाभवत्स्वयं ॥ १९ ॥ स एव नागतस्तत्र न गतो निजरूपधृक्
॥ बिंबबिंबी प्रभावत्वाद्भासते तादृशो वृथा ॥ २० ॥ सर्वात्मकं च बिंबं यत्तत्रैव बिंबितं परं ॥ आत्मरू
पं निराकारं तयोः संयोगतां गतः ॥ २१ ॥ स एव गणराजोयं मायाखेलकरः प्रभुः ॥ तस्येच्छया
तद्द्विविधं चलति सूत्रधारवत् ॥ २२ ॥ त्रिविधमेकभावेन जातं मोहेन पार्वति ॥ विकल्पः प्रकृतस्तेन
एकोहं बहुस्यामिति ॥ २३ ॥ विकल्पेन द्विधाभूतं देहदेहीस्वरूपकं ॥ सोहं ब्रह्मेति यत्प्रोक्तं वेदे
षु वेदवादिभिः ॥ २४ ॥ न देवदेहिरूपं च देहमोहप्रधारणात् ॥ देहरूपं तथा तत्र बिंदुमात्रं प्रकीर्त्ति

रामः
१२

तं॥२५॥चतुर्विधंप्रदेहानांब्रह्मरूपंपुराजनं॥बहुरूपंचतद्विद्धिकैवल्यदेहसंज्ञितं॥२६॥सोहंब्र
ह्मैकरूपंयद्बहुरूपंचविंदुयत्॥स्वस्वकार्येषुनोशक्तंसत्ताहीनतयाशिवे॥२७॥ताभ्यांतपःकृतं
घोरंस्वस्वरूपस्यसुंदरी॥दिव्यवर्षसहस्रांतेप्रसन्नोभूद्गजाननः॥२८॥प्रत्यक्षतांययौतत्रशुंडा
दंडविराजितः॥लंबोदरोमहाकर्णश्चतुर्बाहुस्त्रिनेत्रभृत्॥२९॥तस्यदर्शनमात्रेणस्फूर्तिर्जा
तातयोस्तदा॥तयातंतौसमारब्धौस्तोतुंस्तोत्रंप्रचक्रतुः॥३०॥प्रकृतिपुरुषावुचतुः॥नमस्तेग
णनाथायस्वसंवेद्यमयायते॥निराकारस्वरूपावैशुंडायस्यविराजति॥३१॥यस्यदेहश्चसाका
रःकंठाधःपरिकथ्यते॥अभेदएतयोर्जातस्तेनत्वंवैगजाननः॥३२॥चतुर्विधंनिजानंदाद्वैदेषुक
थितंभवेत्॥अव्यक्तमेकरूपंचद्वितीयंसमरूपकं॥३३॥तृतीयंसत्स्वरूपंचचतुर्थंयत्सदाह्यस
न्॥चतुर्हस्तंस्वरूपंतेतेनभवांश्चतुर्भुजः॥३४॥त्वदुदरेस्थितंसर्वंतेनलंबोदरः॥मायामायिकरू

श्रुतः १

मु॰पु॰
२०

पंयद्दोपादौद्विविधंचते॥३५॥एतेसर्वेगणाढुंढेत्वदीयानात्रसंशयः॥गणनाथोसितेनत्वंनाम्नाख्या
तश्चसर्वदा॥३६॥एतादृशोनिजात्मासावावयोर्ध्यानआवभौ॥स्वसंवेद्यतयाध्यातोभक्तानुग्रहका
रकः॥३७॥भक्ताभिमानभावेनदेहधारीस्वयंह्यभूत्॥एतैश्चलक्षणैर्युक्तोगणेशोनामधारकः॥३८॥
भक्ताभिमानभावेनदेहधारीस्वयंह्यभूत्॥धन्यंसर्वकृतंस्वामिन्येनत्वंदेहवानभूत्॥स्वानंदवास
भृत्साक्षाद्धृदिनित्यंस्थिरोभव॥३९॥नमस्तेगणराजायनमस्ते[illegible]हारिणे॥भक्तानांवैह्यभक्ता
नांविघ्नकर्त्तेनमोस्तुते॥४०॥कर्मणांफलदात्रेचज्ञानानांसिद्धिदायिने॥अमेयशक्तयेतुभ्यंस
र्वाधारायतेनमः॥४१॥किंकर्त्तव्यंदयासिंधोतदेवाज्ञापयप्रभो॥तवभक्तिंमहत्तीव्रांदेह्या
यांगणनायक॥४२॥एवंस्तुतिंसमाकर्ण्यपरितुष्टोगणाधिपः॥मेघगंभीरयावाचाहर्षयन्न
ब्रवीत्तदा॥४३॥गणेशउवाच॥साधुसाधुमहाभागौयदुक्तंस्तोत्रमुत्तमं॥ममप्रीतिकरंसर्वका

विघ्न ५

रामः
२०

मदंप्रभविष्यति॥४४॥धर्मार्थकाममोक्षाणांदायकंपुष्टिवर्द्धनं॥काराग्रहस्थितानांचमोच
नंलक्षपाठतः॥४५॥मारणोच्चाटनादीनांनाशकंतत्तथैवच॥एकविंशतिवारंयएकविंश
दिनावधिः॥४६॥पठेतयदियोभक्त्यासईप्सितफलंलभेत्॥ब्रह्मीभूतकरंचैवनिष्कामपठ
नाद्भवेत्॥४७॥भवतोस्तपसातुष्टस्तोत्रेणभक्तिभावतः॥प्रीतोदास्यामिसंपूर्णंभवद्भ्यामीप्सि
तंचयत्॥४८॥बिंदुमात्रस्वरूपेणयत्स्थितंब्रह्मशाश्वतं॥तस्माच्चतुर्विधंविश्वंप्रकटंसंभविष्य
ति॥४९॥प्रकर्षेणचसर्वेषांकृतिस्तस्माद्विनिःसृता॥प्रकृतिस्तेनतेनामभविष्यतिजनेष्विदं
॥५०॥सृष्ट्वाचतुर्विधंविश्वंबंधहीनाभविष्यसि॥मदीयांभक्तिमत्यंतांप्रकृतेप्राप्स्यसिध्रुवं॥
॥५१॥जनास्त्वदीयभक्तिंयेकरिष्यतिसकामतः॥निष्कामतश्चतेभ्यस्त्वंसर्वंदास्यामिशोभने॥
॥५२॥चतुर्विधेष्वयंशेतेपुरेतेपुरुषःपरः॥सोहंमात्रात्मकोभावीनाम्नासर्वत्रतिष्ठतु॥५३॥स

मदीयाभक्तिरत्यंताभविष्यतिमहामते॥तयाबंधनहीनस्त्वंमान्यस्तथाभविष्यसि॥५३॥

मु॰पु॰ २१

वोकारविहीनोयंतत्रभ्रांतोभविष्यति॥ वैवर्वितभावेनप्रकृतौमोहितःसदा॥५४॥स्वयंमोहविही
नःससोहंमात्रात्मकःसदा॥मत्प्रसादाद्भवेन्नित्यंब्रह्मदेहिसुखात्मकं॥५५॥तवभक्तिंकरिष्यंतिजे
नाभावेनसंयुताः॥तेभ्यस्तदीप्सितंसर्वंदास्यसित्वंनसंशयः॥५६॥ब्रह्मभूतपदंचैवदास्यसियोगसे
वया॥साक्षात्पुरुषरूपस्त्वंसर्वसत्तात्मकोभव॥५७॥प्रकृतौवीर्यमाधत्स्वसर्वसत्तात्मकंविभो॥ते
नेयंसर्वसूरविश्वंसृजष्यसिनसंशयः॥५८॥सृष्ट्वाचतुर्विधंसर्वंपालनंहरणंतथा॥कर्त्तव्यंकाल
योगेनकरणीयमिदंस्मृतं॥६०॥सर्वेषांप्रकृतिर्माता पितापुरुषउच्यते॥नानारूपाणिनामा
निकल्पइष्यंतिवैजनाः॥६१॥इत्युक्त्वागणराजस्तुतत्रैवांतरधीयत॥प्रकृतिःपुरुषश्चैवयथा
ज्ञप्तौप्रचक्रतुः॥६२॥ ॥इतिश्रीमदांत्येमोद्गलेमहा॰प्रथमखं॰वक्रतुंड॰प्रकृतिपुरुषव
रदोनामषष्ठोध्यायः॥६॥ ॥पार्वत्युवाच॥श्रुत्वावैत्वन्मुखांभोजाद्धर्षश्चेतसिजायते॥पुनर्वद

रामः २१

स्वमे स्वामिन्गणराजकथामृतं ॥ कथानां प्ररहस्यं यत्तदेवैतन्न संशयः ॥ पुनाति प्राश्निकं श्रोतॄन्व
क्तारं भक्तितः श्रुतं ॥ २ ॥ प्रकृतिः पुरुषश्चोभौ कथं सृष्टिं प्रचक्रतुः ॥ अंतर्हिते निजानंदे गणेशे
स्वेच्छया विभो ॥ ३ ॥ मुद्गल उवाच ॥ पार्वती वचनं श्रुत्वा प्रहृष्टः शंकरोब्रवीत् ॥ कथां रसयुतां
रम्यां पावनानां सुपाविनीं ॥ ४ ॥ शंकर उवाच ॥ शृणु देवि प्रवक्ष्यामि गणनाथ कथां शुभां ॥
धन्यासि सादराजाता सप्रेमा विघ्ननाशिनी ॥ ५ ॥ अंतर्हिते गणेशे च प्रकृतिः पुरुषस्तथा ॥ सा
मर्थ्येन युतौ जातौ परस्परमनोनुगौ ॥ ६ ॥ तपसा वरदानेन मोहयामास तत्क्षणात् ॥ पुरुषं
प्रकृतिः सा वै नानाभावार्थदर्शिनी ॥ ७ ॥ नानाविभवयुक्तां तां दृष्ट्वा पुरुषसत्तमः ॥ मोहितः पू
र्णभावेन तदधीनोभवत्सदा ॥ ८ ॥ कटाक्षी ता महामाया पुरुषेण महात्मना ॥ हावभावयुता
तत्र संस्थिता भक्तिभाविता ॥ ९ ॥ तस्यां सत्तात्मकं वीर्यं पुरुषेण प्रकाशकं ॥ निक्षिप्तं सहसा देवि

मु॰पु॰
२२

तेनसागर्भवत्यभूत्॥ ॥सगर्भोववृधेतत्रतेजसाखेनसंवृतः॥महताकालयोगेनपूर्णोजातःप्र
तापवान्॥ ॥समयेसुषुवेजातंपुत्रंतेजोमयंपरं॥तस्यनामाभवेल्लोकेमहानित्यभिविश्रु
तं॥ ॥अंतरियस्थितंदेविसर्वांतर्यामिनंपरं॥लोकेषुचमहत्तत्वंज्ञातव्यंतत्समाधिना॥ ॥
सर्वेषामादिभूतोयंमहान्नाम्नाभवत्प्रभुः॥ज्येष्ठोयंतत्वजातीनांहृदितेषांसमास्थितः॥ ॥
महताचततःसृष्टंयदहंकाररूपकं॥सएवत्रिविधोजातोभिन्नमूर्त्तिःप्रतापवान्॥ ॥अहंसर्व
त्रतिष्ठामिमदाधारंत्विदंस्मृतं॥तेनाहंकारनामाससदाहंकारणाच्छिवे॥ ॥सएववाह्यभावेन
स्थितःसर्वत्रसर्वराट्॥इच्छितंमहतायद्वैतत्कर्त्तुंसुसमाहितः॥ ॥त्रिविधोसौगुणस्तत्रतन्नि
बोधजगन्मये॥सात्विकोराजसश्चैवतामसःकथ्यतेबुधैः॥ ॥तेनाहंकरणस्यापित्रिशक्तिस्त
त्वमागतं॥सात्विकीज्ञानशक्तिश्चतयाभावःप्रबुध्यते॥ ॥राजसीयाक्रियाशक्तिस्तयाकार्यंप्र

रामः
२२

वर्त्तते॥ तामसी द्रव्यशक्तिर्या देवरूपा प्रकथ्यते॥२०॥ तत्रादौ तामसी शक्तिः प्रेरिता विश्वयोनिना॥
निर्ममे शब्दरूपं सा तेनाकाशं विनिर्मितं॥२१॥ आकाशेन तु स्पर्शश्च निर्मितः सर्वसिद्धये॥ स्पर्शेन
निर्मितो वायुर्महाबलयुतः प्रभुः॥२२॥ वायुना निर्मितं रूपं तेजोरूपेण निर्मितं॥ तेजसश्च रसो
त्पत्तिरसादापो विनिःस्मृताः॥२३॥ अद्भिश्च निर्मितो गंधो गंधाद्भूमिरजायत॥ तमोगुणमयी
सृष्टिरेषा जाता महाद्भुता॥२४॥ तन्मात्राभूतसर्गश्च पंचपंचात्मकस्वराट्॥ पंचभूतात्मको दे
हः सर्वत्रैव प्रदृश्यते॥२५॥ ततो राजसशक्त्या च पंचभूतमयानि वै॥ इंद्रियाणि प्रसृष्टानि क्रिया
रूपाणि तानि वै॥२६॥ पंचज्ञानेंद्रियाण्याहुर्ज्ञानरूपधराणि च॥ जिह्वा चक्षुस्त्वचा नासा कर्णश्चै
वात्र पंचमः॥२७॥ कर्मेंद्रियाणि पंचैव हस्तौ पादौ गुदं च वाक्॥ लिंगं पंचममत्रैव एभिः संजायते क्रि
या॥२८॥ पंच प्राणास्तथा ज्ञेयाः प्राणोपानश्च व्यानकः॥ उदानश्च समानो वै राजसाः पंच वायवः॥२९॥

दिशोवायुश्चवरुणोश्विनौसूर्यः प्रकीर्त्तिताः॥३१॥एतेज्ञानेंद्रियाणांचदेवताःपरिकीर्त्तिताः॥२

मु॰पु॰
२३

सप्तधातुविभागार्थंक्रियात्मकाउदाहृताः॥एषाक्रियात्मिकासृष्टिराजसीकथिताप्रिये॥३०॥सात्विक्या
मथयादेवाइंद्रियाणांविनिर्मिताः॥अग्निर्विष्णुःप्रजापालइंद्रोमित्रश्चपंचमः॥३१॥एतेकर्मेंद्रियाणां
वैदेवताःपरिकीर्त्तिताः॥सात्विकीसृष्टिरित्युक्तादेशदेवस्वरूपिणी॥३३॥एतेतत्वस्वरूपाख्याआदिदे
वाःप्रकीर्त्तिताः॥यथाविधितयाजाताज्ञानहीनावभूविरे॥३४॥ज्ञानहीनजदोषेणसृष्टिंकर्त्तुंन
चक्षमाः॥तेभ्योज्ञानप्रदानार्थमुपदेशंप्रचक्रतुः॥३५॥प्रकृतिःपुरुषश्चोभौमंत्रमेकाक्षरंपरं॥अ
नुष्ठानविधेर्युक्तंददतुर्गणपस्यतौ॥३६॥तेतत्रैवस्थिताःसर्वेतपश्चेरुर्महद्भृशं॥तेनसंतुष्टतां
यातोगणेशोगणवल्लभः॥३७॥प्रत्यक्षतांययौतेषांसमीपेसंस्थितोमहान्॥तंदृष्ट्वाहर्षिताःस
र्वेदेवास्तोतुंप्रवर्त्तिताः॥३८॥तत्वान्यूचुः॥नमस्तेवक्रतुंडायभक्तसंरक्षकायच॥सर्वाधीशायस
र्वायगणानांपतयेनमः॥३९॥अव्यक्ताव्यक्तरूपायसत्यासत्यायतेनमः॥समायविषमायैवचि

रामः
२३

घ्नेशायनमोनमः॥ [illegible] नमोनमः॥४०॥आत्मनेनात्मनेतुभ्यंगुणहीना
यगौणिने॥नामरूपधरायैवद्वाभ्यांहीनायतेनमः॥४१॥अनंतोदरसंस्थायनानाभोगकराय
च॥भोगहीनायसर्वत्रस्वानंदपतयेनमः॥४२॥मायाधरायवैतुभ्यंमायाहीनायतेनमः॥मायीनां
मोहकारायसर्वज्ञायचतेनमः॥४३॥सर्वसिद्धिधरायैवसिद्धीनांपतयेनमः॥सिद्धिहीनायसिद्धा
यसिद्धानांपतयेनमः॥४४॥जगन्मयायवैतुभ्यंजगद्धीनायतेनमः॥कर्मणांफलदात्रेचकर्मरूपा
यतेनमः॥४५॥कर्महीनायतेज्ञानज्ञानदात्रेनमोनमः॥ज्ञानिनांज्ञानकर्त्रेचज्ञानहीनायतेनमः॥
॥४६॥चतुर्विधधरायैवचतुर्विधमयायच॥चतुर्विधविहीनायस्वसंवेद्यायतेनमः॥४७॥पाशांकु
शधरायैवदत्ताभयधरायच॥चतुर्भुजायवैशूर्पकर्णायतुंदिलायच॥४८॥महतएकदंतायम
हतांचमहीयसे॥लघवेलघुरूपायलघूनांलघवायच॥४९॥गजवक्त्रायदेवायब्रह्मणेब्रह्मरूपि

मु॰पु॰
२४

णे॥ब्रह्मणस्पतये चैव ब्रह्मदात्रे नमो नमः॥५०॥ किमस्माभिस्तुतिः कार्या ह्यपारगुणराशिनः॥ नमो न
मो गणेशाय तेन संतुष्टितो भव॥५१॥ कृतांजलिपुटाः सर्वे ऋषयश्चास्थिताः पुरः॥ तान्दृष्ट्वा गणराज
स्तु हृष्टः सन्प्रत्युवाच ह॥५२॥ ॥इति श्रीमदांत्ये मौद्गले म॰ प्रथमखं॰ वक्रतुंडचरित्रे तत्वकृत
स्तुतिवर्णनं नाम सप्तमोध्यायः॥७॥ शिव उवाच॥ शृणु देवि गणेशस्य चरितं पापनाशनं॥ भु
क्तिमुक्तिप्रदं चैव स्मरणेन सुसिद्धिदं॥१॥ गजाननप्रसन्नात्मा परमात्मा परात्परः॥ भक्तानंदक
रः साक्षादुवाच भक्तिभावितः॥२॥ श्रीगजानन उवाच॥ अहो तत्वानि सर्वाणि वरं ब्रूत मनेप्सितं॥
तपसाहं प्रसंतुष्टो भक्त्या स्तोत्रेण भावतः॥३॥ भवत्कृतमिदं स्तोत्रमतिप्रीतिकरं मम॥ सर्वसि
द्धिप्रदं चैव पठते शृण्वते भवेत्॥४॥ विद्याकामो लभेद्विद्यां धनकामो लभेद्धनं॥ स्त्रीकामः स्त्रिय
माप्नोति पुत्रकामः सुपुत्रकान्॥५॥ मुक्तिकामो लभेन्मुक्तिं जयकामो लभेज्जयं॥ पठनादस्य स्तो

रामः
२४

त्रस्यवांछितंप्रलभेत्खलु॥६॥गणेशवचनंश्रुत्वाभक्तिनम्रात्मकंधराः॥ऋषयस्तंप्रणम्यादावू
चुस्तेहृष्टमानसाः॥७॥आदिऋषयऊचुः॥प्रसन्नोभगवानद्ययदिदेयोवरोमहान्॥त्वदीयामचलां
भक्तिंदेहिनोगणनायक॥८॥सृष्टिसामर्थ्यमत्यंतमस्माकंत्वत्प्रसादतः॥भवतुभजतांसर्वसिद्धिदा
श्चवयंतथा॥९॥यद्यन्मनोप्सितंदेवतत्तत्सिद्ध्यतुसर्वदा॥बंधहीनत्वसातत्यंदेहिविघ्नविना
शन॥१०॥तत्वानांवचनंसर्वंश्रुत्वागणपतिःस्वयं॥ददौतेषाममीष्टंसमहादेविमहाप्रदः॥
॥११॥गजाननउवाच॥दत्तावरामयादेवायेभवद्भिर्वृताःपराः॥इत्युक्त्वांतर्दधेढुंढिःपश्यता
मृषिणांखलु॥१२॥स्वानंदेचगतेदेवेगणेशेपरमात्मनि॥खिन्नाइवाभवान्देवाःपरस्परमु
खेक्षणात्॥१३॥गणेशवरदानेनज्ञानंजातंमद्भुतं॥बुद्धियुक्तामहादेवाःसृष्टिंचक्रुःप्रभावि
ताः॥१४॥परस्परप्रवेशंचचक्रुस्तेऋषयस्तदा॥तेनैकभावतांप्राप्तास्तस्मादंडंबभूववै॥१५॥

मु॰पु॰
२५

तस्मिन्नंडेषुमानादिरेकः सर्वात्मशक्तिवान्॥जातोवैभगवान्साक्षाद्गुणेशोगुणवल्लभः॥मह
ताकालयोगेनदेहात्तस्यविनिःसृताः॥आपस्तत्रस्थितंह्यंडंतत्रवृद्धिंययौचसः॥१७॥कालेना
वयवीजातःसंपूर्णदेहवानभूत्॥तस्यतेजःस्वभावेनतदंडंस्फुटितंमहत्॥१८॥सएवनिःसृ
तःसाक्षादसंख्यसूर्यसन्निभः॥अपारमहिमायस्यसर्वादिःसर्वभावनः॥१९॥सर्वतोहस्तपादो
वैसर्वतोदरनासिका॥सर्वतोक्षिमुखोनंतः॥सर्वतःश्रुतिमान्बभौ॥२०॥असंख्यावयवोदेवो
ह्यसंख्योदारविक्रमः॥असंख्यलीलयायुक्तःपरमात्मस्वभाववान्॥२१॥आदिमध्यांतहीनः
ससर्वत्रव्याप्यसंस्थितः॥महतांचमहीयान्योयस्यपारोनदृश्यते॥२२॥अण्डभ्योणुतरोदे
वोरोमरंध्रेषुयस्यवै॥ब्रह्मांडानिभ्रमंतिस्मपरागाइवखेभ्रमन्॥२३॥महाकारणनामावैतुरीयो
देहधारकः॥आत्मप्रतीतिरूपंचकथ्यतेसौमहाद्युतिः॥२४॥गुणानामधिपोयंवैगुणेशस्तेनक

रामः
२५

ध्यते॥ सर्वात्मा सर्वरूपश्च नाददेहधरः प्रभुः॥२४॥ गुणेशेन कृतं कर्म नानाचेष्टात्मकं ततः॥
तेन नामानि जातानि पश्चात्तस्य महात्मनः॥२५॥ आपः शरीरसंसृष्टास्तत्र सुप्तोयमीश्वरः॥
तेन नारायणं नाम प्राप्तं तस्य महात्मनः॥२६॥ आपो नरप्रसूताश्च तेन नाराः प्रकथ्यते॥
न देवायतनं तस्य कर्मणानेन स प्रभुः॥२७॥ सृजति भिन्नभिन्नं च त्रिविधं त्रिविधं पृथक्॥ ब्रह्मा
तेनाथ संतप्तं नाम तस्य प्रभावतः॥२९॥ वेदोपनिषदि प्रोक्तो ब्रह्मलोकसनातनः॥ सर्वेभ्यो
यः परः श्रेष्ठ एनं विद्धि सुनिश्चितं॥३०॥ सर्वेषां फलदाता स कालरूपेण एव च॥ चालकस्तेन
नामाभून्महादेवपरात्परः॥३१॥ कर्मणामयमाधारो जातः सूर्य इति स्मृतः॥ मोहको वस्तुजा
तीनामादिशक्तिश्च तेन सः॥३२॥ इत्यादिनामतां प्राप्तो नानाभावेन कर्मणा॥ गुणेशस्तुरीया
धारः सर्वत्रासौ महाप्रभुः॥३३॥ कारणानां च सर्वेषां कारणोयं न संशयः॥ महाकारणमेतच्च

मु॰पु॰
२६

पुराणेषुप्रपठ्यते॥३४॥कर्त्तुःकर्त्तास्वयंसाक्षाद्धर्त्तुर्हर्त्तानसंशयः॥पातुःपाताप्रकाशश्चप्रकाशो
यंगुणेश्वरः॥३५॥त्रिदेहोगुणतश्चायंवामेराजसतांगतः॥सात्विकोमध्यभागेसदक्षिणेतामसो
बभौ॥३६॥एतादृशोमहात्मासावादिदेवोगुणेश्वरः॥अज्ञानेनावृतोयस्मात्तेनवैतपसिस्थि
तः॥३७॥सोतपत्तपउग्रंतुहृदिध्यात्वागजाननं॥बहुकालेव्यतिक्रांतेप्रसन्नोभून्महाप्रभुः॥
॥३८॥आगतोदेवदेवेशोधेनुर्वत्समिवादरात्॥बोधयामासतंशीघ्रंगुणेशंभक्तवत्सलः॥३९॥
गणेशउवाच॥एकाक्षरस्यमंत्रस्यजपेनतपसापिते॥प्रसन्नोहंमहाबाहोगुणेशवृणुवा
छितं॥४०॥शिवउवाच॥इत्येवंबोधितोदेविगणेशेनकृपावता॥गुणेश्वरःप्रतुष्टावभक्ति
भावसमन्वितः॥४१॥गुणेशउवाच॥नमामिदेवंगणनाथमीशंसदासुशांतंहृदियोगि
नांवै॥अपारयोगंदृढयोगनाथंसुशांतयोगेश्वरमानतोस्मि॥४२॥सदासमाधिस्थमनंत

अयोगरूपंकथितुमशक्यंनिवृत्तिमात्रंह्यसमाधिसंस्थं॥अभेदभेदात्मकमूलहीनंसुशां

रामः
२६

पारंब्रह्मसुखसंवेद्यमयंविभातं॥निजात्मयोगेनचलभ्यमेवंसुशांतयोगेश्वरमाननोस्मि॥४४॥वि
देहयोगेनचसांख्यरूपंजनेनलभ्यंगणराज्यमीड्यं॥सदाद्युपाधौनहिनंगणेशंसुशांतयोगे
श्वरमाननोस्मि॥४५॥सुसंस्थितंसर्वविलासयुक्तंहृदिस्थबोधात्मकमादिदेवं॥अभेदमात्रं
परमार्थरूपंसुशांतयो॰॥४६॥अनादिमध्यांतमनंतपारंसुसंवृतंसंततमात्मरूपं॥गणेश
माद्यंपुरुषंपुराणंसुशांतयोगे॰॥४७॥अनादिरूपंप्रकृतिप्रभेदंसदासुबिंदुमयमप्रमेयं॥
अमायिकंमोहकुरंगसिंहंसुशांतयोगे॰॥४८॥गुणेशरूपेणविराजमानमपारमव्यक्तमयं
गणेशं॥गुणेविहीनंगुणचालकंचसुशांतयोगे॰॥४९॥समस्तरूपंजगदीशमेकंसुषुप्तिरू
पंसकलावभासं॥अनादिमायामयमारुधारंसुशांतयोगे॰॥५०॥जगन्मयंसर्वसुखनिधारं
हिरण्मयंस्वप्नगतंगणेशं॥जनस्यविज्ञानकरंपुराणंसुशांतयोगे॰॥५१॥स्तुतंसदास्वमुनी

मु॰पु॰
२७

इसिद्धेः स्थितं जगन्मोहमयं प्रसिद्धं ॥ सदा परं स्थूलविहारयुक्तं सुशांतयोगे ॥५२॥ असत्स्वरूपं वि
विधे ह्यभेदं गणेशमायामयशक्तिरूपं ॥ [illegible] मनोवचोहीनमहानुभावं सुशांत
योगे ॥५३॥ रविस्वरूपं ह्यमृतं पुराणमभेदमेकात्मकमात्मरूपं ॥ अखंडमानंदघनं गणेशं सु
शांतयोगे ॥५४॥ समं सदा विष्णुमचिंत्यभावमभेदभेदादिविवर्जितं च ॥ सदा सुखानंदमयं ग
णेशं सुशांतयोगे ॥५५॥ अचिंत्यरूपं सकलैर्विहीनं सदाशिवं मोहविहीनमाद्यं ॥ अपारवेशं
स्वसुखावभासं सुशांतयोगे ॥५६॥ पदार्थरूपं विविधप्रभेदं विकारयुक्तं परमप्रमेयं ॥ सुस्वल्प
बोधं ह्यथ त्वं पदं तं सुशांतयोगे ॥५७॥ अखंडमेकात्मकविश्वरूपं विकारहीनं महदप्रमेयं ॥ ग
णेशमेकं हृदि तत्पदस्थं सुशांतयोगे ॥५८॥ गणेशचैते विविधस्वरूपाः कलावताराभवदीय
भव्याः ॥ सुशांतमेकं भवदीयरूपं कथं विभाव्यं मनसा न शक्यं ॥५९॥ यदा च सर्वात्ममयं वदामि

रामः
२७

॥तदातुसोहंप्रकृतिस्वरूपं॥गकाररूपंजगदीशभेदं॥गकारमेकंशरणंप्रपद्ये॥६०॥मनोवचो
हीनमथोवदामिह्ययोगसंयोगमयंशकारं॥निवृत्तिरूपंशरणंसदावैनमामितंसर्ववरिष्टमा
द्यं॥६१॥नशक्यतेवक्तुमवक्तुमेवमनोभवंतंप्रणमामिढुंढे॥गणेशविघ्नेशमहानुभावप्रसीद
भोब्रह्मपतेमहात्मन्॥६२॥जन्मधन्यंदृशिर्धन्याविद्याज्ञानंतपःफलं॥येनदृष्टोगणाधीशः
कृतकृत्योस्मिसांप्रतं॥६३॥यदिदेयोवरोमह्यंतदाभक्तिंदृढांत्वयि॥देहिमेपरमेशानययामो
होविनश्यति॥६४॥सृष्टिसर्जनसामर्थ्यंभजतांकामपूरणं॥निर्विघ्नंसर्वकार्येषुदेहिविघ्नवि
नाशन॥६५॥गणेशवचनंश्रुत्वासुप्रसन्नोगजाननः॥मेघगंभीरसादृश्यंवचनंचेदमब्रवीत्॥
गणेशउवाच॥भवितामेमहाभक्तिःसृष्टीनांरचनास्तथा॥नानाविधाभविष्यंतिनिर्विघ्नंसर्वदा
भवेत्॥६७॥भवद्भ्यःसर्वदातृत्वंभविष्यतितथानघ॥महत्कार्येसमुत्पन्नेदास्यामिदर्शनंचुते॥६८॥

स्तोत्रंत्वया कृतंयच्च सर्वमान्यंभविष्यति॥ पठतांशृण्वतांचैवब्रह्मभूतकरंमहत्॥६९॥ स्तोत्रंब्रह्मपतेः।
साक्षान्नाम्नावैस्तुतिसाखं॥ भविष्यतिमहाभागसर्वसिद्धिकरंपरं॥७०॥ सकामेभ्योजनेभ्योपिका
मदंचिंतितप्रदं॥ निष्कामेभ्यः स्वभक्तेभ्योमुक्तिदंप्रभविष्यति॥७१॥ ममप्रीतिकरंपूर्णंसारंसर्व
त्रभाषितं॥ त्रिकालपठनादस्यसाध्योयंनात्रसंशयः॥७२॥ शिवउवाच॥ इत्युक्त्वांतर्हितःसाक्षा
द्गणेशोभक्तवत्सलः॥ देवस्यापिवियोगेनगुणेशोविमनाभवत्॥७३॥ ॥इतिश्रीमदांत्येमौ
द्गलेमहा॰प्रथमखंडेवक्रतुंडचरित्रेगुणेशवरप्रदोनामाष्टमोध्यायः॥८॥ ॥शिवउवाच॥
वरदानप्रभावेनगुणेशोज्ञानदानभूत्॥ समर्थोभगवान्साक्षात्सृष्टुंतत्रमनोदधे॥१॥ तस्य
निश्वासतोवेदानिःसृतारूपधारिणः॥ सर्वज्ञानकराःसाक्षाद्भास्वंतोगुरवःसतां॥२॥ पश्चा
त्तेनगुणेशेनसमभूतात्मकंजगत्॥ सृष्टंसुषुप्तिसंज्ञंचमहत्तत्वादिभिःसमैः॥३॥ आनंदव्य

वहारत्वात्प्रधानमितिकथ्यते। कारणंद्वंद्वभावानांतेनकारणकंस्मृतं॥४॥मायातमाकरीय
स्मात्तेनतामसतांगतं॥समानव्यवहारेणप्रधानंमोहदंबभौ॥५॥तस्यापिजाड्यभावश्चतेन
नज्ञायतेसदा॥किंकर्त्तव्यमकर्त्तव्यंसोतपत्प्रतपोमहत्॥६॥तपःकृतंमहोग्रंचदिव्यवर्षस
हस्रकं॥तेनप्रत्यक्षतांयातोगणेशोभक्तवत्सलः॥७॥स्तुतःसंपूजितस्तेनकारणेनमहाय
शाः॥सामर्थ्यंयोगरूपंचददौपरमभावितः॥८॥वेदैश्चापिकृतंघोरंतपःपरमदारुणं॥तेषां
प्रत्यक्षतांयातोविघ्नेशोविघ्नवारणः॥९॥वेदैश्चसंस्तुतोदेवःस्तोत्रैर्वेदसमुद्भवैः॥ब्रह्मणस्प
तिसूक्तेनबह्वृचःस्तुतवान्प्रभुं॥१०॥गणेशशांतिकेनैवयजुस्तंस्तुतवांस्तथा॥नामाष्टकार्थ
कृत्स्तोत्रंतेनसाम्नाचसंस्तुतः॥११॥अथर्वशीर्षकंनामतेनैवाथर्वणास्तुतः॥इत्यादिगाणपत्यैश्च
स्तोत्रैर्नानाविधैस्तुतः॥१२॥पूजितोमूलमंत्रेणसंतुष्टस्तेनविघ्नहा॥सर्वेषांगुरुरूपायैभविष्य

मु॰पु॰
२९

थवरंददौ॥२३॥सर्वमान्याजगत्पूज्यावेदास्तेनकृतास्तदा॥सांगोपांगसमाचारागुरवस्तेमताःखलु॥
॥२४॥पार्वत्युवाच॥तमोगुणमयंस्वामिन्प्रधानंसमरूपकं॥वरंप्राप्यगणेशात्तुकिंकृतंतेनकिंव
द॥२५॥मुद्गलउवाच॥प्रियोक्तंवचनंश्रुत्वाहृष्टरोमामहेश्वरः॥तांभगवानुवाचेदंस्मयन्निवप्र
सन्नधीः॥२६॥शिवउवाच॥शृणुप्रियेप्रवक्ष्यामिगणेशप्रीतिवर्द्धने॥विभूतिस्तस्यदेवस्यत्वंवै
भाग्यवतीशिवे॥२७॥गणेशवरदानेनसृष्टंतेनापिसूक्ष्मकं॥हिरण्यगर्भमांतर्यंसात्विकंस्व
प्नरूपकं॥२८॥महदादिमहत्तत्वैःसूक्ष्मभूतैश्चसंवृतं॥द्वंद्वविज्ञानमूलंतदंतरिसंस्थितंबभौ॥
॥२९॥बोधहीनेनतेनैवतपस्तप्तंसुदुष्करं॥तेनतुष्टोगणेशानोवांछितंप्रददौवरं॥३०॥वरदान
प्रभावेननानासामर्थ्यवानभूत्॥भगवान्सूत्ररूपःसस्वप्नमायाधरःप्रभुः॥३१॥तेनस्थूलस्व
रूपंचसृष्टंराजससंज्ञकं॥जागृद्भोगकरंपूर्णंतत्वैश्चस्थूलरूपिभिः॥३२॥ज्ञानहीनेनतेनाथ

रामः
२९

तपस्तप्तंसुदारुणं॥तपसाचैवसंतुष्टोगणेशःकरुणानिधिः॥२३॥प्रत्यक्षतांययौतस्यजागृद
न्नमयस्यच॥तेनापिपूजितोदेवःस्तुतस्तस्मैवरंददौ॥२४॥वरदानप्रभावेननानासामर्थ्यवा
नभूत्॥ईश्वरोन्नमयश्चासावेकानेकमकल्पयत्॥२५॥जागृत्स्वप्नसमानानित्र्यवस्थाप्रचु
राणिच॥भिन्नभिन्नानिजातानिकोटीशःकोटीशःखलु॥२६॥गुणेशरोमकूपेभ्योनिःसृता
निमहांतिच॥अंडानिभिन्नभिन्नानिसर्वत्रसंस्थितानिवै॥२७॥व्याप्यरूपाणिह्यंडानिव्यापकःस
गुणेश्वरः॥तयोरभेदभावेसाप्रकृतिर्ब्रह्मबिंदुकं॥२८॥जागृतासृष्टमाकाशभिन्नंसर्वप्रकाशकं
॥२९॥शब्दमात्रमयंभूतमादिरूपंसनातनं॥३०॥आकाशेनचसंसृष्टोवायुःस्पर्शगुणात्मवान्॥
वायुनारूपतन्मात्रंतेजःसृष्टंप्रकाशवत्॥३१॥तेजसारससंयुक्ताआपःसृष्टाप्रसारिणः॥अ
द्भिर्गंधगुणापृथ्वीसृष्टाधारणधर्मिका॥३२॥तत्रैकैकप्रवेशेनपंचीकरणभावतः॥पृथ्वीपंचगुणाजा

मु॰पु॰
३०

ताचतुर्भूतप्रवेशनात्॥३२॥आपश्चतुर्गुणाजातास्त्रयाणांसप्रवेशनात्॥तेजस्त्रिगुणतांप्राप्तंभू
तयोश्चप्रवेशनात्॥३३॥वायुर्द्विगुणवान्जातआकाशस्यप्रवेशनात्॥आकाशमेकगुण
भृद्भूतानांब्रह्मसंज्ञितं॥३४॥पंचभूतानिजातानित्र्यवस्थसंयुतानिच॥अष्टधाप्रकृतिःप्रोक्ता
कोशरूपासुशोभना॥३५॥तत्रकोशिस्वरूपेणगुणेशेविंवितोयतः॥तेनासामर्थ्यतांप्राप्ता
प्रकृतिरष्टरूपिणी॥३६॥अष्टावरणसंयुक्तमंडंसृष्टंप्रभास्वजं॥तत्रवैपुरुषोजज्ञेवैराजो
भगवान्छिवे॥३७॥पंचाशत्कोटिविस्तारःपृथ्व्याःप्रोक्तोमयाचते॥आपोदशाधिकास्त
स्यास्तेजस्ताभ्योदशाधिकं॥३८॥तस्माद्दशाधिकोवायुस्तस्मात्खंवैदशाधिकं॥तस्माद्द
शाधिकंजाग्रदभिमानंप्रकथ्यते॥३९॥तस्माद्दशाधिकंस्वप्नमहत्तत्वमितिस्मृतं॥द्विती
यंनामकुत्रापिकथ्यतेमुनिभिःसदा॥४०॥तस्माद्दशगुणामायाज्ञेयासुषुप्तिकाधिका

रामः
३०

गुणेशः पुरुषो ज्ञेयोनंतोपारश्चतुर्थकः ॥४१॥ वैराटावरणं कृत्वा स्थिता पृथ्वी सनातना ॥
अद्भिः समावृता पृथ्वी तेजसा यः समावृताः ॥४२॥ वायुना च वृतं तेजः खेन वायुः समावृ
ताः ॥ अहंकारेण संवृत्तमाकाशं देवि सर्वतः ॥४३॥ अहंकारश्च सूत्रेण संवृतो राजसः स्व
यं ॥ माययाच महत्तत्वं संवृतं स्वप्नसंज्ञितं ॥४४॥ मायावरणमांत्यं वै ज्ञातव्यं विबुधैः प
रं ॥ अष्टावरणसंयुक्तमंडं ते कथितं मया ॥४५॥ अंडान्येतादृशानि ह्यसंख्यातानि प्रिये
बभुः ॥ तीर्यगूर्ध्वमधस्तद्वद्गुणेशेन धृतानि च ॥४६॥ इति श्रीमदांत्ये मौद्गले प्रथमखंडे
वक्रतुंडअष्टधाप्रकृतिवर्णनं नाम नवमोध्यायः ॥९॥ ॥पार्वत्युवाच॥ श्रोतुमिच्छामि
शर्वेश वैराटस्य स्वरूपकं ॥ कीदृशोयं महाभागस्तन्मे कथय शंकर ॥१॥ शिव उवाच ॥ पंच
कोटिप्रविस्तारो योजनानां समंततः ॥ तस्य देहे च भूतानि स्थावराणि चराणि वै ॥२॥ संस्थि

मु॰ पु॰
३२

तानिचसर्वाणिभुवनानिचतुर्दश॥ततेहंसंप्रवक्ष्यामिसमाहितमनाशृणु॥३॥पादतलेच
पातालंगुल्फेतस्यरसातलं॥सक्थ्योर्महातलंतस्यजंघयोश्चतलातलं॥४॥सुतलंजानु
भागेस्यवितलमुरुमंडले॥अतलंकटिसंधौचकट्यांभूर्लोकसंस्थितः॥५॥नाभौतस्यभुवो
लोकःस्वर्लोकश्चहृदिस्थितः॥महर्लोकश्चकंठेवैजनलोकोमुखेस्थितः॥६॥तपोलोको
ललाटेचसत्यलोकःशिरःस्थितः॥एतावान्देहरूपोवैवैराटपुरुषोमहान्॥७॥सहस्रशी
र्षशोभाढ्यःसहस्राननपादवान्॥सहस्रहस्तःकर्णःससहस्रोदरवान्प्रभुः॥८॥सर्वत्रव्या
प्यभावेनस्थितोसौपरमेश्वरः॥मृत्येष्वमृतेभोक्ताचस्वप्रकाशेनवर्त्तते॥९॥तस्यांतरिस्थि
तंरूपंहिरण्यगर्भसंज्ञितं॥एतादृशंतथास्वप्नंविश्वरूपंविराजति॥१०॥बहिर्वैश्वानरश्चा
यंजागृद्वैराटसंज्ञितः॥हिरण्यगर्भकोशस्थःस्वप्नवैराटधारकः॥११॥उभयोःसमभावेन

रामः
३२

बाह्यांतरैकरूपतः॥ईश्वरोनामवैराटः सुषुप्तिधारकोबभौ॥१२॥त्रिविधंयद्विराड्रूपंकथितंतेतु
पार्वति॥तुरीयमात्मरूपंयत्त्रिविधेषुप्रवर्त्तते॥१३॥अथोशृण्वविभिन्नानामुत्पत्तिंह्यल्पभा
वनां॥नानाभावधरांतांवैचराचरमयींपरां॥१४॥विराड्ज्ञानभावेनावृतस्तेनतपःकृतं॥ए
काक्षरविधानेनगणेशंसदधौहृदि॥१५॥सोतपतपउग्रंचदिव्यवर्षसहस्रकं॥तपसाध्या
नभावेनप्रत्यक्षोगणपोभवत्॥१६॥बोधयामासतंदेवोवरंब्रूहीतिसोब्रवीत्॥गणेशंसद
सादृष्ट्वापादयोःप्रणनामतं॥१७॥धन्यंजन्मतपोमेद्यधन्यंज्ञानंवपुश्चदृक्॥धन्यामेसंपदो
देवत्वदंघ्रियुगदर्शनात्॥१८॥इत्युक्त्वास्तोतुमारेभेगणेशंब्रह्मनायकं॥वाचासंस्पृष्टयाह
ष्टोभगवान्विश्वधारकः॥१९॥विराडुवाच॥नमस्तेगणनाथायगणानांपतयेनमः॥विघ्नेशा
यपरेशायविघ्नहंत्रेनमोनमः॥२०॥सिद्धिबुद्धिपतेतुभ्यंनानासिद्धिप्रदायिने॥नानाज्ञानप्रदा

मु॰पु॰
३३

त्रेचब्रह्मणेब्रह्मरूपिणे॥ मनोवाग्गतिभूताययोगिनांहृदिवासिने॥ नानावतारकर्त्रेचभक्तसंरक्षका
यच॥२२॥ नमोनमोमहेशायशिवायशिवदायिने॥ सर्वत्रसमभावायविष्णवेप्रभविष्णवे॥२३॥ तेजो
राशिपतेतुभ्यंभानवेतेनमोनमः॥ नानामायाप्रभेदायशक्तयेशक्तिरूपिणे॥२४॥ स्रष्टुपात्रेथ
संहर्त्रेचराचरमयायच॥ सर्वेभ्योज्ञानदात्रेचनिर्मलायनमोनमः॥२५॥ सर्वेभ्योभिन्नरूपायमा
याहीनायतेनमः॥ मायिभ्योमोहदात्रेचमायाधारायतेनमः॥२६॥ गुणांतेनययुर्यस्यनानाब्र
ह्मणितेनमः॥ अतोमयिगणेशानकृपयानुग्रहंकुरु॥२७॥ इतिस्तुत्वागणेशानंमौनवानभ
वत्स्वयं॥ वैराटपुरुषस्तत्रकृतांजलिर्मुदायुतः॥२८॥ भगवांस्तंगणेशानउवाचभक्तिभावितः॥
वरंवरयदास्यामिशंकांमाकुरुविश्वप॥२९॥ इदंत्वयाकृतंस्तोत्रंममप्रीतिकरंभवेत्॥ यःपठे
द्भावपूर्वंतुसिद्धिस्तस्यभविष्यति॥३०॥ यंयंचिंतयतेकामंतंतंदास्यामिवांछितं॥ भुक्तिमुक्तिप्र

रामः
३२

दंभावीपठनाच्छ्रवणादपि॥३१॥इत्युक्तवंतंगणनाथमाद्यंवैराटदेवःप्रणनामतंवै॥भावेनयु
क्तोवचनंजगादहृष्टःस्वयंविघ्नहरंप्रभुंच॥३२॥वैराटउवाच॥यदितुष्टोसिदेवेशयदिदेयोव
रोमहान्॥तवभक्तिंदृढांदेहिययामोहोविनश्यति॥३३॥अतुलंसर्जनंसृष्टेःपालनंहरणंतथा
॥करोमित्वत्प्रसादेनभक्तेभ्योभुक्तिमुक्तिदा॥३४॥ऐश्वर्यमतुलंदेहिगजाननमहाप्रभो॥यंय
मिच्छामितंतंवैसिद्ध्यतुत्वत्प्रसादतः॥३५॥शिवउवाच॥तथेतिवचनंप्रोक्त्वागणेशोंतरधीयते॥
॥विराड्रूपेणसंयुक्तोगणेशंहृद्यभावयत्॥३६॥एवंदेविचसर्वत्रनानांडेषुस्थितैपरैः॥वैराटैस्तैः
कृतंपूर्णंगणेशतपउत्तमं॥३७॥तेनसर्वेमहात्मानःस्वस्वकर्मणिसंस्थिताः॥निर्विघ्नावरदा
नेनभगवंतःसनातनाः॥३८॥अनंतानिप्रजानीहिब्रह्मांडानिनशक्यते॥वक्तुंकेनापिहेरंबंविना
तानियथातथं॥३९॥सततंगणनाथोपिनसंख्यातुंप्रवर्तते॥गणनाशब्दशास्त्रेषुयावतीह्यधिकं

मु॰पु॰
३३

ततः॥४०॥अतः केनापि संख्यानं न कृतं वेदवादिना॥ अनंतानि महांडानि ज्ञातव्यानि जगन्मये॥
॥४१॥एवं प्रभावयुक्तो सौ हृदये मे प्रवर्त्तते॥ गणेशो ध्यानलोभी च भक्तेशो भक्तवत्सलः॥४२॥
॥ ॥इति श्रीमदांत्ये मौद्गले महापुराणे प्रथमखंडे वक्रतुंड॰ नानाब्रह्मवर्णनं नाम दशमोध्या
यः॥२०॥ ॥पार्वत्युवाच॥भगवन्देवदेवेश कृपां कृत्वा वदस्व मे॥ वैराटेन कथं सृष्टं जगत्स्थाव
रजंगमं॥१॥अन्यच्च ब्रूहि मे नाथ ध्यानमार्गं पुरातनं॥ येन साक्षात्करिष्यामि गणेशं नात्र संश
यः॥२॥मुद्गल उवाच॥इति पृष्टो महादेव्या महादेवः प्रहृष्टवान्॥ कथां परमपुण्यां च कथ
यामास तच्छृणु॥३॥दक्ष उवाच॥गणेशश्च कथां श्रुत्वा हर्षश्चेतसि जायते॥ कथयस्व महा
भाग शिवेन कथितं तु यत्॥४॥मुद्गल उवाच॥धन्योसि दक्ष लोकेषु येन सादरता च ते॥ गणे
शामृतधारायां कथायां नात्र संशयः॥५॥प्रहृष्टां गिरिजां दृष्ट्वा शिवो वचनमब्रवीत्॥ धन्या

रामः
३३

धन्यामहाभागेशृणुसादरमादितः॥६॥शिवउवाच॥गणेशंमनसाध्यात्वावैराटःसृष्टुमारभ
त्॥तस्यनाभेःसमुत्पन्नोब्रह्मालोकपितामहः॥७॥मुखाद्विष्णुर्जगत्पातानेत्रादहंहरोभवं॥
सृष्टिस्थितिलयाकारास्त्रिगुणरूपधारकात्॥८॥वामांकाच्छक्तिरुत्पन्नात्वंवैपार्वतिमोहि
नी॥दक्षिणांगाद्रविःसाक्षात्कर्माधारःसमुद्भवः॥९॥पंचदेवाःसमुत्पन्नाभिन्नाजाताःस्वभा
वतः॥नविदुःकिंचिदात्मानंवैराटंचापिशोभने॥१०॥अंधेतमसिसर्वत्रबभ्रमुर्बहुकालतः॥
नकिंचित्प्रापुरायामात्स्थिताःपरमदुःखिताः॥११॥किंकर्तव्यंक्वगंतव्यमज्ञानेनावृताभृशं
॥कस्माद्वयंसमुत्पन्नानजानीमोमहान्प्रभुं॥१२॥अथचिंतयतांतेषांबुद्धिर्जातासुनिश्चिता॥
तपःकर्तुंसमारब्धायस्मैतेब्रह्मणेनमः॥१३॥सर्वेषांमूलभूतंयद्यादृशंतादृशंखलु॥स्वधीस्थं
तत्समाचिंत्यतपस्तप्तंसुदारुणं॥१४॥तपसागणनाथस्तुप्रसन्नोंतरमाश्रितः॥तत्रदृष्टिःस

मु॰पु॰
३४

मुत्पन्नातेषांस्वभावितात्मनां॥१५॥हृदयेबीजरूपंचस्फुरंतंदृष्टमद्भुतं॥एकाक्षरंमहामंत्रंतं
प्राप्यहर्षमाययुः॥१६॥तंमंत्रंजपमानास्तेतदारभ्यजगन्मये॥तेनमंत्रप्रभावेणज्ञानंप्राप्तं
सुनिर्मलं॥१७॥दिव्यवर्षसहस्रेणप्रत्यक्षःसमजायत॥गणेशोभक्तिभावेनतेषांपुर
समुत्थितः॥१८॥अनंतकोटिसूर्योजाःशुंडादंडविराजितः॥चतुर्बाहुधरःसाक्षाल्लंबोदरोवि
भूषितः॥१९॥भूषणैरायुधैश्चैवसिद्धिबुद्धिसमन्वितः॥भक्तानंदकरःश्रीमानाखुवाहो
महाद्युतिः॥२०॥तंदृष्ट्वाभयभीतास्तेदेवाःशंभुपुरोगमाः॥किमिदंतेजआयातिप्रलयाग्नि
समंमहत्॥२१॥अस्मान्भक्ष्यतिकिंदेवविघ्नेशकरुणानिधे॥तवभक्तावयंस्वामिन्कथंवि
घ्नेनभाविताः॥२२॥इतितेषांवचःश्रुत्वाबभूवसौम्यरूपवान्॥तंदृष्ट्वाहर्षिताःसर्वेप्रणे
मुर्भावपूर्वकं॥२३॥गणेशदर्शनेनैवस्फूर्तिःप्राप्तामहाद्भुताः॥तयासर्वंयथातथ्यंज्ञातंतै

रामः
३४

पंचभिः पुराणैः॥२४॥ततस्तंतुष्टुवुः सर्वेभक्तिनम्रात्मकंधराः॥हृष्टरोमाणएवंतेअश्रुदृक्जलएवि
लाः॥२५॥पंचदेवाऊचुः॥नमस्तेविघ्नराजायभक्तानांविघ्नहारिणे॥[illegible]विघ्नकर्त्रे
सुभक्तानांगणेशायनमोनमः॥२६॥हेरंबायनमस्तुभ्यंहुंढिराजायतेनमः॥विनायकाय
देवायब्रह्मणांनायकायच॥२७॥लंबोदरायसिंहगजाननधरायच॥सूर्पकर्णायगूढाय
वक्रहस्तनमोस्तुते॥२८॥लंबोष्ठायैकदंतायसर्वेशायगणाधिपा॥अनंतभक्तिमाधारधरणी
धरतेनमः॥२९॥मोदरायनमस्तुभ्यंमोदरूपेनमोनमः॥३०॥पंचभूतमयायैवंपंचभूतधे
रायच॥३१॥इंद्रियाणामधिपायेंद्रियज्ञानप्रकोरिणे॥३२॥अध्यात्मनेधिभूतायाधिदैवायच
तेनमः॥अक्षायाक्षपतेतुभ्यंमंत्राक्षायनमोनमः॥३३॥प्राणायप्राणनाथायेप्राणानांप्राणरू
पिणे॥चित्तायचित्तहीनायचित्तेभ्यश्चिंतदायिने॥३४॥विज्ञानायचविज्ञानपतयेहृद्धारिणे॥

नमोमायामयायेवमायाहीनायतेनमः॥

मु॰पु॰
३५

विज्ञानेभ्यः स्वविज्ञानदायिनेतेनमोनमः॥३४॥आनंदायनमस्तुभ्यमानंदपतयेनमः॥आनंदानं
ददात्रेचकारणायनमोनमः॥३५॥चैतन्यायचयत्नायचैतन्यधारिणेनमः॥चैतन्येभ्यः स्वचैतन्य
दायिनेनादरूपिणे॥चि॥३६॥बिंदुमात्रायबिंदूनांपतयेप्राकृतायच॥भेदाभेदमयायैवज्योति
रूपायतेनमः॥३७॥सोहंमात्रायशून्यायशून्याधारायदेहिने॥शून्यानांशून्यरूपायपुरुषाय
नमोनमः॥३८॥ज्ञानायबोधनाथायबोधानांबोधकारिणे॥मनोवाणीविहीनायसर्वात्मकन
मोनमः॥३९॥विदेहायनमस्तुभ्यंविदेहाधारकायच॥विदेहानांविदेहायसांख्यरूपायतेनमः॥
॥४०॥नानाभेदप्रधरायचैकानेकादिमूर्तये॥असत्स्वानंदरूपायशक्तिरूपायतेनमः॥४१॥अमृता
यसदाखंडभेदाभेदविवर्जितः॥सदात्मरूपिणेसूर्यरूपाधारायतेनमः॥४२॥[illegible]
सत्यासत्यविहीनायसमस्वानंदमूर्तये॥आनंदा[illegible]नंदकंदायविष्णवेतेनमोनमः॥४३॥अव्यक्ता

रामः
३५

शोनात्रसंशयः॥पूज्यतेसमयानित्यंचिंतामणिविनायकः॥३४॥पंचानांचित्तवृत्तीनांप्रकाशकतया
स्थितः॥तेनचिंतामणिर्नामाकथ्यतेसगजाननः॥३५॥गजवक्त्रात्मिकांमूर्त्तिंपश्यदेविग्रहेस्थितां॥
मणिरत्नमयींसाक्षात्पूजयामिसुभक्तितः॥३६॥मुद्गलउवाच॥इत्युक्त्वादर्शयामासध्यानस्था
नंसदाशिवः॥एकांतेपश्यतदेवि विस्मितासाभवत्परं॥३७॥इत्युक्त्वाचिररामाथशंकरःकरु
णानिधिः॥तंपुनःप्रत्युवाचेदंमहादेवीजगन्मयी॥३८॥शक्तिरुवाच॥सर्वेषांमोहसंदात्रीता
मसस्यसदाशिव॥तवपत्नीकथंजाताह्येकभागस्थितस्यवै॥३९॥अमुंमेसंशयंदेवछेत्तुमर्हसि
सांप्रतं॥त्वदन्यःसंशयच्छेत्तासर्वज्ञोनास्तिकुत्रचित्॥४०॥पार्वतीवचनंश्रुत्वाशिवोहर्षसमन्वि
तः॥उवाचमधुरंवाक्यंबोधयंस्त्वांसहेतुकं॥४१॥शिवउवाच॥शृणुदेविपुरावृत्तंयेनत्वंमत्प्रि
याभवत्॥तत्तेहंकथइष्यामिकथारूपंसुखप्रदं॥४२॥विवादःपंचदेवानांस्पर्द्धतांयःसमुद्भ

योगोभवेन्नदुर्ल्लभः॥२४॥प्रथमोवक्रतुंडश्चत्वंपदेब्रह्मकथ्यते॥द्वितीयएकदंतश्चतत्पदेब्रह्मबो
धकः॥महोदरस्तृतीयस्तुब्रह्मासिपदधारकः॥गजाननश्चतुर्थश्चसांख्यरूपोमहेश्वरी॥२६॥लं
बोदरइतिख्यातोह्यसद्ब्रह्मत्वयिस्थितः॥षष्ठोविकटनामाचसद्ब्रह्मणिरविःपरः॥२७॥विघ्नराजः
स्वयंविष्णुःसप्तमःसमतांगतः॥धूम्रवर्णोष्टमःशंभुरव्यक्तोनेतिकथ्यते॥२८॥अष्टब्रह्मसुतत्पा
लाःकलारूपधराःस्मृताः॥गणपागणराजस्यह्यवताराःप्रकथ्यते॥२९॥स्वसंवेद्यमयंब्रह्म
तेनवैप्रधृताःप्रिये॥सर्वेषांब्रह्मणोदेविखेलकस्तेनसस्मृतः॥३०॥अयोगस्यावताराश्चखेला
दिकंनविद्यते॥स्वानंदवासिनंविद्धिखेलकंसततंप्रिये॥३१॥पूर्णयोगेगणाधीशःसंयोगायोगव
र्जितः॥तत्रशांतिश्चयोगीनांप्रभवेद्योगसेवया॥३२॥इतिसर्वंसमाख्यातंयत्पृष्टंदेविशोभनं॥
अनेनविधिनानित्यं[illegible]गणेशभजसर्वदा॥३३॥अस्माकंकुलदेवश्चगणे

मु॰पु॰
४८

खंपरं॥तेनाहं वक्रतुंडस्तु लभ्य उन्मनसा भवेत्॥१४॥भवतां कार्यसिध्यर्थं विहारार्थं तु मायया॥
बिंदुरूपधरो भूत्वा स्थितोहं भावपूर्वकं॥१५॥यदि मे स्मरणं सद्यो विस्मृतं भवतां तदा॥मायामोहे
न संभ्रांता भविष्यथ महेश्वराः॥१६॥भवद्भिः सततं तस्मात्कर्तव्यं स्मरणं हृदि॥आदौ पूज्यो भवि
ष्यामि दैवे पित्र्ये च कर्मणि॥१७॥तेन सिद्धियुताः सर्वे भविष्यंति न संशयः॥इत्युक्त्वांतर्दधे दे
वो गणेशो गणपालकः॥१८॥शिव उवाच॥इति ते कथितो देवि ध्यानमार्गः पुरातनः॥यं ध्या
यामि हृदिस्थं मे गणेशं ब्रह्मनायकं॥१९॥अखिलं ब्रह्मणा सृष्टं चराचरमयं शिवे॥[illegible]
[illegible]कः कालैर्भानुर्जातो न संश[illegible]॥२०॥हिमाचलसुता त्वं वै जाता तेन सुविस्मृतं॥तवाखिलं
हृदि संस्थं ज्ञानं गणेशबोधकं॥२१॥मया सुस्मारितं तुभ्यं स्मर सर्वं सुविस्मिते॥भवती च महा
माया पश्य त्वं गणपं हृदि॥२३॥अष्टौ तस्यावताराश्च कथयामि समासतः॥भजतां तेन मार्गेण

अहं संहारकारी च त्वं प्रमोदप्रदा शिवे॥कर्मणां चालकः कालैर्भानुर्जातो न संशयः॥२१॥३

राम:
४८

शउवाच॥ स्वपदेब्रह्मरूपावैजगतीजगदीश्वराः॥ भिन्नभावेगुणात्मानोभवंतोपिमयाकृ
ताः॥५॥ चतुर्विधेनभावेनक्रीडामियत्रतत्रच॥ क्रीडयापतितंबिंबंतेनाहंपंचधाभवं॥६॥
बहुषुमेविलासेषुतेषुभावेषुदेवपाः॥ भवंतोमदधीनाश्चसंस्थितानात्रसंशयः॥७॥ अ
स्मिन्भिन्नविहारेचरजःसत्वतमोमयाः॥ त्रयोब्रह्माहरिःशंभुर्भिन्नाजाताहिमायया॥८॥ अहं
कारस्त्रिदेवानांसूर्योमोहमयीतथा॥ शक्तिस्त्रिगुणसिद्ध्यर्थमेतेपंचमयाकृताः॥९॥ अहमत्र
स्थितोंशेनवक्रतुंडइतिस्मृतः॥ बिंदुब्रह्ममयःसाक्षाद्भिन्नभावप्रकाशकः॥१०॥ तुरीयंमम
यारूपंकृतंयद्गुणपंसुराः॥ ज्ञातव्यंबुद्धिरूपंतद्दक्षिणांगंप्रकथ्यते॥११॥ पंचदेवविहाराख्यंवा
मांगंसिद्धिरूपकं॥ सिद्धिबुद्धियुतोहंवैबिंदुमात्रात्मकोभव॥१२॥ भक्तानांविघ्नरूपायेवक्रास्ते
कथिताःसुरैः॥ तांतुंडेनहनिष्यामिवक्रतुंडस्ततःस्मृतः॥१३॥ मममायामयाज्जीवाद्वक्रंब्रह्ममु

वर्जिता॥२२॥शिवउवाच॥इत्युक्त्वाविररामाथगणेशोभक्तवत्सलः॥तेपिभेदंपरित्यज्यशांतिंप्राप्ताश्च
तत्क्षणात्॥२३॥एकविंशतिश्लोकैस्तैर्गणेशेनप्रकीर्त्तितं॥गीतासारंसुशांतेभ्यःक्षांतिदंयोगसाद
नैः॥२४॥गणेशगीतासारंचयःपठिष्यतिभावतः॥श्रोष्यतिश्रद्दधानश्चेद्ब्रह्मभूतसमोभवेत्॥२५॥इ
हभुक्त्वाखिलान्भोगानंतेयोगमयोभवेत्॥दर्शनात्तस्यलोकानांसर्वपापंलयंभवेत्॥२६॥ ॥इति
श्रीदांत्येमौद्गले-प्रथमखंडेवक्रतुंडचरित्रेगणेशगीतासारकथनंनामषोडशोध्यायः॥१६॥ ॥
शिवउवाच॥गणेशगीतासारंतेश्रुत्वापंचसुरेश्वराः॥ऊचुस्तंविस्मिताःसर्वेप्रणम्यगणनायकं॥
पंचदेवाऊचुः॥भगवन्भवतासर्वंकथितंतथ्यमेवच॥तेनतृप्तावयंस्वामिन्मोहशून्याःकृता
स्त्वया॥२॥तवदर्शनमात्रेणस्मरणंपूर्वगंकृतं॥गुणरूपावयंढुंढेकथंब्रह्ममयावद॥३॥ते
षांवचनमाकर्ण्यतानुवाचगजाननः॥भक्तवात्सल्यभावेनतोषितोसौमहाप्रभुः॥४॥गणे

असत्सत्समनेतिस्वानंदरूपावयंस्मृताः॥१३॥स्वानंदाद्यत्परंब्रह्म योगाख्यंब्रह्मणांभवेत्॥के
षामपिप्रवेशोनतत्रतस्यापिकुत्रचित्॥१४॥मदीयंदर्शनंतत्र योगेनयोगिनांभवेत्॥स्वा
नंदेदर्शनंप्राप्तंस्वसंवेद्यात्मकंचमे॥१५॥तेनस्वानंदवासीनंवेदेषुप्रवदंतिमां॥चतुर्णांब्रह्म
णांभोगात्संयोगाद्भेदयोगतः॥१६॥संयोगश्चह्ययोगश्चतयोःपरतरोमतः॥पूर्णशांतिपदो
योगश्चित्तवृत्तिनिरोधतः॥१७॥क्षिप्तंमूढंचविक्षिप्तमेकाग्रंचनिरोधकं॥पंचभूमिमयंचित्तं
तत्रचिंतामणिःस्थितः॥१८॥पंचभूमिनिरोधेनप्राप्यतेयोगिभिर्हृदि॥शांतिरूपात्मयोगेन
ततःशांतिर्मदात्मिका॥१९॥एतद्योगात्मकंज्ञानंगाणेशंकथितंमया॥नित्यंयुंजतयोगेननै
वमोहंप्रगच्छथ॥२०॥चित्तरूपास्वयंबुद्धिःसिद्धिर्मोहमयीस्मृता॥नानाब्रह्मविभेदेनताभ्यांक्री
डतितत्पतिः॥२१॥त्यक्त्वाचित्ताभिमानंयंगणेशोहंसमाधिना॥भविष्यथभवंतोपिमद्रूपामोह

मु॰पु॰
४६

वाविकल्पकरणाद्विधा॥३॥सदास्वसुखनिष्ठंयद्ब्रह्मसांख्यंप्रकीर्त्तितं॥परतोत्थानकंतच्चक्रीडाहीन
तयापरं॥४॥स्वतःपरतउत्थानहीनंयद्ब्रह्मकथ्यते॥स्वानंदःसकलाभेदरूपसंयोगकारकः॥५॥त
देवपंचधाजातंतन्निबोधतईश्वराः॥स्वतश्चपरतोब्रह्मोत्थानंयद्विविधंस्मृतं॥६॥ब्रह्मणोनामत
द्वेदेकथ्यतेभिन्नभावतः॥ तयोरनुभवोयश्चयोगिनांहृदिजायते॥७॥रूपंतदेवज्ञातव्यमस
द्वेदेषुकथ्यते॥९॥साशक्तिरियमाख्याताब्रह्मरूपाह्यसन्मयी॥८॥तत्रामृतमयाधारःसूर्य
आत्माप्रकथ्यते॥शक्तिसूर्यमयोविष्णुरानंदोनंदनात्तयोः॥९॥त्रिविधेषुतदाकारस्तत्क्रिया
हीनरूपकः॥नेतिशिवश्चतुर्थोयंत्रिनेतिकारकात्परः॥१०॥त्रिविधंमोहमात्रंयन्निर्मोहस्तु
सदाशिवः॥तेषामभेदेयद्ब्रह्मस्वानंदःसर्वयोगकः॥११॥पंचानांब्रह्मणांयच्चबिंबंमायाम
यंस्मृतं॥ब्रह्मातदेवविज्ञेयःसर्वादिःसर्वभावतः॥१२॥बिंबेनसकलंसृष्टंतेनायंप्रपितामहः॥

रामः
४६

गजाननः॥ तं दृष्ट्वा दंडवत्सर्वे प्रणता भक्तिभावतः॥१७॥ तानुत्थाप्य परं ढुंढिर्वचनं चेदमब्रवीत्॥
स्तोत्रेण भावितो देवाः प्रीतो वो नात्र संशयः॥१८॥ यः पठेत्स्तोत्रमेतद्वै स मे मान्यो भवत्सुराः॥ वां
छितं पूरयिष्याम्यंते मे सायुज्यमाप्नुयात्॥१९॥ शृणुध्वं मे वचो रम्यं मा गर्वं कुरुत प्रियाः॥ भवंतो मद
धीनाश्च कलांशा नात्र संशयः॥२०॥ क्रीडार्थं निर्मिताः सर्वे स्पर्द्धमानाः परस्परं॥ किमर्थं मनसि
भ्रांता जाताः पूर्णात्मका अपि॥२१॥ शृणु ज्ञानं रहस्यं यन्मदीयं तेन भाविताः॥ सदा मोहविनिर्मु
क्ता भवितारश्च मत्समाः॥२२॥ इति श्रीमदांत्ये मौद्गे प्रथमखंडे वक्रतुंडचरित्रे गणेशप्रसन्नभा
वो नाम पंचदशोध्यायः॥२५॥ ॥शिव उवाच॥ गणेशवचनं श्रुत्वा प्रणता भक्तिभावतः॥ पप्र
च्छुस्तं पुनः शांता ज्ञानं ब्रूहि गजानन॥१॥ गणेश उवाच॥ देहश्चतुर्विधः प्रोक्तस्त्वं पदं ब्रह्म भिन्नतः॥
सोहं देही चतुर्द्धा तत्पदं ब्रह्म सदैकतः॥२॥ संयोग उभयोर्यच्चासि पदं ब्रह्म कथ्यते॥ स्वत उत्थानकं दे

वाभवत्॥७॥आययौविष्णुरभ्यासेसर्वमकथयत्सुत॥तेनस्मतादृशंदृष्टंकथयामाससोपितं॥८॥
एवंपंचापितंदृष्ट्वाविस्मिताअभवन्परं॥एकत्रमीलिताजातातुष्टुवुस्तंगतस्मयाः॥९॥पंचदेवा
ऊचुः॥नमस्तेवक्रतुंडायत्रिनेत्रधारिणेनमः॥चतुर्भुजायदेवायपाशांकुशधरायच॥१०॥लं
बोदरनमस्तुभ्यंनाभिशेषायतेनमः॥महतएकदंतायशूर्पकर्णायतेनमः॥११॥सिंदूरारुण
देहायरक्तवर्णधरायच॥महाकायायसूक्ष्मायगणेशायनमोनमः॥१२॥सिद्धिबुद्धियुतायै
वविभूतिसहितायच॥चिंतामणिधरायैवचिंतामणेनमोनमः॥१३॥अव्यक्तायपरेशायप
रेषांचपरायते॥नमोवाणीविहीनायविघ्नेशायनमोनमः॥१४॥नानामायाधरायैवमायि
नांमोहकारिणे॥हेरंबायनमस्तुभ्यंब्रह्मणांपतयेनमः॥१५॥दर्शयस्वनिजंरूपंभक्तेभ्यः
प्रीतिदायकं॥सनाथाहिवयंतेनसर्वनाथायतेनमः॥१६॥स्तुवतांतत्पुरःप्रादुरासीद्देवोग

तत्रादौशंकरस्यापिहृदिप्रकटतांगतं॥तंपपृच्छस्वयंशंभुःकोभवान्वदमेप्रभो॥४०॥शांति
योगेनसंप्राप्तःकिंत्वंब्रह्मपतिःपरं॥कथयस्वमहाभागत्वंनजानामितत्वतः॥४१॥ ॥
इतिश्रीमदांत्येमौद्गले॰प्रथमखंडेगणेशप्रादुर्भावोनामचतुर्दशोध्यायः॥२४॥शिव
उवाच॥शिवस्यवचनंश्रुत्वाभक्तिभावेनमोहितः॥गणेशोहंपुनर्दृष्टस्तपसाभाविता
त्मना॥२॥यःपुराभवतोदेववरदाताभवंपरः॥उग्रेणतपसातुष्टोकरवंज्ञानसंयुता
न्॥३॥ममैषासततंमायामोहेनै[illegible]वप्रमोहति॥तेनविस्मरणंप्राप्तंतवापि
नात्रसंशयः॥४॥एवमुक्त्वाशिवंमायामोहजालंनिराकरोत्॥सर्वस्यस्मरणंजातंपुनःआ
प्तंशिवस्यच॥५॥सर्वंस्मृत्वाशिवस्तत्रस्तोतुंसमुपचक्रमे॥तावदंतर्हितंजातंरूपंगणप
तेःशुभं॥६॥पुनर्ध्यानेनशंभुःसतमेवचिंतयन्स्थितः॥नापश्यद्धृदितद्रूपंतेनाकुलमि

चकुत्रापिनोक्ताःशास्त्रेषुसंमतं॥अतःकोपिप्रभुर्भाव्यःसएवकुत्रवर्त्तते॥३०॥एवंविवादेसंप्राप्ते
विस्मृताज्ञानमाद्यकं॥गाणेशंचित्तवांचल्यादूर्ध्वंजग्मुःप्रभावतः॥३१॥नकिंचिददृशुस्तत्राधोभा
गेप्रययुस्ततः॥एवंदशदिशोभ्रांताःपश्यंतस्तेपरस्परं॥३२॥नकिंचिददृशुस्तत्रस्थिताएकत्रतेपु
नः॥योगमार्गेणचित्तेस्वेध्यानंचक्रुःक्रमेणच॥३३॥ब्रह्माभेदस्वरूपेतेरेजुर्वैयोगभावतः॥एकी
भूताइवात्मानःशांतिंप्राप्ताःस्वभावतः॥३४॥ततस्तान्दर्शयामासयोगिध्येयमनुत्तमं॥स्वरूपं
गणराजस्यहृदयेसंस्थितंपरं॥३५॥चतुर्भुजंत्रिनेत्रंतच्छुंडादंडविराजितं॥एकदंतंशूर्पकर्णंव
क्रतुंडंमहोदरं॥३६॥रक्तवर्णंमहाकायंसिंदूरालिप्तमेवच॥नाभिशेषंकिरीटादिनानाभूषण
शोभितं॥३७॥सिद्धिबुद्धियुतंपूर्णविभूतिभिरुपासितं॥चिंतामणिंमणिंचैवदधतंहृदयेशु
भं॥३८॥प्रसन्नवदनंभक्तानुग्रहाणांप्रकारकं॥हृदिदृष्ट्वाभवंन्नेवंविस्मितास्तेसुराप्रिये॥३९॥

लामात्रंविद्यतेनैवनिश्चितं॥२०॥तस्मिन्क्षणेस्वयंशक्तिरागतामोहिनीपरा॥उवाचतांन्प्रसन्ना
मेकिमर्थंस्मरणंकृतं॥२१॥ताम्रूचुस्तेचचत्वारोदेवाःस्नेहेनभाविताः॥दर्शयस्वमहादेविऐश्व
र्यंकीदृशंत्वयि॥२२॥इत्युक्त्वासास्वरूपंयद्दर्शयामाससुंदरं॥चराचरमयंपूर्णंस्थूलसूक्ष्मादि
भिर्युतं॥२३॥दृष्ट्वारूपंतदीयंवैभ्रांतास्तेशरणंययुः॥नांतंपश्येमतेदेविरूपस्यमहतःकदा॥२४॥
सौम्यरूपातदाजाताताम्रुचुःपश्यभावतः॥अस्माकंदेविऐश्वर्यंकीदृशावयमेवच॥२५॥तेषां
वचनमाकर्ण्यज्ञानदृष्ट्याप्रपश्यति॥नांतंजगामतेषांवैनतासांतान्विशेषतः॥२६॥उवाचस्नेह
भावेननांतंपश्यामिकुत्रचित्॥भवंतोपिमहात्मानईश्वराःपूर्णभावतः॥२७॥वयंपंचसमाना
थानांतरंदृश्यतेकदा॥कःसमर्थोभवेदेवोनिश्चयोनैवदृश्यते॥२८॥गणेशमाययाभ्रांताअव
दंस्तेपरस्परं॥प्र[illegible]नुरेकश्चसर्वत्रवेदेषुपठ्यतेबुधैः॥२९॥प्रभवःपं

शिः सदात्मा त्वं पप्रच्छ तान्समाहितः ॥१०॥ किमर्थं स्मरणं देवा मदीयं कृतमादरात् ॥ तन्मे कथयतामद्या
गतोहं स्नेहतः परं ॥११॥ भानोर्वचनमाकर्ण्य प्रहृष्टास्ते त्रयो भृशं ॥ ऊचुः प्रसन्नभावेनैश्वर्यं प्रदर्शय
प्रभो ॥१२॥ तेषां श्रुत्वा गिरः सौम्यं दर्शयामास रूपकं ॥ तेजोमयमपारं यच्चराचरमयं जगत् ॥१३॥
सूर्यस्य तेजसा सर्वे निःप्रभास्ते त्रयः कृताः ॥ प्रहृतदृष्टयो जाता न शेकुर्द्रष्टुमंजसा ॥१४॥ ज्ञानदृष्ट्या
च तं दृष्ट्वा चराचरात्मकं प्रभुं ॥ अपारं भास्वरं रूपं नतास्तं स्नेहभावतः ॥१५॥ दर्शयित्वा तथात्मानं सौ
म्यरूपार्यमाभवत् ॥ तमूचुस्ते त्रयो देवानां तं पश्येम ते विभो ॥१६॥ त्वमपि पश्य चास्माकमैश्वर्यं
स्नेहभावतः ॥ तेषां तद्वचनं श्रुत्वा रविर्हृष्टो बभूव ह ॥१७॥ ज्ञानदृष्ट्या रविस्तेषामैश्वर्यं दृष्टवानपि ॥ उ
वाच प्रणतो भूत्वा विस्मितश्चेतसा भृशं ॥१८॥ भवंतोपि महात्मानो नांतं पश्यामि सर्वतः ॥ युष्मा
कमैश्वरं भावमद्भुतं दृष्टवानहं ॥१९॥ वयं सर्वेश्वराः सर्वे भगवंतः सनातनाः ॥ न्यूनाधिकं क

देत्रयोदशोध्यायः॥१३॥ ॥शिवउवाच॥शृणुदेविप्रवक्ष्यामियज्जातमद्भुतंततः॥गणेशमायामो
हेनमोहितानांचरित्रकं॥१॥शिवस्यवचनंश्रुत्वाविष्णुर्ब्रह्माणमब्रवीत्॥वरंवृणुविरंचेत्वंशिवःपु
त्रमयंप्रभो॥२॥तवपुत्रःशिवोजातस्तेनमत्पौत्रतांगतः॥उभयोःसफलंपूर्णंवांछितंजातमद्भुतं
॥३॥विष्णोर्वचनमाकर्ण्यविधिःशंकरमब्रवीत्॥ममपुत्रोभवत्वंवैवरएषवृतोमया॥४॥विष्णुना
पितदेवोक्तंतथेतिशंकरोब्रवीत्॥तवभावाद्भविष्यामिरुद्रोहमंशतोविधे॥५॥शिवस्यवचनंश्रु
त्वासंतुष्टौविधिमाधवौ॥ऊचतुःशंकरंतत्रस्नेहेनभावपूर्वकं॥६॥शिवत्वंपश्यविधिवदैश्वर्यमा
वयोःपृथक्॥तेनतुष्टौमहादेवभविष्यावोनसंशयः॥७॥तयोपादैश्वरंभावंशिवोपिज्ञानच
क्षुषा॥दृष्ट्वानांतंजगामासौतौपुनःप्रत्युवाचह॥८॥भवतोमहिमानंचापारंपश्यामिशाश्वतं॥व
यंत्रयःसमाभाव्याईश्वराःसर्वतःपराः॥९॥एतस्मिन्नंतरेतत्राजगामयोदिवाकरः॥तेजोरा

मु॰ चि॰
४२

लरूपाय त्र्यंबकाय नमो नमः ॥४२॥ उमापते नमस्तुभ्यं वृषभवाहनाय च ॥ आदिदेवाय देवाय महादेवा
यते नमः ॥४३॥ प्रसीद भगवञ्छंभो नांतं पश्यावहे विभो ॥ किंरूपः किंस्वभावस्त्वं न जानीवः कथंचन ॥
॥४४॥ दर्शयस्वात्मरूपं भो महेश्वर नमोस्तु ते ॥ येन ते भजनं देवजनाः कुर्वंति निर्भयाः ॥४५॥ तयोर्व
चनमाकर्ण्य शंभुः प्रकटमास्थितः ॥ ददर्श तु स्ततस्तंतौ हरिश्च भगवान्विधिः ॥४६॥ वामभागे स्थि
तं विष्णुं दक्षिणांगे पितामहं ॥ विश्वं चराचरं सर्वं लिंगे तत्रास्य संस्थितं ॥४७॥ अपारमहिमानं तं दृष्ट्वा
नमतुरादरात् ॥ उपसंहररूपं ते त्वमेव परमेश्वरः ॥४८॥ तयोर्वचनमाकर्ण्य हृष्टः सशंकरः प्रभुः ॥
भगवान्पूर्वरूपेण संतस्थौ वृषभध्वजः ॥४९॥ उवाच तौ महादेवो वृणुतं वरमीप्सितं ॥ दास्यामि भव
तो भावात्स्तोत्रेण तुष्टिमागमत् ॥५०॥ य एतत्पठते स्तोत्रं सकामाल्लभते खिलान् ॥ भवति मत्प्रियत्वं
हि मल्लोके ते प्रगच्छति ॥५१॥ इति श्रीमदांत्ये मौद्गले महा॰ प्रथमखंडे वक्रतुंडचरित्रे पंचदेवविवा

रामः
४२

इत्युक्तो ब्रह्मणा विष्णुस्तं प्रत्युवाच भावतः ॥ भगवन्मे वरं देहि पश्चाद्गंतुं समुत्सहे ॥ ३३ ॥ भ्रांतो ब्रह्मा
भवत्तत्र वरं ब्रूहीति सोब्रवीत् ॥ दास्यामि नात्र संदेहः प्रीतस्त्वां भावयाम्यहं ॥ ३४ ॥ विष्णुरुवाच ॥ त्वं मे
पुत्रो भव ब्रह्मन्नेष एव वरो मम ॥ तस्य तद्वचनं श्रुत्वा विस्मितो विधिरब्रवीत् ॥ ३५ ॥ वंचितोहं त्वया नूनं
संभ्रमेस्मिन्समुत्थिते ॥ दत्तो वरो यतस्तेन तत्र पुत्रो भवाम्यहं ॥ ३६ ॥ सृष्टिकाले कदा प्राप्ते त्वन्नाभि
कोशतः स्वयं ॥ देहं सृजामि योगेन पद्मजोहं तवात्मजः ॥ ३७ ॥ इत्युक्तः स हरिस्तत्र तथेति तं प्रण
म्य च ॥ प्रविष्टोधः शिवस्यापि दृष्टुं पारं महात्मनः ॥ ३८ ॥ ब्रह्मापि त्वरितो भूत्वोर्ध्वं ययौ पारलिप्स
या ॥ न तत्र पारमीशस्य प्राप्तवान्प्रपितामहः ॥ ३९ ॥ विष्णुश्च शंकरस्याधो न पारं दृष्टवानभूत् ॥ बहु
कालेन तौ तत्र गतौ सुखिन्नमानसौ ॥ ४० ॥ परस्परं विचारेण शंकरं स्तोतुमुद्यतौ ॥ बद्धांजलिपुटा
वेतौ स्तोत्रं चक्रतुरुत्तमं ॥ ४१ ॥ ब्रह्मविष्णू चतुः ॥ नमस्ते शंकरायैव नमस्ते शूलपाणये ॥ रुद्राय का

क्ताभवंत्युत ॥२३॥ तेषांकिंस्यात्प्रयाणांतान्ज्ञातव्यंस्मरतुःप्रभु ॥ तयोःस्मरणमात्रेणसं
ययुस्तत्रतेत्रयः ॥२४॥ प्रथमंप्राकृतंस्तत्रशंकरःशूलधृक्प्रभुः ॥ उक्तवांस्तौकिमर्थंमेस्मर
णंवदतंकृतं ॥२५॥ तत्रोचतुर्हरिर्ब्रह्माशृणुशंकरमेवचः ॥ तवैश्वर्यंकियन्मात्रंदर्शयस्वस
दाशिव ॥२६॥ तयोर्वचनमाकर्ण्यगर्वयुक्तःसदाशिवः ॥ उवाचक्रोधसंयुक्तोवचनंविस्म
यन्निव ॥२७॥ शिवउवाच ॥ अहंकर्ताचसर्वेषांयुवयोर्नात्रसंशयः ॥ मत्तःपरंनकिंचिद्वैज्ञात
व्यंसर्वभावतः ॥२८॥ इत्युक्त्वासस्वयंशंभुर्दर्शयामासतौवपुः ॥ ज्योतिरूपंमहालिंगंसर्वत्रसं
स्थितंपरं ॥२९॥ ततोदृष्ट्वामहाश्चर्यंविस्मितौविधिमाधवौ ॥ अधऊर्ध्वंपुरःपश्चाद्वामदक्षि
णसंततं ॥३०॥ तत्रब्रह्मास्वयंविष्णुमुवाचमधुरंवचः ॥ अधस्त्वंगच्छदेवेशऊर्ध्वंगच्छामिभावतः
॥३१॥ शिवस्यांतंप्रपश्यावःकीदृशोयंमहेश्वरः ॥ अतस्त्वंत्वरितोभूत्वाकुरुशीघ्रमिदंवचः ॥३२॥

निर्भिद्य सहसा द्वारं ययौ तेन बहिर्विधिः ॥१४॥ बहिरागत्य विष्णुं स क्रोधेन तं जगाद ह ॥ वशमानीय
मा किं त्वं स्वाधीनमिच्छसि प्रभो ॥१५॥ अहं स्वेन प्रभावेण निःसृतो योगमायया ॥ द्वाराणि पिहि
तान्येव किमर्थं वद माधव ॥१६॥ वचनं ब्रह्मदेवस्य श्रुत्वा विष्णुर्महायशाः ॥ प्रहस्य तमुवाचेत्थं
स्नेहयुक्तं समाहितः ॥१७॥ विष्णुरुवाच ॥ वशीकर्तुं विधेत्वाहमिच्छामि न जगद्गुरो ॥ द्वाराणि पि
हितान्येव मया क्रीडार्थमादरात् ॥१८॥ परस्परप्रलोलार्थं कृतं यत्प्रपितामह ॥ प्रभावं ज्ञातुका
मस्य ते पराधं क्षमस्व मे ॥१९॥ इति प्रसादितो ब्रह्मा प्रसन्नः प्राह तं पुनः ॥ क्रीडार्थं यत्त्वया विष्णो
कृतं ज्ञातं न कैर्मया ॥२०॥ अहं क्रोधसमायुक्तः संजातो ज्ञानतः प्रभो ॥ अप्रियं भाषणं विष्णो क्ष
मस्व यत्कृतं मया ॥२१॥ तवांतं नैव जानामि जठरेहं समास्थितः ॥ त्वं श्रेष्ठो मे गुरुः साक्षान्ना
त्र संशयवान्हरे ॥२२॥ भवानहमतः प्राज्ञौ श्रेष्ठौ सर्वेश्वरौ परौ ॥ शंभुः शक्तिश्च सूर्यश्च गर्वयु

जनार्दनः॥ योगमायाबलेनैव योगीशो जठरे विधेः॥४॥ ब्रह्मांडखनांतत्र दृष्ट्वा नानाविधां परां॥ ना
भिपद्मयुतं विष्णुं ददर्श पुरुषोत्तमः॥५॥ विस्मितो हृदि मोहेन किमिदमद्भुतं महत्॥ पश्यन्नांतं जगामा
सौ निःसृतो देहमध्यतः॥६॥ निःसृत्य प्रणिपत्यादौ तं विधिमवदत्प्रभुः॥ ब्रह्मन्नांतं प्रजानामि त्वदी
यं वै न संशयः॥७॥ त्वदीये जठरे हं वै स्थितस्तेन भवान्गुरुः॥ सर्वेशो नात्र संदेहः स्रष्टा त्वं स्वप्रभावतः॥
॥८॥ त्वमेव भगवन्पश्य मदीये जठरे परं॥ प्रभावं पूर्वभावेन मदीयं कीदृशं प्रभो॥९॥ नारायणवचः
श्रुत्वा ब्रह्मा विस्मितमानसः॥ योगस्यैव प्रभावेण गतस्तत्र यथारुचिं॥१०॥ विष्णोश्च जठरे तेन ब्रह्मां
डं लोकसंकुलं॥ ब्रह्माणमपरं तत्र स्थितं पश्यन्विमोहितः॥११॥ ब्रह्मानांतं जगामासौ पश्यन्पश्य
न्महामनाः॥ बहिर्गंतुं मनश्चक्रे विष्णुना मार्ग आवृतः॥१२॥ द्वाराणि योगभावेन पिहितानि स्व
मायया॥ भ्रमन्भ्रमन्स्वयं ब्रह्मा नावापमार्गमुत्तमं॥१३॥ तत्र योगबलेनापि ब्रह्मा वै पद्मनालजं॥

ल्पसिजनार्दन ॥मदधीनश्चसर्वेषांभावस्तेनाहमीश्वरः॥४४॥ब्रह्मणोवचनंश्रुत्वाविस्मितःस
जनार्दनः॥उवाचमधुरंवाक्यंब्रह्माणंसांत्वयन्निव॥४५॥विष्णुरुवाच॥सृजामिकमलंनाहं
मोहितुंत्वांपितामह॥लीलार्थंपद्ममेवेदंपश्यत्वंनात्रसंशयः॥४६॥समत्सरमिदंवाक्यंत्वयोक्तं
यत्पितामह॥अहंत्वांपालयामीहतेनसृष्टाभवान्किल॥४७॥नान्यःपातामदीयोकःसर्वेषांपात्र
भावतः॥अहंस्थितोमहाविष्णुर्मत्समंनैवविद्यते॥४८॥इतिश्रीमदांत्येमौद्गलेमहापुःप्रथमखं
डेवक्रतुंडचरित्रेब्रह्मविष्णुविवादवर्णनंनामद्वादशोध्यायः॥१२॥ ॥शिवउवाच॥शृणुदेवि
कथांपुण्यांगणेशप्रीतिवर्द्धनीं॥यज्जातमादिकालेवैतत्तेहंकथयामिच॥१॥विष्णोर्वचनमाकर्ण्य
गर्वयुक्तंप्रभावजं॥भगवांस्तमुवाचेदंवेदकर्त्तापितामहः॥२॥ब्रह्मोवाच॥विष्णोत्वंयदिमांपाता
सर्वेश्वरोमहाप्रभुः॥पश्योदरेगतोभूत्वाप्रभावंमेजगद्गुरो॥३॥ब्रह्मणोगिरमाकर्ण्यप्रविष्टोसौ

मु-पु
३९

॥३४॥ तत्रापश्चसंसृष्टाविष्णुनास्वशरीरतः॥ तत्रैवसुप्तवान्देवोबहुकालंयथासुखं॥३५॥ज
लेशैवालतीलुचिसमुत्पन्नाक्रमेणवै॥ बहुकालेनतन्मध्येपृथ्वीजातास्वभावतः॥३६॥ती
लार्थंविष्णुनासृष्टंनाभ्यांकमलमुज्वलं॥ शतयोजनविस्तारंकर्णिकापत्रशोभितं॥३७॥सुवा
सबहुलंवीक्ष्यतेनरमेजनार्दन॥३८॥ कस्मिन्कालेजगामस्मतत्रब्रह्मापितामहः॥३८॥कम
लंतेनसंदृष्टंविस्मितोहृदयेभृशं॥३९॥ केनसृष्टमिदंदिव्यंपद्मंपरमशोभनं॥३९॥तत्रनारा
यणंदृष्ट्वाप्रसुप्तंसमहार्णवे॥ प्रभुरुत्थापयामासब्रह्मातंस्नेहभावतः॥४०॥ब्रह्मणोवचनेने
वसमुत्तस्थोजनार्दनः॥ ब्रह्माणंमानयामासस्वागतंभोपितामह॥४१॥ तत्रब्रह्मामहाविष्णुंप्र
त्युवाचसमत्सरः॥ किंमोहार्थंत्वयासृष्टंपद्मंपरमशोभनं॥४२॥ अहंब्रह्माजगत्स्रष्टासर्वादिः
सर्वभावनः॥ मयाप्रक्रियतेसृष्टिःपश्चात्वंपालयिष्यसि॥४३॥ यदिसृजामिनाहंचेत्किंपा

रामः
३९

रविंदेषुगणेशचरितंबभौ ॥ भवबंधहरंपूर्णमिहामुत्रसुखप्रदं ॥ २५ ॥ चरितंगाणपत्यानांगणे
शसेवनात्मकं ॥ अहर्निशंप्रभवतिचेष्टितंढुंढिभक्तिदं ॥ २६ ॥ तरितोहंत्वयादेविकथांपृच्छसि
मांपुनः ॥ गणेशभक्तिपूतांवाभक्तानांतस्यभाविताम् ॥ २७ ॥ प्रष्टुःश्रोतुश्चवक्तुर्याब्रह्मभूतपद
प्रदा ॥ इहामुत्रवदामित्वागाणेशींसुखदायिनीं ॥ २८ ॥ पंचदेवास्तथाजातायथागणपतिःस्वयं ॥
कथयामासवरदईश्वराज्ञानभाविता ॥ २९ ॥ पंचलोकाःसमुद्भूतावरदानप्रभावतः ॥ निराधा
राअखंडाश्चावसंस्तेषुविभागशः ॥ ३० ॥ कैलासेशंकरश्चैवविकुंठेविष्णुरेवच ॥ सौरलोकेरविः
शक्तिलोकेवसज्जगन्मयी ॥ ३१ ॥ सत्यलोकेतथाब्रह्मावसतिस्ममुदान्वितः ॥ ऐश्वर्यभोगभो
क्तारःपरस्परहितेरताः ॥ ३२ ॥ सत्यसंकल्पवंतस्तईश्वराब्रह्ममानिनः ॥ बहुकालेनतेषांवैमत्स
रःसमजायत ॥ ३३ ॥ अहंश्रेष्ठतमश्चैवसर्वेषांप्रभुरीश्वरः ॥ हृदयेमन्यमानास्तेविहारंचक्रुरंजसा ॥

आदितेयन्यमूढात्मादेवादीनपिपूजति॥गणेशोहंधनेनेवक्षिप्तोनरकेवयं॥१८॥×४

समूढात्मानुविज्ञेयोनारकीनात्रसंशयः॥१९॥अन्यदेवस्यभक्तागणेशंनार्चयंतिचेत्॥तेषांन
भवित्तासिद्धिर्नरकेषुपतंतिते॥२०॥अमृतंस्यज्जरुस्यान्नंयथासेवतेदुर्मतिं॥गणेशंचत्तथा
त्यज्यान्यस्यदेवस्यसेवनं॥२१॥अस्माकंजनकोमातासर्वेषांनात्रसंशयः॥ज्येष्ठराजइतिख्या
तस्तेनादिपूज्यकोभवत्॥२२॥गणेशनिंदकोजंतुरस्माकंभक्तिकारकः॥नारकीभवितासद्योस्म
द्रुद्वेषकारकात्॥२३॥अतस्त्वधन्यरूपासिसर्वेषांमूलबीजकं॥भजिष्यसिगणेशानंभक्तिभा
वसमन्विता॥२४॥सत्यंदेवित्वयाप्रोक्तंगणेशानांत्रकीर्तनं॥गणेशस्यचवाक्यंतेनजन्मकृ
तार्थकं॥२५॥गणेशंप्रार्थयामीरुक्मिणिचिंतामणेप्रभो॥चित्तेनिवासकारिलंगजाननमहादरा॥
॥२६॥गाणपत्यामहाभागास्तेषांसंगोसदास्तुमे॥तेषांमध्येतथावासोदेहिलंबिरदानन॥
अग्रेमेगाणपत्यास्तेपृष्ठेवामेचदक्षिणे॥सर्वत्रसरतेवासोगाणपत्येभवंतुमे॥२८॥येषांसुखा

थोवाचतथाशृणुमहामुने॥५॥मुद्गलउवाच॥शृणुदक्षमहाभागपार्वत्याशिवसन्निधौ॥
यत्पृष्टंयच्छ्रुतंसर्वंकथयामिसविस्तरं॥६॥पार्वत्युवाच॥भगवन्देवदेवेशतारितास्त्वया
विभो॥गणेशामृतपानेनकृतकृत्यास्मिसांप्रतं॥७॥पंचदेवाःसमर्थाश्चप्राभवन्वरदानतः॥
किंचक्रुस्तेमहात्मानःकथयस्वविधानतः॥८॥गणेशभक्तियुक्तंचेच्चरितंकथयस्वमे॥अथवा
गाणपत्यानांचरितंब्रह्मदायकं॥९॥व्यर्थसंलपनेनायुर्नाशोकृतोनशोभते॥धन्यास्तेसा
धवोलोकेगणेशभक्तिभाविताः॥१०॥मुद्गलउवाच॥प्रियायावचनंश्रुत्वातिहृष्टःसमहेश्व
रः॥उवाचस्मयमानश्चालिंग्यदेवींमहायशाः॥११॥शिवउवाच॥धन्यासिपार्वतीत्वंचसार्थकं
जन्मतेपरं॥भक्त्याधृतोगणेशोयंहृदितेनवरानने॥१२॥गणेशभक्तियुक्तायेनरास्तेब्रह्मरूपिणां॥
दर्शनान्मुक्तिदातारःसर्वेभ्योनात्रसंशयः॥१३॥गणेशंयःपरित्यज्यसिद्धिमिच्छतिशाश्वतीं॥

मु॰पु॰
३७

इष्यसि॥७४॥ महत्कार्येसमुत्पन्नेप्रत्यक्षोहंभवामिवै॥मत्तुल्याःसर्वभावेनकृतादेवानसंशयः॥७५॥शि
वउवाच॥इतिदत्वावरान्देवोगणेशोंतर्दधेस्वयं॥तेपिहृष्टानिजात्मानंकृत्यकृत्यंप्रमेनिरे॥७६॥आ
युधंभूषणंश्रेष्ठंनानासामर्थ्यमद्भुतं॥संकल्पसिद्धितांचैवतेभ्योददौगणाधिपः॥७७॥भजतांभक्ति
भावेनकामपूराःकृतावयं॥परमेश्वरतांप्राप्ताःप्रसादाद्गणपस्यच॥७८॥ ॥इतिश्रीमदांत्येमौद्ग
लेमहापु॰वक्रतुं॰पंचदेववरदोनामैकादशोध्यायः॥ ॥शौनकउवाच॥सूतसूतमहाप्राज्ञपरमा
नंददायक॥कथाममृतरूपांचकथयत्वंमहाद्युते॥१॥वयंप्रसन्नतांयाताःकृतकृत्यायथातथा॥
गणेशामृतपानेनह्यानंदेनपरिप्लुताः॥२॥कथयस्वकथांदिव्यांपंचदेवैश्चकिंकृतं॥विस्तारेणय
थान्यायंयेनमुक्ताभवामहे॥३॥श्रुत्वातेषांमुनीनांचवचनंभक्तिभावितं॥हृष्टःसूतःपुनःप्राह
कथांपापप्रणाशिनीं॥४॥सूतउवाच॥एवमेवसदक्षेणपृष्टोयोगीश्वरोमहान्॥मुद्गलस्तंय

रामः
३७

समुद्भवः॥पालकः सर्वलोकानां विष्णुर्नामाभविष्यसि॥६५॥विकुंठेवसतिःप्राप्यवाहनंगरुडस्त
व॥नानावतारवांश्चापिभविष्यसिमहाबलः॥६६॥पंचवक्त्रमहातेजस्तमोगुणसमुद्भवः॥सं
हारकारकोनित्यंहरनामाभविष्यसि॥६७॥कैलासेवसतिस्तेस्तुवाहनंवृषभस्तथा॥तृतीये
नस्वनेत्रेणसर्वंभस्मकरिष्यसि॥६८॥सहस्रकिरणत्वंवैसूर्यनामाभविष्यसि॥कर्मणांचाल
कत्वात्षडृतुधर्मप्रकाशकः॥६९॥त्रिगुणानामहंभावत्वंजातोसिप्रकाशक॥रथोश्वालंकृत
श्चापिवाहनंतेनसंशयः॥७०॥सौरलोकेनिवासश्चग्रहराजोभविष्यसि॥वृष्टिमूलंत्वदाधारं
तेजोराशिःप्रतापवान्॥७१॥चतुर्भुजेमहाशक्तेत्वंजातासित्रिदेहतः॥नानाविषयभोगेनदेहा
र्थंमोहकारिणी॥७२॥शक्तिनाम्नीमहामायाभविष्यसिनसंशयः॥द्विधामोहप्रदात्रीत्वंभुक्तिमु
क्तिभ्रमात्मिका॥७३॥सिंहवाहनगामित्वं शक्तिलोकनिवासिनी॥नानाभेदविमोहेनजगत्त्वंमोह

गणेशायपरेशायह्यपारगुणकीर्त्तये॥योगशांतिप्रदात्रेचमहायोगायतेनमः४

यपरेशायनेतिनेतिमयायच॥शिवायशाश्वतायैवमोहहीनायतेनमः॥४४॥संयोगेनचसर्वत्रस
माधिरूपधारिणे॥स्वानंदायनमस्तुभ्यंमौनभावप्रदायिने॥४५॥अयोगायनमस्तुभ्यंनिरालं
बस्वरूपिणे॥मायाहीनायदेवायनमोवैह्यसमाधये॥४६॥शांतिदायनमस्तुभ्यंपूर्णशांति
प्रदायते॥योगानांपतयेचैवयोगरूपायतेनमः॥४७॥गुणांतंनययुर्यस्यवेदाद्यावेदकारकाः॥
सकस्यस्तवनीयस्याद्यथामतिस्तुतस्तथा॥४८॥तेनवैभगवान्साक्षाच्चिंतामणिर्गजाननः॥
प्रसन्नोभवतुत्रातास्माकंत्वंपरमांगतिः॥५०॥इत्येवमुक्त्वादेवेशास्तूष्णींभूतास्तथाशिवे॥गणेशो
पिप्रसन्नात्माहृष्टःसन्प्रत्युवाचतान्॥५१॥गणेशउवाच॥पंचदेवामहाभागाःप्रसन्नोभवतांस्त
वैः॥तपसाचतथाभक्त्यावांछितंब्रूतवैवरं॥५२॥भवत्कृतमिदंस्तोत्रंपरमाल्हादवर्द्धनं॥ममप्रीतिक
रंभक्त्यासर्वदंप्रभविष्यति॥५३॥यःपठेद्भावपूर्वंसधर्मार्थकाममोक्षभाक्॥पुत्रपौत्रयुतःश्रीमा

कृतांजलिपुटाजगुः ।५२।। पंचदेवाऊचुः ।। सनाथाहिवयंजाताः सर्वेत्वय्यागतेप्रभो ।। वरंदेहिगणाधीशं ५

मु॰पु॰ ३६

नंतेस्वानंदमाप्नुयात् ।।६४।। सप्तवारंपठेन्नित्यमेकविंशतिवासरं ।। काराग्रहगतोवापिमुच्यतेबंध
नात्स्वयं ।।५५।। एककालंद्विकालंवात्रिकालमपियःपठेत् ।। सवैदेवादीनांवंद्योभविष्यतिनसंश
यः ।।५६।। मारणोच्चाटनादिभ्यएकविंशतिवारतः ।। तावद्दिनानिपाठेनतेभ्योनैवभयंभवेत् ।।५७।।
धनधान्यादिकंसर्वमारोग्यंपशुवर्द्धनं ।। यंयंचिंतयतेकामंतंतंप्राप्नोतुनिश्चितं ।।५८।। शिवउवाच ।।
गणेशवचनंश्रुत्वाहृष्टाविष्ण्वादयःसुरा ।। प्रणिपत्यगणाधीशंतवभक्तिदृढात्मकं ।।५९।। तेनमा
यानबध्येतनरान्देवानपिप्रभो ।। किंचास्माभिःप्रकर्त्तव्यंतदाज्ञापयसर्वदा ।।६१।। सामर्थ्यंविविधंदेहि
भजतांकामपूर्वकं ।। स्थानंनामसदानंदंदेहिनाथनमोस्तुते ।।६२।। गणेशउवाच ।। चतुर्मुखमहा
बाहोरजोगुणसमुद्भवः ।। सृष्टिकर्त्ता[illegible]भवत्वंवैब्रह्मानाम्नामहद्युते ।।६३।। सत्यलोकेनिवास
स्तेहंसवाहनवान्भव ।। वेदादिज्ञानयुक्तश्चसर्वेषांत्वंपितामहः ।।६४।। चतुर्भुजोसिदेवेशसत्वात्वंवै

राम॰ ३६

वः॥ तत्रैश्वर्यं मया दृष्टं त्वदीयं महदद्भुतं॥४३॥ पंचानां बोधको देवो गणेशोंतर्दधे प्रिये॥ बोध इत्याय
थान्यायमस्मान्ब्रह्ममयः प्रभुः॥४४॥ ततो मया तपस्तप्तं त्वदीयप्रापकं महत्॥ भक्तिभावेन संतु
ष्टा त्वं जाता शतवर्षतः॥४५॥ मत्समीपे समागम्य वृणु वरमभीप्सितं॥ प्रसन्नाहं महादेव दास्यामि
भाषितं त्वया॥४६॥ त्वां न त्वास्तु तवान्नानाचेष्टितैस्त्वत्स्वरूपकैः॥ तेन तुष्टिपरा जाता तवापि जगदी
श्वरी॥४७॥ मया प्रयाचितं देवि त्वं मे पत्नी भव प्रिये॥ एष एव वरो मह्यं दातव्यो जगदीश्वरी॥४८॥ मदी
यवचनं श्रुत्वा विस्मिताभावपूर्वकं॥ जाता त्वं मे वरं दत्वांतर्द्धानं कृतखे गता॥४९॥ अतस्त्वं मे प्रिया जा
ता वरदानप्रभावतः॥ तव वामांगसंभूता लक्ष्मीर्नारायणप्रिया॥५०॥ दक्षिणांगात्समुद्भूता सावि
त्री ब्रह्मणः प्रिया॥ हृदयात्ते च संभूता संज्ञा पत्नी रवेरपि॥५१॥ इति सर्वं समाख्यातं स्मर सर्वं शुचिस्मि
ते॥ साधय त्वं पुनर्योगं गणेशं शांतिदं परं॥५२॥ मुद्गल उवाच॥ शिवेन कथितं सर्वं श्रुत्वा देवी

मु॰पु॰
५०

नगात्मजा॥ एकांते साधयामास योगं गणपतेः परं॥५३॥ पूर्वसंस्कारभावत्वात्स्वल्पकालेन सा शिवा॥
शांतिं प्राप्ता महाभागा प्रययौ शिवसन्निधौ॥५४॥ मुद्गल उवाच॥ इति ते कथितं दक्षचेष्टितं गणप
स्य च॥ भज त्वं सर्वभावेन गणेशं ब्रह्मनायकं॥५५॥ तेन त्वं विघ्नहीनोपि भविता त्र न संशयः॥ सर्व
मान्यो महायोगी शोकहीनो जगद्गुरुः॥५६॥ इति श्रीमदांत्ये मौद्गले॰ प्रथमचरित्रे वक्रतुंडचरित्रे पा
र्वतीशिवसंवादे समाप्तिवर्णनं नाम सप्तदशोध्यायः॥१७॥ ॥शौनक उवाच॥ शृणु सूत महाभा
ग कथितं परमाद्भुतं॥ चरितं गणनाथस्य तेन तृप्ता वयं विभो॥१॥ शिवशक्तिमहावादं श्रुत्वा तृप्ता
विवर्द्धते॥ पुनश्च वद सूत त्वं गणेशचेष्टितं महत्॥२॥ सूत उवाच॥ शृणु शौनक यत्नेन दक्षेणैव
महामुनिं॥ गणेशामृतपानं च कृत्वा पृष्टो वदामि यत्॥३॥ [illegible] उवाच॥ शृणु शौनक यत्नेन दक्षे
णैव महामुनिं॥ गणेशामृत [illegible] शंकरशक्तिसंवादं ब्रह्मभूतपदप्रदं॥ श्रुत्वा दक्षो महाभागः पप्र

रामः
५०

मुनिसत्तमं॥४॥दक्षउवाच॥किंचित्पुरातनंपुण्यंफलितंमेमहाद्भुतं॥तेनमुद्गलतेवक्त्राच्छ्रु
तंकथामृतंमया॥५॥धन्योसिकृतकृत्योसिगणेशेभक्तिमानसि॥गणेशाच्चपरंनास्तिज्ञातंत
द्वाक्यतोमया॥६॥वदमुद्गलमाहात्म्यंपुनर्गणपतेःशुभं॥नतृप्तोहंमहायोगिन्पीत्वाब्रह्मा
मृतंमहत्॥७॥शिवशैलसुतावादोमहदानंददायकः॥तत्राष्टौगणराजस्यह्यवताराःश्रुता
मया॥८॥तेषांतेचरितंचापिमाहात्म्यंयादृशंमहत्॥श्रोतुमिच्छामियोगीशदयांकृत्वावदस्वमे
॥९॥किमर्थंगणराजोयमवतारंकरोतिवै॥ब्रह्मभूतमयोदेवस्तद्वदस्वमहामुने॥१०॥परोपका
रणार्थायत्वादृशामुनिसत्तमाः॥भ्रमंतिधरणींब्रह्मन्यतितेभ्यःसुखप्रदाः॥११॥दर्शनस्पर्श
नेनैवभाषणेनविशेषतः॥पावयंतिजनान्सर्वान्साधवःसमदर्शिनः॥१२॥सूतउवाच॥श्रुत्वा
दक्षवचोरम्यंतंप्रत्युवाचमुद्गलः॥प्रहृष्टोभावयुक्तस्यदक्षस्यचमहात्मनः॥१३॥मुद्गलउवाच॥

मु॰पु॰
५२

शृणु दक्ष महाभाग धन्योसि नात्र संशयः॥ येन त्वं गणनाथस्य कथां पृच्छसि मां प्रभो॥२४॥
पापीनां नास्तिकानां वैदांभिकानां कदाचन॥ गणेशामृतपानस्य स्वेच्छा नोत्पद्यते क्वचित्॥२५॥
द्वंद्वभावविचारज्ञास्तयोः सहनकारकाः॥ भूतेषु समभावश्च संसारतरणे रताः॥२५॥ परोपकारका
र्येषु मतिस्तेषां प्रवर्त्तते॥ एतादृशा महाभागा गणेशे सादराः प्रभो॥२७॥ कथां गणपतेर्नित्यं शृ
ण्वंति च पठंति ते॥ श्रावयंति जनानन्यान्भक्तिभावसमन्विताः॥२८॥ अतस्त्वं सादरो भूत्वा शृणो
षि पापनाशनीं॥ कृत्वा वर्द्धयसि प्रश्नं कथां गणपतेः शुभां॥२९॥ शृणु यच्च पुरा वृत्तं मदीयं भाव
पूर्वकं॥ तवाग्रे कथ इष्यामि संशयो येन नश्यति॥३०॥ कथामवताररूपां वै ज्ञास्यसि त्वं यथार्थ
तः॥ गाणपत्यपदं सर्वं प्राप्स्यसि सर्वथा भवान्॥३१॥ अहं तपसि संविष्टः शीलोंछवृत्तिमाश्रितः॥
दशपंचदिनेषु वै द्वादश्यां पारणं भवेत्॥३२॥ द्रोणमात्रं चिनोमि चान्नमुपोषितवांस्ततः॥ तेनान्ने

रामः
५२

नयथान्यायंपंचभागान्ददाम्यहं॥२३॥एवंबहुगतेकालेतपसिमयिसंस्थितः॥देवाःसर्वेभयोद्वि
ग्नाःकिमयंसाधइष्यति॥२४॥ऐंद्रंपदंविधातुर्वावैष्णवंशैवमेवच॥किंवांछतिमहाभागोमुनिस्त
पसिसंस्थितः॥२५॥देवैःसंप्रेषितस्तत्रमुनिःसर्वार्थकोविदः॥ममाश्रमेपरिक्षार्थंदुर्वासाकोप
वान्ययौ॥२६॥नग्नउन्मत्ततुल्यःसन्नागतःपारणस्यमे॥भिक्षांदेहिमुनेमह्यंयथातृप्तोभवाम्य
हं॥२७॥भावयुक्तंमयादत्तमन्नंतस्मैमहामुने॥नज्ञातोमुनिमुख्योयंदुर्वासाआगतोग्रहं॥२८॥
तेनान्नंसकलंभुक्तंद्रोणमात्रंमहात्मना॥उच्छिष्टंलिप्तवान्देहेगतोविकलवद्यथा॥२९॥मनसि
मेमहानंदःप्राप्तोदक्षप्रजापते॥धन्यंतपोमदीयंवैतृप्तसर्वान्नभुक्जनः॥३०॥उपोषणैःसमा
युक्तोहंतत्रतपसिस्थितः॥पुनःसद्वादशींप्राप्यपारणार्थंसमाययौ॥३१॥दुर्वाससंपुनर्यातंता
दृशंवेषमास्थितं॥महताहर्षयुक्तेनपूजयामिमहामुनिं॥३२॥सर्वान्नंभुक्तवान्सद्योएवंषड्वार

माययौ॥ममभावपरिक्षार्थंतपःखंडनकारकः॥३३॥पूर्वपुण्यप्रभावेणव्यविहीनोहमण्यपि॥त्रिमा
सोपोषितोभावयुक्तेनतपसाभवं॥३४॥तपसाभावशुद्धेनपरितुष्टोमहामुनिः॥स्वरूपंदर्शयामास
योगरूपंमहाद्भुतं॥३५॥उवाचशुद्धिमापन्नोमुद्गलत्वंनसंशयः॥गच्छस्वर्गंमहाभागअक्षयंभोक्तु
मर्हसि॥३६॥स्वर्गलोकाजिताःसर्वेत्वयाक्षय्यप्रकारिताः॥तपसाशुद्धभावेनाधुनातान्गच्छमु
द्गल॥३७॥इत्युक्त्वाचैवदुर्वासागतःस्वाश्रममंडले॥तस्मिन्नेवक्षणेस्वर्गाद्विमानंतत्रचागतं॥३८॥
विमानात्पुरुषोदिव्यभूषणैर्भूषितःपरः॥उत्तीर्यमेसुसान्निध्यमागतःपूजितोमया॥३९॥स्व
र्गादागतवंतंवैविद्धिमुद्गलमांतथा॥उवाचमधुरंवाक्यंचलत्वंचमयासह॥४०॥बृहस्पतिपु
रोगःसदेवैरिंद्रःप्रतापवान्॥त्वदर्थंसंस्थितःस्वामिंस्तेनाहंप्रेषितोमुने॥४१॥इदंविमानमा
रुह्यनानाभोगसमन्वितं॥मयासार्द्धंमहाभागचलस्वर्गंसुभोगदं॥४२॥सूतउवाच॥देवदूत

वाचेाम्यंश्रुत्वासमुद्गलोमुनिः॥विनयावनतोभूत्वातंपप्रच्छमुदान्वितः॥४४॥सूतउवाच॥मु
द्गलस्यवचःश्रुत्वादेवदूतस्तमब्रवीत्॥विनयेनचसंतुष्टोयथातथ्यंविभागशः॥४५॥देवदूतउ॥
कर्मभूमिरियंब्रह्मन्भोगभूमिश्चसामता॥स्वर्गरूपानरादीनांकर्मभोगप्रदायिनी॥४६॥नाना
सुखप्रदास्तत्रगुणावक्तुंनशक्यते॥ईप्सितंलभतेसर्वंसदायौवनसंस्थितिः॥४७॥क्लमःस्वेदा
दिकंतत्रनैवशीतोष्णतातथा॥अप्सरादिविहाराश्चकामरूपागतिर्भवेत्॥४८॥स्वकर्मतुल्यगा
न्भोगान्भोक्तव्यासर्वभावतः॥येयेभोगाःशरीरिणांतेतेतत्रसमास्थिताः॥४९॥भोगभूमिःसमा
ख्यातास्वर्गरूपामहामुने॥वेदेतत्रचकिंन्यूनंयेनपृच्छसिमांप्रभो॥५०॥त्वयानानाविधंकर्मतप
सासाधितंमुने॥स्वर्गलोकाःकृताःसर्वेक्षयास्तान्भोक्तुमर्हसि॥५१॥तत्रस्वर्गेत्रयोदोषातान्शृणु
ष्वमहामुने॥इहकर्मकृतंलोकैर्भोक्तव्यंशुभरूपकं॥५२॥तत्रकर्मकृतंलोकैस्तदेवफलहीनकं॥ते

मु०पु०
५३

नशोकोमनस्यस्तितदंतोकिंभविष्यति॥५३॥एतादृशंमयाकर्मपुण्यरूपंकृतंमहत्॥तेनचैताव
त्कालोमेस्वर्गवासोभविष्यति॥५४॥एकंदोषंमहांतंतंजानीहिमुनिसत्तम॥द्वितीयंशृणुदोषत्वं
कथयामिसविस्तरं॥५५॥नानास्वर्गेषुमित्राणिनानाप्रीतिविवर्द्धनाः॥देवास्तत्रमहाभागतैः
सहमोदतेस्वयं॥५६॥सत्कर्मतस्यतेनैवभुक्तंस्वर्गेयथातथं॥पश्चात्पतनकालेषुतमधःपात
यंतिते॥५७॥क्षिणमेकंनकोपितंस्नेहंपश्यतिलोकपः॥पतनस्यभयंचित्तेदोषोयंपातरूप
कः॥५८॥तृतीयंदोषरूपंतच्छृणुत्वंभावरूपकं॥तद्वदिष्यामितेप्रीत्यायेनज्ञानंभवेत्परं॥५९॥
सत्कर्मकारिणस्त्वन्येमहाभोगकरामुने॥अनेकाःसंतिस्वर्गेषुतान्दृष्ट्वातपतिस्वयं॥६०॥धिङ्मां
न्यूनविहारेणतिष्ठामिस्वल्पपुण्यतः॥महापुण्यकराअन्येअधिकाविहरंत्युत॥६१॥सदाहृदि
तपत्येवंस्वर्गभूमिस्वभावतः॥हृदितापात्मकोदोषस्तृतीयःकथितोमया॥६२॥अनंतगुणसं

रामः
५३

युक्तंस्वर्गंजानीहितापस॥ दोषैस्त्रिभिःसमायुक्तंमहापुण्येनप्राप्यते॥६३॥ धन्यस्त्वंमुनिशार्दू
लतत्स्वर्गंविजितस्त्वया॥ भुंक्ष्वभोगान्मनोज्ञान्वैचलशीघ्रंमयासह॥६४॥ ॥इतिश्रीमदांत्ये
मौ॰ प्रथमखंडेवक्रतुंडचरित्रेमुद्गलदेवदूतसंवादोनामाष्टादशोध्यायः॥१८॥ सूतउवाच॥
देवदूतवचःश्रुत्वामुद्गलस्तमथाब्रवीत्॥ शृणुशौनकमहात्म्यंमुनेस्तस्यसुयोगिनः॥१॥ मु
द्गलउवाच॥ देवदूतमयासर्वंत्वयोक्तंबुद्धिपूर्वकं॥ श्रुतंपुनःपप्रच्छामितन्मेवदमहामते॥२॥
दोषैस्त्रिभिर्विहीनंतंकंलोकंवदमेप्रभो॥ मनस्तापविहीनेनमोदंतेयत्रमानवाः॥३॥ सूतउवाच॥
मुद्गलस्यवचःश्रुत्वादेवदूतउवाचह॥ तंप्रतितदहंतुभ्यंकथयामिसविस्तरं॥४॥ देवदूतउवाच॥
निष्कामकर्मणाविप्रब्रह्मलोकंप्रलभ्यते॥ विकुंठःशिवलोकश्चसौरःशाक्तोजनेनच॥५॥ तत्रा
पिदोषयुक्तत्वंवर्त्ततेमुनिसत्तम॥ ब्रह्मभूतपदंयच्चदोषहीनंप्रचक्षते॥६॥ देवदूतमुखादित्थंश्रु

त्वासमुद्गलोमुनिः॥तंपपृच्छपुनःसाधुर्भक्तिनम्रात्मकंधरः॥७॥मुद्गलउवाच॥कुत्रतल्लभ्यतेस्वामि
न्वदसर्वमशेषतः॥उपकारपरोसित्वंतेनपृच्छामितत्वतः॥८॥देवदूतउवाच॥कर्मभूमिरियंब्रह्मन्न
त्रैवलभ्यतेजनैः॥धर्मार्थकाममोक्षाश्चब्रह्मभूतंनसंशयः॥९॥श्रुत्वातस्यवचोरम्यंमुद्गलस्त
मुवाचह॥गच्छदूतनमस्तुभ्यंस्वर्गंप्रतिनयाम्यहं॥१०॥हृदिसंतापसंयुक्तंपुनःपातभयात्मकं॥
स्वर्गंनेच्छामिभोविद्वन्ब्रह्मतत्साधयाम्यहं॥११॥देवदूतउवाचेदंमुद्गलंमुनिसत्तमं॥भाग्यहीनो
सिनूनंत्वंस्वर्गंनैवाभिनंदसि॥१२॥स्वर्गेच्छाकस्यनैवास्तिनरस्यवदमामुने॥उग्रैस्तपोभिर्दानैश्चय
ज्ञैःस्वर्गश्चप्राप्यते॥१३॥नानापुण्यादिकंकृत्वासत्कर्मादिसुसाधनैः॥स्वर्गमिच्छंतिमनुजामहासु
खप्रदंपरं॥१४॥सस्वर्गश्चत्वयाप्राप्तस्तपसोग्रसुसाधनैः॥नेच्छसित्वंमहामूढज्ञानहीनोसिमेम
तं॥१५॥देवदूतंवदंतंचैवंतंपुनरिदंवचः॥मुद्गलःस्नेहयुक्तंतत्प्रत्युवाचहसन्निव॥१६॥मुद्गल

उवाच॥ किं मां मोहयसि प्राज्ञ देहोयं बंधनात्मकः॥ देहसौख्यकरं स्वर्गं न मुक्तिदं बुधैः स्मृतं॥१७॥
तत्रापि हृदि संतापो वर्त्तते दूतसत्तम॥ तापत्रयसमायुक्तं विद्वान्नेच्छति कर्हिचित्॥१८॥ गच्छ त्वं
च महाभाग बृहस्पतिपुरोगमं॥ इंद्रायनमनं मेघ कथयन्नागतो मुनिः॥१९॥ एवमुक्त्वा नमस्कृत्य
देवदूतमहं प्रभो॥ अग्निशालां च गतवान्गतो दूतो यथागतं॥२०॥ मयापि स्वाश्रमे तत्र स्थितं मनसि
धारितं॥ विधिना ब्रह्मवेदेषु नानारूपं प्रकथ्यते॥२१॥ किं प्रमाणं भवेत्तेषां साधनीयं मया कथं॥
पूर्णभावमविज्ञाय भ्रांतोहं नात्र संशयः॥२२॥ अतः संशयनाशार्थं गमिष्यामि महामुनिं॥ अंगि
रसं च योगीनां वंद्यं वेदज्ञमुत्तमं॥२३॥ शब्दब्रह्मणि निष्णातं परे ब्रह्मणि तन्मयं॥ पुरुषं मूलम
स्माकं साक्षाद्ब्रह्मशरीरकं॥२४॥ इति निश्चितवांस्तत्र गतोहं मुनिसंनिधौ॥ आश्रमोस्य मया दृष्टः
सर्वभूताभयप्रदः॥२५॥ नातपो न च शितत्वं न क्रोधकामसंभवः॥ न मात्सर्यादिकं तत्र समकालमयो

मु॰पु॰
५५

बभौ॥२६॥नावृष्टिर्नातिवृष्टिश्चह्यकालेमरणंनच॥नग्रहादिकृतापीडातत्ररक्षोभयंनच॥२७॥सर्वशांति
प्रदःपूर्णस्तापसानांहितावहः॥विस्मितेनसुपुण्येनप्रविष्टोभाग्ययोगतः॥२८॥तत्रनानामुनीनांच
वाचाःपरमशोभनाः॥मयादृष्टामहाभागवेदघोषनिनादिताः॥२९॥अग्निहोत्रादिभिर्युक्तानानाप
क्षिनिनादिताः॥वृक्षवल्लीसमायुक्तानानापुष्पफलाश्रिताः॥३०॥नानासरोवराण्येवहंसकारंडवै
र्बभुः॥नानापक्षिवृतानिचसुधारूपजलानिवै॥३१॥सुनिर्मलपयांसिचमकरादियुतानिच॥कमलैः
कुमुदैस्तत्रशोभमानानिषट्पदैः॥३२॥सिंहव्याघ्रमृगानागागजागावश्चमूषकाः॥निर्वैराःप्रा
णिनस्तत्रवसंतिचप्रजापते॥३३॥एवंदृष्ट्वामहाभागआश्रमेहर्षसंयुतः॥पश्यंपश्यंश्चह्यभवंवि
स्मितोनिजचेतसि॥३४॥तत्रकुशासनस्थितंसाक्षात्सूर्यंइवापरं॥तेजसादीप्यमानंतंपश्याम्यंगि
रसंमुनिं॥३५॥सिद्धैर्नानाविधैश्चैवयोगिभिर्मुनिभिर्वृतं॥शिष्येभ्योब्रह्मविद्यांतांकथयंतंयथा

रामः
५५

र्थतः॥३६॥दंडवत्तंप्रणम्यादौभक्तिभावयुतोभुवं॥प्रांजलिःप्रयतोभूत्वासंस्थितोमुनिसन्निधौ॥३७॥
तवगोत्रभवंस्वामिन्मुद्गलंमुनिसत्तम॥दर्शनार्थंसमायांतंविद्धिमांब्रह्मदायक॥३८॥मदीयंवच
नंश्रुत्वाप्रसन्नःप्राहमांमुनिः॥वत्सत्वमागतस्तातनिष्ठात्रमेप्रसन्निधौ॥३९॥अविघ्नभावयुक्ते
नतपस्तप्तंत्वयासुत॥तेनमेदर्शनंजातंसत्पुत्रोसिनसंशयः॥४०॥मुनेर्वचनमाकर्ण्यप्राप्तोहंप
रमांमुदं॥तत्रस्थितंमयादक्षसन्निधौतस्यधीमतः॥४१॥कस्मिंश्चदिवसेयोग्यंलब्ध्वावसरमुत्तमं
॥पृष्टोमयामहायोगीशृण्वत्सुचमुनिष्वपि॥४२॥ज्ञप्तुमिच्छामिभोस्वामिन्वदमांकरुणानिच॥
त्वमस्माकंगतिःसाक्षात्सर्वेषांचैवभक्तितः॥४३॥सूतउवाच॥वचनंमुद्गलस्यापिश्रुत्वातंपुनरब्र
वीत्॥अंगिराभगवान्योगीयोगिनांमांप्रहर्षयन्॥४४॥अंगिराउवाच॥तातपृच्छसिकिंमह्यंतद्ब्रू
हित्वंमहाद्युते॥भवितामंत्रकर्त्तात्वंपुराणाचार्यतात्वयि॥४५॥मुद्गलउवाच॥कथितंब्रह्मवेदेषुना

मु॰पु॰
५६

नानाभावसमन्वितं॥ किं प्रामाण्यं प्रकर्तव्यं ब्रह्मभूतेष्वभिः प्रभो॥४६॥ अंगिरा उवाच॥ शृणु पुत्र प्रवक्ष्या
मि वेदार्थैर्भाषितं यथा॥ क्रमेण ब्रह्मप्राप्त्यर्थं नानाब्रह्मनिरूपणं॥४७॥ अन्नं ब्रह्मेति यत्प्रोक्तं तत्रो
पाधिः समागतः॥ अन्नरूपो महातेजा अन्नकोशमयं ततः॥४८॥ प्राणो ब्रह्मेति यत्प्रोक्तं प्राणको
शप्रकाशकं॥ मनो ब्रह्मेति जानीहि मनःकोशमयं तथा॥४९॥ विज्ञानं ब्रह्म यत्प्रोक्तं महाकार
णवाचकं॥ आनंदो ब्रह्म सामान्यमानंदकोशभासकं॥५०॥ चैतन्यं ब्रह्म यत्प्रोक्तं महाकारणवा
चकं॥ विद्ध्वं ब्रह्म यदुक्तं तत्ज्ञानदेहमयं मुने॥५१॥ चिद्ब्रह्मेति समाख्यातं सोहं मात्रात्मकं मतं॥ बोधो
ब्रह्मेति वेदेषु ह्यसद्रूपप्रकाशकं॥५२॥ सांख्यं ब्रह्मेति यत्प्रोक्तं विदेहवाचकं सुत॥ कर्मज्ञानेति वेदे च क
थितेनेतदात्मिके॥५३॥ समं ब्रह्मेति जानीहि कथितं नंदनात्मकं॥ अव्यक्तं सहजं ब्रह्म ज्ञातव्यं ने
तिरूपकं॥५४॥ शक्तिर्ब्रह्मेति वेदेषु ह्यसद्रूपप्रकाशकं॥ सूर्यो ब्रह्मेति यत्प्रोक्तमात्मरूपं प्रकी

रामः
५६

कीर्त्तितं ॥ विष्णुर्ब्रह्मेतियत्प्रोक्तमुभयात्मकवाचकं ॥ शिवोब्रह्मेतिशास्त्रेषुनिर्मोहस्यप्रकाशकं ॥ ५६ ॥
स्वानंदोब्रह्मवेदेचसंयोगोभयमुत्तमं ॥ निर्वृत्तिर्ब्रह्मशास्त्रेषुह्ययोगवाचकंपरं ॥ ५७ ॥ एवंनानाप्रका
रैश्चवेदादिषुप्रकथ्यते ॥ मुनिभिर्ब्रह्मवादिभिःसर्वंतथ्यंप्रमाणतः ॥ ५८ ॥ बृंहतिबृंहयतियद्ब्रह्मेति
श्रुतिवाक्यतः ॥ तदेवब्रह्मभूतत्वंज्ञातव्यंमुनिभिःसदा ॥ ५९ ॥ अन्नाद्यात्मचिदाद्यैर्यद्युक्तंब्रह्मप्र
कथ्यते ॥ तदेवोपाधियुक्तंवैयोगिभिःसुविचारितं ॥ ६० ॥ ब्रह्मेतिब्रह्मविज्ञेयंतत्रयोगेनप्राप्य
ते ॥ तदर्थंमथनंसर्वंकर्मज्ञानादिकंसुत ॥ ६१ ॥ तदेवंब्रह्मप्रत्यक्षंब्रह्मणस्पतिवाचकं ॥ ब्रह्म
णांब्रह्मविख्यातंवेदेश्रुतिसमन्वितं ॥ ६२ ॥ बृंहतिबृंहयतियद्गणशब्दःप्रकीर्त्तितः ॥ समूहेचग
णोधातुःकविभिःकथितोभवत् ॥ बाह्यांतरादिकानांचसमूहेगणउच्यते ॥ तत्राभेदेनयोगेन
प्राप्यतेयोगिभिःपरः ॥ ६४ ॥ अन्नानांबहवोभेदाबाह्यांतरादिभावतः ॥ तदेवगणवाच्यंचज्ञातव्यं

मु॰पु॰
५७

विबुधैः सदा ॥६५॥ इत्यादयो गणास्तस्य ह्यनंता ब्रह्मवाचकाः ॥ तेषां स्वामी गणेशानः स एव ब्रह्मण
स्पतिः ॥६६॥ तं भजस्व महाभाग ब्रह्मभूतं यदिच्छसि ॥ तस्यावताररूपा ये ज्ञानादिब्रह्मवाचकाः ॥
॥६७॥ ॥ इति श्रीमदांत्ये मौ॰ प्रथमखंडे वक्रतुंडचरित्रे अंगिरसमुद्गलसंवादो नामैकोनविंश
तिमोध्यायः ॥१९॥ ॥ सूत उवाच ॥ अंगिरसो वचः श्रुत्वा हृष्टरोमा समुद्गलः ॥ विनयावनतो भू
त्वोवाच तं विस्मयन्निव ॥१॥ मुद्गल उवाच ॥ तस्यावतारमाहात्म्यं कथयस्व महामुने ॥ तं क्रमेण
भजिष्यामि ब्रह्मभूतस्य सिद्धये ॥२॥ अंगिरा उवाच ॥ अनंता अवताराश्च गणेशस्य महात्मनः ॥ न
शक्यते कथां वक्तुं मया वर्षशतैरपि ॥३॥ संक्षेपेण प्रवक्ष्यामि मुख्यानां मुख्यतां गतान् ॥ अवता
रांश्च तस्याष्टौ विख्यातान्ब्रह्मधारकान् ॥४॥ वक्रतुंडावतारश्च देहानां ब्रह्मधारकः ॥ मदासुरस्य हं
तारः स आखुवाहनः स्मृतः ॥५॥ [illegible] महोदर इति ख्यातो ज्ञानब्रह्मप्रकाशकः ॥ मो

रामः
५७

+ मत्सरासुरहंता स सिंहवाहनगः स्मृतः ५ एकदंतावतारो वै देहिनां ब्रह्मधारकः २

हासुरस्यशत्रुर्वैसआखुवाहनःस्मृतः॥७॥गजाननःसविज्ञेयःसांख्येभ्यःसिद्धिदायकः॥लोभासुरप्र
हर्त्ताचमूषकगःप्रकीर्त्तितः॥८॥लंबोदरावतारोवैक्रोधासुरनिबर्हणः॥आखुगःशक्तिब्रह्मासतस्य
धारकउच्यते॥९॥विकटोनामविख्यातःकामासुरप्रदाहकः॥मयूरवाहनश्चायंसौरमात्मधरःस्मृ
तः॥१०॥विघ्नराजावतारश्चशेषवाहनउच्यते॥ममासुरप्रहंतासविष्णुब्रह्मेतिवाचकः॥११॥धूम्रव
र्णावतारश्चाभिमानासुरनाशकः॥आखुवाहनतांप्राप्तःशिवात्मकःसउच्यते॥१२॥एतेष्टौतेम
याप्रोक्तागणेशांशाविनायकाः॥एषांभजनमात्रेणस्वस्वब्रह्मप्रधारकाः॥१३॥स्वानंदवासकारीस
गणेशानःप्रकथ्यते॥स्वानंदेयोगिभिर्दृष्टोब्रह्मणिनात्रसंशयः॥१४॥तस्यावताररूपाश्चाष्टौविघ्न
हरणाःस्मृताः॥स्वानंदभजनेनैवलीलास्तत्रभवंतिते॥१५॥मायातत्रस्वयंलीनाभविष्यतिसुपुत्र
क॥संयोगेमौनभावश्चसमाधिःप्राप्यतेजनैः॥१६॥अयोगेगणराजस्यभजनेनविनश्यति॥मायाभे

दमयंब्रह्मनिर्वृत्तिःप्राप्यतेपरा॥१७॥योगात्मकगणेशानोब्रह्मणस्पतिवाचकः॥तत्रशांतिःसमा
ख्यातायोगरूपाजनैःकृता॥१८॥नानाशांतिप्रभेदश्चस्थानेस्थानेप्रकथ्यते॥शांतिनांशांतिरू
पासायोगशांतिःप्रकीर्त्तिता॥१९॥योगस्ययोगतादृष्टासर्वब्रह्मसुपुत्रक॥नयोगात्परमंब्रह्मत्र
ह्मभूतेनलभ्यते॥२०॥एतदेवपरंगुह्यंकथितंवत्सतेखिलं॥भजत्वंसर्वभावेनगणेशंब्रह्मना
यकं॥२१॥मयापूर्वंतपश्चीर्णंगणेशस्यमदात्मनः॥महंदत्तोवरस्तेनवांछितोभक्तिमान्
नृः॥२२॥तववंशेचगणेशाभविष्यंतिविशेषतः॥तत्रापिमुद्गलोत्यंतंगाणपत्याभविष्यति॥
॥२३॥नमुद्गलसमोभक्तोगणेशस्यदृश्यते॥नभूतोनभविष्योवाभक्तराजःसएकराट्॥२४॥
मुद्गलस्यप्रणामेनस्वशीभाषणदर्शनैः॥वायुस्पर्शादिभिर्भावैरुद्धरिष्यंतिजंतवः॥२५॥महमेवं
वरंदत्वागणेशेनंतर्धेसुत॥सत्वंमुद्गलनामासिममवंशस्यभूषणं॥२६॥धन्योवंशोमदीयोद्य

गणपत्याश्चयत्रवै॥समुत्पन्नामहाभागाजंतूनांतारकाःस्मृताः॥२७॥वंसाक्षान्मूर्तिमांस्तेषुगा
णपत्यःप्रतापवान्॥समुत्पत्स्योमहायोगीभविष्यसिनसंशयः॥२८॥शुभ्रलायेवमुक्तात्मंगि
राउपदिष्टवान्॥एकाक्षरंमहामंत्रंगणेशस्यययाविधिं॥२९॥गच्छपुत्रत्वमद्यैवतपसेवनमुत्त
मं॥आराधयगणेशंसदर्शनंतेप्रदास्यति॥३०॥अंगेरसंप्रगम्यासोशुभ्रलःप्रययौवनं॥एक
निष्ठतयातेपेतपःपूर्णंमहाद्भुतं॥३१॥एकाक्षरविधानेनसंगेनपरितुष्टवान्॥गणेशोवर्षस
हस्त्रेणदिव्येनसभा[illegible]गतः॥३२॥आखुवाहश्चतुर्बाहुःसिद्धिबुद्धिसमन्वितः॥प्रमोदामोदका
द्यैश्चसंवृतोभक्तवत्सलः॥३३॥नानाभूषणशोभाढ्योजेगवक्त्रोमहोदरः॥एकदंतस्त्रिनेत्रश्चचतु
रायुधभूषितः॥३४॥चिंतामणिंमणिंविभ्रद्धृदयेज्योतिजालकं॥महाभक्तमुवाचेदंवयन्सकृपाव
तः॥३५॥गणेशउवाच॥वरंवृणुमहाभागशुभ्रलाशिनंहृदि॥दास्यामिपरमप्रीतएकाक्षरवि

मु॰पु॰
५२

धानतः॥३६॥ सूत उवाच॥ गणेशवचनं श्रुत्वा मुद्गलः प्रणनाम तं॥ बद्धांजलिपुटो भूत्वा पूजयामास
भक्तितः॥३७॥ पूज[illegible] इत्वा यथान्यायं प्रहृष्टमानसो मुनिः॥ पुलकांकितसर्वांगः साश्रुनेत्रो बभूव
ह॥३८॥ गद्गदगिरया वाचा [illegible]तं प्रणम्य पुनः पुनः॥ महता भक्तिभावेन चांगिरसो गणेश्वरं॥३९॥
मुद्गल उवाच॥ धन्यो वंशो मदीयोद्य धन्यं जन्म वयोपि च॥ विद्याज्ञानं तपस्तीर्थं धन्यं त्वद्दर्शनात्प्र
भो॥४०॥ इयं धन्याद्य पृथ्वी च वृक्षाः पुष्पफलान्विताः॥ पशुपक्षिलताद्या ये यत्रागतो महाप्र
भुः॥४१॥ इत्युक्त्वा तं प्रतुष्टाव गणेशं सर्वसिद्धिदं॥ स्तोत्रेण स्वात्मनिष्ठेन भक्त्या परमया युतः॥
॥४२॥ ॥ इति श्रीमदांत्ये मौद्गले प्रथमखंडे क्रतुंडचरित्रे गणेशमुद्गलसमागमो नाम विंशति
मोध्यायः॥२०॥ शौनक उवाच॥ कथं स्तुतिः कृता तेन गणेशस्य महात्मनः॥ तां मे वद महाभा
ग सर्वज्ञोसि मतो बुधैः॥१॥ सूत उवाच॥ भक्तः कथ इष्यामि भावयुक्तेन चेतसा॥ स्तुतिं कृ

रामः
५२

नांगणेशस्यमुद्गलेनचतांमुनो॥५॥मुद्गलउवाच॥किंस्तौमित्वांगणाध्यक्षवेदैःस्तोतुंनशक्यते॥ब्र
ह्मादिभिश्चयोगींद्रैर्यथामतिब्रुवेप्रभो॥३॥त्वद्दर्शनप्रभावेनशक्तोस्मिनात्रसंशयः॥त्वदनुग्रह
तःसर्वेस्तोतुंशक्ताभवंतिवै॥४॥नमस्तेगणेशायसर्वादिभूतेपरेषांपरेशायवेदातिगाया॥प
रमायिनेमोहिनांमोहदात्रेह्यगम्यायगम्यायतेवैनमस्तु॥५॥पुराणादिशास्त्रैःसदासंस्तुताय
शिवादिसुरेंद्रैर्नमस्तेस्तुताय॥अनाद्यंतमध्यादिभेदैर्विहीनायनानामयायास्तुसर्वेश्वराय॥
६॥नमोलक्षवेदाष्टयोनिप्रचारतदाकाररूपाययोगेनयोगिन्॥नमोसन्नभूताय सर्वैक
रायकलानंतरूपायपुष्टिधराय॥७॥नमोभूमिरूपायनानाप्रभेदधरायाथधारायनित्या
यतेस्तु॥जलाधिस्वरूपायनद्यादिप्रदायतदाकारहीनायसारायधाम्ने॥८॥नमस्तेजसाज्योति
रूपायचंडेप्रकाशयभोक्त्रेचसर्वस्थितायनमोवायुरूपायतेखात्मकायप्रचारस्वरूपायभि

मु॰पु॰
६०

न्नायतस्मात्॥२॥नमःस्वस्वरूपायदीप्तायपूर्णप्रकाशायभूतादिब्रह्मप्रदाय॥नमःस्थूलभो
गायरूपायजागृन्मयायप्रभोराजसायाधतेस्तु॥१०॥नमःस्वप्नमायामयायातिसूक्ष्मस्वरूपा
यसर्वांतरिसंस्थिताय॥नमःकारणायोभयब्रह्मदायसमायातिसौषुप्तभोगिन्नमस्ते॥११॥न
मश्चेतनाधाररूपायतेस्तुप्रयत्नायत्रैविध्यभोगप्रदाय॥गणेशायचैतन्यधारायतेस्तुनमो
नादरूपायकालायब्रह्मन्॥१२॥नमोबिंदुरूपाय [illegible] वक्राननायनमोदेहमा
याविहारायतुभ्यं॥नमश्चित्स्वरूपायसोहंप्रदायनिराकारदेहिस्वरूपायतेस्तु॥१३॥सदाह्येक
दंतायजन्मातिगायपरायाथशून्यायदैत्यघ्नकाय॥भदादेश्वशत्रोर्महाखूध्वजायनमोनादि
सिद्धायमायाधराय॥१४॥नमोज्ञानरूपायनानाविहारप्रदायाथपूर्णायसर्वत्रगाय॥न
मोमायिमायादिभेदाकरायसदाबोधरूपायतेवैमहात्मन्॥१५॥नमःसांख्यरूपायवैदे

रामः
६०

हिनांवैपरायस्वसंभोगहीनायदेव॥सदाकेवलंब्रह्मभूतायतेस्तुनमोज्ञानहीनायबुद्धिम
याय॥१६॥नमःस्वस्वरूपायस्वानंददायसमाधिस्वरूपायमौनात्मकाय॥स्वसंवेद्ययोगे
नलभ्यायतेस्तुनिजात्मप्रबोधायसर्वाधिपाय॥१७॥नमःपंचपंचादिमायाकरायचतुर्द्धा
चतुर्द्धाविभिन्नायधिमन्॥असद्रूपकायाथशक्तिमयायनमोभेदभेदादि[illegible]नानात्म
काय॥१८॥नमःसत्स्वरूपायसूर्यात्मकायसदात्मप्रबोधायमायाधराय॥अखंडामृता
याद्वितीयायतेस्तुसदाकालकालायमोक्षप्रदाय॥१९॥नमोविष्णुरूपायआनंददाय
समायस्वमायोभयादिसृजाय॥अनंतायभेदादिहीनायभूम्नेसदाभेदरूपायसर्वा
त्मकाय॥२०॥नमःशंभुरूपायनेतिप्रदायसदामोहहीनायचत्र्यंबकाय॥त्रिधामायया
भासितूर्यस्वरूपपरब्रह्मरूपायतेधूम्रवर्ण॥२१॥चतुर्णामभेदायसंयोगकारीन्स्वसंवेद्यभा

मु॰पु॰
६१

वेनविघ्नाधिपाय॥ स्वभक्तस्यपक्षेसदासंस्थिताय गणाधीशहंत्रेमहादैत्यकानां॥२२॥ नमः क
र्मरूपायकर्मादिकर्त्रेजनानांस्वकर्मादिनाभोगदात्रेनमोज्ञानरूपायनिःसंगदायसदाकर्म
हीनायतेकेवलाय॥२३॥ नमस्तेसमानप्रदायोभयायसमायाथयोगेनआनंददाय॥ न
मःसाहजब्रह्मभूतप्रदायत्रिधाम्नेत्रिहीनायसंतोषप्रदाय॥२४॥ चतुर्णांस्थितीनांसदापा
लकायनिजात्मस्वरूपायसंयोगकारिन्॥ अपारायनानाचतुर्णांसमूहेप्यधीशायहेरंब
तुभ्यंनमस्ते॥२५॥ अयोगायमायाविहीनायतुभ्यंनमस्तेनिरानंदरूपायनित्यं॥ निवृत्ति
स्वरूपायभिन्नायतेस्तुनमोयोगरूपासमाधिस्थिताय॥२६॥ नमोयोगशांतिस्वरूपायशां
तिप्रदात्रेगणेशाययोगायतुभ्यं॥ सदाब्रह्मणाब्रह्मदात्रेखिलेशगणानांपतेज्येष्ठराजाय
तेस्तु॥२७॥ नमोब्रह्मणेसृष्टिकर्त्रेसदावैरजोधारिणेवेदशास्त्रादिकर्त्रे॥ सदासृष्टिहीनाय

रामः
६१

साम्यायधाम्नेनमोमायिनेमध्यवृत्तिस्थिताय॥२८॥नमःसत्वरूपायविष्णुप्रभेदाज्जगत्पालका
याथमायाधराय॥नमःसत्वहीनायसर्वातिगायकवीनांपतेविघ्नहंत्रेनमस्ते॥२९॥नम
स्तामसायाथसंहारकर्त्रेत्रिनेत्रप्रदीपायशक्तिधराय॥सदाकालरूपायकैलासदायत
मोहीनरूपायलंबोदराय॥३०॥नमःकर्मणांमूलबीजायतेस्तुनमोभानुरूपायज्योतिर्म
याय॥त्रिकालादिबोधायसूर्यायभूम्नेप्रकाशैर्विहीनायहेरंबतेस्तु॥३१॥नमःशक्तिरूपाय
मोहप्रदायक्रियाधारभूतायनानाभ्रमाय॥अनंतस्वरूपाधिलीलाधरायनमःशक्तिहीना
यसिद्धीशतुभ्यं॥३२॥नमश्चंद्ररूपायपुष्टिप्रदायकलाभिस्त्रिलोकस्थभूतादिकेभ्यः॥सुधाधा
रकायाथनक्षत्रकादीप्रकाशायतेह्यन्नहीनायढुंढे॥३३॥नमःकामरूपायकामारयेतेनम
स्तेगजाकारतुंडायतुभ्यं॥हरींद्रादिदेवैःसदासंस्तुतायशुकादिमहासिद्धवंद्यायतेस्तु॥३४॥

अनिसायनियायदेवेशदेवसकामायनिष्कामभावप्रदाय।।सदासर्वपूज्यायसर्वाधिपायवरुण
शेषादिभिःसंस्तुनाय।।३५।।नमःकाश्यपायाघकापिलकायवरेण्यस्यपुत्रायपाराशराय।।
नमःशंभुपुत्रायपार्श्वात्मजायनमोभक्तिमोक्षैकगणाधीशतेस्तु।।३६।।नमोमाधवस्यस्त्रीपुत्रा
यतुभ्यंनमःसर्वमात्रेनमःसर्वपित्रे।।नमःसर्वपुत्रायसर्वात्मकायनमःसर्वसर्वायनानामया
य।।३७।।नमःपाशधारिन्नमोदंतधारिन्नमोंकुशधारिन्सदानंदरायिन्।।नमःपुत्रपौत्रादिरा
ज्यप्रदात्रेनमोऽशक्तिमुक्तिप्रदायाथतुभ्यं।।३८।।नमोनंतशक्तेगुणानामधीशमयूरेशयोगेश्व
रायेशतुभ्यं।।नमोव्यक्तव्यक्तस्वरूपायदंतिगजाकारसाकारमोदायतेस्तु।।३९।।नमोह्ये
करूपायनानाप्रभेदास्पदविघ्नपालायशुंडाधराय।।अनाथायनाथायदेवादिकानांविना
यकसर्वात्मनांतेनमोवै।।नमस्त्वंपराकारदेहायतुभ्यंनमस्तत्पदाकारतुंडायतेस्तु।।तयो

रैक्यभावासिरूपप्रयुक्तशरीरायप्रत्यक्षधाम्नेनमस्ते॥४१॥नमोवामभागेनसिद्धिस्वरूपाधृतामो
हमायाजनानांजनित्री॥सदाबुद्धिरूपाधृतादक्षिणांगेनपुंस्त्रीस्वरूपासिभेदायतेस्तु॥४२॥नमस्त्वं
पदाभ्रामरीतत्पदाधारशक्तिःसदाकामदात्रीह्यभेदा॥तयोरैक्यभावेस्वसंवेद्यनाम्निपुरेमस्तकेवा
सकारींश्चतासां॥४३॥अखंडामृतंयत्रतोयंसुताम्रंसमुद्रेस्थितंचेक्षुनाम्निनमस्ते॥निराधाररू
पेचपानेनतस्यनपुंस्त्रीप्रदंतत्रखेलिंश्चतेस्तु॥४४॥जनानांसदात्र्यक्षरेणैकवारंगणेशेतिस्वा
नंददायिन्नमस्ते॥सकृज्जल्पतांजन्ममृत्यूनतेषांमहिम्नेह्यपारायढुंढीश्वराय॥४५॥तवोपास
काब्रह्मभूतानचित्रंजनेभ्यश्चस्पर्शादिनाब्रह्मदावै॥सुरेंद्रादिपूज्यागणेशस्वरूपानमस्तेनमस्ते
नमस्तेगणेश॥४६॥सूतउवाच॥इतिस्तुत्वागणेशानंमुद्गलोमौनधारकः॥पादौगृह्यगणेश
स्यपतितोदंडवत्क्षितौ॥४७॥भक्तमुत्थापइत्वातंस्वजेपरमादरात्॥गजाननःप्रसन्नात्मात

मु॰पु॰
६३

मुवाचमहामुनिं॥४८॥गणेशउवाच॥त्वयास्तोत्रंकृतंयच्चमदीयंमेप्रसन्निधौ॥स्तोत्रोत्तममि
तिख्यातंभविष्यतिनसंशयः॥५०॥नसंकष्टंनरोगंचप्राप्नोतिसनरोत्तम॥पुत्रपौत्रादिकंसर्वं
धनंधान्यंददामिवै॥५१॥मारणोच्चाटनादीनिनश्यतिपठनेनच॥एकविंशतिवारेणतावदि
वसमानतः॥५२॥काराग्रहादिकापीडानश्यतिपठनेनच॥मनसीप्सितमाप्नोतिनरोमेपरम
प्रियः॥५३॥त्वंतुमत्तोवरान्ब्रूहिदास्यामिभक्तियंत्रितः॥त्वत्समोनास्तिभावज्ञोवशेतेहंसदास्थि
तः॥५४॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेमुद्गलकृतगणेशस्तोत्रोत्तमनामस्तो
त्रवर्णनंनामैकविंशतिमोध्यायः॥२१॥सूतउवाच॥गणेशवचनंश्रुत्वाभक्तिभावसमन्वितः॥मु
द्गलंप्रणिपत्यैवमुवाचहर्षपूरितः॥१॥मुद्गलउवाच॥किंमांलोभयसेढुंढेवरंवृण्मिनकिंचन॥
तववाक्यानुरोधेनवृणोमित्वंददासिचेत्॥२॥तवभक्तिंदृढांदेहिसदाखंडात्मिकांप्रभो॥संपू

राम॰
६३

णांभक्तिमिच्छामिगाणेशींयत्रतत्रच॥३॥मुद्गलस्यवचःश्रुत्वाविस्मितोगणराट्स्वयं॥अहोसंपूर्णभा
वेनभक्तिमेकांवृणोतियत्॥४॥गणेशउवाच॥मदीयायाचलाभक्तिःसंपूर्णाप्रभविष्यति॥तवत्रि
भुवनेभाग्यंसमंतयानदृश्यते॥५॥भक्तिःसानवधाविप्रचेतसिवरदायका॥दशमंनास्तिसंस्थानं
चित्तस्यचावधारणे॥६॥श्रवणंकीर्त्तनंचैवस्मरणंपादसेवनं॥अर्चनंवंदनंदास्यंसख्यंदेहनिवे
दनं॥७॥तेषांचिन्हंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमं॥तेनैवप्राप्यतेभक्तिर्जनैर्मेनात्रसंशयः॥
॥८॥श्रवणंमद्गुणानांचमृननंतादृशंकृतं॥तदनुकूलवर्त्तव्यंजायतेनुभवस्ततः॥९॥अनुभवे
रसोत्पत्तिस्तत्रसर्वाप्रजायते॥श्रवणंमेतयाकार्यंगुणानांजंतुनासदा॥प्रियंभवतिनान्यच्च
मदेकरसभावतः॥तेनान्यच्छ्रवणेप्रीतिर्यदानोत्पतेक्वचित्॥११॥तदासंपूर्णतांप्राप्ताभक्तिर्मे
श्रवणात्मिका॥अहंवसामितत्कर्णेसदानद्भक्तिलालस॥१२॥मद्गुणानांमदायस्यकीर्त्तनंर

मु॰पु॰
६४

सदायकं॥ नान्यत्कीर्त्तनभावेषु तस्य वै मनसो रसः॥१३॥ तदा भक्तिः सुसंपूर्णा मदीया कीर्त्तनात्मि
का॥ प्राप्ता तेन त्वहं तत्र जिह्वाग्रे प्रवसाम्यहं॥१४॥ मदीयकार्यभावस्य विस्मृतिर्नैव जायते॥
समये सावधानस्य व्रतपूजादिमार्गतः॥१५॥ तदा स्मरणरूपा सा भक्तिः प्राप्ता महामुने॥ स्मृत्यां
वसामि तस्याहं भक्तियोगार्थमेव हि॥१६॥ मदीयपादपद्मं यत्सत्यमन्यदसत्यकं॥ ज्ञात्वा देहश्र
मः सर्वो नालस्येन प्रवर्त्तते॥१७॥ मम पादाश्रयः पूर्णः सदा येन कृतो मुने॥ अन्यत्रालसभावे
न मिथ्याभूतेषु सर्वदा॥१८॥ तदा भक्तिः समुत्पन्ना पादसेवनरूपिका॥ तस्यालसविहीनेहं
देहे स्थास्यामि निश्चलः॥१९॥ सांगोपांगप्रकर्त्तव्यं मदीयं कर्मभावतः॥ अन्यच्च यादृशं जातं
तादृशं किल जायते॥२०॥ अर्चनात्मकभक्तिः सा तदा प्राप्ता नरेण वै॥ सांगोपांगतया तत्र वसा
मि भक्तिभावितः॥२१॥ न मत्समं भवेद्भाति वेदादिषु विचारितः॥ मयि श्रेष्ठत्वमापन्नं श्रेष्ठेप्र

रामः
६४

नमनंभवेत्॥२२॥यदावैमत्समंनास्तिचित्तेखंडंप्रतिष्ठितं॥तदावंदनजाभक्तिःप्राप्तातेननसंश
यः॥२३॥तस्यश्रेष्ठत्वभावेहंतिष्ठामिसर्वतःसदा॥भक्तिभोक्तास्वयंभूत्वान्यत्रश्रेष्ठत्वनाशकः
॥२४॥गणेशोपासनामार्गोयथाशास्त्रेषुदृश्यते॥तंदृष्ट्वातादृशोभूत्वागाणपत्याभिमानतः॥
॥२५॥मांभजतिस्वभावेनगाणेशोहंकृतिधरः॥लभेदास्यत्वमापन्नंभक्तिभावेनभावितं॥२६॥गा
णपत्यस्वभावेहंतिष्ठामितस्यभावतः॥दास्यभक्तिविभोगार्थमेकनिष्ठप्रकाशकः॥२७॥मित्रस्य
सन्निधानेतुगोप्यंयथानविद्यते॥बाह्यांतरंयत्तस्यास्तिमित्रंजानातिसर्वतः॥२८॥तथाबाह्यांत
रैकेनदंभहीनस्वभावतः॥भजतिमांनरोयस्तुसख्यंप्राप्तंमदीयकं॥२९॥यत्रकुत्रस्थितेनैवकृतं
मनसिसंधृतं॥गणेश्वरेणतत्ज्ञातंसर्वांतर्यामिनाखिलं॥३०॥एतादृशविचारेणभययुक्ते
नचेतसा॥सर्वभावेनमांधृत्वाभजतेनान्यचेतसः॥३१॥तस्यसख्येसदाहंवैतिष्ठामिभक्तिलोलुपः॥

वाह्यांतरैक्यभावेषुमोहितस्तस्यचेष्टया॥३३॥पंचधांचित्तभूमिंयांतांत्यक्त्वाहंविनाशतः॥गणेशोहंन
संदेहस्तेनात्माप्रनिवेदितः॥अहंभावविहीनेहंभक्तिभावेसुसंस्थितः॥नैवभिन्नोभविष्यामितस्मा
ज्जानीहिभोमुने॥३४॥इत्येवंनवधाभक्तीरसयुक्तामपिस्थिता॥सहतेक्षणमात्रंनचित्तंमद्रसहीन
कं॥३५॥तदासंपूर्णभक्तोमेजातोयंनात्रसंशयः॥अहंमोहेनसंयुक्तस्तत्रतिष्ठामिसर्वदा॥३६॥न
क्षणंतत्परित्यक्तुंशक्नोमिभक्तियंत्रितः॥नवधाचित्तभावेनतंरक्षिष्यामिसर्वदा॥३७॥नभक्तिसमभा
वश्चममप्रीतिकरःकदा॥तेनबद्धोभविष्यामिहृदयेतस्यधीमतः॥३८॥नवधामांभजंतेयेनरानाना
विधाःसदा॥तेषांकुत्राधिकंयातिभक्तावेकस्वभावतः॥३९॥अधिकाचरसोत्पत्तिर्यत्रभक्तौसमाग
ता॥तस्यांमुख्यत्वमापन्नंनवधाभजतेसति॥४०॥तत्रमुख्यस्वभावेनभक्तराजाश्चयेस्थिताः॥तान्व
दामिमहाभागशृणुतत्वमिदंमहत्॥४१॥श्रवणेमद्गुणानांयदाधिक्यंयत्रविद्यते॥तत्रवैकार्त्ति

केयश्चभक्तराजःप्रकीर्त्तितः॥४२॥कीर्त्तनेभक्तराजस्तुसूर्यआत्माशरीरिणां॥स्मरणेरामचंद्रोवै
भक्तराजःस्मृतोबुधैः॥४३॥पार्वतीपादसेवायांभक्ताधीशाचसं[illegible]स्मृता॥महाविष्णुःस्वयं
राजाभजतामर्चनेमयि॥४४॥वंदनेभक्तराजेंद्रःशंकरःसर्वभावतः॥दास्येभक्ताधिपःप्रोक्तोरामो
वैजमदग्निजः॥४५॥सख्येचतुर्मुखःसाक्षाद्भक्तानामधिपःस्मृतः॥वैय्यासकिःशुकोभूपआत्म
निविदिनांमयि॥४६॥एतेभक्ताधिपाःप्रोक्ताअंतरायविहीनतः॥मांभजंतेमहाभागाब्रह्मभूता
स्तदप्यहो॥४७॥त्वंतेषांचसदाराजाकृतोमयानसंशयः॥पूर्णभक्तिस्वभावेनमांभजिष्यतिय
त्नतः॥४८॥नवधाभक्तिभावेषुतवाधिक्यंभविष्यति॥पूर्णभक्तोमदीयस्त्वंभक्तेशेषःकृतोमया
मद्भक्तौत्वत्समोनैवभवन्नप्रभविष्यति॥भवतीनकदाविप्रत्वदधीनोहमंजसा॥५०॥तवांग
वायुनास्पृष्टापूताश्चदर्शनादिभिः॥भविष्यंतिनसंदेहोब्रह्मबुद्धियुतास्तथा॥५१॥सूतउवाच॥

एवमुक्त्वांतर्दधे सौगणेशो ब्रह्मनायकः॥ तदादिसमुनिः प्रोक्तः सर्वेषां वंद्यतां गतः॥५२॥ मुद्गल
स्य चरित्रं यः शृणुयाद्वा पठेन्नरः॥ आवयेद्भावयुक्तेभ्यः सर्वे सर्वार्थसिद्धिभाक्॥५३॥ इह मु
क्त्वाखिलान्भोगानंते ब्रह्ममयो भवेत्॥ भक्तराजेंद्रता तस्य विघ्नेशस्य भविष्यति॥५४॥ ॥इति
श्रीमदांत्ये मौद्गले प्रथमखंडे वक्रतुंडचरित्रे मुद्गलवरप्रदानो नाम द्वाविंशोध्यायः॥२२॥ ॥
दक्ष उवाच॥ धन्योसि योगिराजोसि भक्तराजेंद्रता च ते॥ मदीयभाग्ययोगेन संप्राप्तं दर्शनं प्रभो
॥ अष्टौ ये गणराजस्य ह्यवताराः प्रकीर्त्तिताः॥ तान्मे कथय योगीश विस्तरेण महामुने॥२॥ दैत्याः
संनिहतास्तैस्तु तेषां जन्मादिकं परं॥ सकलं युद्धभागं मां कथयस्व विशेषतः॥३॥ एतादृशा महा
दैत्या न श्रुता कुत्रचित्प्रभो॥ मां विस्मापयति त्वत्तः कथा पापापनोदिनी॥४॥ मुद्गल उवाच॥ प्र
जापते कथां दिव्यां तव भावनियंत्रितः॥ कथयामि समासेन गणराजप्रमोदिनीं॥५॥ प्रथमं व

त्रतुंडस्यचरित्रंशृणुपुण्यदं॥मत्सरासुरयुद्धंचगणेशेनमहाद्भुतं॥६॥इंद्रस्येंद्रपदप्राप्तिर्जा
तायस्मिन्दिनेपरा॥तस्मिन्दिनेमहोत्साहोवार्षिकःक्रियतेमुने॥७॥कदाचिदमरावत्यांमहो
त्सवपरायणः॥सुभद्रासनगोतिष्ठद्देवेंद्रःसर्वपूजितः॥८॥तत्रदेवाःसगंधर्वाअप्सरोभिः
समागताः॥नागायक्षामुनींद्राश्चराक्षसादेवयोषितः॥९॥आगतोभगवांस्तत्रसर्वभूतगणै
र्वृतः॥स्कंदनंदीश्वराद्यैश्चपार्वत्यासहशंकरः॥१०॥लक्ष्म्यासहस्वयंविष्णुर्विष्वक्सेनादिभि
र्गणैः॥वेदादिभिर्वृतोब्रह्माप्रजापतिभिराययौ॥११॥सर्वग्रहैःसमायुक्तोभानुस्तत्रागम
त्स्वयं॥अग्निश्चधर्मराजश्चकुबेरोवरुणस्तथा॥१२॥आदित्यामनवश्चैववसवोरुद्रकास्तथा॥
साध्याविद्याधराविश्वेदेवास्तत्राययुःप्रभो॥१३॥अश्विनौशेषनागश्चवहवस्तत्रचागताः॥
उपविष्टामुदायुक्ताउत्सवेंद्रस्यधीमतः॥१४॥तत्रनानाकथांचक्रुरानंदपरिवर्द्धनीं॥मुनयोभा

मु॰कु॰
६७

वसं[illegible]युक्तापुरातनभवामुने॥२५॥नृत्यमप्सरसश्चक्रुर्गंधर्वाललितंजगुः॥हाहाहूहूमु
खाअन्येतुंवरुनारदादयः॥२६॥वादित्राणिवादयंतिस्तुवंतिचारणाःस्मतान्॥हृष्टपुष्टजना
स्तत्रस्त्रियःपरममोदिताः॥२७॥तत्ररंभाविचित्राणिनृत्यादीनिचकारह॥हावभावप्रयुक्ता
पते॰निचेष्टितानिप्रजा॥२८॥कंदुकक्रीडनेयुक्तामभायांयत्रतत्रसा॥बभ्रामतांप्रपश्यन्सन्निं
२५ द्रोभूत्कामपीडितः॥२९॥मोहितोमंजुलवैर्नृत्यादिकलयातथा॥कर्तव्यंनैवजानातितन्म
नाःससुरेश्वरः॥३०॥शीघ्रमेवसमाप्तंतन्मुत्सवंकृतवान्स्वयं॥सर्वेस्वस्वस्थलंजग्मुर्मानि
ताहर्षिताविधे॥३१॥रंभांनिमंत्र्यइंद्रश्चजगामवनमेकलः॥नानापरिमलैर्यत्रयुक्तावृक्षाःसु
पुष्पिका॥३२॥नानाप्रस्रवयुक्तानिजलानिनिर्मलानिच॥सुवर्णपुष्पशोभाभिःषट्पदैःसंयु
तानिच॥३३॥इत्यादिकामपुष्टानिनानावस्तुयुतानिच॥वनानितत्ररेमेसाविंद्रःकामविमोहि

रामः
६७

हितः॥२४॥रंभयासक्तचित्तेनवज्रिणाक्रीडितंभृशं॥नतृप्तिरभवत्तस्यघृतेनदहनस्यवत्॥२५॥
तत्राजगामदुर्वासायदृच्छाविचरन्मुनिः॥तंदृष्ट्वालज्जितोराजादेवानांविनयाश्रितः॥२६॥त्यक्त्वा
रंभांनमस्कृत्यतंमुनिंप्रांजलिःस्थितः॥तादृशंतंपरित्यज्यजगाममुनिसत्तमः॥२७॥अतिविह्वलगा
त्रत्वात्प्रस्कंदेसुरशत्रुहा॥रेतोभूत्पतितंभूमौतस्माद्दैत्यसमुद्भवः॥२८॥इंद्रोसौस्वगृहंगत्वारंभां
त्यक्त्वाचकारह॥सुराणामखिलंराज्यमात्मानंनिंदयन्मुहुः॥२९॥अहोधिक्देवराज्यंमेसुराणां
स्त्रीजितस्यच॥असुराणामिदंग्रेभयंभविष्यति॥३१॥इत्येवमात्मनात्मानंनिंदयामासदेवपः॥
स्वधर्मेसंस्थितोदक्षवृत्रहापुनरेवच॥३२॥इंद्रवीर्याच्चकालेनभूम्यांजातोमहासुरः॥तंपृ
थ्वीपालयामासस्तनपानादिनाभृशं॥३३॥सतुसंववृधेतत्रहिमाचलइवापरः॥आजानुबा
हुदीर्घाक्षोमहावक्षोमहाबलः॥३४॥रक्तवर्णःक्रूरकर्मायथाग्निर्ज्वलितोबभौ॥नामतस्या

करोद्भूमिर्मत्सरः स्वस्वभावतः ॥३५॥ पंचवर्षवयोयस्य तस्योपवीतदानकं ॥ ब्राह्मणैः कारयामास
धरित्रीस्वेहभावतः ॥३६॥ सतु वेदादिकं सर्वं शीघ्रं यन्गुरुसन्निधौ ॥ स्थित आर्जवसंयुक्तो ग्राहकः
श्रवणात्वतः ॥३७॥ महाबुद्धिं सकालेन स्वल्पेन वेदपारगः ॥ दुर्बुद्धेर्दुहितां रम्यां तामुवाह विलासि
नीं ॥३८॥ नाम्नामदकरां ख्यातां सर्वावयवशोभिनीं ॥ चतुरां सर्वकार्येषु विषयस्य विवर्द्धिनीं ॥
॥३९॥ एकस्मिन्दिवसे तस्य मतिर्जाता दुरात्मनः ॥ सुविपुलं तपस्तप्त्वा जपे ब्रह्मांडमोजसा ॥४०॥
स शुक्रमुपसंगम्य विद्यां पंचाक्षरीमगात् ॥ तपसा च तया शंभुं तोषयामास भक्तितः ॥४१॥ निर्ज
नवन एकांते पुष्पपल्लवशोभिते ॥ कंदमूलफलोपेते सुजले संस्थितो तपन् ॥४२॥ दिव्यवर्षसह
स्रं स निराहारतया स्थितः ॥ जपन्पंचाक्षरं मंत्रं ध्यात्वा हृदि सदाशिवं ॥४३॥ दीक्षां पाशुपतीं
धृत्वा तोषयामास शंकरं ॥ तस्य प्रतपसा देवाः सुक्षुभिताः समंततः ॥४४॥ न प्रकाशो रवेरासी

श्वासमात्रावशेषितं॥ हीनांगमावृतं तत्र वल्मिकेन समंततः॥४८॥ महोग्रतपसायुक्तं २

न्नाग्निर्ज्वलति भास्वतः॥ भूतान्याकुलतां तत्र प्राप्तानि तपसो बलात्॥४५॥ देवाः सर्षिगणाः सर्वे
शंकरं शरणं ययुः॥ मत्सरतपसा तप्ता ब्रूक्षास्मान् जगदीश्वरः॥४६॥ शंकरस्तैः समायुक्तः पार्वत्या
स्वगणैः सह॥ तं देशमगद्धृष्टो भक्तं दृष्ट्वा महाद्भुतं॥४७॥ अस्थित्वचा समायुक्तं देवाः सर्वे वि
सिस्मिरे॥ ऋषयोपि महाभागा दृष्ट्वा तं तापसं परं॥४८॥ ॥इति श्रीमदांत्ये मौद्गले प्रथमखंडे व
क्रतुंडचरित्रे मत्सरासुरतपोवर्णनं नाम त्रयोविंशतिमोध्यायः॥२३॥ मुद्गल उवाच॥ मत्सरा
सुरमुग्रं तं तापसं शांभवं प्रभो॥ बोधयामास सः शंभुर्दानवेंद्रं महाबलं॥१॥ शंकर उवाच॥ भो भो
मत्सर उत्तिष्ठ वरान् वरय सुव्रत॥ तवोग्रतपसा भक्त्या संतुष्टोहं ददामि तान्॥२॥ अहो धैर्यमहो
धैर्यं धन्यं ते तापसोत्तम॥ देहभावमतिक्रम्य स्थितोसि दृढभक्तितः॥३॥ क्लेशं तपतपो जातं सि
द्धिं प्राप्तां तपोभवां॥ पश्येच्छसि तया तं तं दास्यामि तेति दुर्लभां॥४॥ शिवस्य वचनं श्रुत्वा प्रभुत्वोग्र

मु.पु.
६९

त्सरासुरः॥उन्मील्यलोचनेपश्यन्शंकरंपुरतःस्थितं॥५॥शिवदर्शनमात्रेणसत्तावानभवत्किल॥
उत्थायतंनमस्कृत्यननर्त्तप्रेमविह्वलः॥६॥उवाचतंमहाबुद्धिःशिवंकल्याणकारकं॥भक्तानां
कल्पवृक्षंचपार्वतीसहितंप्रभुं॥७॥मत्सरासुरउवाच॥धन्योवंशोमदीयोद्यजन्मसंपत्तिशास्त्र
जं॥ज्ञानंमेजनकोमातातपोधन्यंमहत्प्रभो॥८॥मुनयोयंनजानंतियोगिनोध्यानशालिनः॥
वेदास्मृतिसमायुक्तास्तंपश्यामिसदाशिवं॥९॥एवमुक्त्वानमस्कृत्यपूजयामासहर्षतः॥ऋ
षिदेवयुतंशंभुंभक्तिभावसमन्वितः॥१०॥यथाविधिससंपूज्यशंकरंदंडवत्क्षितौ॥प्रणिपत्यस
मुत्थायप्रांजलिस्तोत्रमारभत्॥११॥मत्सरासुरउवाच॥नमस्तेत्रिदशेशायशंकरायशिवाय
च॥निर्गुणायगुणानांचेशायसर्वगुणायते॥१२॥अपारायमहादेवायपिनाकधरायच॥
नमोनमोमहेशायसर्वस्यपतयेनमः॥१३॥उमाकांतनमस्तुभ्यंभक्तसंरक्षकायच॥भक्तिप्रिया

रामः
६९

यदेवायहरायतेनमोनमः॥१४॥वृषध्वजायनंदीशवाहनायत्रिशूलिने॥भस्मांगरागधारायव्या
घ्रांबरधरायते॥१५॥भालचंद्रनमस्तुभ्यंपंचवक्त्रायशंभवे॥दशबाहुधरायैवत्रिनेत्रायकपालि
ने॥१६॥जटाजूटधरायैवनमोगंगाधरायते॥गिरीशायनमस्तुभ्यंगजचर्मधरायते॥सदाब्रह्म
मयायैवनमोब्रह्मप्रदायिने॥निराधारायनित्यायपोगिनांपतयेनमः॥१८॥अपारगुणधारा
यरुद्रायतेनमोनमः॥किंस्तौमित्वांमहादेवयत्रवेदाविकुंठिताः॥१९॥इतिस्तुत्वामहेशानंमत्स
रःप्रणनामतं॥उत्थितंतंशिवःप्राहवरंवरयसुव्रत॥२०॥इदंत्वयाकृतंस्तोत्रंममप्रीतिवि
वर्द्धनं॥पठतेशृण्वतेसर्वकामदंप्रभविष्यति॥२१॥विद्यामायुःसुखंराज्यंपुत्रपौत्रादिकंच
यत्॥भुक्तिमुक्तिंप्रदास्यामिस्तोत्रेणस्तवितोसुर॥२२॥श्रुत्वाशिववचोरम्यंप्रहृष्टोमत्स
रोब्रवीन्नयावनतोभूत्वाशिवंभक्तवरप्रदं॥२३॥मत्सरउवाच॥यदिदेवेशतुष्टोसियदिदा
त्॥वि१

स्मिन्मेवरात्।।नरोभवंतेसर्वत्रभक्तिर्हिसदाशिवा।।५७।।पंचभूतात्मकंसर्वंत्रिगुणैःसुवि
राजितं।।तस्मान्मेमरणंशंभोनकदाचिद्भवेदिह।।५८।।आरोग्यादिसमायुक्तमेश्वरंदेहि
शाश्वतं।।ब्रह्मांड्स्यचराज्यंमेदेहिदेहिसदाशिव।।५९।।मुंजलउवाच।।तस्यैवंवचनंश्रुत्वा
शिवोविस्मितमानसः।।देवाःसर्षिगणाःसर्वेविस्मिताःप्रबभूविरे।।६०।।किमुक्तंमत्सरेणै
वकागतिर्वोभविष्यति।।तपसोग्रेणसंतुष्टःशिवस्तंप्रत्युवाचह।।६१।।शिवउवाच।।यत्त्वया
प्रार्थितंदैत्यतत्सर्वंतेभविष्यति।।उग्रेणतपसाक्लेशेनदत्तंसुदुर्लभं।।६२।।मुंजलउवाच।।
वरान्सुदुर्लभान्प्राप्यमत्सरोग्रहमागमत्।।हर्षितोऽपश्यत्सर्वान्सुहृदोमातरंस्त्रियं।।६३।।आ
ल्हादेनसदातत्रस्थितोमान्यैःप्रमानितः।।नानाभोगान्प्रभुंजानसुहृद्भिःसुखदायकः।।६४।।
पुत्रोमदकरायांहोजनयामासमत्सरः।।अजिकांतिमतोतुल्योपित्रावीर्येणतेजसा।।६५।।

सुंदरप्रियइत्येवंज्येष्ठस्यनामसोकरोत्॥विष्णुप्रियनामाभूत्कनिष्ठःप्रीतिदःपरः॥३३॥ए
कस्मिन्दिवसेदैत्यःश्वसुरस्यगृहंगतः॥तत्रनानाविधादैत्यामीलितास्तमबोधयन्॥३४॥
दैत्याऊचुः॥किंस्थितोसिमहातेजस्तदाज्ञावशगावयं॥ज्येष्यामःसर्वदेवादींस्त्वत्सहा
येनमत्सर॥३५॥त्वत्समोनैववीरोस्तिब्रह्मांडेकुत्रचित्प्रभो॥वरदानबलाद्यत्वान्निर्भयो
सिमहासुर॥३६॥आज्ञांदेहिगमिष्यामोजेतुंदेवान्नसंशयः॥शस्त्रास्त्रैस्तान्विनिर्भिद्यभ
वामःस्वर्गभोगिनः॥३७॥मुद्गलउवाच॥दैत्यानांवचनंश्रुत्वामत्सरस्तानुवाचह॥भवद्भिः
कथितंसर्वंसर्वेषांहितकारकं॥३८॥ममापिहृदयेनित्यमेवंवसतिदानवाः॥किंकरो
मिचमेमातानिवारयतिमांसदा॥३९॥इंद्रस्तवपितापुत्रदेवाःपूज्याःसवासवाः॥अतोध
र्मेणवर्त्तस्वयेनेहपरलोकभाक्॥४०॥मत्सरस्यवचःश्रुत्वादैत्यास्तमब्रुवन्वचः॥अखिलंध

मु॰पु॰
७२

र्मसंयुक्तं बोधदं भावपूर्वकं ॥४१॥ दैत्या ऊचुः ॥ शृणु मत्सरवृत्तांतं पुराभूतं स्वधर्मजं ॥ अस्माक
मेव मान्यं यत्तव संशयनाशकं ॥४२॥ जलंधरः समुत्पन्नः शिववीर्यान्महाबलः ॥ तेन शंभुर्जि
तः संख्ये देवाः सर्वे च निर्जिताः ॥४३॥ पार्वतीपत्नीभावार्थं ग्रहितुमुद्यतोभवत् ॥ दैत्या एतादृ
शा जाता बहवो मत्सरासुर ॥४४॥ यत्र मान्या कृता देवास्तत्र दैत्याः प्रदूषिता ॥ दैत्या मान्यास्त
था देवा दूषिताः प्रभवंति वै ॥४५॥ देवेंद्राः शत्रवः संति दैत्यानां सततं प्रभो ॥ अतस्त्यक्त्वा स्वसंदे
हं जय देवान्महाबलः ॥४६॥ त्यजतां मातरं पृथ्वीं देवमुनिसहायिनीं ॥ वसात्र त्वं महाभाग अ
स्माभिः सहितः सदा ॥४७॥ तेषां वचनमाकर्ण्य मत्सरो हितकारकं ॥ तथैव कृतवांस्तत्र त्यक्त्वा
पृथ्वीमुवास ह ॥४८॥ ॥ इति श्रीमहांत्ये मौद्गले प्रथमखंडे वक्रतुंडचरित्रे मत्सरासुरदैत्यस
मागमो नाम चतुर्विंशतितमोध्यायः ॥२४॥ ॥ मुद्गल उवाच ॥ शृणु दक्ष महाभाग कथां पा

रा॰मः
७२

पप्रणाशनीं॥ वक्रतुंडावतारस्य प्रयोजनप्रकाशिनीं॥ [illegible]
॥१॥ दैत्यास्तं गृह्य सर्वे ते गताः शुक्रं महामुनिं॥ दंडवत्तं प्रणेमुश्च मत्सरेण समन्विताः॥२॥ शुक्र
स्तान्मानयामास किमर्थं यूयमागताः॥ भवतां कार्यसिद्धिर्यातां करिष्यामि यत्नतः॥३॥ शु
क्रस्य वचनं श्रुत्वा सुधारससमं मुने॥ हर्षिताः प्रणिपत्यैनमूचुः सर्वे हितावहं॥४॥ तव
स्वामिन्प्रसादेन मत्सरः कुलधारकः॥ अस्माकं सर्वभाग्यस्य फलरूपस्त्वया कृतः॥५॥ वरा
न्प्राप्य महाबाहुरस्माकं हितमाश्रितः॥ दैत्यानां दानवादीनां राजायमिति निश्चितं॥६॥
तत्र राज्याभिषेकार्थं त्वया हि सर्वमानद॥ अस्माकं धाम सर्वस्वं त्वमेव मुनिसत्तम॥७॥ दैत्या
नां वचनं श्रुत्वा शुक्रस्तथेति सोब्रवीत्॥ आगतो राज्यलाभार्थं मत्सरस्य महात्मनः॥८॥ मिलि
तास्तत्र सर्वे ते दैत्यदानवराक्षसाः॥ हर्षेण महता युक्ता महोत्सवपरायणाः॥९॥ तेषां मुख्या

मु॰पु॰
७२

महाभागांस्तान्शृणुष्वप्रजापते॥संक्षेपेणप्रवक्ष्यामिप्राधान्यानांप्रधानकान्॥१०॥नमुचिःशं
बरःशुंभोनिशुंभःकालभैरवः॥विरोचनोविप्रचित्तिःप्रल्हादोमहिषासुरः॥११॥अंधकासुरनामा
चरुरुदैत्यःप्रतापवान्॥इत्याद्यावहवोदैत्यामिलितास्तस्यचोत्सवे॥१२॥यथाविधितयात
त्रब्राह्मणैर्वेदपारगैः॥ऋग्यजुःसाममंत्रैश्चाभिषिक्तोमत्सरोभवन्॥१३॥उशनाःसर्वकर्ताभू
त्तेषामादिःप्रतापवान्॥साक्षाद्योगीगणेशस्यमहाभक्तोमहामुनिः॥१४॥दैत्यादीनांसराजाभू
न्मत्सरःपरवीरहा॥शुशुभेतीवतेजस्वीमध्यान्हार्कोमहाश्रिया॥१५॥सर्वेस्वस्वग्रहंजग्मुःसना
थाश्चवयंकृताः॥शुक्रेणप्रवदंतस्तेहर्षयुक्ताःप्रजापते॥१६॥गतेकियतिकालेचमत्सरःसंम
नोदधे॥ब्रह्मांडजयनेदुष्टोजुहावसकलासुरान्॥१७॥आगतास्तेत्वराभाजःकिंकार्यंवदमानद॥
तानुवाचजयाकांक्षीत्रैलोक्यंवशमानये॥१८॥तस्यतद्वचनंश्रुत्वाहृष्टाःसर्वेमहासुराः॥नदं

रामः
७२

तोमेघवन्नादैः कालानांकंपनात्मकैः ॥१९॥ शस्त्रास्त्राणिह्यमोघानि धृत्वावाहनगाबभुः ॥ सन्नद्धा
सर्वभावेनचतुरंगबलान्विताः ॥२०॥ पदातयोपसंख्यातानानाशस्त्रधरास्तथा ॥ पर्वतद्रुमपाषा
णहस्ताः सन्निःसृताः पराः ॥२१॥ सिंदूरारुणभालाश्चमुक्तकेशामहाबलाः ॥ उड्डीयोड्डीयधावं
तोमिथोयुद्धकरास्ततः ॥२२॥ शस्त्रयुद्धेमल्लयुद्धेगदायुद्धेविशारदाः ॥ अस्त्रयुद्धविचारज्ञाः निः
सृताप्राशनोत्सुकाः ॥२३॥ धूलिध्वजेनतेषांसभास्करोनिःप्रभःकृतः ॥ अग्रेदैत्यस्यसेनायाभू
षणानियथावभूः ॥२४॥ ततोहस्तिसहस्राणांसहस्राणिययुःपुरः ॥ धातुभिरंजितानिचनाना
चित्रैर्महामुने ॥२५॥ सिंदूरारुणभालानित्वसत्कंठाधराणिच ॥ घंटानादनिनादैश्चनादितानि
हितस्तथा ॥२६॥ महावीराश्रितानिचकुंतलाद्यस्त्रकैस्तथा ॥ पूर्णानिचंचलानीवपर्वताःकिंसु
शोभिताः ॥२७॥ दंताग्रैर्गिरिणांचैवभेदकानिप्रजायते ॥ शुंडाभिर्वृक्षजालानांछेदकानिमहानि

च॥२५॥मदेनासिक्तभालानिभ्रमरैःकुंजितानिच॥रणेशत्रुसहस्राणांनाशकाराणिसर्वशः॥२९॥
निःसृतानिपुरेभ्यश्चसेनाशोभाकराणिच॥दैत्यैःसुदारुणैस्तानिस्वाश्रितानिसमंततः॥३०॥ततो
श्वानांसहासेनांनिःसृताबलवत्तराः॥चंचलावायुवेगाश्चतत्राश्वाःपूर्णभूषिताः॥३१॥चामरैरुप
वीताश्चमनोवेगामहाबलाः॥उड्डीयोड्डीयधावंतआकाशेवायवोयथा॥३२॥खुराघातैर्विस्फुलिं
गान्प्रस्रवंतइतस्ततः॥नानाशस्त्रधरास्तत्रदैत्यारेजुर्यथाघनाः॥३३॥कालस्यभयदाःसर्वेनाना
युद्धविशारदाः॥अपाराश्चसमारूढादारुणाःपापनिश्चयाः॥३४॥तत्रकेचिन्महादैत्याःखरारो
हाविनिःसृताः॥अजवाहनरूढाश्चगोवाहनविराजिताः॥ [illegible]
[illegible]॥३५॥महिषारूढकाश्चान्यव्याघ्रारूढामहाबलाः॥सिंहशार्दूलवाहाश्चखगवाहस्तथा
परे॥३६॥इत्यादिचित्रवैचित्रवाहनेषुविराजिताः॥निःसृताअसुराःसर्वेयममत्तुमिवोद्यताः॥

॥३७॥ ततो रथसमारूढा रथिनो निःसृताः प्रभो॥ अपाराश्च महाक्रोधा रुणनेत्रा भयंकराः॥३८॥ रथाः
स्वालंकृतास्तत्र मणिमुक्तादिभिः परैः॥ नानाशस्त्रास्त्रभारैश्च पूरिता मेघघोषिणः॥३९॥ ध्वजैश्चा
लंकृताः पूर्णा अश्वैर्जवनशालिभिः॥ संयुताः सूतचतुरैर्महावीरैः समाश्रिताः॥४०॥ रथाः खरयु
ताः केचिद्वृकैश्च वाहिताः परे॥ सिंहैर्गोभिर्गजैर्ऋक्षैर्नानापशुभिरावभुः॥४१॥ तत्र वज्रसमांगैश्च
खरैः शतमखंडितैः॥ अलंकृतं रथं दैत्यो मत्सरः सममारुहन्॥४२॥ तस्याग्रे द्वौ सुतौ शूरावश्वारू
ढौ प्रजग्मतुः॥ विरोचनादयो दैत्याः समंताज्जग्मुराजिताः॥४३॥ पृथिव्यां तस्य सैन्यं तत्समुद्र
इव संबभौ॥ यत्र तत्र महावीरयुद्धभूषणभूषितं॥४४॥ ॥इति श्रीमदांत्ये मौ० प्रथमखंडे वक्रतुं
डचरित्रे मत्सरासुरसेनावर्णनं नाम पंचविंशोध्यायः॥२५॥ ॥मुद्गल उवाच॥ ततो दक्षमह
त्सैन्यं पृथिवीजयनोद्यतं॥ हननेक्षत्रियाणां तत्प्रवृत्तं कालचक्रवत्॥१॥ विरोचनादयो दैत्याः

स्थितायत्रयमोपमाः॥ तैः सह युद्धवादज्ञः कः पुमान्भुवि तिष्ठति॥२॥ दैत्याः पादप्रहारेण चूर्णयंतो
द्रिसंचयान्॥ शेषमस्तकमानम्य भारेणैव प्रचक्रतुः॥३॥ तान्मेघसदृशान्दृष्ट्वा पर्वताकारसंस्थि
तान्॥ यमरूपान्भवेयुस्ते क्षत्रियागतजीविनः॥४॥ केचित्पलायितास्तत्र केचिच्च शरणं ययुः॥
महावीरास्ततो युद्धं कृत्वा स्वर्गं ययुर्मृताः॥५॥ ये मृतास्तत्सुतास्तैस्ते स्थापिताः करदायिनः॥ श
रणागतराजानः स्थापिताः स्वपदे स्थिताः॥६॥ कुत्र राजविहीनं तु तत्र दैत्याः प्रकारिताः॥ राजा
नः सर्वभावेन भोगयुक्ततया प्रभो॥७॥ देशे देशे तथा दैत्याः क्षत्रियाणां प्रसन्निधौ॥ स्थापिता भा
वबोधार्थमेवं सर्वत्र कारितं॥८॥ सद्वीपां वसुधां सर्वां जित्वा दैत्यो ननंद ह॥ मत्सराज्ञां वशां पृथ्वीं
तत्र दृष्ट्वा प्रजापते॥९॥ पातालमगमद्दैत्यो दैत्यवृंदसमन्वितः॥ मत्सरो नागसर्पाणां जया
र्थं वलयांस्ततः॥१०॥ नागोद्यानानि गत्वा ते बभंजुर्दितिनंदनाः॥ तान्दृष्ट्वा नागराजानो युद्धा

र्थंसमुपाययुः॥२१॥सन्नद्धाःक्रोधयुक्तास्तेमहाभोगामहाबलाः॥रथादिषुसमारूढानानावाहनगा
वभुः॥२२॥वासुकिस्तक्षकश्चैवकंबलाश्वतरौतथा॥इत्याद्याबहवोनागानागराजानआययुः॥
शस्त्रास्त्रनिचयैर्बाणैर्दैत्यान्जघ्नुर्महाबलाः॥दैत्यास्तान्छस्त्रसंघातैःपातयामासुरोजसा॥
नागैर्महाबलैस्तत्रनिहतादैत्यसंचयाः॥पपतुर्भग्नदर्पास्तेदिशोदशसुविह्वलाः॥२५॥दैत्या
नांकदनंदृष्ट्वाविरोचनमुखाययुः॥असुराःक्रोधसंयुक्तानागांश्चामर्दयस्तुते॥२६॥शस्त्रास्त्रै
र्विविधैर्दैत्यामारयामासुरोजसा॥केषांचिन्मस्तकाभग्नाःपादाहस्तोदराणिच॥२७॥शोणि
तानांमहानद्यःप्रास्रवंस्तुदिशोदश॥भग्नदर्पाभयान्नागाःपलायनमकुर्वतः॥२८॥केचि
त्तच्छरणंजग्मुर्दैत्यान्परमदारुणान्॥हाहाकाररवैर्युक्तानागास्त्राससमन्विताः॥२९॥दैत्या
नांपौरुषंदृष्ट्वावासुकीप्रमुखाययुः॥क्रोधेनपरितप्तास्तान्वारयामासुरोजसा॥३०॥तक्षकादि

महानागाविषंक्षुब्धाश्चतत्यजुः॥विवरंतद्विषैःसर्वंव्याप्तंतत्रप्रजापते॥२१॥महाविषभवाज्वालाददा
हदैत्यपुंगवान्॥मृतादैत्याअनेकाश्चगरलेनप्रपीडिताः॥२२॥नस्थातुंशक्यतेतत्रदैत्यैःसंग्राममं
डले॥शस्त्रास्त्राणिचसर्वाणिदग्धानिसर्वतःकिल॥२३॥गजाश्वरथपादांतामृतादग्धाश्चसर्व
शः॥मूर्च्छिताःपतिताभूमौविरोचनमुखास्ततः॥२४॥नागानादंप्रचक्रुस्तेनदंतश्चदिशोदश॥
हर्षेणमहतायुक्तानृत्यंतिस्मास्थिताःपरे॥२५॥एतस्मिन्नंतरेतत्रविरोचनःप्रतापवान्॥उ
त्थितःसमरश्लाघीगतपीडोमहाबलः॥२६॥शुक्रेणतत्रदैतेयाविद्ययानिर्विषाःकृताः॥उत्थि
ताःसर्वतःसर्वेअंधकःप्रमुखाबभुः॥२७॥असुराःक्रोधसंयुक्तागरुडास्त्रंचतत्यजुः॥तस्मात्स्म
गरुडाजातानागान्भुंजंतिकृत्स्नशः॥२८॥तत्रवासुकिनागेनमहाज्वालाप्रवर्त्तिता॥गरुडाश्च
तयादग्धागरुडास्त्रंतथाभवत्॥२९॥एतद्दृष्ट्वामहाश्चर्यंवासुकेःपौरुषंमहत्॥विरोचनादयः

सर्वेगरुडामाययाभवन्॥३०॥तैःसर्वंभक्षितंसैन्यंनागानांतद्दिशोदश॥अपलायन्भयोद्विग्नाम
हानागाश्चभीरवः॥३१॥वासुकीतक्षकाद्यायेगरुडैःपीडिताभृशं॥मूर्छितामरणप्रायाजातायुद्धे
चदारुणे॥३२॥शेषेणसर्ववृत्तांतोज्ञातोभयकरःपरः॥आययौसामभावेनशरणंदैत्यसंन्निधौ॥
॥३३॥किमर्थंक्रोधसंयुक्तादैत्याद्भूतमहाबलाः॥भ्रातरस्तानुवाचाथमदीयानात्रसंशयः॥३४॥
किमर्थंयुद्धमारब्धंगच्छतादितिनंदनाः॥पातालवासिनःसर्वेभवंतोवयमेवच॥३५॥मुद्गलउवाच॥
शेषस्यवचनंश्रुत्वाविरोचनप्रतापवान्॥उवाचतंवचोरम्यंतेजोयुक्तंस्वभावजं॥३६॥विरोचनउ॥
शेषशेषमहाभागमान्योसिनोमहामते॥स्नेहेनवदसिप्राज्ञसत्यंशृणुचमेवचः॥३७॥अस्माकंम
त्सरोराजाब्रह्मांडंवशमात्मनः॥इच्छतिशासनंतस्यग्राह्यंभवद्भिरावृतैः॥३८॥नोचेन्नागासुराणांच
विनाशःप्रभविष्यति॥त्वंश्रेष्ठःसर्वभावेनसर्वेषांहितमाचर॥३९॥विरोचनवचःश्रुत्वाशेषःसर्वार्थ

कोविदः॥प्रहसंस्तमुवाचेदंसामयुक्तंमहामतिः॥४०॥यमिच्छतिमहाभागोमत्सरस्तंकरोम्यहं॥शासनं
परिजग्राहकरभारंसवार्षिकं॥४१॥नानारत्नानिदत्वावैसामचक्रेसुरैःसह॥नागान्वासुकिमुख्यान्स
गृहीत्वास्वस्थलंययुः॥४२॥असुराहर्षिताःसर्वेजितनागामहाबलाः॥पातालजयिनोभूत्वावरुणं
जेतुमाययौ॥४३॥ ॥इतिश्रीमदांत्येमौ॰प्रथमखंडेवक्रतुंडचरित्रेपातालविजयोनामषड्विंशति
मोध्यायः॥२६॥ ॥मुद्गलउवाच॥असुराजयशोभाढ्यावरुणालयमागता॥दूतंसंप्रेषयामा
सवरुणस्यसभांप्राते॥१॥वरुणस्यसभांगत्वादूतोवचनमब्रवीत्॥शृणुदेवेंद्रवाक्यंमेप्रेषितंम
त्सरेणयत्॥२॥मदीयवंशगोभूत्वातिष्ठस्थानेमहाबल॥नोचेत्संग्रामभूमौत्वांवधिष्यामिसुरा
स्तथा॥३॥दूतस्यवचनंश्रुत्वावरुणःक्रोधमूर्छितः॥संग्रामायप्रसन्नद्धोबभूवातिभयानकः॥४॥
मकरारूढएवासौपाशादिशस्त्रधारकः॥यादसोदेवरूपांश्चगृहीत्वाबहिराययौ॥५॥दूतेनक

थितः सर्वोवृतांतोवरुणस्यतं॥ श्रुत्वामत्सरदैतेयोदैत्यैर्युद्धोद्यतोभवत्॥६॥ देवानामसुराणांचसैन्ये
परमदारुणे॥ परस्परंसुसन्नद्धेरणभूमौप्रजग्मतुः॥७॥ देवानांसैन्यमत्युग्रंदृष्ट्वाविरोचनःस्वयं॥ म
हिषासुरनामाचशुंभश्चैवांधकासुरः॥८॥ अन्येचबहवस्तत्रधावितारणमूर्द्धनि॥ नादयंतोदिशः
सर्वेजघ्नुर्देवांश्चसाहसाः॥९॥ मीलितादैत्यदेवास्तेपरस्परजयेप्सवः॥ शस्त्रास्त्रैर्वृक्षपाषाणै
र्जघ्नुर्वीराननेकशः॥१०॥ अभवत्तुमुलंयुद्धंदैत्यदेवविनाशनं॥ दिनत्रयंमहाघोरंदैत्याभग्ना
स्ततोभवन्॥११॥ जयशालिनएवंस्मदेवागर्जंतिभैरवं॥ मूर्छितादैत्यभूपाश्चविरोचनमुखाः
परं॥१२॥ तान्काव्यःसावधानान्सचकारस्वेनतेजसा॥ उत्थिताःसर्ववीरास्तेयुयुधुरसुराःपु
नः॥१३॥ क्रोधेनमहतायुक्ताजघ्नुर्देवान्महाबलान्॥ पुनश्चनियतंयुद्धंबभूवातिभयानकं
॥१४॥ प्रयुयुधुरहोरात्रंजलौकसोसुरास्ततः॥ यादसांश्चगणाःसर्वेमृताभग्नाःप्रचूर्णिताः॥

मु॰पु॰
११

सर्वेदेवगणास्तत्रपप्लुःसर्वतोदिशं॥वरुणंसदधारापिविरोचनोमहाबलः॥१६॥धृतंवरुणमा
श्रित्यजलौकसोविदुद्रुवुः॥मृताःकेचित्क्षताःकेचिच्छरणंकेचितान्ययुः॥१७॥हर्षितानाद
संयुक्तादैतेयाजग्मुरादृताः॥उत्तरेधननाथंतेजयशालिनएवते॥१८॥कुबेरेणसवृत्तांतः
श्रुतोवरुणदेशतः॥पलायनंसमालब्धकैलासेशंकरंययौ॥१९॥संतथागतमाश्रित्यदै
त्याःपरमदारुणाः॥अलकायांप्रवेशंतेचक्रुश्चजयशालिनः॥२०॥एवंजित्वाकुबेरंतं
म-४ वरुणेनसमन्विताः॥धर्मराजंययुःसर्वेदैतेयामृत्युरूपकं॥२१॥यमराजःसुसन्नद्धःश्रुत्वा
दूतमुखात्कथां॥यमैरोगैश्चरक्षोभिर्विविधैःपरिवारितः॥२२॥महिषारूढएवासौदंड
हस्तोमहाबलः॥आययौरणभूमिंचमहामृत्युसमन्वितः॥२३॥यमंसमागतंदृष्ट्वामृ
त्युरोगादिभिर्वृतः॥दैतेयाःक्रोधसंयुक्तायुयुधुःसहसाबलात्॥२४॥देवानांचैवदैत्या

रामः
११

नांवीराश्चयुयुधुर्भृशं॥परस्परंप्रबोधंतोजघ्नुर्नानाप्रहारकः॥२५॥दिनपंचमहाद्भूतंयुद्धं
दारुणरूपकं॥नाशकंदेवदैत्यानांबभूवचप्रजापते॥२६॥यमैश्चमर्दितादैत्यामृताःके
चित्क्षताःपरे॥पपलुःसर्वशस्तत्रमृत्युःसंत्रासतापिताः॥२७॥एतस्मिन्नंतरेतत्रविष
यप्रियआगतः॥मत्सरासुरपुत्रश्चयुयुधेमृत्युनासह॥२८॥तेनास्त्रेणचशस्त्रेणरोगाः
परमपीडिताः॥यमास्तेमृत्युरूपावैपलायनमकुर्वतः॥२९॥यमेनबहुधाशस्त्रैर्योधया
मासदारुणं॥महिषंमूर्छितंकृत्वापातयामासवैयमं॥३०॥उत्थितोधर्मराजश्चकालदंडेन
वेगतः॥तताडदैत्यपुत्रंतंगर्जयन्विषयप्रियं॥३१॥कालदंडस्तुतंस्पृष्ट्वापतितोधरणीतले॥
आगत्यसहसातेनधृतोयमप्रतापवान्॥३२॥तस्यैतच्चमहत्कर्मदैत्यपुत्रस्यदैत्यपाः॥पुप
जुःपरमप्रीताधन्यंधन्यंतमब्रुवन्॥३३॥यमंधृत्वाचदैतेयाआययुरमरावतीं॥इंद्रोपिदेवदे

मु॰पु॰
७८

वेंद्रैः सन्नद्धो वैरभावतः ॥३४॥ अग्निर्वायुः प्रसन्नद्धावागतौ बलसंयुतौ ॥ देवाः सर्वे महाभागाः स्वस्व
लोकात्समाययौ ॥३५॥ विश्वेदेवाश्च साध्याश्च रुद्रा वसव एव च ॥ गंधर्वाश्चैव यक्षाश्च विद्याधराः
समागताः ॥३६॥ ग्रहाश्च चंद्रसूर्यः स आदित्या बलवत्तराः ॥ सन्नद्धाः सर्वदेवास्ते वज्रिणं जग्मु
राहताः ॥३७॥ सर्वदेवगणैरिंद्रो रणभूमिं समाययौ ॥ ऐरावतसमारूढो वज्रपाणिर्महाबलः ॥
॥३८॥ देवसैन्यं सुसन्नद्धमागतं स्वबलान्वितं ॥ दृष्ट्वा दैत्यगणाः सर्वे जघ्नुः शस्त्रप्रहारतः ॥३९॥
देवास्तान्जघ्नुः शस्त्रैश्च महाक्रोधसमन्विताः ॥ एवं परस्परं तत्र तुमुलं युद्धमाबभौ ॥४०॥
मृता दैत्यास्तथा देवैस्ताडिताः शस्त्रघातितः ॥ दैत्याहताश्च देवास्ते छिन्ना भिन्नाः सुमूर्छिताः ॥
॥४१॥ एवं परस्परं युद्धं देवदैत्यविनाशनं ॥ सप्तरात्रमभूतीव्रं ततो दैत्या पलायिताः ॥४२॥ वि
रोचनादयः सर्वे मूर्छिता धरणीतले ॥ जयवंतः सुरेंद्रास्ते नदंति स्म प्रहर्षिताः ॥४३॥ एतद्दृष्ट्वा

रामः
७८

महाश्चर्यं सुंदरप्रिय आगतः ॥ ज्येष्ठपुत्रो मत्सरस्य युयुधे सर्वदेवपैः ॥ ४४ ॥ शस्त्रास्त्रैर्मल्लयुद्धै
स्तान्मर्दितं तेन सर्वशः ॥ देवसैन्यं दिशस्तत्र पपाल सुभयातुरं ॥ ४५ ॥ शोणितप्रस्रयास्तत्र नद्यो
जाताः प्रजायते ॥ इंद्रोपि युयुधे तेन दैत्यपुत्रेण धीमता ॥ ४६ ॥ इंद्रेण निहतस्तत्रेंद्रेण दैत्यो महा
बलः ॥ न चचाल तदाश्चर्यमिंद्रो मनसि संगतः ॥ ४७ ॥ दैत्यपुत्रः समागत्य खड्गेनैरावतं गजं ॥ मूर्छि
तं कारयामास वज्रिणं च पदाग्रहीत् ॥ ४८ ॥ मर्द इत्यासुरेशानं स्ववशं प्रचकार ह ॥ धृत्वा पुरंद
रं सोपि स्वस्थानमगमन्मुदा ॥ ४९ ॥ दैत्यैः संपूजितस्तत्र महाबलपराक्रमः ॥ सुंदरप्रियपुत्रो
भून्मत्सरस्य प्रहर्षितः ॥ ५० ॥ देवाः केचिद्धृतास्तत्र केचिच्च मूर्छिताः कृता ॥ केचित्पला इता दक्ष
भग्नाः केपि विचूर्णिताः ॥ ५१ ॥ एवं स सकलान्देवान्वशं चक्रे महाबल ॥ मत्सरासुर एवायं स्वर्गाधी
शो बभूव ह ॥ ५२ ॥ इति श्रीमदांत्ये मौ० प्रथमखंडे वक्रतुंडचरित्रे मत्सरासुरविजय इंद्रपराजयो ना

मु.पु.
७९

मसप्तविंशतिमोध्यायः॥२७॥ ॥मुद्गलउवाच॥ देवाश्चशरणंकेचित्कश्यपादीन्समाययुः॥
विह्वलाभयभीतास्तेशशंसुर्दैत्यचेष्टितं॥१॥ देवाऊचुः॥ मत्सरासुरदुष्टेनजितादेवाःसवासवाः॥
इंद्रोधृतोमहाभागवयंशरणमागताः॥२॥ रक्षास्मान्मुनिशार्दूलत्वंपिताभयविह्वलान्॥ जी
वनाशसमादुःखादिंद्रंमोचयमत्सरात्॥३॥ देवानांवचनंश्रुत्वावसिष्ठादिसमन्वितः॥ ब्रह्मा
णंप्रययौदेवैःकश्यपोवंशवृद्धये॥४॥ सत्यलोकसमासीनंगत्वादृष्ट्वाननामच॥ स्तुत्वातंवि
विधैर्वाक्यैःप्रांजलिःप्रत्युवाचह॥५॥ कश्यपउवाच॥ मत्सरेणधृतःस्वामिन्निंद्रोदेववरैःसह॥
[illegible]॥६॥ [illegible]
[illegible]॥ देवस्थानपतिर्जातोदैत्यःपरमदारुणः॥ देवादैत्याःप
देस्वेस्वेयथायोग्यंवसंतिवै॥ तथाकुरुजगन्नाथत्वंधाताचगतिर्हिनः॥७॥ कश्यपस्यवचःश्रुत्वा॥

रामः
७९

देवान्नृषीन्नथाब्रवीत्॥पितामहः प्रजानाथहृदयेनविदूयता॥८॥ब्रह्मोवाच॥शृणुध्वंमुनयोदे
वाशिवप्राप्तवरोसुरः॥अजेयः सर्वभूतानांदेवादीनांविशेषतः॥९॥नमयाशक्यतेकर्त्तुंयथा
योग्यंस्वभावतः॥गच्छामिशरणंविष्णुंभवद्भिःपालनंप्रति॥१०॥विकुंठमगमद्ब्रह्मा देवैश्चमुनि
भिःसह॥गत्वाविष्णुंनमस्कृत्यस्तुत्वोवाचप्रजापतिः॥११॥मत्सरेणधृतोयुद्धइंद्रोदेववरःप्र
भो॥किंस्थितोसिमहाविष्णोत्वंपालकइतिश्रुतिः॥१२॥ब्रह्मणोवचनंश्रुत्वाविष्णुस्तंप्रत्युवा
चह॥नशक्यतेमयाधातर्वशंकर्त्तुंमहासुरं॥१३॥शिवस्यवरदानेनमत्तोसौदैत्यपुंगवः॥
तस्माच्चशरणंयामिशंकरंनात्रसंशयः॥१४॥ब्रह्मादिभिःस्वयंविष्णुःकैलासमगमत्कि
ल॥शंकरंप्रणिपत्याहसर्वैर्ब्रह्मादिभिःसह॥१५॥विष्णुरुवाच॥नमस्तेभगवन्छंभोनमस्ते
शूलपाणये॥नमस्तेजगतांनाथसर्वसाक्षिन्नमोस्तुते॥१६॥नमोनमोमहादेवस्रष्ट्रेराजस

मु॰पु॰
८०

रूपिणे॥ पात्रे विष्णुस्वरूपाय हर्त्रे रुद्रग्रहधारिणे॥१७॥ पंचवक्त्रधरायैव योगिने योगदायिने॥ नि
र्गुणाय निरूपाय ब्रह्मभूताय ते नमः॥१८॥ मत्सरेण महादेव पीडितास्ते सुरर्षयः॥ धृतइंद्रः सु
राधीशो मर्द इत्वा सुरान्परान्॥१९॥ भयभीता वयं तेन शरणं त्वामुपागताः॥ रक्षास्मान्देवदेवे
शत्वं श्रेष्ठो देवधारकः॥२०॥ विष्णोर्वचनमाकर्ण्य शिवश्चिंतातुरः स्वयं॥ उवाच तान्देवमुनी
न्विष्णुमुख्यान्महेश्वरः॥२१॥ शिव उवाच॥ तपसोग्रेण देवेश मया दैत्यो विवर्द्धितः॥ वरैर्दुर्ल
भरूपैश्च किं करोमि जनार्दनः॥२२॥ स दैत्यश्चालितुं विष्णो न शक्यते कदाचन॥ विचारं कुरु
देवेश त्वं बुद्धियुक्त एव हि॥२३॥ शिवस्य वचनं श्रुत्वा विष्णुः परमकंपितः॥ उवाच दुःखयुक्तेन
हृदयेन सुरेश्वरः॥२४॥ विष्णुरुवाच॥ कर्त्ता त्वमन्यथा कर्त्ता ह्यकर्त्ता नात्र संशयः॥ विपरीतं त्व
योक्तं च वयं किं करवामहे॥२५॥ त्वदीयसन्निधौ देव वसामश्च सदाशिव॥ वयं दैत्यवशे ही

रामः
८०

नाश्वराम इति मे मतिः ॥२६॥ विकुंठादिपदं त्यक्त्वा तव संन्निधिमागताः ॥ अधुना मत्सरो दैत्यश्चा
गमिष्यति तत्र सः ॥२७॥ विकुंठं सत्यलोकं च गृहीत्वा सुखमेष्यति ॥ तव स्थानं न कैलासं भक्त
त्वाद्वै ग्रहिष्यति ॥२८॥ वचनं वैष्णवं श्रुत्वा शिवो निश्वाससंयुतः ॥ स्थितस्तत्रैव दक्षत्वं शृणु
मत्सरचेष्टितं ॥२९॥ ॥ इति श्रीमदांत्ये मौ० प्रथमखंडे वक्रतुंडचरित्रे देवानां शिवसन्निधि
गमनं नामाष्टाविंशतिमोध्यायः ॥२८॥ मुद्गल उवाच ॥ इंद्रं धृत्वा महादैत्यो मत्सरो हर्षसं
युतः ॥ ऐरावतसमारूढो ययौ ताममरावतीं ॥१॥ विरोचनमुखैर्वीरैः संवृतो दैत्यपुंगवः ॥
शुशुभे तीव्रतेजस्वी प्रभावेण बलेन च ॥२॥ इंद्रासने समासीनं तं ययुरप्सरोगणाः ॥ गंधर्वा
श्चारणाश्चैव भयभीताः समंततः ॥३॥ शिषे विरे महाभागं मत्सरममितौजसं ॥ सर्वभावेन
तं हृष्टं चक्रुः सर्वे स्वविद्यया ॥४॥ देवोद्यानेषु सर्वेषु विचचार महासुरः ॥ कुशलो देवभोगेषु भो

मु॰पु॰
२१

गांश्चतुर्भुजेपरान्॥५॥देवस्थानानिसर्वाणिविभज्यप्रददौस्वयं॥दैत्येभ्योमुख्यमुख्येभ्यःस्थितास्ते
षुमहासुराः॥६॥नानारूपान्देवभोगान्बुभुजुस्तत्रसंस्थिताः॥मत्सरसेव्यमानास्तेबलेनदर्पिता
मुने॥एकस्मिन्दिवसेभौमाइंद्रासनसमाश्रितः॥मत्सरोहर्षयुक्तःसदैत्यान्प्रोवाचगर्वितः॥
८॥भोभोविरोचनाद्याश्चशृण्वंतुमेवचोसुराः॥ब्रह्मादयोमहाभागाःकथमत्रैवनागताः॥
॥९॥नमस्यंतिनदेवेशामांयदिमत्सरान्विताः॥सर्वमदंतदातेषांहरिष्यामिनसंशयः॥
॥१०॥मत्सरस्यवचःसर्वेपुपूजुर्दैत्यदानवाः॥दूतंसंप्रेषयामासमत्सरःक्रोधसंयुतः॥११॥
गच्छदूतत्रयाणांत्वंब्रह्मादीनांपुरेषुवै॥देवेशान्वदवाक्यंमेसावधानेनचेतसा॥१२॥दर्शना
र्थंमत्सरस्ययांतुदेवामयासह॥नोचेन्मत्सरदैतेयस्ताडयिष्यतिनिश्चितं॥१३॥मत्सरस्य
वचःश्रुत्वागतोदूतोबलान्वितः॥अंधकोनामदैत्येंद्रोमहावेगसमन्वितः॥१४॥सत्यलोकेस

रामः
२१

धातारंनददर्शमहाबलः॥शून्यांतांनगरींवीक्ष्यगतोविकुंठमादरात्॥१५॥तत्रापितादृशंदृष्ट्वागतः
कैलासमेवसः॥तत्रानंदयुतान्सर्वान्देवान्ऋषीनपश्यत॥१६॥सभामध्येगतोदैत्यःशिवचारैःप्र
वेशितः॥स्थितमानम्यशंभुंसआसनेविनिवेशह॥१७॥कैलासविभवंदृष्ट्वाविस्मितोमानसे
भवत्॥सदानंदमयंधन्यंमन्यमानःस्वचेतसि॥१८॥पृच्छतंशंकरंदैत्यउवाचबलगर्वितः॥
तृणीकृत्यमहेशानंसर्वान्देवास्तथांधकः॥१९॥अंधकउवाच॥मत्सरासुरवाक्यंचशृणुध्वंसु
रसत्तमाः॥जित्वेंद्रंदेवनाथंतांस्थितोहंजगदीश्वरः॥अतोमद्दर्शनार्थायभवंतोपिसहानुगाः॥
ब्रह्माविष्णुश्चरुद्रश्चप्रगच्छध्वंममांतिकं॥२१॥तस्माद्भवद्भिरद्यैवमयासहसुरेश्वराः॥आगंत
व्यंमत्सरस्यदर्शनार्थंसुसत्वरं॥२२॥अंधकस्यवचःश्रुत्वाशिवःक्रोधसमन्वितः॥उवाचतंमहा
दैत्यंमुखादग्निंसमुद्गिरन्॥२३॥शिवउवाच॥किंमांवदसिपापिष्ठतृणीकृत्ययथावचः॥मद्वर

मु॰पु॰
८२

स्यप्रभावेणमत्सरोविजयीध्रुवं॥२४॥यदाहंक्रोधसंयुक्तस्तदाभस्ममयंखलु॥करिष्यामिनसंदे
हःसासुरंमत्सरंखलु॥२५॥मत्सराज्ञावशोहरेकिंप्रजातोसुराधम॥मत्वात्वांमूढदूतंहिमोच
यामिनसंशयः॥२६॥गच्छत्वंमत्सरदैत्यंवदवाणींमयेरितां॥नोचेत्वांभस्मसात्कुर्यांकुपितोहंख
लोत्तम॥२७॥शिवस्यवचनंश्रुत्वामत्सरमंधकीययौ॥कथयामासवृत्तांतंसर्वदैत्यपुतायच॥२८॥
विभवंवर्णयामासकैलासस्ययथायथं॥ब्रह्मांडेनसमंकिंचित्कैलासस्यमहासुर॥२९॥अंध
कस्यवचःक्रूरंश्रुत्वादैत्यामहाबलाः॥विरोचनमुखाःसर्वेमत्सरंक्रूरमब्रुवन्॥३०॥किंस्थितोसि
महाबाहोज्येष्यामस्त्वत्प्रसादतः॥देवत्रयंनसंदेहआज्ञापयासुरेश्वर॥३१॥दैत्यानांवचनंश्रुत्वा
तेजोयुक्तंसमत्सरः॥उवाचक्रोधसंयुक्तस्तान्दैत्यान्हर्षयन्निव॥३२॥मत्सरउवाच॥मयातपःप्र
भावेणप्राप्तंतेजोमहाद्भुतं॥तत्रशंभुर्वृथामानीस्वात्मानंमन्यतेर्थदं॥३३॥तपोहीनायराज्यंवै

रामः
८२

ब्रह्मांडस्य ददाति चेत्॥ तदायं जगदीशेषो मन्यते नान्यथा मया॥३४॥ अतः शंभुं विजेष्यामि तपस्तेजः
समन्वितः॥ दर्पं तस्य हरिष्यामि वृथा ब्रह्मस्वभावजं॥३५॥ वेदांते ब्रह्मवेदेषु कथितं निर्विकल्पकं॥ त
देव सर्वमान्यं वै जगदीशत्वमाबभौ॥३६॥ सकामकर्मणा सर्वं प्राप्यते मनुजैस्तथा॥ ब्रह्मार्पणतया
कर्मकृतं चेन्मुक्तिमाप्नुयात्॥३७॥ अखिलं कर्मणा सृष्टं पालितं च प्रतियते॥ तत्र किं तैस्त्रिभि
र्देवैः क्रियते कर्मजैः खलु॥३८॥ कर्मणा हं सृजामि च पालयामि हरामि च॥ कर्माधीनं जगत्स
र्वं सदेवासुरमानुषं॥३९॥ एवमुक्त्वा महादैत्यो विरोचनमुखैर्वृतः॥ आययौ शंकरस्थानमावे
शेन समन्वितः॥४०॥ नानाशस्त्रास्त्रधाराभिर्हतास्तत्र वाहे स्थिताः॥ शिववाराश्च तैः सर्वे पप
लुर्भयपीडिताः॥४१॥ छिन्नभिन्नांगदेहाश्च ययुः शंकरसन्निधौ॥ ऊचुः समागतो दैत्यः सर्वैः
समत्सरासुरः॥४२॥ ॥इति श्रीमदांत्येमौ प्रथमखंडे वक्रतुंडचरित्रे शिवमत्सरासुरसमागमो

नामैकोनविंशोध्यायः॥२९॥शुक्रउवाच॥गणानांचपिशाचानांवचनंदानवर्षभ॥श्रुत्वाशिवः
स्वयंतत्रपुनरेवसंशितोभवत्॥१॥ब्रह्माविष्णुश्चकामश्चवसवोधनदोभवत्॥चंद्रःसूर्यस्तथाव
ह्निसमीराश्चाश्विदंशिनाः॥२॥कालाग्निरुद्रमुख्याश्चभैरवोभूतनायकः॥कृत्वायुद्धंक्षमंवेशं
स्थिताःशंकरसन्निधौ॥३॥अष्टभैरवमुख्याश्चवीरभद्रोभवत्॥नंदीशृंगीपुष्पदंतमहा
कालमुखाँस्तत्रदेव्यःशस्त्रधरायपुः॥एवंनानाविधैःसैन्यैर्वृतःशंभुर्महेश्वरः॥४॥वृषारूढो
महातेजाश्चाययौयुद्धलालसः॥यत्रदैत्यास्थितास्तत्रकार्त्तिकेयादिभिर्वृतः॥५॥शंकरसैन्य
संयुक्तंनानायुद्धविशारदं॥नानाशस्त्रधरंदृष्ट्वादैत्येशश्चिक्षिपुःशरान्॥७॥तंदृष्ट्वाकुपितादे
वाःशस्त्रास्त्रैस्तान्निजघ्निरे॥एवंपरस्परंयुद्धमभवद्दारुणंमहत्॥८॥देवानांचैवदैत्यानामन्यो
न्यजयकांक्षिणां॥शस्त्रास्त्रैर्बाणनिचयैरंधकारःप्रवर्त्तितः॥९॥सैन्यानांरजसाव्याप्तमाकाशंस

र्वतो विधे॥ न प्रज्ञायत तत्रैव स्वीयो वा पर एव च॥१०॥ घंटानां शंखतूर्याणां वीराणां रथिनां तथा
॥ वृंहितानां हेषितानां शब्दैस्तद्बधिरीकृतं॥११॥ देवान्पृष्ट्वा सुराजघ्नुर्दैत्यान्देवास्तथापरे॥ अ
संवद्धं महायुद्धं चक्रिरे सुरदानवाः॥१२॥ शस्त्रैः शस्त्राणि संवार्य तथास्त्रैरस्त्रसंचयं॥ मल्लयुद्धं
महावीराश्चक्रुस्तत्र मदान्विताः॥१३॥ संग्रामे तुमुले तत्र प्रवृत्ते घोररूपिणि॥ मृता मुमूर्षवः के
चिच्छिन्नभिन्नास्तथाभवन्॥१४॥ नानाजंतुशरीरेभ्यः प्रवृत्ता रक्तसंभवा॥ नदी बभौ महाघो
रा मांसकर्दमशालिनी॥१५॥ रक्तकास्थिबलाकाचकेशशैवालशोभिता॥ चापसर्पाशि
रःपद्माकबंधवृक्षवाहिनी॥१६॥ भल्लकाष्ठा महाघोरा चामरतृणसंयुता॥ छत्रावर्ता दुर्ग
मा च चर्मपट्टीशदुर्दुरा॥१७॥ भीरुभीतिकरी चैव वीरहर्षप्रवर्द्धिनी॥ तां दृष्ट्वा दैत्यराजास्ते क्रोध
युक्ताः समाययुः॥१८॥ तैः समंताद्बलं भग्नं देवानां सर्वमंजसा॥ बाणजालैर्दिशो व्याप्ता गं

मु॰पु॰
८४

तुंमार्गोनविद्यते॥पलायनपरा देवाः सर्वेदशदिशोगमन्॥तंदृष्ट्वादेवराजास्तान्वारयामासुरोज
सा॥२०॥द्वंद्वयुद्धंचतत्रासीत्परस्परविनाशनं॥देवानांमुख्यदैत्यानांकांश्चित्तेषुवदामिते॥
॥२१॥नमुचिःकामदेवेनयुयुधेबलसंयुतः॥शंबरोवायुनासार्द्धंशुंभोदेव्यामहाबलः॥२२॥
चंद्रमसानिशुंभश्चविरोचनोगुहेनच॥कालभैरवदेवेनकालभैरवदानवः॥२३॥महिषासुरदैते
यःकालाग्निशंकरेणच॥प्रल्हादोविष्णुनासार्द्धंविप्रचित्तिश्चभानुना॥२४॥अंधकासुरनामाच
वीरभद्रेणसंयुगे॥अग्निनाचैवदुर्बुद्धिर्युयुधेबलसंयुतः॥२५॥विषयप्रियएवासौब्रह्मणायु
युधेभृशं॥शंभुनायुयुधेतत्रसुंदरप्रियएवच॥२६॥२७॥मत्सरासुरदैत्येशोयुद्धंद्रष्टुंस्थि
तोभवत्॥एवंनानाद्वंद्वयुद्धंशतशोथसहस्रशः॥२७॥संस्थातुंनैवशक्यंतदपारत्वात्प्रजा
पते॥शस्त्रास्त्रैरसुराजघ्नुःसुरांस्तानपितेसुराः॥२८॥अग्निवाय्वादिकास्त्राणितत्यजुःक्रोधसं

रामः
८४

पुताः॥ त्रिभुवनंचकंपेचदारुणेसंयुगेतदा॥२९॥ देवासुरप्रनाशश्चमहांस्तत्रप्रवर्त्तितः॥ शोणि
द्यः२ तौघैःप्रवृत्तास्तुनपरमदारुणाः॥३०॥ एवंसप्तदिवानक्तंगतास्तेषांप्रयुध्यतां॥ नासुरानचदे
वास्तेविरामंचक्रुरंजसा॥३१॥ ततश्चकुपितादेवाअत्यंतंकुपितादयः॥ दैत्यानामस्त्रसंघाता
नस्त्रैःसंवार्यतान्पुनः॥३२॥ ताडयामासुरव्याग्राअस्त्रैर्नानाविधैःपरं॥ मूर्छितान्पतितांश्च
क्रुर्मृतान्संचूर्णितान्परान्॥३३॥ ततोदशदिशोदैत्याःपपलुर्भयसंकुलाः॥ त्रिशूलादभिरस्त्रा
स्त्रैस्तत्रापितेमृताबभूः॥३४॥ सुंदरप्रियकाद्याश्चमूर्छिताधरणींगताः॥ मृतप्रायाकृतास्तैस्ते
विष्ण्वादिभिर्महामुने॥३५॥ तंदृष्ट्वाक्रोधसंयुक्तोमत्सरःस्वयमाययौ॥ कृत्वानादंमहाघो
रंब्रह्मांडंकंपयन्निव॥३६॥ धनुश्चक्रेसनादंवैतेनसंत्रासिताःसुराः॥ बाणवृष्टिंससर्जासौदा
रुणांशत्रुनाशनीं॥३७॥ तस्यबाणैःसुराःसर्वेमर्दिताःबलवत्तरां॥ मृताःकेचित्कृताःकेचिन्मू

कालाग्निरुद्रमष्टभिः॥ दशभिश्च महाकालीं ताडयामास मत्सरः॥४२॥ पंचभिः पंचभिश्चैव ४

मु॰पु॰
८५

र्छिताः पतितामृधे॥३८॥ पंचबाणैश्च सेनान्यं ताडयामास वक्षसि॥ पतितः सधरापृष्ठे मूर्छितो भृश
विह्वलः॥३९॥ अग्निं च सप्तभिर्बाणैर्नंदिनं दशभिस्तथा॥ ताडयामास दैत्येंद्रः पतितो रणमूर्द्धनि॥
॥४०॥ दशभिर्वीरभद्रं सोष्टभिः सवितरं ततः॥ चंद्रं च सप्तभिर्बाणैः पातयामास दैत्यपः॥४१॥ अनि
लं नवभिश्चैव गणपान्भृंगीमुख्यकान्॥ बाणैः सपातयामास प्रलयाग्निसमद्युतिः॥४२॥ कुबेरं
दशभिर्बाणैस्ताडयामास वक्षसि॥ ब्रह्माणं शतबाणैश्च पातयामास भूतले॥४३॥ एवं तस्याद्भु
तं कर्म दृष्ट्वा विष्णुः समाययौ॥ बाणैः सहस्रभिस्तं सववर्षे घनवद्भृशं॥४४॥ दैत्यो बाणान्निवा
र्यैव तं शरैः क्रोधसंयुतः॥ शतभिस्ताडयामास पतितः सधरातले॥४६॥ ततश्च शंकरः क्रुद्धस्त्रिशू
लेनाहनद्भृशं॥ त्रिशूलं निष्फलं तत्र पतितं धरणीतले॥४७॥ पाशं दैत्यपतिं क्षिप्त्वा महसा शंक
रं ततः॥ गृहीत्वा पशुवत्कंठ आनयामास सन्निधौ॥४८॥ धृत्वा शंभुं महाबाहुं वदंति स्म च तं मुने॥

रामः
८५

अतुलं किं त्वया मह्यं दत्तं वद सदाशिव ॥४९॥ कर्मणा त्वं समर्थश्च तथाहं कर्मणा किल ॥ जगदीश्वरतां
प्राप्तो वृथाहंकारवानसि ॥५०॥ क्रमेण विष्णुमुख्यांश्च देवान्गृह्य महाबलः ॥ कैलासशिखरे तत्र रे
मे दैत्यसमन्वितः ॥५१॥ सर्वैः पूज्यतमो भूत्वा दैत्यैः परमहर्षितैः ॥ नानाकौतुकयुक्तेन भोगाश्च
बुभुजे पराः ॥५२॥ ॥ इति श्रीमदांत्ये मौ॰ प्रथमखंडे वक्रतुंडचरित्रे शिवपराजयो नाम त्रिंशत्त
मोध्यायः ॥३०॥ ॥ मुद्गल उवाच ॥ शृणु दक्षमहाश्चर्यं दक्षस्य चेष्टितं महत् ॥ ब्रह्मांडाधि
पतिर्जातो मत्सरः कर्मणा स्वयं ॥१॥ सुंदरप्रियपुत्रं वै कैलासाधिपतिं ततः ॥ चक्रे विकुंठना
थं तं पुत्रं स्वं विषयप्रियं ॥२॥ प्रल्हादं सत्यलोकस्य माहेंद्रस्य विरोचनं ॥ एवं चक्रे च राजानो
स्वर्गाधीशाः सदैत्यपान् ॥३॥ स्वयं भूमिं समागम्य नगरं निर्ममे ततः ॥ मत्सरावासकं नाम्ना
तत्रैव न्यवसन्मुदा ॥४॥ त्रैलोक्यवशगं सर्वं चकार स्वेन तेजसा ॥ शिवादयश्च देवेंद्रा गृहे तस्य स

मास्थिताः॥५॥तान्समानाय्यदैत्येशोहर्षयुक्तेनचेतसा॥उवाचमधुरंवाक्यंसामयुक्तंमहासु
रः॥६॥शृणुशंभोमहाभागदेवेंद्रैःसहदेवय॥यत्रेच्छागच्छतत्रत्वंमदाज्ञापालयन्सदा॥७॥
एवमुक्त्वासदैत्येंद्रोमोचयामासशंकरं॥देवैःसर्वैर्महाभागोमत्सरोहर्षसंयुतः॥८॥शिवो
पिदेवसंघातैःपर्वतद्रोणमाश्रितः॥चिंताविष्टोमहादेवःकालंपश्यंश्चचक्रमे॥९॥यत्रत
त्रगुहायांतेदेवाविष्णुपुरोगमाः॥संस्थिताभयभीताश्चदिवसानतिचक्रमुः॥१०॥पृथिव्यां
दैत्यराजेनततोधर्मस्यखंडनं॥कृतंसर्वत्रतेनैवहाहाकारोभवत्ततः॥११॥देवानांप्रतिमांयत्र
तांभंक्त्वाचिक्षिपुर्जले॥दैत्यांस्तदाज्ञयादक्षधर्मलोपंप्रचक्रिरे॥१२॥मत्सरस्यचदैतेयाःप्रति
लोमाःसर्वभावतः॥देशेदेशेपुरेग्रामेस्थापयामासुरंजसा॥१३॥गृहेगृहेचदेवानांप्रतिमाःसं
स्थिताःपराः॥ताभंक्त्वाजलमध्येतेचिक्षिपुश्चप्रजायते॥१४॥मत्सरःप्रतिमांकृत्वागृहेगृहेद

दुस्ततः॥ दैत्याः सुदारुणा विश्वं त्रासयामासुरेव च॥ १५॥ ब्राह्मणांश्च समानीय ताडयामास मत्सरः॥
ममैव मंत्रयुक्तेन यज्ञादिः क्रियतां द्विजाः॥ १६॥ मम नाम्ना च गायत्रीं युक्तां जपत माचिरं॥ अग्नि
होत्रादिकं कर्म कुरुत मामकं यथा॥ १७॥ अहमेवेश्वरो देवा ब्राह्मणादिजनस्य च॥ भजतां मम पा
दस्य दुर्लभं किं भविष्यति॥ १८॥ धनधान्यादिकं सर्वं स्वर्गभोगादिसंयुतं॥ दास्यामि नात्र संदेहो
मदधीनं जगत्त्रयं॥ १९॥ मम प्रीतिकरा येन दैत्या भोज्या प्रपूजिता॥ तेन संतर्पितो नूनं वांछितं
पूरयाम्यहं॥ २०॥ एवमादि स सर्वत्र नानाधर्मनिकृंतनं॥ कारयामास दुर्बुद्धिर्मत्सरो मत्स
रान्वितः॥ २१॥ केचिदृषिगणा दक्षवनं व्याघ्रादिसंयुतं॥ जग्मुस्तत्र क्रियाः सर्वाश्चक्रुर्धर्मप
रायणाः॥ २२॥ देहरक्षणयुक्ताश्च मुनयो भ्रंशमागताः॥ सर्ववर्णपरिभ्रष्टा जना जाता प्रजा
पते॥ २३॥ यजनं याजनं तत्र स्वधर्मादिस्वभावजं॥ कर्म सर्वं न चक्रुस्ते जनास्तद्भयभाविताः॥ २४॥

मु॰पु॰
८७

नस्वाहानस्वधाकुत्रनवषट्कारआभवत्॥ वर्णसंकरवल्लोकाः स्थिताभयसमन्विताः॥२५॥ एवंपा
पस्यवृद्धिश्चसंजाताभयदायिनी॥ तेनदेवगणाः सर्वउपोषणप्रपीडिताः॥२६॥ विचारंतत्रचक्रुश्च
स्तेमत्सरस्यविनाशने॥ नचकिंचिद्भयोद्विग्नानाशार्थंप्रापुरोजसा॥२७॥ एतस्मिन्नंतरेतत्रदत्ता
त्रेयः समाययौ॥ साक्षाद्ब्रह्ममयोयोगीन्यस्तस्वपरविभ्रमः॥२८॥ मलिनोजडवल्लोकेभ्रमतिस्म
पिशाचवत्॥ चेष्टितैश्चेष्टितोलग्नोबालवद्द्वंद्वकारकः॥२९॥ उन्मत्तवन्महाभागोभयंनैवप्रविं
दति॥ आत्रेयोगणराजस्यभक्तः परमशोभनः॥३०॥ तंदृष्ट्वादेवसंघास्तेसमुत्तस्थुः सुसादराः॥
प्रणेमुः कार्यसिध्यर्थंपूजयामासुरंजसा॥३१॥ पादसंवाहनंतस्यचक्रुः केचनभाविताः॥ फला
दिनाचनैवेद्यमर्पयामासुरादरात्॥३२॥ पप्रच्छुर्भुक्तवंतंतंविनयेनसमन्विताः॥ शंभुः विष्णुमुखाः
सर्वेभयभीतामहामुनिं॥३३॥ शिवउवाच॥ स्वामिंस्त्वंद्वंद्वहीनश्चनित्यमानंदभाक्परः॥ न्यस्तस्व

रामः
८७

परभावश्चतथापिजनवल्लभः॥३४॥गाणेशप्रवरोभक्तः साक्षाद्गणपतिःस्वयं॥योगभावेनसं
पन्नोयोगीयोगविदांवरः॥३५॥तथापिदुःखितान्दृष्ट्वामनस्तेकलिलंभवेत्॥उपाधिहीनभावे
नदुःखनाशंकरोषिवै॥३६॥अतोवयंमहाभागपीडितामत्सरेणवै॥भ्रष्टस्थानावनेसर्वे
चरामःश्वापदाइव॥३७॥अत्रापिधर्मलोपेनपीडितावयमुत्कटं॥उपोषणपराःस्वामिन्म
रिष्यामोमहामते॥३८॥अत्रतेदर्शनंप्राप्तंपूर्वपुण्यबलेनभो॥तेनदुःखविहीनाश्चभविष्या
मोनसंनसंशयः॥३९॥अतोमत्सरदैत्यस्यनाशोपायंवदप्रभो॥येनसर्वंजगत्क्लिष्टंतत्सु
खीकुरुमानद॥४०॥एकस्यदोषयोगेनबहवःपीडितायदि॥अनुपाधितयायोगीतंदोषंना
शयिष्यति॥४१॥शक्तश्चेत्स्वस्वभावेनसर्वेभ्यःसुखदायकः॥अतस्त्वंरक्षयोगीशजगत्कृत्स्नं
विशेषतः॥४३॥शृणुशंभोजगन्नाथत्वंसाक्षादीश्वरःशिवः॥तवाधीनमिदंसर्वंत्वांकिंब्रूमि

महामते॥४४॥तथापिवच्मिदेवेशत्वदाज्ञासंप्रचोदितः॥येनत्वंदेवसंयुक्तःसुखंविंदसिशाश्वतं॥४५॥
त्वदीयहृदयेशंभोमत्सरःसंस्थितोधुना॥ईश्वरोहमिदंसर्वंमदधीनंप्रवर्त्तते॥४६॥त्रिभुवनेनम
त्साम्यंसएवमत्सरःपरः॥तंजहियोगमार्गेणहृदयस्थंमहासुरं॥४७॥श्रेष्ठंदृष्ट्वामहेष्वांतेजा
यतेयामहामते॥तांजहितपसाशंभोगणेशस्यप्रसेवया॥४८॥एकाक्षरविधानेनमयासौसे
वितःपुरा॥तेनाहंचगणाधीशोनभिन्नोमयितिष्ठतः॥४९॥अतस्त्वंयोगमार्गेणगणेशंसर्वसि
द्धिदं॥एकाक्षरविधानेनतमाराधययत्नतः॥५०॥हृदिस्थंमत्सरंहत्वापश्चात्तंजहिदानवं॥यो
गेनत्वंसमर्थोसिभवितानात्रसंशयः॥५१॥एवमुक्त्वामहादेवंगतोसौमुनिसत्तमः॥यदृच्छ
विचरन्सन्वैसेवतेगणनायकं॥५२॥ ॥इतिश्रीमदांत्येमौ॰प्रथमखंडेवक्रतुंडचरित्रेदेवदत्ता
त्रेयसमागमोनामैकत्रिंशोध्यायः॥३१॥ ॥मुद्गलउवाच॥शृणुदक्षमहाप्राज्ञचेष्टितंपरमंम

हत्॥ यत्कृतं सर्वदेवैस्तत्कथयामि समासतः॥१॥ गते मुनौ महाभाग शिवो हर्षसमन्वितः॥ ग
णेशं हृदि संचिंत्य ब्रह्मादिकान्वचोब्रवीत्॥२॥ शृणु विष्णो विधे देवा शृणुध्वं सर्वतापसाः॥ ऋषयः
संस्थिता अत्र वचनं हितकारकं॥३॥ आत्रेयेण च दत्तेन कथितं दुःखनाशनं॥ अत एकाक्षरेणैव
ढुंढिं प्रसादयामहे॥४॥ शंभोर्वचनमाकर्ण्य मुनयो देवनायकाः॥ साधु साध्वब्रुवन्सर्वे प्रसन्ना
श्च बभूविरे॥५॥ तत एकाक्षरेणैव मंत्रेण गणपं मुने॥ देवाश्च मुनयः सर्वे सेवयामासुरादरात्॥
॥६॥ महोग्रतपसा युक्ता स्थितास्तत्र शिवादयः॥ आराधयंस्तु देवेशं गणेशं सर्वनायकं॥७॥ प
॥द्मासनगताः केचिद्वीरासनकृताः परे॥ स्वस्तिकासनमासीना एवं नानासने स्थिताः॥८॥ निराहा
रतया केचित्स्थितास्तत्र प्रजापते॥ पत्रवायुभुजश्चान्ये प्राणायामपरायणाः॥९॥ जलभक्षा
स्वपादाग्रस्थिताः केचिद्दृढासनाः॥ केचिन्मानसपूजाभिः पूजयामासुरंजसा॥१०॥ केचित्पुष्पोपहारा

मु॰पु॰
८९

घेः प्रपूजुः प्रयत्नतः ॥ प्रदक्षिणपराः केचिदेवं नानाविधानतः ॥ १ ॥ गणेशं तपसा चैव मंत्रेण विधि
पूर्वकं ॥ एकचित्तेन सर्वे ते तोषयामासुरंजसा ॥ २ ॥ एवं वर्षसहस्रेण दिव्येन तपसा स्वयं ॥ प्रसन्नो
भून्महातेजा वक्रतुंडः प्रतापवान् ॥ ३ ॥ देवानां च मुनीनां च पुरो ययौ गणाधिपः ॥ तेजसां पुंज ए
वासौ साक्षाद्ब्रह्ममयो बभौ ॥ ४ ॥ सिंहगो गजवक्त्रश्च शूर्पकर्णो महोदरः ॥ चतुर्बाहुश्च पाशेनां
कुशेन वरदेन च ॥ ५ ॥ अभयेन समायुक्तो वामांगे सिद्धिधारकः ॥ दक्षिणांगे च बुद्धिं वै दधानो
भगवान्परः ॥ ६ ॥ नाभिशेषो मुकुटी च कुंडलीकटकान्वितः ॥ चिंतामणिलसद्वक्षो व्यालय
ज्ञोपवीतवान् ॥ ७ ॥ नानाभूषणशोभाढ्यस्तेजसा ज्वलदद्भुतः ॥ पुष्करं पुष्करे धृत्वा भ्रामयन्स
मुपाययौ ॥ ८ ॥ तं दृष्ट्वा देवविप्रास्ते भयभीताः समंततः ॥ उदेतं किमिदं तेजः प्रलयानलस
न्निभं ॥ ९ ॥ अथवा गणराजोयं किं वा स्वामी समागतः ॥ अथवा प्रलयो भावी न काले देवनि

रामः
८९

र्मितः॥ इतितर्कसमायुक्तान्देवान्मुनिसमन्वितान्॥ उवाचवक्रतुंडस्तान्मेघगंभीरनिःस्वनाः॥२१॥
वक्रतुंडउवाच॥ भोभोमुनिगणाः देवासएवाहंसमागतः॥ [illegible]
यंध्यायंतमहाभागातंजानीतगणेश्वरं॥२२॥ तपसामंत्रराजेनममध्यानेनसर्वशः॥ परितुष्टोव
रंदातुमागतोहंनसंशयः॥२३॥ मुद्गलउवाच॥ वक्रतुंडवचः श्रुत्वाहर्षिताअमरर्षयः॥ प्रणेमुः
प्रार्थयामासुःसौम्यभावंप्रविह्वलाः॥२४॥ तेषांप्रार्थितमाकर्ण्यसौम्यतेजाअभूत्प्रभुः॥ यथातं
मुनयोदेवा [illegible] अपश्यन्स्वेनचक्षुषा॥२५॥ सौम्यभावेनसंयुक्तंवक्रतुंडंसुरेश्वराः॥ मुनय
स्तंप्रणम्योचुर्धन्याधन्यावयंप्रभो॥२६॥ तंपुपूजुःप्रयत्नेनस्नेहभावेनस्नेहजः॥ षोडशैरुपचारैश्च
यथाविधिसहेश्वराः॥२७॥ यथाविधिप्रणम्यैवतुष्टुवुःकृतमंगलाः॥ बद्धांजलिपुटाःसर्वेभक्तिनम्रा
त्मकंधराः॥२८॥ साश्रुनेत्राःसरोमांचास्तद्दर्शनमहोत्सवाः॥ यथाज्ञानंयथान्यायंवक्रतुंडंमहौज

मु॰पु॰
९०

सं॥२९॥देवर्षयऊचुः॥नमस्तेवक्रतुंडायगजवक्त्रायतेनमः॥एकदंतायदेवायसर्वेषांपतयेनमः॥
॥३०॥निर्गुणायनिरूपायचतुर्बाहुधरायते॥सिंहवाहाभ्यनागानांपतिर्नाभौधरायच॥३१॥अनं
तायह्यपारायदुर्लक्ष्यायनमोनमः॥पाशांकुशधरायैवनागयज्ञोपवीतिने॥३२॥वरदाभयहस्ता
यसिद्धिबुद्धिवरायच॥ब्रह्मभूतायभक्तानांब्रह्मभूतकरायच॥३३॥नमस्तेशंभुरूपायविष्णुरूपा
यतेनमः॥सूर्यरूपायधात्रेचनमःशक्तिमयायच॥३४॥दैत्यदानवरूपायदेवरूपधरायच॥न
मःपक्षिस्वरूपायपशुरूपायतेनमः॥३५॥ग्रहनक्षत्ररूपायलतावृक्षस्वरूपिणे॥पर्वतायन
मस्तुभ्यंसरित्सागररूपिणे॥३६॥जलजंजलरूपायसर्परूपायतेनमः॥चतुरसीतिलक्षासुयो
निषुसंस्थितायच॥३७॥चराचरमयायैवनमोनानाप्रभेदिने॥कर्माकर्मस्वरूपायविकर्मणेनमो
नमः॥३८॥ज्ञानयोगायदेवायस्वात्मरूपधरायते॥स्वसंवेद्यस्वरूपायसदायोगमयायते॥३९॥

रामः
९०

अनाधारायधारायशष्टब्रह्ममयायते॥मायारूपायमायायैमायाहीनायतेनमः॥४०॥मायिभ्यो
मोहदात्रेचसर्वाकारायतेनमः॥स्थूलसूक्ष्मादिभेदायभेदहीनायतेनमः॥४१॥भेदाभेदमया
यैवानंतपारायतेनमः॥भक्तेभ्योवरदात्रेचभक्तसंरक्षकायच॥४२॥नमोनमःपरेशायनमोन
मोव्ययायच॥गणेशायनमस्तुभ्यंयोगाधीशायतेनमः॥४३॥यंस्तोतुंनसमार्थाश्चवेदाःसां
गाश्चयोगिनः॥तंकिंस्तौमोगणेशानंवक्रतुंडस्वरूपिणं॥४४॥मायासुखंयत्सर्वेषांमनसि
ज्ञानकारणं॥ब्रह्मतस्मात्तथावक्रंज्ञानहीनंततःस्मृतं॥४५॥मायाचब्रह्मरूपंयद्द्वयोर्योगे
भवेत्परा॥योगशांतिश्चसर्वेषांयोगीनांहृदिसंस्थिता॥४६॥मायादेहस्वरूपातेब्रह्मवक्रंस्मृ
तंमुखं॥उभयोर्योगभावेत्वंवक्रतुंडःप्रकथ्यते॥४७॥तंवक्रतुंडंपश्यामःसाक्षाद्योगमयंपरं
धन्यावयंगणाध्यक्षस्तुत्वातंप्रणतास्तवैः॥४८॥धन्यंजन्मदृशीर्धन्याधन्यासंपदएवच॥ज्ञानं

मु॰पु॰
९१

धन्यंतपश्चैवयेनदृष्टोगजाननः॥४९॥प्रसन्नोयदिदेवेशयदिदेयोवरःशुभः॥तदात्वदीयपा
दाब्जेभक्तिरस्तुसदाचनः॥५०॥प्रार्थयामोवरंपूर्णंयतस्त्वंचिंतितार्थदः॥मत्सरासुरनाशंच
वक्रतुंडकुरुप्रभो॥५१॥जगत्सर्वंवयंचैवपीडितास्तेनविघ्नप॥सर्वेषामुपकारार्थंजहिदैत्यंम
हाबलं॥५२॥स्तुत्वैवंप्रार्थइत्वातंप्रणतास्तेसुरर्षयः॥तानुत्थाप्यस्वयंसाक्षाद्वक्रतुंडउ
वाचह॥५३॥वक्रतुंडउवाच॥भवत्कृतमिदंस्तोत्रंसर्वसिद्धिप्रदंपरं॥भविष्यतिमहाभागा
ईप्सितार्थंप्रदंमहत्॥५४॥मत्सरासुरनाशंचकरिष्यामिसुरर्षयः॥भवतांभक्तिभावेनप्रस
न्नःपूर्णतांगतः॥५५॥पंचभूतमयंसर्वंत्रिगुणंजगदुच्यते॥अष्टावरणसंयुक्तंब्रह्मांडंहि
सुरर्षयः॥५६॥अष्टावरणसंयुक्तादेवाःसर्वेचमानवाः॥नागाश्चराचरंसर्वंत्रिगुणंजगदुच्य
तेतस्यतेभ्योभयंनहि॥५७॥अतोमत्सरदैत्यस्यनाशश्चकठिनोमहान्॥तथापिभवतांदेवाः

रामः
९१

करिष्यामिप्रियंद्विजाः॥५८॥ ॥इतिश्रीमदांत्येमौ॰ प्रथमखंडेवक्रतुंडचरित्रेवक्रतुंडप्रादुर्भावोना
मद्वात्रिंशोध्यायः॥३२॥ ॥मुद्गलउवाच॥एवमुक्त्वासुरान्विप्रान्सस्मारबलमुत्कटं॥तस्यस्म
रणमात्रेणप्रादुर्भूतागणाःप्रभोः॥१॥प्रमोदामोदकाद्याश्चवक्रतुंडागजाननाः॥चतुर्बाहुधराः
सर्वेनानाशस्त्रास्त्रपाणयः॥२॥केचित्सिंहसमारूढाःकेचिन्मूषकवाहनाः॥केचिन्मयूरमारू
ढाःशेषारूढास्तथापरे॥३॥अश्वारूढास्तथाचान्येमुकुटैःसुविराजिताः॥कटकैःकुंडलैश्चैव
नानाभूषणराजिताः॥४॥भयंकाराश्चशत्रूणांभक्तेभ्यःसुखदायकाः॥महात्मानोमहाशक्ता
ब्रह्मांडस्फोटकारकाः॥५॥नानाक्रीडासमायुक्ताःसदास्वानंदभाविताः॥गणेशनाममाहात्म्य
मकथंस्तेपरस्परं॥६॥वक्रतुंडंनमस्कृत्यस्थिताःप्रांजलयोभवन्॥आज्ञांकुरुगणाध्यक्षकरावा
मस्तवेप्सितं॥७॥किमर्थंस्मरणंदेवकृतमस्माकमादरात्॥दासास्त्वदीयपादस्यकरिष्यामोजवान्वि

मु॰पु॰
९२

ताः॥ ॥ तेषां वचनमाकर्ण्य वक्रतुंडः प्रतापवान्॥ उवाच तान्महाभागान्मेघगंभीरनिःस्वनः॥ ९॥ वक्रतुं
ड उवाच॥ शृणुध्वं मोदकाद्याश्च मत्सरासुरदैत्यपं॥ हनिष्यामि महावीर्यं तत्र युद्धं भविष्यति॥ १०॥ यु
धध्वं दारुणं तत्र मया सह महाबला॥ एतदर्थं विशेषेण स्मरणं भवतां कृतं॥ ११॥ वक्रतुंडवचः श्रुत्वा
सर्वे हर्षसमन्विताः॥ गणा ऊचुः प्रणम्येनं निबद्धकरसंपुटाः॥ १२॥ गणा ऊचुः॥ स्वामिन्वदसि य
त्सर्वं तदाश्चर्यमयं बहु॥ मत्सरासुरनाशः स एकेन क्रियतेधुना॥ १३॥ त्वत्प्रसादात्सर्वं सुलभं नो भवे५
गणाधिप॥ आज्ञां कुरु महाभाग एकस्य पश्य पौरुषं॥ १४॥ गणानां तद्वचो रम्यं श्रुत्वा प्राह गणा
धिपः॥ वक्रतुंडः प्रसन्नात्मा हर्षयन्सकलानिव॥ १५॥ वक्रतुंड उवाच॥ भवद्भिः कथितं सर्वं तत्त
थानतदन्यथा॥ क्रीडार्थं निर्मितो दैत्यो मया मायाप्रभावतः॥ १६॥ यदि क्षणेन तं दैत्यं नाशयामि
प्रभावतः॥ तदा क्रीडा कथं देवा मया प्रक्रियते परा॥ १७॥ अतस्तेन महाभागा युद्धध्वं मे प्रसन्निधौ॥

रामः
९२

अष्टावरणहीनेन रूपेण हन्मि तं क्षणात्॥१८॥ इति तस्य वचः श्रुत्वा गणा हर्षसमन्विताः॥ जगर्जुर्ना
दयंतस्ते दिशो विदिश एव च॥१९॥ तं दृष्ट्वा परमाश्चर्यं विस्मितास्ते सुरर्षयः॥ हर्षेण महता युक्ता
मेनिरे मत्सरं हतं॥२०॥ ततः सर्वान्समादाय गणान्देवा मुनीनपि॥ वक्रतुंडो ययौ तत्र पुरीमी
र्ष्याह्वयां परां॥२१॥ तत्र राज्यं चकारासौ मत्सरः सुप्रतापवान्॥ ब्रह्मांडस्य महावीर्यो नानाभोग
समन्वितः॥२२॥ देवांगनाभिरावृत्तः सदा तिष्ठत्सदैत्यपः॥ मद्यादिपानसंयुक्तो नानावीरप्रपालि
तः॥२३॥ यद्यन्मनसि तेनापि चिंतितं सफलं सदा॥ तत्तद्भवति सर्वं स्म तपसा वरदानतः॥२४॥
न बुबोध गतं कालं कालेन वंचितो यथा॥ धन्योहं मन्यमानः स्वेन मत्तो मानसे परः॥२५॥ एकस्मि
न्दिवसे तत्र सभायां संस्थितोभवत्॥ वीरैः परिवृतो नानानृत्यं पश्यन्विनोदितः॥२६॥ तत्राकाश
मयी वाणी बभूव भयदायका॥ आगतो मत्सरं हंतुं वक्रतुंडो महाबलः॥२७॥ श्रुत्वाकाशमयीं वा

लीं मूर्छितो मत्सरासुरः ॥ पतितः शुष्ककंठश्च कंपमानांगविह्वलः ॥ २८ ॥ तं तथा पतितं दृष्ट्वा सर्वे सुराभ
यातुराः ॥ केनोक्तं परुषं वाक्यं हन्मस्तमद्य निश्चितं ॥ २९ ॥ ततः केचिन्नभोभागे बभ्रमुर्यत्र तत्र ते ॥
ददृशुस्तन्न तत्रापि सदसि पुनराययुः ॥ ३० ॥ सर्वैः कृतसदैत्येशः सावधानो यथा पुरा ॥ उपविष्टः
सभामध्ये हृदयेन विदूयता ॥ ३१ ॥ उवाच स्खलितं वाचं मत्सरो भयविह्वलः ॥ वचनं किमिदं स
त्यमनृतं वा भविष्यति ॥ ३२ ॥ कालस्य कालरूपोहं मम मृत्युः कथं भवेत् ॥ असत्यानमसो वाणी न
ज्ञाता न श्रुतापि च ॥ ३३ ॥ अष्टावरणसंयुक्तं ब्रह्मांडं सर्वमंजसा ॥ अष्टावरणयुक्तेभ्यो मम मृत्यु
र्न जायते ॥ ३४ ॥ को सौ वक्राननो जंतुः कथितः कुत्र वर्तते ॥ तं हनिष्यामि दृष्टश्चेत्क्षणमात्रान्न
संशयः ॥ ३५ ॥ इति श्रुत्वा वचस्तस्य मत्सरस्य दुरात्मनः ॥ ऊचुः प्रल्हादमुख्यातं विनयेन सम
न्विताः ॥ ३६ ॥ प्रल्हादादय ऊचुः ॥ मा कुरुष्व महाभाग चिंताचिंतानिषूदन ॥ तव मृत्युः कथं भा

वीपश्चात्सूर्योदयो यथा॥३७॥ अस्माकं शत्रुभावेन स्थिता देवाः सहेश्वराः॥ जितास्तदपि ते स
र्वे चिद्रदर्शिन एव च॥३८॥ तैश्च मायाकृता चेत्स्यादीदृशी वासुरोत्तम॥ अन्यथा ते महामृत्युः क
थं भवति मानद॥३९॥ नेयमाकाशवाणी भो तस्माद्देवान्सहेश्वरान्॥ हनिष्यामोद्य दैत्येश श
त्रुहीनास्तदा वयं॥४०॥ तेषां वचनमाकर्ण्य मत्सरश्चैव हर्षितः॥ सत्यमुक्तं भवद्भिर्यद्गच्छध्वं
विद्विषां वधे॥४१॥ मत्सराज्ञां समादाय निःसृता दैत्यपुंगवाः॥ विचिन्वंति स्म सर्वत्र देवान्सर्वा
न्प्रयत्नतः॥४२॥ ॥इति श्रीमदांत्ये मौ॰ प्रथमखंडे वक्रतुंडचरित्रे मत्सरासुरविचारवर्णनं ना
म त्रयस्त्रिंशोध्यायः॥३३॥ मुद्गल उवाच॥ दैत्यान्भ्रमणयुक्तांस्त आययुर्ढुंढिसन्निधौ॥ यत्र दे
वगणैर्युक्तो वक्रतुंडः प्रतापवान्॥१॥ दृष्ट्वा तं वक्रतुंडं ते भयभीता बभूविरे॥ महाकायं महावी
र्यं निरनागस्वरूपिणं॥२॥ नानापरिवृतं वीरैः प्रलयाग्निसमैः परैः॥ देवैर्हर्षसमायुक्तैः संस्तुतं

भक्तिभावितैः ॥३॥ मनसा दैत्यपाः सर्वे मेनिरे मृत्युमात्मनः ॥ सत्याकाशमयी वाणी सोयं वक्ताननो
भवेत् ॥४॥ वक्रतुंडजयत्वं वै जयत्वं जय सर्वदा ॥ देवैः प्रकथ्यते तस्माद्वक्रतुंडोयमागतः ॥५॥ य
दि युद्धं करिष्यामो तेन सार्द्धं महाद्भुतं ॥ युद्धे वयं मृताश्चेद्वै वृत्तांतं को निवेदयेत् ॥६॥ अतो मत्सर
दैत्येशं गमिष्यामो जवान्विताः ॥ एवं निश्चययुक्तास्ते मत्सरं जग्मुरादरात् ॥७॥ स देवो वक्रतुंडस्त
त्पंचयोजनदूरतः ॥ ईर्ष्यापुरं परित्यज्य स्थितः कृत्वा सभां प्रभुः ॥८॥ दैत्यास्ते मत्सरं गत्वा
वृत्तांतं सन्यवेदयन् ॥ कथितं सत्यमेवेदं वचनं खसमुद्भवं ॥९॥ नरकुंजररूपेण दृष्टो वक्राननः
प्रभुः ॥ देवैः समावृतो भूपविचारं कुरु सर्वथा ॥१०॥ तेषां वचनमाकर्ण्य मत्सरश्चिंतयान्वितः ॥ व
भूव म्लानतुंडश्च ज्ञात्वा शत्रुं महाबलं ॥११॥ ततः क्रोधसमाविष्टस्तं हंतुं चक्रिवान्मनः ॥ आज्ञा
पयत्स दैत्येंद्रान्सज्जितान्भो भवंतु च ॥१२॥ गमिष्यामि रिपुं हंतुं वक्रतुंडं महाबलं ॥ स देवं सपरि

वारंततोहृदिसुखंभवेत्॥१३॥आज्ञामात्रेणदैत्येशाःसन्नद्धाःसमुपाययुः॥हर्षेणमहतायुक्ता
देवमर्दनलालसाः॥१४॥चतुरंगंमहत्सैन्यंनिःसृतंनगराद्बहिः॥तन्मध्येमत्सरोवीरःशुशुभेरथ
संगतः॥१५॥आगतास्तेत्वराभाजोवक्रतुंडःस्थितोभवन्॥तान्दृष्ट्वादेवसंघास्तंशशंसुर्गणनाय
कं॥१६॥स्वामिन्समागतादैत्याःस्वयमेवमहाप्रभो॥यत्करिष्यसिदेवत्वंत्वरयातत्कुरुप्रभो॥१७॥
नोचेदस्मांश्चदैतेयाहनिष्यंतिमहाबलाः॥मरणंप्राहमस्माभिःकुत्रस्थातुंनशक्यते॥१८॥
देवानांवक्रतुंडश्चश्रुत्वावचनमादरात्॥उवाचविस्मितोभूत्वामाभयंकुरुतप्रियाः॥१९॥स
दैत्यंमत्सरंदेवाहनिष्यामिनसंशयः॥पश्यंतुकौतुकंयुद्धेमदीयंपरमद्भुतं॥२०॥इत्युक्त्वाव
क्रतुंडःससिंहारूढोभवत्प्रभुः॥पाशांकुशकरोगर्जन्मेघनादसमस्वनः॥२१॥तस्यशब्देन
संत्रस्तंत्रैलोक्यंसचराचरं॥भयभीतादैत्यगणाबभुवुश्चप्रजापते॥२२॥मत्सरोहृदिसंत्रस्तो

मु॰पु॰
९५

वचनंचेदमब्रवीत्॥ दृश्यते प्रबलासेना किं भविष्यति दैत्यपाः॥२३॥ भययुक्तं वचस्तस्य श्रुत्वा दैत्य नं॰१
पाब्रुवन्॥ वयं योत्स्यामहे स्वामिन्पश्यत्वं युद्धजं महः॥२४॥ इत्युक्त्वा मत्सरं सर्वे प्रल्हादप्र
मुखासुराः॥ वक्रतुंडं ययुर्वीरा नादयंतस्त्रिविष्टपं॥२५॥ बाणवृष्टिं महोग्रां ते चक्रुः क्रोधसमन्वि
ताः॥ ववर्षुरस्त्रशस्त्राणि वर्षाकाले घना इव॥२६॥ तैरस्त्रैर्दैत्यराजानां हतासेना दिवौकसां॥ दे
वा विष्णुमुखास्तत्र युयुधुस्तान्समागतान्॥२७॥ घोरयुद्धं ततस्तेषां देवासुरविनाशनं॥ पति
तं दारुणं क्रूरं द्रष्टुं नैव प्रशक्यते॥२८॥ देवाश्च दानवाश्चैव युयुधुः शस्त्रपाणयः॥ मरणे निश्च
यं कृत्वा परस्परजयेप्सवः॥२९॥ केचिद्बाणमयीं वृष्टिं चक्रुः केचित्तु शक्तयः॥ चिक्षिपुर्भिंडि
पालानि खड्गैश्च चिच्छिदुः परे॥३०॥ बबंधुरपरे पाशैर्भल्लैश्च विविधुः परे॥ गदायुद्धं महाघोरं रामः
चक्रिरे वीरसत्तमाः॥३१॥ मुद्गरैश्च महावीरा मारयामासुरोजसा॥ मल्लयुद्धं परे चक्रुर्नादयं ९५

नोदिशोदश॥३२॥सैन्यस्यरजसासर्वंव्याप्तमासीद्दिगंतरं॥नाभूत्स्वपरयोधोपिपुरोगाज्जघ्निरेत
दा॥३३॥शस्त्रैःशस्त्राणिसंवार्यतथास्त्रैरस्त्रसंचयं॥बाणैर्बाणान्समारब्धाश्चिच्छिदुस्तेपरस्परं॥
३४॥शस्त्रेभग्नेचतेवीरामल्लयुद्धंसुदारुणं॥चक्रिरेक्रोधसंयुक्तामंडलानिप्रबभ्रमुः॥३५॥ह
स्तेनहस्तमापीड्यपादैःपादान्प्रगृह्यच॥कूर्परंकूर्परेणैवमर्दयामासुरादरात्॥३६॥मस्तकं
मस्तकेनैवजानुभ्यांजानुनीतथा॥ललाटेनललाटंचस्फालयामासुरंजसा॥३७॥एवंयुद्धेप्र
वृत्तेवैमृताःकेचिन्मुमुर्छिरे॥भग्नाःकेपिक्षताअन्येनानाशस्त्रप्रहारतः॥३८॥शोणितौघवहाघो
रानदीजातादुरत्यया॥रक्तेनसर्वतस्तत्ररेणवोमज्जितास्ततः॥तेनप्रकाशिरेतत्रदिशःस्वपरबो
धकाः॥ततोभून्नियतंयुद्धंयथायोग्यंप्रजापते॥४०॥रथिनोरथिभिःसार्द्धंगजिनोगजिभिस्तथा॥
अश्वारूढाहयारूढैःपदाताश्चपदातिभिः॥४१॥श्रेष्ठायुयुधिरेश्रेष्ठैर्महाबलसमन्विताः॥प्रबो

मु॰पु॰
९६

ध्वजघ्निरेकेचिद्वीरासमरशालिनः॥४२॥परस्परंप्रभेदुस्तेशस्त्रास्त्रैर्मर्मभेदिभिः॥सर्वेशुशुभिरेतेनपु
ष्पिताःकिंशुकाइव॥४३॥कदाचिज्जयिनोदेवाःकदाचिद्दानवास्तथा॥नरात्रौविश्रमंचक्रुःक्रोधयुक्ताः
परस्परं॥४४॥एवंपंचदिनंयुद्धंपतितंतत्रदारुणं॥नजयंप्राप्यतेदेवैर्दैत्यैश्चापिप्रजापते॥४५॥
इतिश्रीमदांत्येमौ॰प्रथमखंडेवक्रतुंडचरित्रेदेवासुरप्रसंगोनामचतुःत्रिंशोध्यायः॥३४॥मुद्ग
लउवाच॥एवंपरस्परंघोरंयुद्धंकृत्वामहाबलाः॥नजयंप्राप्नुवंतिस्मकर्मचैवयथासुरं॥१॥तद्दृ
ष्ट्वापरमाश्चर्यंप्रल्हादःकुपितोभवत्॥धनुःसज्यंमहाघोरंकृत्वाबाणान्समाददे॥२॥मंत्रयन्न
नलास्त्रेणचिक्षेपसशरान्बहून्॥तेभ्योजातोमहानग्निःप्रलयानलसन्निभः॥३॥ददाहदेवसेनां
सप्रल्हादोसुरसत्तमः॥भयभीताःसुराःसर्वेजज्वलुश्चसमंततः॥४॥हाहाकारंप्रकुर्वंतोदग्धास्ते
जातवेदसा॥मर्यादांरणभूमिंचत्यक्त्वाततःपलायिताः॥५॥महाग्निःसर्वतस्तान्वैसुरान्वाहनसंयु

रामः
९६

वक्रतुंड उवाच॥ शृणु मत्सरयत्पृष्टं त्वया बुद्धिविशारद। तत्सर्वं कथ इष्यामि संशयच्छेदनायते॥२५॥३

अन्यत्रत्वं महाभाग ब्रह्मभावेन संस्थितः॥ सुरासुरमयं ब्रह्म कथमेकं समाश्रितः॥२२॥ असुरा
णां निहंता त्वं सुराणां पालको धुना॥ एतन्मे संशयं ब्रह्मन्छेत्तुमर्हसि विश्वप॥२३॥ मत्स
रस्य वचः श्रुत्वा वक्रतुंडः प्रतापवान्॥ उवाच तं महावीरं भावं दृष्ट्वा हृदि स्थितं॥२४॥ अ
खिलो ब्रह्मरूपोहं मया सृष्टं चराचरं॥ लीलार्थं बंधहीनेन स्वस्वधर्मयुतं परं॥२५॥ प्रकृतिं
पुरुषाभ्यां तस्याल्पतेद्ध्रियते मया॥ तयोर्हृदि स्थितेनैव चिंतामणिस्वरूपिणा॥२६॥ सर्वेषां
चित्तवृत्तेश्च चालकोहं न संशयः॥ मदाज्ञावशगं सर्वं वर्तते दैत्यपुंगव॥२७॥ यदा स्वधर्ममत्यंतं
त्यक्त्वा देवगणेश्वराः॥ दैत्यानां निधनार्थाय यतंते मूलनाशकाः॥२८॥ तदा दैत्यहृदिस्थोहं तपसि
प्रेरको मतः॥ तेन दैत्यास्तपश्चेरुर्देवानां प्रजिघांसया॥२९॥ तपसा वरदानेन देवान्घ्नंति महा
बलाः॥ ततस्ते सततं देवाः सत्ताहीना भवंति हि॥३०॥ ततोहं देवसंघानां विपरीतो न संशयः॥

र्वतः ॥२॥ ननानायोनिजोजंतुर्नाष्टावरणकस्तथा ॥ ब्रह्मरूपोहमानंदानंदकारकएवच ॥३॥ त्वां
हंतुंमुनिदेवानांस्थापनार्थमिहागतः ॥ हनिष्यामिनसंदेहोदैत्यनायकदुर्मतो ॥४॥ शिथिलं
वरपुण्यंतेसंप्राप्तंपापसंचयात् ॥ नानापापफलार्थस्यदातातेहंसमागतः ॥५॥ कर्त्तुमक
र्त्तुमीशंमामन्यथाकर्त्तुमादरात् ॥ जानीहिमत्सरत्वंवैकिंकरिष्यसितद्वद ॥६॥ जीवितुमिच्छ
सिप्राज्ञतदामेशरणंव्रज ॥ स्वस्थानेधर्मविद्वेषंत्यक्त्वाधुनासुखीभव ॥७॥ देवादीनांचविद्वे
षंत्यक्त्वातिष्ठसिदैत्यप ॥ तदाज्ञांनहनिष्यामिजानीहिमेमतंपरं ॥८॥ मुद्गलउवाच ॥ वक्रतुं
डवचःश्रुत्वामत्सरोविस्मितोभवत् ॥ उवाचतंप्रसन्नात्माभक्तिभावेनयंत्रितः ॥९॥ मत्स
रउवाच ॥ वक्रतुंडनमस्तुभ्यंवदमेसकलंप्रभो ॥ संशयंछिंदितंपूर्वंहृदिस्थंगणनायक ॥
॥१०॥ यदित्वंसगुणोनास्तिनिर्गुणोपिनकथ्यसे ॥ ब्रह्मरूपोसिसर्वेशतदाकारधरःकथं ॥११॥

यतेखल॥४०॥तलप्रहारसंयुक्ताःपर्वताश्चूर्णितांगताः॥ तस्याग्रेकथमायातःकालेनप्रे
रितोयथा॥४१॥शब्दगर्जनमात्रेणकंपतेसचराचरं॥तस्याग्रेत्वंसुसंग्रामंकिंकरिष्यसितद्वद॥
॥४२॥ब्रह्मांडंसकलंयुद्धेजितंमयाप्रभावतः॥तदात्वंकुत्रगुप्तःसन्स्थितोसिभयभावतः॥
॥४३॥समीचीनमिदंमूढकृतंत्वयाधुनाखल॥दृष्टिसमीपगोयेनजातोहन्मिसुरप्रियं॥४४॥
शरणंयाहिमेदुष्टजीवितुंयदिचेच्छसि॥मदाज्ञावशगोभूत्वावनेतिष्ठयथासुखं॥४५॥मूढ
भावेनसंयातंत्वांनहन्मितदासुर॥प्रेरकान्मुनिदेवांस्तेतान्हनिष्यामिनिश्चितं॥४६॥इतिश्री
मदांत्येमौ॰प्रथमखंडेवक्रतुंडचरित्रेमत्सरसमागमोनामसप्तत्रिंशोध्यायः॥३७॥ ॥मु
द्गलउवाच॥एवंब्रुवंतमत्यंतंमत्सरंक्रोधसंयुतः॥वक्रतुंडप्रसन्नात्मास्मयन्निवंजगादतं॥
॥१॥वक्रतुंडउवाच॥मागर्वंकुरुदैत्येशनाहंदेवोनमानुषः॥नासुरोनैवनागश्चनगंधर्वोनप

भुक्ता नानाविधा भोगाः सोयं मत्सर आगतः ॥ नरकन्याः पशोः कन्या मुनिकन्याः समाहृताः ॥
बलेन न समं यस्य ब्रह्मांडे सोयमागतः ॥ ३२ ॥ अस्याष्टवरणैर्मृत्युर्न भवेच्च कदाचन ॥ सोयं समा
गतो दैत्यं पश्य पश्य गणाधिप ॥ ३३ ॥ इत्येवं ब्रुवतो देवान्वक्रतुंडो महाबलः ॥ माभयं कुरुत प्रा
ज्ञा हनिष्यामीति सोब्रवीत् ॥ ३४ ॥ सिंहारूढो महाबाहुरेकदंतविराजितः ॥ पाशांकुशधरो भूत्वा
पृथौ संग्राममंडले ॥ ३५ ॥ प्रमोदामोदकाद्यैश्च संवृतं युद्धलालसं ॥ तं दृष्ट्वा क्रोधसंयुक्तो मत्स
रं प्राह मर्त्सयन् ॥ ३६ ॥ मत्सरासुर उवाच ॥ किमर्थमागतस्त्वं मे वक्रतुंड रणे ग्रतः ॥ अद्यैव त्वां ह
निष्यामि मामुखं दर्शयस्व रे ॥ ३७ ॥ मूढोसि येन संग्रामं कर्तुमागत एव च ॥ न मे मृत्युर्भवेद
ष्टावरणैर्देहधारिभिः ॥ ३८ ॥ शंभुविष्णुमुखैर्देवैः प्रेरितस्त्वं न बुध्यसे ॥ मोहभावेन संयाते मत्स
रेण युयुत्सया ॥ ३९ ॥ एकबाणेन त्वां हन्मि ससैन्यं नात्र संशयः ॥ पदाघातेन मे भूमिर्विशीर्णा जा

मु॰पु॰
१०३

खविवर्जिताः॥ सर्वर्त्तुफलदावृक्षामेघाः कालप्रवर्षिणः॥२२॥ यस्याज्ञावशभावेन तपति च
दिवाकरः॥ न शीतं प्रबलं तत्र मत्सरे राज्यभागिनि॥२३॥ न रोगाः प्रभवंतीह भयभीताः स
मंततः॥ न च चौरादिसंत्रस्तं जगद्राज्ये प्रशासति॥२४॥ यस्य पूजा च सर्वत्र जगती क्रियते न
वै॥ यज्ञादिसर्वमखिलं भुंक्ते येन महात्मना॥२५॥ कालो बिभेति यं दृष्ट्वा तदाज्ञापालको
भवत्॥ कर्मखंडनरूपं च कृतं येन सुरारिणा॥२६॥ न स्वाहा न स्वधा यत्र न वषट्कार एव च॥
न वेदाध्ययनाचारो मत्सरे राज्यकर्त्तरि॥२७॥ न स्नानादिक्रिया यत्र न स्वधर्मः स्वभावजः॥
न वर्णो नाश्रमो धर्मो मत्सरे राज्यकर्त्तरि॥२८॥ देवाश्वापदतुल्या वै भ्रमंति वनगोचरे॥ अन्न
वस्त्रादिसंहीनाः कृता दैत्येंद्रकेन भो॥२९॥ मुनयस्तपसा हीनाः शापसामर्थ्यहीनकाः॥
कृता मत्सरदैत्येन सोयं स्वामिन्समागतः॥३०॥ देवांगना च तत्कन्या नागकन्या महात्मना॥

रामः
१०३

॥१२॥ देहस्यमरणंनित्यंजन्मचैवतथाप्रभो॥ किंचित्रंतत्रसंजातंयेनशोचसिदैत्यप॥१३॥ आत्म
नोमरणंनैवजन्मशास्त्रेषुकथ्यते॥ मायामोहंपरित्यज्यस्वस्थोभवमहामते॥१४॥ तयोरूर्ध्वक्रि
यासर्वाकर्त्तव्यास्वजनैरपि॥ अतस्त्वंमरणंदैत्यसार्थकंतत्तयोःकुरु॥ अथवातौपरित्यज्यवक्र
तुंडंजहिप्रभो॥ अथवाशरणंयाहियेनैवंकुशलंभवेत्॥१६॥ वीरारुदंतिकुत्रापिनैवजानी
हिदैत्यप॥ सपलान्हर्षसंयुक्तान्माकुरुष्वाधुनापरान्॥१७॥ एवंप्रबोधितोदैत्योमत्सरःक्रो
धसंयुतः॥ आदायसकलंसैन्यंययौसंग्राममंडलं॥१८॥ मत्सरासुरआयांतंदृष्ट्वाशंभ्वाद
यःसुराः॥ भयभीताश्चतंप्रोचुर्वक्रतुंडंप्रणम्यते॥१९॥ स्वामिन्समागतोदैत्योमत्सरःसप्र
तापवान्॥ यस्याग्रेमशकादेवास्तृणरूपानरादयः॥२०॥ यस्याग्रेवशवर्त्तिन्यःश्रियःस
र्वार्थदायकाः॥ ब्रह्मांडंकंपतेयस्यभयात्सोयंसमागतः॥२१॥ यस्यराज्येमहाभागाजनाद्रुः

किंजातंभविताकिंवादैवंमेविफलंकृतं॥३॥तपसामरमुख्यत्वंब्रह्मांडंराज्यमंजसा॥मयाप्रा
प्तंस्वसामर्थ्यंमतुलंतद्वृथाकृतं॥४॥अहोहिबलवद्दैवंप्रबलोविष्फलोमतः॥येनमेभयसंप्रा
प्तिःपश्चात्सूर्योदयोयथा॥५॥मृतादैत्याअसंख्याश्चमदर्थेनात्रसंशयः॥मृतौपुत्रौमहाकालौ
कालस्यकथमद्यतौ॥६॥अधुनाशोकसंतप्तोमरिष्यामिनसंशयः॥कथंमिथ्यास्वरूपंमेवर
दानंकृतंमहत्॥७॥अहोपुत्रौमहावीर्यौकथंमरणमापतुः॥माभ्यांस्वभुजवीर्येणजिताविष्णु
मुखाःसुराः॥८॥अहोपुत्रौचमांत्यक्त्वाघोरेदुःखार्णवेपरे॥क्वगतौवदतंवाक्यंनिष्ठुरौकथमा
गतौ॥९॥आदौचपितरंवृद्धंत्यक्त्वामांसुंदरप्रिय॥विषयप्रियमेबालौकथंमृत्युमुपस्थितौ॥
॥१०॥इतिनानाविधंशोकंचक्रेदैत्येंद्रपालकः॥तंतेसभ्यवराःसर्वेसांत्वयामासुरादरात्॥११॥
वृद्धाऊचुः॥नरोदनंप्रकर्त्तव्यंत्वयादैत्येंद्रनायक॥रणेमृतौमहावीर्यौकीर्त्तिंकृत्वामहत्तरां॥

भयकरंघोरंकथितुंशक्यतेनच॥५३॥प्रल्हाद प्रमुखाः सर्वेपतितारणमूर्द्धनि॥मृततुल्या
मृतावापिकिमस्माभिर्ज्ञायतेनच॥५४॥तवपुत्रौमहावीर्यौमृतौसंग्राममंडले॥कृत्वायु
द्धंमहाघोरंपरशुभ्यांमहामते॥५५॥अकस्माद्वक्रतुंडस्यगणौद्वौसमुपस्थितौ॥ताभ्यां
चैवहतौवीरौस्वल्पकालेनदैत्यप॥५६॥वक्रतुंडसमंचैवनभूतंनभविष्यति॥इतिमनसि
संज्ञातंतस्मात्तंशरणंव्रज॥५७॥नोचेद्देवगणाःसर्वेनाशंयास्यंतिनिश्चितं॥मागर्वंकुरु
दैत्येशदैत्यान्रक्षमहामते॥५८॥ ॥इतिश्रीमदांत्येमौ०प्रथमखंडेवक्रतुंडचरित्रेसुंदरप्रि
यविषयवधोनामषड्त्रिंशोध्यायः॥३६॥ ॥मुद्गलउवाच॥दैत्यानांवचनंश्रुत्वासदैत्योम
त्सरासुरः॥मूर्छितःसहसाभूमौपपातभयविह्वलः॥१॥अतिष्ठन्दैत्यपास्तत्रतैराशुविधृ
तोनृपः॥सावधानंप्रचक्रुस्तंप्रयत्नैःपरमादृताः॥२॥द्विमुहूर्तेनसंबद्धोमत्सरःप्रललापह॥

मु॰कु॰
२०२

काद्याश्चभवद्भिर्बलमंजसा॥ हतंसर्वंचदैत्यानांदैत्यश्रेष्ठाःप्रमूर्छिताः॥४४॥अधुनामरणंप्राप्तंस
मीपेवःप्रदृश्यतां॥शस्त्रैस्तीक्ष्णैर्हनिष्यावःसवक्रतुंडकान्खलान्॥४५॥एवमुक्त्वासबाणांस्तौ
ववर्षतुर्महासुरौ॥ततस्तयोर्बलंवीक्ष्यद्वौवीरौसमुपस्थितौ॥४६॥सर्वगःसर्वविच्चैवसबलोधृत
कार्मुकौ॥बाणवृष्टिंततोवार्यबाणांश्चिक्षेपतुःपरान्॥४७॥अमोघाःसर्वबाणास्तेजग्मुःकाल
यमोपमाः॥दैत्यान्सर्वान्प्रचक्रुस्तौछिन्नभिन्नात्मकान्मुने॥४८॥मृतामुमूर्षवःकेचित्पतिताःध
रणीतले॥अकस्माद्रक्तसंघातैर्नदीतत्रप्रवर्त्तिता॥४९॥तयोर्बलंनिरीक्ष्यैवकुपितौदैत्यपुंगवौ॥
अग्न्यस्त्रंधनुषिश्रेष्ठंदधतुःक्रोधसंयुतौ॥५०॥यावन्मुमोचतुस्तावत्परशूयमसंनिभौ॥आगतौ
चशिरश्छेदंतयोश्चचक्रतुःक्षणात्॥५१॥मत्सरस्यसुतौवीक्ष्यमृतौसर्वेभयातुराः॥मत्सरंश
रणंजग्मुश्चुरूर्वृतांतमंजसा॥५२॥दैत्याऊचुः॥शृणुदैत्येशवृत्तांतंरणभूमिसमुद्भवं॥महा

रामः
२०२

पेमुनिं॥३४॥गतंशुक्रंतदादृष्ट्वादैत्याःसर्वेभयातुराः॥हाहाकारंप्रचक्रुस्तेकिंभविष्यतिविह्व
लाः॥३५॥रक्षितागुरुरत्युग्रःपश्यतांनोमहासुराः॥नीतश्चमरणंतस्माच्छ्रेष्ठंकिंनमृतावयं॥
॥३६॥अधुनाक्वनुगंतव्यंतस्माद्युद्धमहेवयं॥मरिष्यामोथवामोचयिष्यामस्तंतुतेजसा॥३७॥
इतिपरस्परंदैत्याउक्त्वामरणनिश्चयाः॥उदायुधाश्चसर्वेतेयुयुधुर्देवसैनिकैः॥३८॥व्यंगादे
वाःकृतास्तैस्तेपतितारणमूर्द्धनि॥हाहाकारश्चसर्वत्रदेवसैन्येप्रवर्त्तितः॥३९॥ततोब्रह्मप्रिया
द्यायेकुपिताःशस्त्रधारिणः॥परशुवरदाद्यैश्चपाशांकुशत्रिशूलकैः॥४०॥शस्त्रैर्दैत्यान्निजघ्नु
स्तान्कालरुद्राइवप्रजां॥तैरस्त्रैर्दैत्यसेनायाःकदनंकृतमोजसं॥४१॥बहवश्चमृतादैत्यामू
र्छिताश्चापरेवनौ॥पेतुस्तेसर्वशोवीराःप्रल्हादप्रमुखामुने॥४२॥ततोदैत्यकुमारौतावागतौ
रणमूर्द्धनि॥उचतुस्तान्गणांस्तत्रप्रमोदाद्यान्महासुरौ॥४३॥दैत्यपुत्रावुचतुः॥प्रमोदामोद

मु॰पु॰
१००

युक्ताः समाययुः॥ तैः प्रेक्षिताः सुराः सर्वे गता मूर्छास्तदाभवन्॥२५॥ श्रमहीनाः क्षतादिभ्यो हीना जाताः
प्रभावतः॥ तेजसा द्विगुणाश्चैव हृष्टपुष्टा यथा मुने॥२६॥ एतस्मिन्नंतरे तत्र काव्येन जीवितास्तथा॥ दै
त्याः समुत्थिताः सर्वे निरुजश्च महाबलाः॥२७॥ प्रल्हादप्रमुखा वीराश्चक्रुर्नादं समंततः॥ ब्रह्मांडम
खिलं तेन सनादमभवत्परं॥२८॥ ततो देवगणाः सर्वे शंखनादं प्रचक्रिरे॥ तेन दैत्यगणा भीता ब
धिरा इव तस्थिरे॥२९॥ शंखानां चैव भेरीणां दुंदुभीनां स्वनैः परैः॥ वीराणां क्षेडितेनैव हेषितैर्बृं
हितस्वनैः॥३०॥ रथनेमिः स्वनैः सर्वं व्याप्तमासीत्प्रजापते॥ परस्परं तथा संपद्वीक्ष्य वीक्ष्य वि
सिस्मिरे॥३१॥ एतस्मिन्नेव काले ते प्रमोदाद्या गणा ययुः॥ कुपिताः शस्त्रसंवृष्टिं चक्रिरे दैत्य
मोहिनीं॥३२॥ तेषां शस्त्राणि सर्वाणि ह्यमोघानि महामुने॥ चिच्छिदुर्दैत्यराजानां मस्तकानि भु
जादिकान्॥३३॥ ब्रह्मप्रियो महाबाहुः शुक्रं धृत्वा प्रपश्यतां॥ असुराणां गतो दूरं गुहायां चिक्षि

रामः
१००

भुः॥महोग्रांकालरूपांवैप्रलयस्यप्रकाशनीं॥२५॥चिच्छेदतुश्चतांदैत्यौस्वशरैरतिवेगितैः॥तौमंड
पंक्षणेनैवचक्रतुःशरसंभवं॥२६॥तद्बाणैरपितेदेवाश्छिन्नभिन्नाःकृतामुने॥शंकरोविस्मितो
भूत्वाशूलमुग्रंमुमोचह॥२७॥आगतंकालरूपंचशूलंदृष्ट्वामहासुरौ॥पाशुपतंमहास्त्रंतौ
मोचयामासतुस्तदा॥२८॥अनिर्वार्यंमहोग्रंवैसर्वभस्मकरंपरं॥जज्वालतेजसासर्वंब्रह्मांडंव्या
कुलंततः॥२९॥त्रिशूलंनिष्फलंतेनमहास्त्रेणकृतंक्षणात्॥शिवस्यहृदयेगत्यपपातभयदाय
कं॥३०॥मूर्छितःशंकरस्तेनपतितोधरणीतले॥हाहाकारश्चसर्वत्रदेवसैन्येततोभवत्॥३१॥प
तितंशंकरंदृष्ट्वाक्रतुंडोमहाबलः॥स्वांसेनांप्रेरयामासदैत्यमर्दनलालसां॥३२॥गणेशदूत
मुख्यायअष्टौतत्राययुःपरः॥स्वस्वसेनांसमादायमहाकायामहाबलाः॥३३॥प्रमोदश्चैवआ
मोदस्तथाब्रह्मप्रियोमुने॥योगप्रियश्चस्वानंदभोक्ताज्ञानमयश्चह॥३४॥सर्वगःसर्वविच्चैवक्रोध

मु.पु.
९९

हर्षयुक्तः सशौनकः ॥५॥ मुद्गल उवाच ॥ दैत्यपुत्रौ महावीर्यौ शंकरं क्रोधसंयुतौ ॥ यदूचतुश्च तत्सर्वं शृणु
दक्षप्रजापते ॥६॥ मत्सरपुत्रावूचतुः ॥ तिष्ठ तिष्ठ महादेव पश्य पौरुषमावयोः ॥ ज्ञातं त्वदीयसामर्थ्यं न
च गंतुं त्वमर्हसि ॥७॥ अस्मदीया महासेना हता सर्वा सदाशिव ॥ दैत्येंद्राः पातिताः सर्वे त्वया शंकर तेज
सा ॥८॥ पौरुषं दर्शितं पूर्णं सर्वदेवातिगं महत् ॥ अधुना त्वां हनिष्यावो वक्रतुंडस्य पश्यतः ॥९॥ त्वां ह
त्वा वक्रतुंडं च हनिष्यावो न संशयः ॥ पश्चात्सर्वान्सुरेंद्राश्च ततो मुनिगणान्सुरान् ॥१०॥ एवमुक्त्वा
महादेवं धनुः सज्यं प्रचक्रतुः ॥ तावुवाच महादेवः स्मयमान इदं वचः ॥११॥ शिव उवाच ॥ भवद्भ्यां
कथितं क्रूरं तत्सर्वं तथ्यमेव च ॥ अधुनायं समुत्पन्नो वक्रतुंडो महाबलः ॥१२॥ भूभारहरणार्था
य भवतां नाशनाय च ॥ अधुना तद्गतः कालो विपरीतेन कर्मणा ॥१३॥ वक्रतुंडप्रसादेन हनिष्या
मि समत्सरां ॥ आसुरं कुलमत्यर्थं पापरूपं न संशयः ॥१४॥ इत्युक्त्वा बाणवृष्टिं स चकार शंकरः प्र

रामः
९९

दैत्यसैन्येमहानासीत्तदाकोलाहलपरः॥४५॥ततस्त्रिशूलवेगेनशिवेनसहसापुनः॥मूर्छिता
श्चकृताःकेचित्केचिच्चमारितामुने॥४६॥सर्वेसुरगणास्तत्रपतितारणमूर्द्धनि॥ततोमत्सरपु
त्रौद्वौशंकरंजग्मतुःप्रभो॥४७॥सुंदरप्रियनामाचविषयप्रियएवयः॥ऊचतुःशंकरंतत्रक्रोध
युक्तौमहासुरौ॥४८॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेशिवविजयोनामपंच
त्रिंशोध्यायः॥३५॥ ॥दक्षउवाच॥वदब्रह्मन्नशेषेण ममहर्षकरींकथां॥विस्तरेणमहाभाग
वक्रतुंडप्रभावजां॥१॥मुद्गलउवाच॥नशक्यतेग्निपुत्रेणविस्तरेणपिनाकिना॥शेषेणविधि
नादक्षसंक्षेपेणब्रवीमिते॥२॥दक्षउवाच॥किमुक्तंदैत्यपुत्राभ्यांशंकरेणश्रुतंवद॥श्रुत्वातत्किं
कृतंतेनमहादेवेनमानद॥३॥दैत्याभ्यांकिंकृतंतत्रतद्वदस्वविशेषतः॥श्रुत्वात्वद्वदनाभोजात्क
थांतृप्याम्यहंनच॥४॥सूतउवाच॥एवमादरमाज्ञायदक्षस्यभावितात्मनः॥मुद्गलस्तमुवाचाथ

मु॰पु॰
९८

नारायणास्त्रवेगेनचक्रंप्रतिहतंततः॥ देवान्सर्वान्ददाहापिमहास्त्रंसर्वतःपरं॥३६॥ हृदयेसहसा
गत्यपतितंकेशवस्यतत्॥ मूर्छितंमृततुल्यंतंचकारचजनार्दनं॥३७॥ ततोमदयुतादैत्याज
गर्जुहर्षसंयुताः॥ प्रशशंसुर्महाभागंप्रल्हादंतेजसान्वितं॥३८॥ नारायणास्त्रसंदग्धान्देव
र्षीन्वीक्ष्यशंकरः॥ क्षुभितोदेवरक्षार्थंपिनाकंतोलयन्नभूत्॥३९॥ पाशुपतंमहास्त्रंतत्संद
धेक्रोधसंयुतः॥ बलेनमोचयामासशंकरोशंकरोभवत्॥४०॥ पाशुपतंमहास्त्रंच [illegible]
[illegible] नारायणात्मकंतथा॥ उभेस्त्रेसंयुगेतत्रयुयुधातेविहायसि॥४१॥ देवमुनिगणास्त
त्रहर्षयुक्ताबभूविरे॥ प्रशशंसुर्महादेवंदेवदेवंचशंकरं॥४२॥ ततःपशुपतिःक्रुद्धस्त्रिशूलं
संदधेमुने॥ तत्याजदैत्यसेनायांप्रलयप्रभवंपरं॥४३॥ त्रिशूलंकारयामासमृतान्दैत्यान्सह
स्रशः॥ प्रल्हादहृदयेकस्मात्पपातयमसन्निभं॥४४॥ तेनासौपतितोभूमौवाताहतइवद्रुमः॥

रामः
९८

रंचपातयामासभूतले॥ कुपितोमाधवस्तत्रचक्रंतत्याज्यदासुरं॥२६॥ चक्रेणक्षुरधारेणहतादै
त्याःसहस्रशः॥ गदयामूर्छिताःकेचिन्मुख्यायेतत्रसंस्थिताः॥२७॥ एतस्मिन्समयेवीरःप्रल्हादः
संबभूवह॥ सावधानोमहाभागस्संययौक्रोधदीपितः॥२८॥ बाणवृष्टिंचकारासौमहोग्रांदेवना
शिनीं॥ तयातांछिन्नभिन्नांगान्देवांश्चक्रेधरातले॥२९॥ गदयादेवदेवेशंकेशवंयुयुधेभृशं॥
खड्गेनमूर्छितंचक्रेगरुडंदैत्यनायकः॥३०॥ ततश्चकुपितोविष्णुस्तंहंतुंचक्रमाददे॥ बहुधाभ्रामया
मासतत्याजशस्त्रमुत्तमं॥३१॥ तन्मस्तकानिदैत्यानांचक्रंचिच्छेदसर्वतः॥ बाहूदरभुजांश्चैवच
कारशकलीकृतान्॥३२॥ सहसासुरराजंचप्रल्हादंहंतुमाययौ॥ चक्रंतेजोमयंदिव्यंसमीपेज्व
लनप्रभं॥३३॥ त्वरयास्त्रंसप्रल्हादोधनुषिसंदधेमहत्॥ नारायणात्मकंचैवहृदिस्मृत्वाजना
र्दनं॥३४॥ मुमोचतन्महास्त्रंवैतेजोरूपममोघकं॥ अनिवार्यंजगद्भस्मकारकंकुपितःपरः॥३५॥

मु॰पु॰
२७

यमस्तंवैदंडाघातेनसोहनत्॥ चक्रेसंमूर्छितंदैत्यंमहिषंभयदायकं॥१६॥ एतस्मिन्नंतरेतत्रविरोचनः
प्रतापवान्॥ खड्गनेतंजघानाशुयमंसर्वभयंकरं॥१७॥ पपातखड्गघातेनयमोयमवतांप्रभुः॥ वरु
णस्तंवबंधापिविरोचनंस्वपाशतः॥१८॥ ततस्तंमोचयामासपाशंछित्वामहाबलः॥ अंधकःख
ड्गधारेणगदयावरुणंतथा॥१९॥ मूर्छितंस्मचकाराभूद्विरोचनःसमुत्थितः॥ ततोवायुःकुबेर
श्चतौयातौक्रोधसंयुतौ॥२०॥ वायुनाखड्गघातेनमूर्छितःप्रकृतोंजसा॥ अंधकासुरनामासौ
पपातधरणीतले॥२१॥ शंबरेणहतोवायुर्मुसलेनमहाबलः॥ सपपाततदाभूमौदेवःसर्वध
रोपिसन्॥२२॥ विरोचनेनबाणौघैस्ताडितोधनरक्षकः॥ मर्मभेदैर्भिरत्युग्रंपपातासौमहाबलः॥
॥२३॥ एतस्मिन्नंतरेतत्रविष्णुःस्वयमुपागतः॥ गदयातंजघानैवविरोचनंमहारिपुं॥२४॥ भिन्नहृ
दयदैत्येशंमृततुल्यंचकारह॥ अंधकंचक्रघातेनपातयामासकेशवः॥२५॥ बाणजालैःशंब

रेत॰१

रामः
२७

तान्॥ दाहयामास प्रबलः प्रल्हादेन प्रचोदितः॥६॥ तेन दैत्यगणाः सर्वे हर्षयुक्ता बभूविरे॥ प्रल्हा
दं पूजयंतस्ते साधु साधु कृतं त्वया॥७॥ सर्वान्पलायमानान्ससुरान्दृष्ट्वा पुरंदरः॥ मेघास्त्रं योजया
मास धनुषि क्रोधसंयुतः॥८॥ एतस्मिन्नंतरे तत्र प्रल्हादः समुपागतः॥ खड्गेन सहसेंद्रस्य धनुश्चि
च्छेद लाघवात्॥९॥ ततः इंद्रः प्रकोपेन वज्रं तत्याज्यतं शति॥ वज्रेण निहतो भूमौ प्रल्हादः सप
पात ह॥१०॥ पतितं तं तथा दृष्ट्वा महिषासुर आगतः॥ गदया देवराजं तं जघान मस्तके किल॥
॥११॥ गदया निहतः सोपि पपात रणमूर्द्धनि॥ मघवा मूर्छितोत्यंतं मुखाद्रक्तं समुद्वमन्॥१२॥
ततोग्निः परमः क्रुद्धो जज्वाल ज्वालया सुरं॥ महिषो जलरूपो भूत्प्लावयामास तं क्षणात्॥१३॥
निस्तेजाश्चिंतया युक्तोग्निः शक्तिं चिक्षेपाद्भुताः॥ तां खड्गेण महादैत्यः पातयामास भूतले॥१४॥
ततो महिषरूपेण शृंगाभ्यां दहनं मुने॥ चकार मूर्छितं क्रुद्धः पपात तेजसां निधिः॥१५॥ ततो ययौ

भवामि चासुराणां वै सिद्धिदाता महासुरा ॥२२॥ यदि दैत्या महादुष्टास्त्यक्त्वा घ्नंति स्वधर्मकं ॥ देवा
न्मूलविहीनांश्च कर्तुमिच्छंति दानव ॥२३॥ तदाहं देवरूपेण तेषां हृदि व्यवस्थितः ॥ छिद्रं प्रकाश
याम्यादौ हनने दैत्यरक्षसां ॥२४॥ ततस्ते नैव देवेंद्रा मार्गेण सुरविद्विषः ॥ घ्नंति मत्सरते सर्वे कथि
तं मे चरित्रकं ॥२५॥ यदि स्वहृदये देवा निश्चयं कुर्वते परं ॥ दैत्यानां तापसं विघ्नं छलेन फलहीनजं ॥
तदाहं वरदाता च भवामि दैत्यनायकं ॥ दैत्येभ्यो नात्र संदेहो देवगर्वप्रहारकः ॥२७॥ यदि दैत्या महा
भाग देवैर्जाता [illegible] दुरासदा ॥ तदाहं दैत्यनाशाय भवामि देहधारकः ॥२८॥ यदा दैत्याश्च देवाश्च
स्वस्वधर्मपरायणाः ॥ तदाहं ब्रह्मभावेन स्थितस्तेषां हृदि ह्यहो ॥२९॥ त्वया प्रपीडिता देवास्त्यक्त्वा
धर्मं स्वभावजं ॥ अतस्त्वां हंतुमायातो दैत्यराज महामते ॥३०॥ इत्युक्त्वा निजरूपं तद्दर्शयामास वि
घ्नपः ॥ ब्रह्मणि बिंदुमात्रेण संस्थितं सुंदरं मुने ॥३१॥ वक्रतुंडप्रसादेन तस्य दर्शनजेन च ॥ फले

नदैत्यराजोपिदिव्यंचक्षुरवाप्तवान्॥३२॥तेनैवचक्षुषातेनदैत्येनपरमाद्भुतं॥दृष्टंरूपंगणेशस्यब्रह्माका
रंप्रजायते॥३३॥नन्यूनंनाधिकंतत्रनसममात्मतानच॥चतुष्पादमयंब्रह्मपादहीनंस्वभावतः॥३४॥
नदेहोनस्मदेहत्रसगुणोनिर्गुणोनच॥नमायामायिकोभातिवक्रतुंडगजाननः॥३५॥सगुणंदेह
रूपंचनिर्गुणंमस्तकंमुने॥गजवक्त्रमयंतेनदृष्टंभिन्नंप्रभावतः॥३६॥तयोर्योगकरःसाक्षाद्वक्र
तुंडःप्रतापवान्॥अवयवादिसंयुक्तोज्ञातोदैत्याधिपेनसः॥३७॥ततस्तंप्रणनामाथभक्तियु
क्तेनचेतसा॥तुष्टावपरयाभक्त्यावद्धांजलिपुटोसुरः॥३८॥मत्सरउवाच॥नमामिवक्रतुंडंचमा
याहीनस्वरूपकं॥सिद्धिबुद्धिपतिंचैवसिद्धिबुद्धिप्रदंसदा॥३९॥अनंतलीलयायुक्तंलीलाहीनं
नमामितं॥अव्यक्तंव्यक्तरूपंवैनमामिस्वहृदिस्थितः॥४०॥जगन्मयंचतद्धीनंसर्वकामप्रपूर
कं॥ब्रह्मभूतप्रदंचैवनमामिगणनायकं॥४१॥सिंहारूढंचतुर्बाहुंनमामिविघ्ननायकं॥सि

द्धिबुद्धिपतिंचैवसिद्धिबुद्धिप्रदंसदा॥४२॥अनंतलीलयायुक्तंलीलाहीनंनमामितं॥अव्यक्तंव्यक्त
रूपंवैनमामिस्वहृदिस्थितं॥४३॥वेदांतवेद्यंसज्योतिर्ज्योतिषामपिभासकं॥नमामिसच्चिदानंद
देहरूपंगजाननं॥४४॥योगिनांहृदिसंस्थंचयोगिभ्योयोगदायकं॥भावाभावमयंदेवंनमामि
भाववर्जितं॥४५॥सर्वत्रपक्षहीनंतेसर्वपक्षधरंप्रभुं॥नमामिवक्रतुंडाख्यंब्रह्मब्रह्माधिपंविभुं॥
॥४६॥अहोभाग्यमहोभाग्यंयेनदृष्टोगजाननः॥सर्वाकारनिराकारहीनोयंवक्रतुंडकः॥४७॥श
रणंतेप्रपन्नोस्मिमांपाहिभक्तवत्सल॥प्रवणंत्वदीयेपादेसंसारोत्तारणेषिणं॥४८॥एवंस्तुत्वा
वक्रतुंडंपादयोर्निपपातह॥पुनःपुनःप्रणम्यासौवद्धांजलिःपुरस्थितः॥४९॥सदृष्ट्वातादृशंदै
त्यंभक्तियुक्तंगजानन॥जगादतंमहाभागंभक्तेशोभावतोषितः॥५०॥वक्रतुंडउवाच॥तेमत्स
रविनाशायकुपितोहंनसंशयः॥शरणागतनाशंचनेच्छामिवृणुवांछितं॥५१॥इदंत्वयाकृतंस्तो

त्रंमत्प्रीतिवर्द्धनंमहत्॥आयुरारोग्यमैश्वर्य्यदायकंधनधान्यकं॥पुत्रपौत्रकलत्रादिनानासंपत्करंप
रं॥धर्मार्थकाममोक्षाणांदायकंप्रभविष्यति॥५३॥मुद्गलउवाच॥वक्रतुंडवचःश्रुत्वामत्सरोभक्ति
संयुतः॥जगादवचनंतत्रवक्रतुंडंकृतांजलिः॥५४॥मत्सरउवाच॥प्रसन्नोयदिसर्वेशमह्यंदेयो
वरोयदि॥सुदृढांचतदाभक्तिंत्वदीयांदेहिविघ्नप॥५५॥अन्यत्वंमेवरंदेहित्वद्भक्तायेचमेप्रियाः॥
स्थानंदेहितथावृत्तिंयोगक्षेमकरीप्रभो॥५६॥मत्सरस्यवचःश्रुत्वावक्रतुंडस्तमब्रवीत्॥अचला
यदिमेभक्तिस्तवानघभविष्यति॥५७॥स्वस्वधर्मरताञ्जंतूंस्तान्रक्षस्वचमत्सर॥मदीयान्प्रवरान्भ
क्तांस्तान्पालयप्रयत्नतः॥५८॥यत्रमदीयपूजाच यत्रादौस्मरणंभवेत्॥सर्वारंभेषुतत्रत्वंमावि
घ्नंकुरुदैत्यप॥५९॥अन्यत्रसर्वभावेषुकर्मज्ञानादिकर्त्तृषु॥आसुरेणैववर्त्तस्वफलंग्राह्यंमहासु
र॥६०॥तेषांहृदिसमावि[illegible]श्यकुरुराज्यंमहामते॥मद्भक्तादिषुभावेषुकर्मज्ञानादिकर्त्तृषु॥

दासत्वंत्वंसदाभवं॥६२॥एवमुक्तोमहादैत्यस्तथेतितमुवाचह॥प्रणिपत्यगणेशानंहर्षयुक्ते
नचेतसा॥६३॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेवक्रतुंडविजयोनामाष्टत्रिं
शोध्यायः॥३८॥ ॥मुद्गलउवाच॥मत्सरंशांतिमापन्नंदृष्ट्वादेवर्षयस्तदा॥प्रहृष्टमनसोजाता
स्तुष्टुवुस्तंगजाननं॥१॥देवर्षयऊचुः॥सदाब्रह्मभूतंविकारादिहीनंविकारादिभूतंमहेशादिवंद्यं
॥अपारस्वरूपंस्वसंवेद्यमेकंनमामःसदावक्रतुंडंभजामः॥२॥अजंनिर्विकल्पंकलाकालहीनं
हृदिस्थंसदासाक्षिरूपंपरेशं॥जनज्ञानकारंप्रकाशैर्विहीनंनमामःसदावक्रतुंडं॥३॥अ
नंतस्वरूपंसदा[illegible]नंदकंदंप्रकाशस्वरूपंसदासद्वेगंतुं॥अनादिंगुणादिंगुणाधारभू
तंनमामःसदा॥४॥धरावायुतेजोमयंतोयभावंसदाकाशरूपंसदाभूतसंस्थं॥अहंका
रधारंतमोमात्रसंस्थंनमामःसदा॥५॥रविवायुविष्णुजलाधीशमृत्युविधात्रश्विवैश्वानरंप्र

रं

मु॰पु॰
२०८

काशं॥ दिशाबोधकं सर्वदेवाधिरूपं नमामः॰॥६॥ उपस्थत्वचावाणीनेत्रप्रकाशं करांघ्रिस्वरू
पं सदा प्राणजिह्वं। गुदस्थं श्रुतिस्थं महाखप्रकाशं नमामः स॰॥७॥ रजोरूपसृष्टिप्रकाशे
विधिं तं सदा पालके केशवं सत्वसंस्थं॥ नमोरूपधारं संहरेतं नमामः स॰॥ दिशाधीशरूपं
सदाशास्वरूपं ग्रहादिप्रकालं ध्रुवादिखगस्थं॥ अनंतोडुरूपं तदाकारहीनं नमामः स॰ २॥
महत्तत्वरूपं प्रधानः स्वरूपमहंकारधारं त्रयीबोधकारं॥ अनाद्यंतमायातदाधारकस्थं
नमामः स॰॥२०॥ सदाकर्मधारं फलैः स्वर्गदं तमकर्मप्रकाशेन मुक्तिप्रदं तं॥ विकर्मादि
नायातनाधारभूतं नमामः स॰॥११॥ अलोभस्वरूपं सदालोभधारं जनज्ञानकारं जनाधी
शपालं॥ नृणां सिद्धिदं मानवं मानवस्थं नमामः॰॥१२॥ लतावृक्षरूपं सदापक्षिरूपं धना
दिविकारं सदाधान्यरूपं॥ पितापुत्रपौत्रादिनानास्वरूपं नमामः स॰॥१३॥ खगेशस्वरू

रामः
२०८

पंवृषादिपशुस्थंमृगेंद्रादिबोधंमृगेंद्रस्वरूपं॥धराधारहैमाद्रिमेरुस्वरूपंनमामः स०॥२४॥सु
वर्णादिधातुमयंरंगमंस्थंसमुद्रादिमेघस्वरूपंजलस्थं॥जलेमत्स्यभेदादिनानाविभातंन
मामः स०॥२५॥सदाशेषनागादिनागस्वरूपंसदानागभूषंचलीलाकरंतैः॥सुरारिस्वरू
पंचदैत्यादिभूतंनमामः स०॥२६॥वरंपाशधारंसदाभक्तपोषमहापौरुषंमायिनंसिंहसं
स्थं॥चतुर्बाहुधारंसदाविघ्ननाशंनमामः स०॥२७॥गणेशंगणेशाधिवंद्यंसुरेशंपरंसर्वपू
ज्यंसुबोधादिगम्यं॥महावाक्यवेदांतवेद्यंपरेशंनमामः स०॥२८॥अनंतावतारैःसदापाल
कंतंस्वधर्मादिसंस्थंजनंकारयंतं॥सुरैर्दैत्यपैर्वंद्यमेकंसमस्थंनमामः स०॥२९॥त्वयाना
सितोयंमहादैत्यभूपःसुशांतिधरोप्राकृतस्तेनविश्वं॥अखंडप्रहर्षेणयुक्तंचतंवैनमामः
सदा॥३०॥नविंदंतियंवेदवेदज्ञरूपानविंदंतियंशास्त्रशास्त्रज्ञभूपाः॥नविंदंतियंयोगयोगी

मु॰पु॰
१०९

शकाद्यानमामः सदा॥२१॥ नवेदाविदुर्यंचदेवेंद्रमुख्यानयोगैर्मुनींद्रावयंकिंस्तवामः॥ तथापि
स्वबुध्यास्तुतंवक्रतुंडंनमामः सदावक्रतुंडंभजामः॥२२॥ मुद्गलउवाच॥ एवंस्तुत्वावक्रतुंडंस्थि
तादेवर्षयःप्रभो॥ बद्धांजलिपुटाःसर्वेतूष्णींभावेनमानद॥२३॥ देवानांचमुनीनांसस्तुतिंश्रु
त्वागजानन्नः॥ उवाचतान्प्रसन्नात्माहर्षयन्वचनंमहत्॥२४॥ वक्रतुंडउवाच॥ शृणुध्वंमुन
यःसर्वेदेवामेवचनंमहत्॥ भवत्कृतमिदंस्तोत्रंमत्प्रीतिवर्द्धनंभवेत्॥२५॥ अनेनस्तौतियोनि
त्यंमांतस्यपूरयाम्यहं॥ भोगान्नानाविधांश्चैवपुत्रपौत्रादिसंपदः॥२६॥ यंयमिच्छंतितंतंचदास्या
मिनात्रसंशयः॥ भुक्तिमुक्तिप्रदंचैतद्ब्रह्मभूतकरंभवेत्॥२७॥ नानासिद्धिप्रदंचैवहृदिबुद्धिप्र
काशकं॥ सुरेंद्रैर्वंद्यतांयातियस्तौतिमामनेनसः॥ सहस्रावर्त्तनान्मर्त्यःकाराग्रहगतंनरं॥ मो
चयेन्नात्रसंदेहोमत्प्रियःसर्वदाभवेत्॥२९॥ अपराधशतैर्युक्तोयदिभवतिमानवः॥ अपराधस

रामः
१०९

निवै

हंतस्यकरोमिस्तोत्रपाठतः॥३०॥एकविंशतिवारंयएकविंशद्दिनावधि॥पठिष्यतिसदातस्मै
चिंतितंप्रददाम्यहं॥३१॥एकविंशतिकाःश्लोकाभवद्भिर्मत्प्रियात्मकाः॥कृतास्तैर्मांसदादे
वास्तुवध्वंमुनयोखिलाः॥३२॥तेनविघ्नविहीनाश्चस्वधर्मरुचयस्तथा॥भविष्यथमहाभागा
भुक्तिमुक्तिंप्रविंदथ॥३३॥वरंब्रूतमहाभागायेषांयन्मनसिस्थितं॥तदास्यामिनसंदेहस्तो
त्रेणतोषितोह्यहं॥३४॥मुद्गलउवाच॥एवमुक्त्वासुराःसर्वेमुनयस्तंप्रणम्यच॥प्रहृष्टमान
साऊचुर्वक्रतुंडंमहाबलं॥३५॥देवर्षयऊचुः॥यदिप्रसन्नतांयातोवक्रतुंडंददातिचेत्॥त्वदी
यामचलांभक्तिंदेहिनाथदयानिधे॥३६॥यदिप्राप्तात्वदीयाचेद्भक्तजनैस्तदाप्रभो॥किंदुर्ल्ल
भंभवत्तेषांहस्तगाःसर्वसिद्धयः॥३७॥अतोभक्तिर्महाभागदेहिनोविघ्ननायक॥तयातृप्ताभ
विष्यामस्त्वत्पादप्रवणावयं॥३८॥तेषांवचनमाकर्ण्यदेवदेवोगजाननः॥जगादभावगंभीरज्ञा

ताविद्वज्जनप्रियः॥३९॥ वक्रतुंड उवाच॥ अचला मदीया भक्तिर्भविष्यति न संशयः॥ भवतां भाव
युक्ताश्चेत्तदा देवर्षयः खलु॥४०॥ अंतर्दधे स उत्क्वातान्वक्रतुंडो गणेश्वरः॥ पश्यतां मुनिदेवानां
स्वानंदस्थो बभूव ह॥४१॥ ततो देवर्षयः सर्वे खिन्नाः स्वस्वपदं ययुः॥ तमेव ध्यायमानास्ते वक्रतुं
डं सुसिद्धिदं॥४२॥ मत्सरोपि ततः सर्वे दैत्यैः परिवृतो ययौ॥ स्वपदं पाल्यमानश्च सुशांतो ह्यभवत्स
दा॥४३॥ तं त्यक्त्वा दैत्यसंघास्ते ययुः स्वस्वगृहं मुने॥ एवं मत्सरमाहात्म्यं वक्रतुंडेन कारितं॥४४॥
स एव वक्रतुंडस्तु सृजते पालति प्रभुः॥ हरति भावहीनः सनाद्यंतमध्यगः स्वयं॥४५॥ एवं ना
नावतारेण स्वस्वधर्मरतान्सुरान्॥ असुरान्मानवादींश्च चकार वक्रतुंडकः॥४६॥ अवताराअ
नंताश्च वक्रतुंडस्य भो विभो॥ चरित्रमखिलं तेषां कथितुं शक्यते न वै॥४७॥ ब्रह्मणा षण्मुखेना
पि विष्णुना शंकरेण च॥ शेषेण मुनिभिरन्यैर्वेदैः क्वाहं च तत्र वै॥४८॥ दिवोदासशमार्थाय स

एववक्रतुंडकः॥शिवपुत्रत्वमापन्नोढुंढिराजेतिनामतः॥४९॥वामनस्यवरंदातुंसएवगणना
यकः॥प्रकटोभून्महातेजाभक्तस्यभक्तपालकः॥५०॥एवंनानावतारैश्चभक्तरक्षणलाल
सः॥करोतिभक्तसंरक्षांजानीहित्वंप्रजापते॥५१॥ब्रह्मणासृष्टिकार्यार्थेव्याकुलेनसनस्मृ
तः॥वक्रतुंडस्ततोदैत्योमत्सरःप्रविवेशतां॥५२॥तेनासुरप्रभावेनपीडितोविधिरद्भुतं॥वि
घ्नयुक्तोभवत्तत्रसृष्टिंकर्तुंनचक्षमः॥५३॥तेनपुरातनंस्मृत्वापुनस्तंशरणंययौ॥विधिर्विघ्न
विहीनःससमसर्जसकलंजगत्॥५४॥ ॥इतिश्रीमदांत्येमौ॰वक्रतुंडचरित्रेवक्रतुंडांतर्द्धाना
मैकोनचत्वारिंशोध्यायः॥३९॥ ॥दक्षउवाच॥धन्योस्म्यनुगृहीतोस्मियत्त्वयाश्रावितंमहत्॥
चरितंवक्रतुंडस्यब्रह्मभूतमयंपरं॥१॥श्रुत्वाश्रुत्वानमेतृप्तिर्जायतेमृतपानवत्॥इच्छामिसोधु
नाश्रोतुंपूजितोविधिनाकथं॥२॥विस्तरेणचमेब्रूहिकथांपापापनोदिनीं॥श्रोतुःपृष्टश्चवक्तुश्च

मु॰पु॰
१११

त्रयाणांसर्वसिद्धिदं॥३॥सूतउवाच॥दक्षस्यवचनंश्रुत्वामुद्गलस्तमुवाचह॥उत्फुल्लनयनोहर्षा
द्गणेशेंद्रःसशौनकः॥४॥मुद्गलउवाच॥शृणुदक्षमहाभागधन्योसिनात्रसंशयः॥येनतेग
णराजस्यकथायांप्रीतिरद्भुता॥५॥नाल्पपुण्येनतेढुंढेःकथामृतस्यधारणे॥श्रवणेचतथा
प्रीतिर्जायतेनकदाचन॥६॥अतस्तेहंप्रवक्ष्यामित्वदादरसुतोषितः॥संक्षेपेणकथांदिव्यां
गणेशस्यमहात्मनः॥७॥प्रलयांतेगणेशेनसृष्टापंचसुराधिपाः॥तेषांतपःप्रभावेणप्रस
न्नोवरदोभवत्॥८॥वरस्यैवप्रभावेणसमर्थास्तेबभूविरे॥स्वस्वकार्येप्रवृत्ताश्चसावधाने
नचेतसा॥९॥सृष्टिसंकरणेब्रह्मप्रवृत्तोजगतोभवत्॥नसस्मारगणेशानंविस्मृत्यादौतद
र्चनं॥१०॥तेनभ्रांतोभवत्सोपिमनसिगर्वमादधे॥त्रिभुवनेनमेतुल्यंस्रष्टाहंनात्रसंशयः॥
॥११॥सृजामिसकलंविश्वंतदाविष्णुश्चपालति॥रुद्रःसंहरतेतेचशक्तिमोहंकरोतिच॥

रामः
१११

॥२२॥ सूर्यकर्मप्रकाशश्च करोति जति प्रभुः ॥ न सृष्टमखिलं विश्वं तदा देवा निरर्थकाः ॥२३॥ म
माज्ञादौ गणेशेन कृता सृष्टौ विशेषतः ॥ मदीयां यात्रतां दृष्ट्वा तस्मान्नान्योस्ति मत्परः ॥२४॥
इति मनसि गर्वेण मोहितो भूत्पितामहः ॥ ततो विघ्नगणास्तत्र प्रबभूवुरनेकशः ॥२५॥ सृ
ष्टिरचनशीलं तं ब्रह्माणं गृह्य दारुणाः ॥ नानारूपा महावीर्यास्ताडयामासुरोजसा ॥२६॥
त्रिनेत्राः पंचनेत्राश्च पृष्ठनेत्रा महाबलाः ॥ दशमुखा सहस्रं च मुखानि धारकाः परे ॥२७॥
एवं नानास्वरूपास्ते विधिं गृह्य प्ररेमिरे ॥ बालक्रीडनकं कृत्वा दुःखयुक्तं महाबलाः ॥२८॥ ए
वं स परवान्ब्रह्मा गर्वं सर्वं प्रतज्य वै ॥ जगाम शरणं देवं गणेशं विघ्ननायकं ॥२९॥ गतगर्वो हृ
दि स्मृत्वा तुष्टाव गणनायकं ॥ तेन विघ्नगणाः सर्वे तद्धानं तत्र चक्रिरे ॥३०॥ मुक्तो विघ्नैस्तदा ब्रह्मा
तताप परमं तपः ॥ षडक्षरेण मंत्रेण वक्रतुंडमतोषयत् ॥३१॥ वायुभक्षो भवेद्ब्रह्मा पादांगुष्ठा

मु॰पु॰
११२

ग्रतिष्ठतः॥चकारचेतसोवृत्तीर्गणेशेनिश्चलास्ततः॥२२॥एवंदिव्यसहस्रंसतपस्तेपेसुदारु
णं॥ततोभूतानिसर्वाणिव्याकुलानिवभूविरे॥२३॥ततस्तस्यतपोग्रेणप्रसन्नोवक्रतुंडकः
॥आययौभक्तराजंतंभक्तिभावेनतोषितः॥२४॥तेजोरूपीमहाकायोवक्रतुंडश्चतुर्भुजः॥सिं
हारूढस्त्रिनेत्रश्चपाशांकुशधरोविभुः॥२५॥वरदाभयहस्तश्चपृथुवक्षोमहोदरः॥सिद्धिबुद्धि
युतश्चिंतामणिहृदिविराजितः॥२६॥नानालंकारसंयुक्तःशेषनाभिर्गजाननः॥सिंदूरारुण
देहश्चनानावस्त्रधरःप्रभुः॥२७॥तंदृष्ट्वाभयभीतोसौविधातास्तोतितत्परं॥गणेशंहृदिसंचिंत्य
नानास्तोत्रैर्विधानतः॥२८॥वक्रतुंडंस्तुवंतंतमुवाचघननिःस्वनाः॥वरंवृण्डविधातस्त्वंदास्यामि
तेनसंशयः॥२९॥इतितस्यवचःश्रुत्वाब्रह्मातंप्रणनामच॥उवाचसौम्यरूपेणवरंदेहिगजानन॥३०॥
ब्रह्मणोगिरमाकर्ण्यसौम्यतेजागजाननः॥उवाचतंमहाभागंभक्तिभावेनतोषितः॥३१॥वक्रतुं

रामः
११२

उवाच॥ स्वानंदनगरेसंस्थंसदैतादृशरूपकं॥मृत्युलोकेस्थितस्त्वंचकिंमांपश्यसिमानद॥३२॥
तपसाभक्तिभावेनतोषितोहंत्वयाविधे॥तेनसौम्यस्वरूपेणत्वदग्रेसंस्थितोभवं॥३३॥त्वंतुम
त्तोवरान्ब्रूहिदास्यामिवांछितान्परान्॥मयिप्रसन्नतांयातेदुर्लभंनभविष्यति॥३४॥गणेशव
चनंश्रुत्वाब्रह्मातंप्रणनामच॥बद्धांजलिपुटोभूत्वास्तोतुंतंसप्रचक्रमे॥३५॥ ॥इतिश्रीमदांत्ये
मोद्गलेप्रथमखंडेवक्रतुंडचरित्रेब्रह्मणस्तपश्चरणंनामचत्वारिंशोध्यायः॥४०॥ ॥ब्रह्मोवा
च॥नमस्तेवक्रतुंडायगणेशायमहात्मने॥अनंतायांतपारायविघ्नेशायनमोनमः॥१॥नमो
भक्तिप्रियायैवभक्तसंरक्षकायते॥अभक्तकामनाशायसर्वदात्रेनमोनमः॥२॥निर्गुणायनि
रूपायनिर्मलायगुणात्मने॥अनंताननधारायसिंहवाहायतेनमः॥३॥अनादिरूपकायैवन
मःसर्वप्रियंकर॥वेदांतवेद्यदेहायगजवक्त्रायतेनमः॥४॥अनंतोदरसंस्थायनानाभोगकरायते॥

मु॰पु॰
११३

मायाधारायमायायामोहकायनमोनमः॥५॥अमेयशक्तयेतुभ्यमनाधारायदंष्ट्रिणे॥चतुर्बाहुम
यायैवस्वानंदपतयेनमः॥६॥सिद्धिबुद्धिप्रदायैवसिद्धिबुद्धिधरायच॥ब्रह्मभूतायदेवायविघ्न
हर्त्रेनमोस्तुते॥७॥वक्रतुंडप्रसन्नस्त्वंमह्यंदेहितदानघ॥त्वदीयामचलांभक्तिंययाबंधोनविद्य
ते॥८॥त्वदाज्ञयाप्रवृत्तोहंतत्रसामर्थ्यमद्भुतं॥सृष्टौदेहिगणाधीशविघ्नहीनंत्वमेसदा॥९॥अ
हंसृष्टाचसर्वेषांत्वयाप्रोक्तोगजानन॥अतस्त्वंपुत्रभावेनगृहेमेतिष्ठमायया॥१०॥त्वंसाक्षा
द्ब्रह्मभूतश्चेद्यदिपुत्रोभविष्यसि॥तदाहंबंधसंहीनोभविष्यामिस्वराजसात्॥११॥तवमातापि
तास्वामिन्बंधयुक्तौयदामतौ॥तदावेदादिकंसर्वंमिथ्याभूतंभविष्यति॥१२॥नामग्रहणमात्रेण
ब्रह्मभूतप्रदोभवेः॥किंपुनःपुत्रभावेनत्वयितिष्ठतिमेगृहे॥१३॥अन्यच्चलालनंकुर्यात्सेवनं
पूजनंतथा॥निरंतरंप्रपश्यामितेनाहमतुलीभवेः॥१४॥ब्रह्मणोवचनंतस्यश्रुत्वागणपतिःस्व

रामः
११३

यं॥जगाद तं महाभागं हर्षयन्सर्वभाववित्॥१५॥वक्रतुंड उवाच॥त्वया यत्प्रार्थितं ब्रह्मंस्तदस्तु स
कलं किल॥सृष्टिकरणसामर्थ्यं तवाद्भुतं भविष्यति॥१६॥निर्विघ्नं सर्वकार्येषु मत्स्मृत्या प्रभविष्य
ति॥यं यमिच्छसि तं तं ते सिद्धिं यास्यति सर्वदा॥१७॥तव पुत्रो भविष्यामि तारको मायया शतः॥वां
छितं पूरयिष्यामि भक्तिभावेन तोषितः॥१८॥त्वया कृतमिदं स्तोत्रं सर्वदं प्रभविष्यति॥मम प्रीति
करं चैव ब्रह्मभूतप्रदं तथा॥१९॥इत्युक्त्वांतर्दधे दक्ष वक्रतुंडः प्रतापवान्॥ब्रह्मापि विमना भूत्वा
तत्रैव संस्थितोभवत्॥२०॥वक्रतुंडप्रसादेन निर्ममे सकलं जगत्॥चराचरमयं सर्वं यथायोग्यं
चकार ह॥२१॥सृष्ट्वा त्रिभुवनं सर्वं कृतकृत्य इवाभवत्॥स्थितः स्वसुखनिष्ठः सन्वक्रतुंडं ससंस्म
रन्॥२२॥एकदा वायुवेगेन कंपितः स प्रजापतिः॥तस्मात्पुरुषरूपेण दंभश्चैव समुद्भवः॥२३॥
तत्पुरः पुरुषश्रेष्ठश्चतुर्बाहुधरः खलु॥गदाचक्रत्रिशूलानि धनुर्बाणधरो बभौ॥२४॥रूपेण

मु॰पु॰
२२४

तेजसापूर्णवीर्येणह्यतुलःपरः॥महाकायोमहाबाहुःस्थितःपर्वतसन्निभः॥२५॥तंदृष्ट्वाविस्मितो
ब्रह्मापर्यपृच्छन्नरंततः॥कस्त्वंकुतआयातःकिंकार्यंतेत्रवर्त्तते॥२६॥वदमेपृच्छतेसर्वंमहाबल
पराक्रमं॥धन्योसिरूपलावण्ययुक्तःपरमशोभनः॥२७॥ब्रह्मणोवचआकर्ण्यमेघगंभीरयागि
रा॥उवाचतंविधातारंस्मयमानइदंवचः॥२८॥विधेत्वाहंप्रजानामिप्रभावान्मेचमानद॥तवांग
कंपात्संभूतंजानीहिमांप्रजापते॥२९॥देहिमेनामयोग्यंत्वंपुत्रोहंतेचसुव्रत॥स्थानंदेहितथा
वृत्तिंयोगक्षेमकरींपरां॥३०॥वचस्तस्यसमाकर्ण्यजगादपद्मसंभवः॥हास्यंकृत्वामहाबाहुः
प्रीणयन्वाक्यमादरात्॥३१॥ब्रह्मोवाच॥किंमांजानासिपुत्रत्वंदंभेनप्रब्रवीषिरे॥अतस्त्वंदंभ
नामावैभविष्यसिमहाखलं॥३२॥यत्रतत्रगतिस्तेवैभविष्यतिमहासुर॥भोगान्नानाविधान्
भुंक्ष्वयथारुचियथासुखं॥३३॥एवमुक्तोमहाबाहुर्जगामतंप्रणम्यसः॥प्रदक्षिणीकृत्यवि

रामः
२२४

धिंक्षितिमंडलमादरात्॥३४॥तत्रागत्यविचारंसकृतवान्मनसिखलु॥ब्रह्मणासत्कृतोहंवैत
स्यगर्वंहराम्यहं॥३५॥विचार्यसहसादंभोजगामशरणंकविं॥तेनोपदिष्टमंत्रेणब्रह्माणंसम
तोषयत्॥३६॥एकपादेनतिष्ठन्सन्निराहारपरायणः॥ततापतपउग्रंवैवर्षाणामयुतंगतं॥
॥३७॥तस्यैवतपसासर्वंव्याकुलंसचराचरं॥नस्थातुंशक्यतेस्थानेभयभीतंबभूवह॥३८॥तंदृ
ष्ट्वापरमाश्चर्यंब्रह्मादेवगणैःसह॥आययौतंवरंदातुंतपसातोषितःप्रभुः॥३९॥काष्ठवत्तंस्थि
तंवीक्ष्यविस्मितःकमलासनः॥जगादतंमहाभागंहर्षयन्निवशोभनं॥४०॥ब्रह्मोवाच॥वरंवृणु
महाभागयंयंमनसिसंस्थितं॥इप्सितंपूरयिष्यामिनात्रकार्याविचारणा॥४१॥ब्रह्मणोवचनंश्रु
त्वादंभःपरमहर्षितः॥तंप्रणम्यप्रतुष्टावबद्धांजलिःप्रतापवान्॥४२॥दंभउवाच॥नमस्तेसृष्टिक
र्त्रेतेसृष्टिहर्त्रेप्रजापते॥सृष्टिपात्रेत्रिरूपायब्रह्मविष्णुशिवात्मने॥४३॥त्वयाततमिदंसर्वंत्वदा

मु॰पु॰
२२५

धारं महाप्रभो॥ त्वयि सर्वं जगन्नष्टं भविष्यति न संशयः॥४४॥ चराचरमयो भूत्वा क्रीडसि त्वं पितामह॥
एकानेकप्रभेदेन त्वं स्थितोसि जगत्प्रभो॥४५॥ अणुभ्योणुतरस्त्वं च महतश्च महान्किल॥ कस्त्वां
स्तोतुं समर्थः स्याद्ब्रह्माकारेण संस्थितं॥४६॥ महद्भाग्यं विभो मेघ येन ते दर्शनं परं॥ प्राप्तं सक
लपापघ्नमग्रे शुभकरं तथा॥४७॥ महद्भाग्यं विभो मेघ येन ते दर्शनं परं॥ यदि प्रसन्नतां यातो
यदि देयो वरो महान्॥ तदा मे वांछितं सर्वं पूरयस्व प्रजापते॥४८॥ राज्यं त्रैलोक्यसंभूतं मह्यं
देहि॥ पंचभूतात्मकेभ्यश्च मृत्युः कदा भवेन्न च॥४९॥ संग्रामेन समं किंचिन्ममस्यान्मा कुरु
प्रभो॥ अखंडैश्वर्यसंयुक्तमारोग्यादिसमन्वितं॥५०॥ इति तस्य वचः श्रुत्वा ब्रह्मा तं प्रत्युवा
च ह॥ तपसा तोषितस्तस्मै दातुमुत्सुकतां गतः॥५१॥ ब्रह्मोवाच॥ त्वया यत्प्रार्थितं दंभ तत्स
र्वं प्रभविष्यति॥ अन्यच्चेति तं तत्ते सिद्धरूपं भविष्यति॥५२॥ इत्युक्त्वांतर्दधे ब्रह्मा दंभः संहर्षि

चिं॰

रामः
२२५

तोभवत्॥स्वयरंप्रजगामासौमहाबलपराक्रमः॥५३॥नगरं शोभनंनामकारयामासदर्पि
तः॥पृथिव्यांसर्वशोभाढ्यंवासंतत्रचकारह॥५४॥ततोदैत्यगणाः सर्वेशुक्रेणप्रेरितामुने॥
आययुस्तत्रदंभस्यनगरेहर्षिताभृशं॥५५॥शुक्रः समागतस्तत्रमुनिभिर्ब्रह्मवादिभिः॥दैत्य
राज्यंसदंभायदातुंसमुद्यतोभवत्॥५६॥शुभेलग्नेमुहूर्त्तेचसोभिषेकमकारयत्॥ब्राह्मणैर्दै
त्यराजानांराजादंभोबभूवह॥५७॥महोत्सवंहर्षितास्तेचक्रुःसर्वेसमागताः॥हृष्टपुष्टजनाकी
र्णंनगरंशुशुभेभृशं॥५८॥सर्वेस्वस्वगृहेजग्मुस्ततोहर्षसमन्विताः॥मुख्याश्चसंस्थितास्तत्र
दैत्याःपरमदारुणाः॥५९॥ ॥इतिश्रीमदात्मेमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेदंभासुरराज्य
प्राप्तिवर्णनंनामैकचत्वारिंशोध्यायः॥४२॥ ॥मुद्गलउवाच॥नगरेदंभदैत्यस्यमहोत्सवयु
ताबभुः॥जनाःसर्वेमहाभागाःकिंचित्कालंप्रजापते॥१॥एकदादैत्यपाःसर्वेययुस्तत्रमहाबलाः॥

मु॰पु॰
११६

तुहुंडश्चतथाहुंडोरुक्मकेतुर्महाबलः॥२॥मद्यपश्चसकोपश्चतथाक्रोधासुरोमहान्॥कामासुरोब
लाद्यश्चरासभासुरएवच॥३॥इत्याद्यावहवश्चान्येदंभंशोभासमन्वितं॥प्रणम्योचुर्महात्मानउ
त्सुकादेवनाशने॥४॥दैत्येशाऊचुः॥किंस्थितोसिमहाराजवयंदासाः समागताः॥त्रिभुवनंप्रजे
ष्यामोदेवमर्दनलालसाः॥५॥तवाज्ञावशगाःसर्वेदैत्यदानवराक्षसाः॥ब्रह्मांडेनत्वयातुल्यस्तव
दंभबलेनवा॥६॥यशसातेजसाचैवनसमंतेसुराधिप॥आज्ञापयमहाबाहोजेष्यामःसकलंज
गत्॥७॥दैत्येशानांवचःश्रुत्वादंभासुरप्रहर्षितः॥उवाचतान्महाभागान्भावयुक्तेनचेतसा॥८॥
दंभासुरउवाच॥सम्यगुक्तंमहाभागाममापिहृदयेस्थितं॥भवद्भिःसहितोहंवैजेष्यामिसचराचरं॥
॥९॥एवमुक्त्वासदैत्येशःशुक्रंतत्रानयन्मुने॥तस्यमतंसमादायनिर्जगामततःपुरात्॥१०॥अपा
रसेनयासार्द्धंचतुरंगसुयुक्तया॥पृथिव्यांसर्वराजानोजितादैत्यैर्महाबलैः॥११॥पातालेषुचस

रामः
११६

र्वान्वैनागान्जित्वादिवंययुः॥तत्रेंद्रोदेवदेवेंद्रैर्युयुधेसोसुरैः सह॥१२॥तेनदैत्यगणाः सर्वेभयभीताः
समंततः॥वज्रपातैर्महाघोरैश्चूर्णिताज्वालितास्तथा॥१३॥असुरारणभूमिंचत्यक्त्वासर्वेपलायिताः॥
ततोदंभासुरस्तत्रयुयुधेबलगर्वितः॥१४॥चक्रपातेनदेवेंद्रंमूर्छितः सचकारह॥देवान्बाणार्दिता
न्सर्वान्कारयामासदैत्यपः॥१५॥लब्ध्वासंज्ञांसुरेंद्रोवैपपालजीवनेच्छया॥ततोदेवगणास्तंधा
न्वत्गुः सर्वेभयातुराः॥१६॥दैत्यऐरावतारूढोदेवेंद्रस्यासनेस्थितः॥अमराणांपुरीगत्वाहर्षितो
हर्षयन्स्वकान्॥१७॥इंद्रोदेवगणैः सर्वैर्ब्रह्मणः शरणंययौ॥ब्रह्मणासहविष्णुंचतेनसार्द्धंशि
वंययौ॥१८॥शिवःक्रोधसमायुक्तआययौरणमूर्द्धनि॥जुहावदैत्यराजंतंसंग्रामायमहाब
लं॥१९॥ततोदैत्येशसंयुक्तोदंभासुरः समाययुः॥क्रोधसंयुक्तचक्षुस्तंसन्नद्धोबलसंयुतः॥
॥२०॥ततोसमभवद्युद्धंदारुणंलोमहर्षणं॥दैत्यानांचैवदेवानांपरस्परविनाशनं॥२१॥चत्वारिंशद्दि

नान्यत्राहोरात्रं नीतिसंयुतं॥ श्रोणितौघमहानद्यो जाताप्रेतसमाकुला॥२२॥ ततो दंभः स्वयं कृद्धो बा
णैर्देवानमर्दयत्॥ चकार देवराजास्तान्मूर्छितान्धरणीगतान्॥२३॥ ततः शंभुस्त्रिशूलेन तं जघा
न महाबलं॥ पपात मूर्छया दैत्यः क्षणाद्युत्थितवान्पुनः॥२४॥ तत्याज्यबलवांश्चक्रं पातयामास
शंकरं॥ मूर्छितं प्रहरार्द्धं च दंभासुरप्रतापवान्॥२५॥ दृष्ट्वाद्भुतं महावीर्यं दैत्यराजस्य शंकरः॥ पपा
ल संज्ञया युक्तो वनेषु देवसंयुतः॥२६॥ देवेंद्रान्यलतो दृष्ट्वा जहसुर्दैत्यनायकाः॥ आनंदेन समायु
क्ता विविशुरमरावतीं॥२७॥ ततः ससत्यलोके च वैकुंठे दैत्यनायकान्॥ कैलासे अमरावत्यां स्थाप
यामास यत्नतः॥२८॥ नानादेवपुरे रम्ये स्थापयामास दानवान्॥ अययौ शोभनायां स स्वपुर्यां
बलसंयुतः॥२९॥ चकार राज्य उन्मत्तस्त्रैलोक्यस्य महाबलः॥ ततः कर्मविहीनार्थमादापयत्स दै
त्यपान्॥३०॥ तदाज्ञया ययुः सर्वे दैत्याः परमरमदारुणाः॥ ब्राह्मणादीन्विबंधुस्ते ताडयामा

सुरोजसा॥३१॥यज्ञग्रहान्बभंजुस्तेयज्ञवृक्षादिकान्खलाः॥तीर्थानिलोपयामासुर्देवतायतनानिच
॥३२॥एवंनानाविधैर्यत्नैःकर्मलोपंप्रचक्रिरे॥केचिद्भ्रष्टाद्विजास्तत्रमृताकेचिद्बभूविरे॥३३॥के
चिद्वनंययुस्तत्रसिंहव्याघ्रादिसंकुलं॥संध्यादिभिर्विहीनाश्चद्विजास्तत्राभवन्प्रभो॥३४॥नस्वा
हानस्वधातत्रनवषट्कारएवच॥नवर्णाश्रमधर्मश्चदंभेराज्यंप्रकुर्वति॥३५॥वर्णसंकररूपा
वैप्रजाजातामहीतले॥तयादेवगणाःसर्वेभयभीताबभूविरे॥३६॥कर्मभोगकरादेवान
ष्टेकर्मणिशौनक॥मृतप्रायामृतादेवाइवब्रह्माणमब्रुवन्॥३७॥देवाऊचुः॥शरणंत्वदृते
देवकंयामःकमलासन॥त्वंधातात्वंविधाताचसर्वेषांप्राणधारकः॥३८॥त्वंगतिःसर्वदेवा
नांत्वमेवब्रह्मभावितः॥अतोस्मान्रक्षदेवेशदंभासुरभयात्परान्॥३९॥कर्महीनंकृतंतेन
त्रैलोक्यंसचराचरं॥देवाःकर्मान्नसंयुक्ताःकृतास्त्वयामहामते॥४०॥कर्महीनप्रभावेनमरिष्या

मु॰पु॰
११८

मोनसंशयः॥ अतस्त्वंसर्वदेवान्वैरक्षस्वप्रपितामह॥४१॥ त्वयैवास्याभयंदत्तंत्वयालितावयं॥ अ
धुनाधुक्षयाविष्टामरिष्यामस्तवाग्रतः॥४२॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरि
त्रेदंभासुरविजयोनामद्विचत्वारिंशोध्यायः॥४२॥ ॥मुद्गलवाच॥ देवेंद्राणांवचःक्रूरंश्रुत्वाचिं
तातुरोभवत्॥ चतुर्मुखोविचारंसचकारतत्रशोभनं॥१॥ नावापदेवरक्षार्थंबुद्धिंबुद्धिविशारदः॥ त
तश्चिंतांदुरंतांवैजगामकमलासनः॥२॥ जगाददेवमुख्यांस्तुभयेनकमलासनः॥ अहंयूयंचसर्वे
पिप्रार्थयामोगजाननः॥३॥ सवैसर्वविचारज्ञःकरिष्यतिशुभंमहत्॥ अतस्त्वंध्यानकौशल्या
ध्यातध्वंचविनायकः॥४॥ एकाक्षरविधानेनवक्रतुंडंयजामहे॥ तेनशंसर्वदेवानांभविष्यतिनसं
शयः॥५॥ मुद्गलउवाच॥ ब्रह्मणोगिरमाकर्ण्यदेवामुनिगणैःसह॥ पूजयामासुरव्यग्रावक्रतुंडंवि
धानतः॥६॥ ब्रह्मापिध्यानसंयुक्तस्तोषयामासविघ्नपं॥ पुरादृष्टंतथाचिंत्यसिद्धिबुद्धियुतंमुने॥७॥

रामः
११८

एतवर्षेगतेतत्रब्रह्मातंहृद्यपश्यत॥साकारजीवसंयुक्तंवदंतंमंजुलांगिरं॥८॥दृष्ट्वाविस्मितचित्तोसौ
यावत्पप्रच्छतंप्रभुं॥तावत्सोपिवहिर्यातःसिद्धिबुद्धिसमन्वितः॥९॥ब्रह्माणंबोधयामासवक्रतुंडो
महाबलः॥सुप्रसन्नतरोजातस्तपसाध्यानशालिना॥१०॥वक्रतुंडउवाच॥पश्यमांपुत्रभावेनपिता
महगणाधिपं॥तवध्यानात्समुत्पन्नंध्यानजंप्रवदंत्यतः॥११॥तपसापूर्वकालेमेत्वयापुत्रत्वमाद
रात्॥याचितंसफलंतच्चकृतंमयाधुनाप्रभो॥१२॥वचनंवक्रतुंडस्यश्रुत्वाब्रह्मामुदायुतः॥वहि
र्वीक्षिगणेशानंसिद्धिबुद्धिविराजितं॥१३॥प्रणनामससाष्टांगंवक्रतुंडंगजाननं॥सिद्धिबुद्धिंवि
धानेनपूजयामासयत्नतः॥१४॥तंदृष्ट्वापरमाश्चर्यंदेवाःसर्वेसमागताः॥ऋषयस्तंमहाभागाः
प्रणेमुर्भक्तिभावतः॥१५॥मानसिकंसुतंदृष्ट्वासिद्धिबुद्धितथात्मजे॥ताभ्यांसहविनितास्तंतुष्टु
वुःकरसंपुटाः॥१६॥ब्रह्मापिपूजनंकृत्वास्तोतुंसर्वैःसमन्वितः॥उद्यतोभून्महातेजावक्रतुंडंचस

मु॰पु॰
११९

स्त्रिकं॥१७॥सदेवर्षिर्ब्रह्मोवाच॥नमस्तेब्रह्मभूतायक्रतुंडायसाक्षिणे॥सिद्धिबुद्धियुतायैवगणेशा
यनमोनमः॥१८॥विघ्नेशायनमस्तुभ्यंनिर्गुणायगुणात्मने॥अनादयेचसर्वज्ञपालकायनमोस्तु
ते॥१९॥नमस्तेसर्वरूपायसर्वाध्यक्षायधीमते॥आदिमध्यांतहीनायसाक्षाद्देवायतेनमः॥२०॥
अमेयशक्तयेतुभ्यंमायिभ्योमोहदायच॥अमायिनेचमायायाआधारायनमोनमः॥२१॥स
त्यायसत्यरूपायसत्यपालकरक्षिणे॥ज्ञानायज्ञानदात्रेचज्ञानगम्यायतेनमः॥२२॥लंबोदरा
यदेवायगणानांपतयेनमः॥गुणेशायगुणाधारहेरंबायनमोनमः॥२३॥त्वांस्तोतुंनसमर्थाश्च
वेदाःशास्त्रसमन्विताः॥योगींद्रादेवमुख्याश्चतत्रकोहंगजानन॥२४॥तथाबुद्धिप्रमाणेनसंस्तु
तोसिगणेश्वरः॥तेनमेसकलंसर्वंजातंलंबोदराधुना॥२५॥ब्रह्मांडानामनंतानांकारकस्त्वंनसं
शयः॥कथंमेपुत्रतांयातःसिद्धिबुद्धिसमन्वितः॥२६॥सिद्धिबुद्धियुतंब्रह्महृदिध्यानंविशेषतः॥त

रामः
११९

देववहिरायातंतारितुंमांनसंशयः॥२७॥इत्युक्त्वाब्राह्मणैःसार्द्धंजातकर्मादिकांक्रियां॥चकारचस्व
यंब्रह्मापरमानंदसंयुतः॥२८॥एकादशदिनेतस्यसिद्धिबुद्धिपतिरिति॥नामसंस्थापयामास
द्विजैःसहपितामहः॥२९॥बालक्रीडनभावेनक्रीडतिस्मविनायकः॥सावित्रीस्तनपानंसाकार
यामासभावतः॥३०॥दिनेदिनेथबालोसौववृधेशुक्लचंद्रवत्॥आनंदंजनयन्मातुःपितुश्चच
रितैःस्वकैः॥३१॥सिद्धिबुद्धियुतोदक्षवर्षद्वयवयस्थितः॥एकदातंविधातारंपप्रच्छविनयान्वि
तः॥३२॥सिद्धिबुद्धिपतिरुवाच॥तातकिंवनवासंत्वंकरोषिमुनिभिःसह॥देवैःपरमदुःखार्त्तो
ममकिंभाससिप्रभो॥३३॥तस्यतद्वचनंश्रुत्वाब्रह्माहर्षसमन्वितः॥जगादगणपंसर्ववृत्तांतंदै
त्यसंभवं॥३४॥तच्छ्रुत्वाकोपदीप्तोसौवक्रतुंडस्तमब्रवीत्॥हर्षयन्देवविप्रादीन्मेघगंभीरनिस्वनः॥
॥३५॥वक्रतुंडवाच॥दंभासुरंमहादैत्यंहनिष्यामिनसंशयः॥देवेभ्योब्राह्मणेभ्यश्चस्वपदानिददा

म्यहं॥३६॥एवमुक्त्वा समारूढः सिंहं शस्त्रधरः प्रभुः॥सिद्धिबुद्धियुतस्तत्र जगाम दैत्यवेश्मनि
॥३७॥नगरं प्रांतभागे स संस्थितो जगदीश्वरः॥तं देवमुनयः सर्वे ययुर्हर्षसमन्विताः॥३८॥इंद्रो ग
त्वा महादैत्यं सामपूर्वमिदं वचः॥उवाच सर्वभावज्ञो भावपूर्वं सुरद्विषं॥४०॥इंद्र उवाच॥ब्रह्मणः पु
त्रतां यातं पूर्णब्रह्मसनातनं॥सिद्धिबुद्धिपतिं विद्धि मानसं ध्यानयोगतः॥४१॥स एव मुनिभिर्देवै
रागतः सुरसन्निधौ॥मां दूतं प्रेषयामास सामार्थं ते प्रसन्निधौ॥४२॥स्वधर्मे त्वं समातिष्ठ देवाः सं
तु हविर्भुजः॥वर्णाश्रमयुता लोकास्तिष्ठंतु विगतज्वरः॥४३॥इंद्रस्य वचनं श्रुत्वा कुपितो नितरां
मुने॥दंभासुर उवाच॥अथ तमिंद्रं प्रदहन्निव॥४४॥दंभासुर उवाच॥किं करोमि समायातो दूतरूपे
ण मे ग्रहे॥नो चेत्त्वां वधयित्वा तु कारागारे क्षिपाम्यहं॥४५॥गच्छ इंद्र महाभाग वदतं गणनायकं॥
पंचमे दिवसे त्वां च बोधयामि न संशयः॥४६॥ततः इंद्रः समायातः सिद्धिबुद्धिपतिं प्रति॥कथ

कथयामासवृत्तांतंविस्तरेणयथायथं॥४७॥श्रुत्वागणपतिःप्रीतउवाचतंमहामतिं॥स
मीचीनंत्वयातत्रकृतंदेवपतेयथा॥४८॥ ॥इतिश्रीमदांत्येप्रथमखंडेवक्रतुंडचरित्रेदं
भासुरदूतवचनंनामत्रिचत्वारिंशोध्यायः॥४३॥ ॥मुद्गलउवाच॥देवेंद्रेप्रस्थितेतत्र
गणेशस्यैवसन्निधौ॥दंभासुरकविंविप्रमाह्वयामाससन्निधौ॥१॥समागतंमहाबु
द्धिंशुक्रंमुनिवरंप्रभो॥प्रणनामससाष्टांगंबद्धांजलिपुटःस्थितः॥२॥तंकाव्यःस्थापया
मासकांचनोत्तरआसने॥पप्रच्छत्वंकिमर्थंमांपृच्छसिदानवाधिप॥३॥शुक्रस्यवचनंश्रुत्वा
भयहर्षसमन्वितः॥उवाचतंमहाभागंभक्तियुक्तेनचेतसा॥४॥दंभासुरउवाच॥स्वामिन्यो
द्धुंसमायातःसिद्धिबुद्धिपतिःप्रभो॥ब्रह्मणोमानसःपुत्रस्तपसातेनकारितः॥५॥परि

मु॰पु॰
१२१

पृच्छामितत्रत्वांसर्वज्ञंमुनिसत्तमं॥ येनतंसर्वभावेनजानाम्यहंसुतत्वतः॥६॥ कासिद्धिःकात
थाबुद्धिःकोसौतयोःपतिःप्रभो॥ किंसामर्थ्यधरोभातिवदसर्वंचमेयतः॥७॥ दंभस्यवच
नंश्रुत्वाशुक्रस्तंपुनरब्रवीत्॥ येनतत्वार्थविज्ञानेगणेशेजायतेमतिः॥८॥ शुक्रउवाच॥ शृ
णुदैत्येंद्रतस्यापिमहिमानंमहाद्भुतं॥ येनत्वंगाणपत्यत्वेतत्वेप्रनिपुणोभवेः॥९॥ सिद्धि
र्मोहकरीमायासर्वत्रैवप्रदृश्यते॥ सिध्यर्थंसर्वलोकाश्चयत्नवंतोभवत्यैः॥१०॥ इहलोक
स्यभोगार्थंसिद्धिमिच्छतिदानव॥ परलोकस्यसिध्यर्थंजनस्तथासमाकुलः॥११॥ ब्रह्मभू
तपदप्राप्तिमिच्छतिसिद्धिरूपिकां॥ इहपरब्रह्मप्राप्तिस्त्रिविधामोहसंज्ञिता॥१२॥ मायाग
णपतेःप्रोक्ताभ्रांतिरूपामहामते॥ वामभागस्थयादेव्याक्रीडतिसौगजाननः॥१३॥ भ्रा

रामः
१२१

मयन्ब्रह्मविद्यादीन्योगिनोमानवादिकान्॥ब्रह्मभूतस्वरूपत्वात्स्वाधीनंसततंमनः॥१४॥द्वितीयाबुद्धि
रूपाचमायातस्यमहात्मनः॥तांशृणुष्वमहादैत्ययेनत्वंसर्वविद्भवेः॥१५॥यत्किंचिद्दृश्यतेसर्वंमनो
वाणीमयंजगत्॥मनोवाणीविहीनंयत्सर्वंबुद्धिमयंबभौ॥१६॥क्षिप्तंमूढंचविक्षिप्तमेकाग्रंचनि
रोधकं॥चित्तंपंचविधंप्रोक्तंबुद्धिरूपंतदेवच॥१७॥पंचानांबहवोभेदावक्तुंनैवप्रशक्यते॥एवमे
काद्यनेकासौबुद्धिःसर्वत्रदृश्यते॥१८॥मोहधारकरूपांतांसंभ्रांताबुद्धिमादरात्॥ज्ञानरूपांहृदि
स्थात्रींब्रह्माकारप्रजानिहि॥१९॥बुद्धियुक्तनरेणैवपरत्रेहप्रलभ्यते॥बुध्याब्रह्ममयोयोगोयुज्य
तेज्ञानिभिःपरः॥२०॥एतादृशीमहाभागादक्षिणांगधरासुर॥तस्ययोगेश्वरस्यापिगणेशस्य
महात्मनः॥२१॥क्रीडार्थंरचितेमायेस्वस्यांगात्तेनदैत्यप॥ब्रह्मरूपंचतंविद्धियोगेनलभतेजनः
॥२२॥स्वानंदाख्यंपरंब्रह्मतदेवनगरंमतं॥तत्रायंवसतेनित्यंसिद्धिबुद्धिसमन्वितः॥२३॥ब्रह्म

मु॰पु॰
१२२

णाराधितंब्रह्मपुत्रभावार्थमादरात्॥ तदेवगणराजोयमागतोब्रह्मणःसुतः॥२४॥मातुःपितुश्च
वंधंयंपुत्रोहरतियच्छ्रुतं॥तदर्थंपुत्रभावेनब्रह्मणाप्रार्थितोविभुः॥२५॥धर्मसंरक्षणार्थायत्वां
हनिष्यतिनिश्चितं॥अतस्तंशरणंगच्छजीवितुमिच्छसिप्रभुं॥२६॥मुद्गलउवाच॥काव्यस्यमुनि
मुख्यस्यवचनंब्रह्मदायकं॥वेदांतसारसंभूतंश्रुत्वादंभउवाचह॥२७॥दंभउवाच॥स्वामिन्छ्रुतंम
यावाक्यंत्वदीयंयोगसंयुतं॥परंतुसंशयंछिंधिहृदिस्थंकथयामिते॥२८॥एतादृशंपरंब्रह्मगणे
शंचेन्महामुने॥धर्माधर्मवतस्तस्मात्संभूतौनात्रसंशयः॥२९॥योगरूपेणसर्वत्रगणेशस्तिष्ठतिप्रभो
॥धर्मस्यरक्षणःसोपिकरोतिकिंविकारतः॥३०॥अधर्मस्यतथानाशंकिमर्थंप्रकरोतिसः॥एतंसं
शयजातंमेछेत्तुमर्हसिसांप्रतं॥३१॥काव्यउवाच॥शृणुदंभगणेशस्यचेष्टितंसर्वदंपरं॥येनतेसं
शयःसर्वोनाशंयास्यतितत्क्षणात्॥३२॥इदंसृष्टंगणेशेननानाभेदमयंजगत्॥तत्रस्वस्वपदे
षुवैस्थापिताजंतवोभवन्॥३३॥अधर्मस्यचधर्मस्यव्यवस्थानेनसंस्कृता॥तत्रलोभेनधर्मंतंग्र

रामः
१२२

सतेधर्मएवच॥३४॥सुराणांचैतदातेजःक्षीणंभवतिसर्वतः॥असुराणांमहत्तेजोविवर्द्धतेदिनेदि
ने॥३५॥तदायंगणराजस्तुदेवानांपक्षवर्द्धनः॥असुराणांविनाशायस्वयंसमुद्यतोभवत्॥३६॥
हत्वादेवगणैःसर्वैरसुराणांबलंमहत्॥स्वस्थानेस्थापयामासधर्मंसर्वप्रियःपुनः॥३७॥ध
र्मेणसकलंदैत्यअधर्मस्यबलंहतं॥तदादैत्यादिकानांतुमूलछेदोभविष्यति॥३८॥देवाना
मुदितंतेजोदिनेदिनेमहाद्भुतं॥दैत्यायवरदत्तायंभवितानेकरूपवान्॥३९॥असुरैर्वरसं
युक्तैर्धर्मक्षीणःसमंततः॥अधर्मस्यससंस्थावैयथापूर्वमकल्पयत्॥४०॥एवंलोभसमा
युक्ताःसुरासुराभवंतिचेत्॥तदातेषांविनाशायगणेशोयततेसुर॥४१॥नास्तितस्यविचारेण
स्वःपरःक्वचिदेवसः॥क्रीडार्थंस्वस्वभावेषुस्थापयामासवैजनान्॥४२॥मुद्गलउवाच॥शुक्र
स्यवचनंरम्यंश्रुत्वादंभःप्रतापवान्॥गणेशंमनसाध्यायन्संस्थितोनगरेस्वके॥४३॥एकांतेसौ

मु॰पु॰
१२३

महातेजा विचारं प्रचकार ह ॥ अयं गणेशनामा वै पूर्णब्रह्म सनातनं ॥४४॥ तमेव शरणं योग्यं य
शस्करं भविष्यति ॥ सर्वेषां समरूपेण स्थितोयं नात्र संशयः ॥४५॥ त्यक्त्वा सिद्धिपतिं सिद्धिमिच्छति
परां ॥ असिद्धिर्भविता तस्य सुहृद्भिर्नात्र संशयः ॥४६॥ बुद्धिपतिं गणेशं यस्त्यक्त्वा शकौलमिष्यते ॥ त
स्याकौशलमेवं च भविता दुष्टभावतः ॥४७॥ सिद्धिबुद्धिविहीनं तु न किंचिद्दृश्यते मया ॥ अतस्तं शर
णं याभिसुरासुरमयं विभुं ॥४८॥ इति निश्चितसंकल्पो दंभः सुधापनिर्भयः ॥ गणेशं हृदि विन्य
स्य भक्तिभावेन भावितं ॥४९॥ ॥ इति श्रीमदांत्ये मौद्गले प्रथमखंडे वक्रतुंडचरित्रे दंभासुर
विचारो नाम चतुश्चत्वारिंशोध्यायः ॥४४॥ ॥ मुद्गल उवाच ॥ शृणु दक्ष महाप्राज्ञ दंभस्य कौश
लं महत् ॥ त्यक्त्वासुरस्वभावं स संस्थितो विगतज्वरः ॥१॥ प्रातरुत्थाय दैत्यान्स सर्वानाकारयत्स्व
यं ॥ उवाच तान्महातेजा वचनं शुक्रसन्निधौ ॥२॥ दंभासुर उवाच ॥ शृणुध्वमसुराः सर्वे गुरुणा

रामः
१२३

हंप्रबोधितः॥ शरणंवक्रतुंडस्ययामितत्रनसंशयः॥३॥ सुराणामधिपोनायंनायंदैत्याधिपःकदा॥
ब्रह्माकारेणसर्वत्रसिद्धिबुद्धिःपतिःस्वयं॥४॥ तस्यतद्वचनंश्रुत्वाकुपितादानवस्तदा॥ ययुःस्व
स्वगृहंसर्वेत्यक्त्वा [illegible] दंभासुरंखलाः॥५॥ दंभासुरप्रसन्नात्माकाव्येनसहितःस्वयं॥ शरणंग
णनाथस्यययौहर्षसमन्वितः॥६॥ नगराद्बहिरागत्यययौदेवस्यसन्निधिं॥ दंडवत्पतितःपृथ्व्यां
कृतांजलिरुपस्थितः॥७॥ तुष्टावतगणाध्यक्षंतद्दर्शनमहोत्सवः॥ यथान्यायंपूजइत्वानिब
द्धकरसंपुटः॥८॥ दंभासुरउवाच॥ नमस्तेब्रह्मरूपायब्रह्माकारशरीरिणे॥ ब्रह्मणेब्रह्मदात्रेच
गणेशायनमोनमः॥९॥ नमस्तेत्रिदशेशायदैत्यदानवपायच॥ सर्वत्रयोगरूपायभावहीनाय
तेनमः॥१०॥ सिद्धिबुद्धिपतेतुभ्यंनमःसिंहध्वजायच॥ गणानांपतयेतुभ्यंहेरंबायनमोनमः॥
॥११॥ एकदंतायदेवायह्यनंतविभवायते॥ विघ्नेशायमहाविघ्ननाशनायनमोनमः॥१२॥ अपार

मु.पु.
१२४

गुणधारायदैत्यदानवमर्द्दिने॥मनोवाणीमयायैवसर्वरूपायतेनमः॥१३॥मनोवाणीविहीनाययो
गिभ्योयोगदायिने॥योगाययोगनाथायविश्वपायनमोनमः॥१४॥मायाधरायमायायाश्चाल
कायनमोनमः॥मायाहीनायसर्वत्रसमभावधरायते॥१५॥अव्यक्तायनमस्तुभ्यंव्यक्तिमूलध
रायच॥निर्मोहायसमोहायलंबोदरनमोनमः॥१६॥यंस्तोतुंनसमर्थाश्चवेदाःसांगामहर्षयः॥
योगींद्राब्रह्मविष्ण्वाद्यास्तंकिंस्तौमिपरात्परं॥१७॥इत्युक्त्वापतितःपृथ्व्यांदंभोभक्तिसमन्वितः॥त
मुत्थाप्यगणाधीशउवाचभक्तिभावितः॥१८॥गणेशउवाच॥त्वयादंभकृतंस्तोत्रंममसंतोषवर्द्ध
नं॥यःपठेत्पाठयेत्तद्वामसर्वसुखमाप्नुयात्॥१९॥पुत्रपौत्रकलत्रादिधनधान्यप्रदंभवेत्॥आ
धिव्याधिहरंचैवसर्वोपद्रवनाशनं॥२०॥एककालंद्विकालंवात्रिकालंसततंतथा॥यःपठेत्सन
रोत्यंतंममप्रीतिकरोभवेत्॥२१॥त्वांहंतुंक्रोधसंयुक्तआगतोहंनसंशयः॥अधुनाशरणंयातस्त्व

रामः
१२४

तोहन्मिननिश्चितं॥२२॥वरंवरयमत्तस्त्वंयत्तेचित्तेस्थितंपरं॥स्तोत्रेणभक्तिभावेनसंतुष्टोहं
ददामिते॥२३॥गणेशवचनंश्रुत्वादंभोहर्षसमन्वितः॥उवाचगणपंतत्रभक्तिनम्रात्मकंधरः॥
॥२४॥दंभासुरउवाच॥यदिदेवेशतुष्टोसियदिदेयोवरोहिमे॥अचलांदेहितेभक्तिंतदानाथ
नमोस्तुते॥२५॥अन्यदाज्ञापयविभोवृत्त्यर्थंमेचसांप्रतं॥स्थानंदेहिगणाध्यक्षतत्रस्थास्या
मिनिश्चलः॥२६॥दंभस्यवचनंश्रुत्वागणेशस्तमुवाचह॥सुप्रसन्नतयादंभभक्तंगंभीरनिः
स्वनः॥२७॥सिद्धिबुद्धिपतिरुवाच॥भवितामयिभक्तिस्तेदृढामव्यभिचारिणी॥तिष्ठस्थानेस्व
केत्वंवैदंभहर्षसमन्वितः॥२८॥नत्वंन्यूनोसिभोक्वापिदैवानेवाधिकामताः॥स्वस्वधर्मेस्थि
ताःसर्वेममप्रीतिविवर्द्धनाः॥२९॥स्वधर्मत्यागदोषेणक्रुद्धोहंनाशयामितान्॥अतस्त्वंनिर्भयो
भूत्वाचिरंतिष्ठमहासुर॥३०॥यत्रमेस्मरणंनास्तिकार्यादौदैत्यसत्तम॥तत्रत्वंदंभभावेनकार्य

मु॰पु॰
१२५

नाशंसदाकुरु॥३१॥कर्मादौपूजनंयत्रममनास्तियदासुर॥तदातंभ्रंशभावेननिष्फलंकुरुसर्वदा॥
॥३२॥ममभक्तिसदायुक्तायेनराःसततंप्रिय॥तान्पालयप्रयत्नेनदंभहीनःस्वभावतः॥यत्रमे
स्मरणंनास्तिपूजनंवामहामते॥आदौतत्रचतेभागःकर्मरूपोमयाकृतः॥३४॥एवमुक्त्वा
सतंदंभंगणेशोंतर्दधेस्वयं॥देवाश्चमुनयःसर्वेजयेत्युक्त्वाययुस्ततः॥३५॥स्वस्वस्थानेषुदीप्ता
स्तेस्थिताभयविवर्जिताः॥पातालविवरेदैत्याःस्थितानिर्व्याकुलाःप्रभो॥३६॥एवंदंभासुरंशां
तंसचकारगजाननः॥ब्रह्मपुत्रत्वमापन्नस्तदप्युक्तंमयापरं॥३७॥यएतच्छृणुयान्नित्यंश्रावयेद्वा
समाहितः॥सदंभभयनिर्मुक्तोयातिब्रह्मसनातनं॥३८॥यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः॥
सर्वसंपत्समायुक्तस्तिष्ठतिविघ्नवर्जितः॥३९॥अधुनावामनस्यापिकथयामिसमासतः॥चरि
त्रंगणनाथस्यभक्तियुक्तंमहाद्भुतं॥४०॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेदंभा

प्र२

रामः
१२५

सुरशांतिकथनंनामपंचचत्वारिंशोध्यायः॥४५॥ ॥दक्षउवाच॥श्रुत्वाकथांगणेशस्यहर्षश्चेतसि
वर्द्धते॥अतःकथयसर्वज्ञचरितंवामनस्ययत्॥१॥मुद्गलउवाच॥कश्यपोमुनिशार्दूलःप्रजाप
तिसमोभवत्॥अदितिस्तस्यज्येष्ठासीत्पत्नीपरमधार्मिका॥२॥तस्यांचकश्यपाद्देवाइंद्राद्या
जज्ञिरेप्रभो॥तेषांविरुद्धभावेनस्थितादैत्यामुनेःसुताः॥३॥बलेनवरगर्वेणदेवान्हंतुंसमु
द्यताः॥अभवन्विष्णुनातेवैनानारूपेणनाशिता॥४॥नप्रापुःस्वर्गराज्यंतेसर्वमान्यंयदात
दा॥काव्यंसकलनीतिज्ञंशरणंतेययुःपुनः॥५॥तेषांसर्वंसवृत्तांतंविदित्वामुनिपुंगवः॥दैत्या
नुवाचसर्वज्ञःकाव्योवेदविदांवरः॥६॥काव्यउवाच॥बलेदानवमुख्यावैशृणुध्वंमेवचोहितं॥
यज्ञैर्देवाःसमुत्पन्नायज्ञाधारास्ततःसुराः॥७॥अतोश्वमेधयज्ञेनयजध्वंशतसंख्यया॥ब
लिंरिंद्रोमहाबाहुर्भवितानात्रसंशयः॥८॥द्वेषभावंचदेवानांसंछाद्ययत्नतःसदा॥तेनस्वर्ग

भुजोदैत्यायूयंसर्वत्रपूजिताः॥९॥भविष्यथमहाभागास्तस्मात्कुर्वंतुमद्वचः॥सर्वेहृष्टाश्चतंतत्रसाधुसा
धब्रुवन्स्थिताः॥१०॥ततस्तेबलिराजानंमुख्यंकृत्वामहाबलाः॥त्वरिताअश्वमेधेषुदीक्षितंचक्रुराद
रात्॥११॥बलिर्विरोचनाज्जातोविष्णुभक्तिपरायणः॥अधर्मेणरुचिस्तस्यजायतेहिकदाचन॥१२॥
आदौत्यक्त्वागणेशंचविष्णुंस्मृत्वामहासुरः॥आद्यंतंयज्ञमारेभेविष्णुभक्तितयाखलः॥१३॥तस्यचेष्टि
तमाज्ञायविघ्नःपरमहर्षितः॥उवाचसदसिस्थादौपूजितोनगणाधिपः॥१४॥भुक्तिमुक्तिप्रदाता
यःसर्ववृद्धिकरोविभुः॥सिद्धिमिच्छंतितंत्यक्त्वातेसिद्धाःप्रभवंतिहि॥१५॥विष्णोर्बलेनदैत्यस्यसिद्धि
श्चकीदृशीभवेत्॥भक्षइष्यामितत्सर्वंकर्मतेनमखेकृतं॥१६॥इत्युक्त्वासस्वयंविघ्नआययौक्रो
धसंयुतः॥प्रविश्यदेवराज्यस्यहृदयेसंस्थितोभवत्॥१७॥यज्ञास्तस्यधृताविप्रैःसंकल्पेशतसं
ख्यकाः॥आद्येयज्ञेसमारब्धइंद्रश्चिंतातुरोभवत्॥१८॥शतयज्ञप्रभावेनबलिरिंद्रोभविष्यति

ततः सशरणं विष्णोर्जगाम सुरनायकः ॥१९॥ नत्वा स्तुत्वा महातेजाः प्रार्थयामास सादरं ॥ विष्णुं देवव
रं तत्र बलिं यज्ञहरायतं ॥२०॥ एतस्मिन्नंतरे तत्र विघ्नः कालस्वरूपधृक् ॥ बलवान्विष्णुमाविश्य सं
स्थितो हृदये भवत् ॥२१॥ बलेः प्रचेष्टितं पूर्णं कथितं वज्रपाणिना ॥ तज्ज्ञात्वा सकलं विष्णुरिंद्रं प्रो
वाच सत्वरं ॥२२॥ विष्णुरुवाच ॥ अदित्या कश्यपेनापि तपस्तप्तं सुदारुणं ॥ शतवर्षं मदीयं च क
स्मिन्काले सुराधिप ॥२३॥ [illegible] तयोरहं प्र
सन्नात्मा वरदश्च पुराभवं ॥ ताभ्यां त्वं पुत्रतां याहि याचितं सर्वभावतः ॥२४॥ ओमित्युक्तं मया त
त्र तं वरं सफलं प्रभो ॥ अधुनाहं करिष्यामि बलेर्यज्ञस्य नाशनात् ॥२५॥ विस्मृतो विष्णुरत्यंतं
बलेर्भक्तिर्महाद्भुता ॥ तं बलिं निग्रहार्थाय स्वयमेवोद्यतो भवत् ॥२६॥ स विष्णुः कश्यपाज्जातो अ
दित्यां वामनः प्रभुः ॥ बलेर्बलं निरीक्ष्यैव न शशाक प्रचालितुं ॥२७॥ मनसि क्षुभितो विष्णुः कश्य

मु॰पु॰
१२७

पंपितरंतदा॥पप्रच्छबलिनाशायवदोपायंमहामते॥२८॥षडक्षरंमहामंत्रंवक्रतुंडस्यतंददौ॥तेना
सौचविदर्भेषुगत्वातपसिसंस्थितः॥२९॥दशवर्षंमहोग्रंसतपस्ततापदारुणं॥निराहारतया
दक्षगणेशंहृदिचिंतयन्॥३०॥उग्रेणतपसातस्यप्रत्यक्षःसिंहवाहनः॥षडक्षरप्रभावेनतंय
योभक्तवत्सलः॥३१॥चतुर्बाहुधरःपूर्णःसिद्धिबुद्धिःसमन्वितः॥एकदंतोगजाकारोमुखपाशा
दिधृक्॥३२॥सिंदूरारुणदेहश्चशूर्पकर्णोमहोदरः॥कोटिसूर्यसमानेनतेजसासुविराजितः॥
॥३३॥तंदृष्ट्वासहसोत्थायवामनःप्रणनामसः॥बद्धांजलिपुटोभूत्वास्तोतुंसमुपचक्रमे॥३४॥वा
मनउवाच॥नमोविघ्नपतेतुभ्यंभक्तविघ्नविनाशिने॥अभक्तविघ्नदात्रेचगणेशायनमोनमः॥
वक्रतुंडायसर्वेषांपालकायनमोनमः॥नानारूपधरायैवसर्वांतर्यामिणेनमः॥३६॥सर्वंचराचरं
स्वामिंस्त्वदाज्ञावशवर्तिनं॥विभूतिभिर्महाराजकरोषिसर्वमंजसा॥३७॥ब्रह्माप्रजापतीनांत्वं

शां॰कु॰४

रामः
१२७

यज्ञानांविष्णुरेवच।ईश्वराणांस्वयंशंभुर्देवानांत्वंपुरंदरः॥२८॥ग्रहाणांत्वंरविस्तंचंद्रोभेषुगणाधिप॥यमोयमवतांत्वंवैवरुणोयादसांप्रभो॥२९॥वायुर्वेलवतांत्वंचनिधीनांधनपःस्वयं॥अग्निर्वैदारुकानांत्वंरक्षसांनिर्ऋतिःस्वयं॥३०॥नागानांशेषरूपोसिस्वयोगिनांशुकस्तथा॥कुमाराणांत्वमेवासिसनत्कुमारसंज्ञितः॥३१॥गुरुसेनापतीनांत्वंमृगाणांसिंहवेशभृत्॥एवंनानास्वरूपेस्त्वंजगद्रक्षणतत्परः॥३२॥त्वांस्तोतुंकःसमर्थःस्याद्योगरूपंसनातनं॥देवाःसेवश्चवेदाद्याःशक्तानस्तवनेभवन्॥३३॥तत्रमंदमतिःकोहंपारंगच्छामिशाश्वतं॥नथापिबुद्ध्याभाग्येनसंस्कृतोस्मिविभुप॥३४॥तवदर्शनमात्रेणकृतकृत्योस्मिसांप्रतं॥धन्यंजन्ममदद्यंवैयेनदृष्टोगजाननः॥३५॥धन्योमातापितामेधकुलंधन्यंतपोपिच॥यउमारम्यमंत्रोयंधन्योयेनत्वमागतः॥३६॥एवमुक्त्वानतोसौभक्तिरसपरिप्लुतः॥रोमांचितशरीरोमूद्गानंदा

मु॰पु॰
२२८

श्रुत्वा जहि भुः॥ देहभावं परित्यज्य वामनो हर्षसंयुतः॥ तदेकनिष्ठतां प्राप्तो महाभागः प्रजापते
॥४८॥ तं तादृशं गणाधीशो दृष्ट्वा प्रेमपरिप्लुतं॥ जगाद परमात्मासौ वामनं भक्तवत्सलः॥४९॥
गणेश उवाच॥ शृणु वामनमेवाक्यं वरं वृणु मनोप्सितं॥ तव भक्त्या तपोयुक्त्या स्तोत्रेण तुष्टिमा
गतः॥५०॥ दास्यामि सकलं तुभ्यं यद्यपि स्यात्सुदुष्करं॥ धन्योसि बालभावेपि भक्तिस्ते मे यदि
परा॥५१॥ त्वया कृतमिदं स्तोत्रं सर्वदं प्रभविष्यति॥ यः पठेच्छ्रावयेद्वापि तस्य सिद्धिर्भविष्यति॥५२॥
इति तस्य वचः श्रुत्वा वक्रतुंडस्य शोभनं॥ वामनः प्रणतो भूत्वा जगाद तं गजाननं॥५४॥ यं यं चिंत
यते कामं तं तं दास्यामि दुर्लभं॥ अंते मोक्षं महाविष्णो स्वानंदे प्रददाम्यहं॥५३॥ यदि प्रसन्नो देवेश
देहि भक्तिं दृढां च ते॥ बलिं देव रिपुं ढुंढे मत्साध्यं कुरु दैत्यपं॥५५॥ यदाहं त्वां स्मरामि च तदात्मानं
प्रदर्शय॥ विघ्नं नैव प्रपश्यामि देहि वरगजानन॥५६॥ तथेति तमथोक्त्वासौ गणेशोंतर्दधे स्वयं॥

रामः
२२८

वामनस्तत्र देवेशं स्थापयामास हर्षत ॥५७॥ अदोषाख्यं महाक्षेत्रं विदर्भे स्थानमुत्तमं ॥ वक्रतुंड
स्य संभूतं तदादि सर्वसिद्धिदं ॥५८॥ ॥इति श्रीमदांत्ये मौद्गले प्रथमखंडे वक्रतुंडचरित्रे वामन
वरप्रदानो नाम षट्चत्वारिंशोध्यायः ॥४६॥ ॥मुद्गल उवाच ॥ वरं लब्ध्वा स संपूज्य वक्रतुंडं स
वामनः ॥ कश्यपं प्रणतो भूत्वा ययौ यज्ञं बलेरपि ॥१॥ तं दृष्ट्वा सूर्यसंकाशं वेदाध्ययनसंयुतं ॥
ह्रस्वाकृतिमुनिश्रेष्ठं विस्मिता मुनयो भवन् ॥२॥ बलिरुत्थाय तं नत्वा पूजयामास भक्तितः ॥
पप्रच्छ किं ददामि ते तद्ब्रूहि मां महामुने ॥३॥ ततः शुक्रेण सर्वं तज्ज्ञातं तस्य प्रयोजनं ॥ गणेश
पूजनं चादौ न कृतं दुष्टबुद्धिना ॥४॥ तेन विघ्नस्वरूपं च विष्णुरूपेण संस्थितं ॥ अधुना यादृशं भावो
भवतु तादृशं महत् ॥५॥ बलेर्वचनमाकर्ण्य वामनः प्राह तं ततः ॥ देहि त्रिपदरूपां मे भूमिं दैत्यप
ते किल ॥६॥ ददौ बलिर्महाभक्त्या तां भूमिं सादरो यथा ॥ तथा वामनदेवोपि गणेशं मनसा स्मर

त्॥७॥विराड्रूपंततोधृत्वापादंचिक्षेपदेवपः॥एकेनसकलंसर्गंपादेनावृत्यसत्वरः॥८॥द्वितीयेनस
भूमिंवैसर्वामावृत्यवामनः॥उवाचदैत्यपंदेहितृतीयस्यस्थलंप्रभो॥९॥बलिर्विस्मयमापन्नो
भ्रांतःशोकाकुलोभवत्॥नोवाचकिंचितंतत्रकिंददामीतिविह्वलः॥१०॥ततोविष्णुःप्रकोपेन
वबंधतंमहासुरं॥विप्रस्यत्वमृणीजातोनरकंगच्छदैत्यप॥११॥विष्णोर्वचनमाकर्ण्यबलिश्च
दुःखितोभवत्॥नरकंविष्णुभक्तायददातिविष्णुरद्भुतं॥१२॥अहोमोहोमहान्मेभूद्येनवेदविवर्जि
तं॥कर्मकृतंविनापूज्यगणेशंविघ्ननायकं॥१३॥तस्येदंहिफलंप्राप्तंविष्णुभक्तस्यविष्णुतः॥अ
तस्तंशरणंयामियदिरक्षतिमांप्रभुः॥१४॥इतिविचार्यतस्यैवमनसिध्यानमादधे॥ढुंढेस्तु
ष्टावदैत्येशःसर्वभावसमन्वितः॥१५॥बलिरुवाच॥नमस्तेविघ्नराजायभक्तानांविघ्नहारिणे॥
अभक्तानांविशेषेणविघ्नकर्त्रेनमोनमः॥१६॥सर्वाकारायदेवायगम्यागम्यस्वरूपिणे॥स्वा

नंदपतयेतुभ्यंहेरंबायनमोनमः॥१७॥नमोब्रह्मपतेतुभ्यंगणाध्यक्षायतेनमः॥सिद्धिबुद्धिपतेतु
भ्यंनमोविश्वंभरायते॥१८॥अपारायनमस्तुभ्यंनानामायाश्रयायच॥मायामोहहरायैवग
णेशायनमोनमः॥१९॥सर्वांतर्यामिणेतुभ्यंचिंतामणिस्वरूपिणे॥सततंब्रह्मभूतायनमस्ते
जगदादये॥२०॥अंतेमध्येचसर्वत्रसंस्थितायनमोनमः॥आदिमध्यांतहीनायसिंहवाहाय
तेनमः॥२१॥अपराधानसंख्यातान्मदीयान्जगदीश्वर॥क्षांत्वापाहिगणाधीशपतंतंनरके
चमां॥२२॥त्वन्मायामोहयोगेनमोहितोहंनसंशयः॥तेनमत्सरभावेनत्वांत्यक्त्वाविष्णुमा
श्रितः॥२३॥सकलंविघ्नसंयुक्तंजगच्चैवचराचरं॥शिवविष्ण्वादिभिःसार्द्धंतवमायाविमोहितं॥
२४॥त्वदीयंशरणंढुंढेशिवविष्ण्वादयःप्रभो॥गच्छंतिमोहहीनाश्चनिर्विघ्नास्तेभवंतिचेत्॥२५॥
अन्यथाभ्रष्टरूपास्तेपदहीनाबभूविरे॥अतस्त्वंसर्वसत्तानांधारकोनात्रसंशयः॥२६॥सत्तारू

पामरविघ्नास्तेषांस्वामीभवान्मतः॥सर्वेषांस्थापकश्चैवोद्यानकंकारकामतः॥२७॥अधु
नात्वत्प्रसादेनमयावृद्धंगजानन॥ततस्त्वांशरणंयातोरिनोनाथश्चसांप्रतं॥२८॥रक्षरक्षगणा
ध्यक्षनरकान्मांदयानिधे॥त्वत्स्मृतिक्लृप्तमात्रेणाजनःसर्वार्थसिद्धिभाक्॥२९॥देवंनानाविधै
स्तोत्रैस्तुष्टावदानवेश्वरः॥सएवाकाशजांवाणींसुश्रावपरमाद्भुतां॥३०॥माभयंकुरुदैत्येंद्ररक्षा
मिशरणागतं॥नरकान्नभयंतोस्तिमत्स्मृतिकरणात्कदा॥३१॥त्वयाकृतमिदंतोत्रंनरकस्यद
र्शभवेत्॥यःपठेच्छ्रावयेद्वापिनरकात्तस्यनोभयं॥३२॥धर्मोर्थेकाममोक्षाणांसाधनंत्रभविष्यति॥
मद्भक्तिर्वर्द्धनंचैववलेभवतिनिश्चितं॥३३॥श्रुत्वाकाशभवांवाणींवलिर्दृष्टोवभूवह॥तमेवगणपं
ध्यातेध्यायंस्तत्रैवसंस्थितः॥३४॥एतस्मिन्नंतरेविघ्नंतस्याजविघ्नविनायकः॥ततोबुद्धिप्रकाशश्च
विलोजोतस्कृतक्षणात्॥३५॥वामनोमनसातत्रध्यायतेस्मप्रजापते॥ममभक्तोवलिःपूर्णस्तस्यश्रा

ष्टंमहद्भयं॥३६॥विप्रस्वमृणमुग्रंचतेनायंनारकीभवेत्॥अहोमयातिमूर्खेणममभक्तःप्रपी
डितः॥३७॥वेदबाह्यंकृतंकर्मबलिनामत्सरान्मखे॥नपूजितोगणाध्यक्षःफलहीनोभविष्य
ति॥३८॥अधुनाभक्तिरक्षार्थंकिंकरोमिविचारतः॥गणेशशरणंयामिततःसौख्यंभविष्यति
॥३९॥एवंविचार्यदेवेशोगणेशंहृदिसोस्मरन्॥स्मृतमात्रेणतस्याग्रेप्रकटोभूद्गजाननः॥
॥४०॥तंदृष्ट्वाप्रणनामादौपूजयामासभक्तितः॥सर्वेदेवगणास्तत्रमुनयस्तंपुपूजिरे॥४१॥ए
तस्मिन्नंतरेतत्रबलिःप्रोवाचवामनं॥गणेशदर्शनेनैवप्राप्तबुद्धिर्महायशाः॥४२॥बलिरुवा
च॥ब्रह्मन्देहितृतीयंमेपादंशिरसिशीघ्रतः॥देहोयंदानरूपेणमयादत्तोनसंशयः॥४३॥त
च्छ्रुत्वाहर्षितोविष्णुस्तथेतिसचकारह॥ब्रह्मस्वमर्णनिर्मुक्तंस्वभक्तंकृत्यसिंस्थितः॥४४॥ततस्तं
मुनिभिर्देवैःसहितोसौजनार्दनः॥तुष्टावप्रांजलिंबध्वागणेशंसर्वसिद्धिदं॥४५॥वामनउवाच॥

नमस्तेगणनाथायसर्वेषांपतयेनमः॥नानागणविभक्तायानंतकर्त्रेनमोस्तुते॥४६॥विघ्नानांपत
येतुभ्यंनमश्चंद्रार्द्धधारिणे॥त्रिनेत्रायनमस्तुभ्यंभक्तसंरक्षकायच॥४७॥अमेयमायया देवत्वये
दंरचितंप्रभो॥तवमायाविमोहेनमोहितान्रक्षविघ्नप॥४८॥तवमायाप्रभावोयंकोजानातिगजा
न न॥वयंयोगिगणाश्चान्येनतंवेत्तुंक्षमाकदा॥४९॥अतोपराधजंदोषंक्षंतुमर्हसिमानद॥तवभ
क्तावयंनाथदेवदेवनमोस्तुते॥५०॥बलिरयंमदीयश्चभक्तःपरमभाविकः॥मच्छ्रेष्ठंनैवदेवेशस
हतेमत्सरान्वितः॥५१॥तेनवेदविरुद्धंचकृतंकर्ममहाद्भुतं॥त्वांविनायज्ञमारेभेफलहीनोभवत्क्र
तुः॥५२॥अधुनामुनिभिर्देवैःसहितोहंगजानन॥प्रार्थयामितदर्थंत्वंसफलंकुरुदानवं॥५३॥त्वं
विनायकनामासित्वयायत्कृतमादरात्॥तदेवमान्यतांयातिवेदादिषुनसंशयः॥५४॥वयं
नायकसंयुक्तावेदवाह्यंयदाप्रभो॥कुर्मश्चेत्पदभ्रष्टावैत्वयासंक्रियतेतदा॥५५॥सफलंयज्ञ

संयुक्तयतोभक्तंकुरुप्रभो॥इत्युक्त्वापादयोस्तस्यपपातगणपस्यसः॥५६॥तमुत्थाप्यगणाधी
शोजगादकेशवंवचः॥किंकरोमिपुरात्वांवैवरदोहंबभूवते॥५७॥त्वदीयहस्ततोदैत्यंनरकेपा
तयाम्यहं॥इतिक्रोधसमाविष्टोधुनास्मरतिमांखलः॥५८॥कायेनमनसावाचादैत्योमेश
रणंगतः॥त्वमपिप्रार्थसेविष्णोकरोमिवांछितंचते॥५९॥अधुनामांपुरस्कृत्यतंयज्ञंचसमा
पय॥तेनायसफलत्वेनयज्ञानांफलमश्नुते॥६०॥अपराधस्यमाहात्म्यंकिंचिद्रक्षामिके
शव॥ऐंद्रेपदेनिवृत्तेचपश्चादयंभविष्यति॥६१॥पातालेस्थापयस्वैनंनात्रकार्याविचारणा॥
अधुनाफलहीनत्वात्कृतंमयाजनार्दन॥६२॥गणेशवचनंश्रुत्वासर्वेहर्षसमन्वितः॥साधु
साधुमहाराजकृतंत्वयागजानन॥६३॥इत्युक्त्वातंपुरस्कृत्ययज्ञंचक्रेबलिस्ततः॥अंतिमंभाव
युक्तःसन्कृतकृत्योभवद्यथा॥६४॥गणेशांतर्दधेतत्रदेवाःस्वस्वपदंययुः॥एवंवामनमाहात्म्यं

मु॰पु॰
१३२

कथितंतेप्रजापते॥६५॥यःशृणोतिनरोभक्त्यावांछितंसत्वमेध्रुवं॥श्रावयेच्छृणुयाद्वापिस्त
स्यसर्वंनदुर्लभं॥६६॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेवामनचरित्रंनामसप्त
चत्वारिंशोध्यायः॥४७॥ ॥शौनकउवाच॥त्वयाप्रकथितंसूतवक्रतुंडस्यधीमतः॥मत्सरा
सुरनाशाख्यंचरितंसर्वसिद्धिदं॥१॥सदेवोत्रस्थितःक्षेत्रेस्थानंब्रूहिमहात्मनः॥आदितस्या
वतारस्यतिथिमुत्सववर्द्धनी॥२॥सूतउवाच॥पूर्वदिगंतसंस्थानेस्थापितोसौमहर्षिभिः॥देवै
श्चगणसंयुक्तैर्महोत्सवपरायणैः॥३॥भाद्रशुक्लचतुर्थ्यांविप्रकटोभूत्सदेवराट्॥वक्रतुंडप्रस
न्नात्मासातिथिःपरमामता॥मध्याह्नेसमयेतस्यपूजनंसुखदायकं॥अपारसिद्धिदंप्रोक्तमाद्यं
तंस्वल्पसिद्धिदं॥द्वीपेद्वीपेचखंडेषुस्वस्वपूर्वदिगंतरे॥प्रतिमावक्रतुंडस्यस्थापितामुनिभिःपु
रा॥६॥तत्रक्षेत्रंसमाख्यातंदशयोजनमात्रकं॥चतुरस्रंमहापुण्यंभुक्तिमुक्तिप्रदंपरं॥७॥म

रामः
१३२

ध्येससंस्थितोदेवोवक्रतुंडोगणेश्वरः॥वामांगेसिद्धिसव्यायाबुद्धिश्चदक्षिणांगके॥८॥संमुखे
सिंहरूपंचवाहनंतस्यशोभनं॥अष्टदिक्षुस्थितास्तस्यसिद्धयोष्टौचशौनक॥९॥गणाअष्टौ
तथाज्ञेयाचतुर्दिक्षुक्रमेणते॥शिवोविष्णुरविःशक्तिर्भक्तियुक्तास्थिताइमे॥१०॥ब्रह्माद्यादे
वताःसर्वेतत्पश्चात्पूर्वदिक्स्थिताः॥गंगाद्याःसरितःसर्वादक्षिणेसंस्थिताःप्रभो॥११॥का
श्याद्यानिचक्षेत्राणिपश्चिमेसंस्थितानिच॥वसिष्ठाद्यामुनिश्रेष्ठाःसंस्थितास्तत्रचोत्तरे॥१२॥
शेषाद्यानागभूपाश्चगंधर्वाःपर्वतास्तथा॥सिद्धाअप्सरसश्चैवविद्याध्राःकिन्नरागणाः॥१३॥
नानाजातिषुयेश्रेष्ठाअभवंस्तत्रसंस्थिताः॥नवक्तुंशक्यतेस्वामिन्मयावर्षशतैरपि॥१४॥से
वार्थंवक्रतुंडस्यलालसाःसततंप्रभो॥हृष्टाःप्रमुदितास्तत्रपरस्परहितेरताः॥१५॥वक्रतुंडच
रित्राणिकथयंतिपरस्परं॥हृष्टरोमाणएवंतेभावंतिभावतःपुनः॥१६॥समुद्रेस्नानकर्त्तारस्त

तोजंतु २

त्रतीर्थानिचक्रिरे॥ स्वस्वनाम्नांकितानिचस्वल्पदेहधरामुने॥१७॥ तत्रगणेशतीर्थंचवक्रतुंडस्य
प्रीतिदं॥ कृतकृत्याभवंतितेस्नानमात्रेणजंतवः॥१८॥ यात्रामात्रेणतत्रैवजनईप्सितमाप्नुया
त्॥ क्षेत्रेमरणजंप्रोक्तंब्रह्मभूतश्चजायते॥१९॥ दूरेस्थित्वानरोयस्तुस्मरणंप्रकरोतिचेत्॥ तस्या
पिशुक्लगत्यासामुक्तिर्भवतिशाश्वती॥२०॥ वक्रतुंडस्ययेभक्तायत्रकुत्रस्थितामुने॥ ब्रह्मभूतान
संदेहःपावनादर्शनान्नृणां॥२१॥ संक्षेपेणमयातस्यस्थानंतेकथितंमुने॥ विस्तरेणनशेषोपि
ब्रह्मविष्णुर्महेश्वराः॥२२॥ वेदाःसस्मृतिकाःसर्वेस्कंदोयोगिनएवच॥ अयुतायुतवर्षैस्तेअभ
वन्नकदाक्षमाः॥२३॥ मुद्गलेनयथाप्रोक्तंदक्षायेतन्मयातथा॥ कथितंभावयुक्तेनकिमन्य
च्छ्रोतुमिच्छसि॥२४॥ शौनकउवाच॥ सूतसूतमहाभागधन्यंक्षेत्रसमुद्भवं॥ माहात्म्यंश्रुतमस्मा
भिर्ब्रह्मसायुज्यदायकं॥२५॥ अधुनाब्रूहिधर्मज्ञयद्दक्षेणचसंश्रुतं॥ मुद्गलात्तेनकथितम

ग्रेतत्कीदृशंद्विज॥२६॥ [illegible] ॥सूतउवाच॥क्षेत्रस्यचरितंश्रुत्वादक्षोहर्षसमन्वितः॥उवा
चमुद्गलंविप्रंभक्तिनम्रात्मकंधरः॥२७॥दक्षउवाच॥ढुंढिराजावतारस्यचरितंवदविस्तरात्॥
वक्रतुंडःस्वयंसाक्षात्कथंशंकरदेहजः॥२८॥मुद्गलउवाच॥शृणुदक्षमहाभागकथयामिपु
रातनं॥इतिहासंगणेशस्यगुणयुक्तंमहाद्भुतं॥२९॥याज्ञवल्क्यमुनींद्रेणकथितंकौशिकाय
च॥तदहंसंप्रवक्ष्यामिब्राह्मणत्वप्रकाशकं॥३०॥भार्गवोमुनिमुख्यश्चऋचकस्तपसिस्थितः॥
बहुकालेव्यतिक्रांतेतपसांजीर्णतांययौ॥३१॥वृद्धत्वंपरिपूर्णंचप्राप्तंतस्यमहात्मनः॥वनेषु
मृगयूथानिपश्यन्सविस्मितोभवत्॥३२॥मृगीसंसक्तचित्तेनमृगःस्वाधीनतांगतः॥पुत्रपौत्रा
दिसंयुक्तोबभ्रामवनगोचरे॥३३॥एकैकाश्रितचित्तास्तेक्रीडांचक्रुःपरस्परं॥दृष्ट्वाभृगुवरस्त
त्रसकामःसंबभूवह॥३४॥उवाचस्वयमेवेदंधन्यंगार्हस्थ्यमंडलं॥इतिविचार्यविप्रस्तुययौगा

धिंनराधिपं॥३५॥सदृष्ट्वासहसोत्थायगाधिःपुपूजितंमुनिं॥भुक्त्वायाचततत्कन्यांभार्यार्थेनृप
सत्तमं॥३६॥राजावृद्धंसमालोक्यजगादतंमहामुनिं॥श्यामकर्णयुताश्वानांसहस्रंदेहिमेमुने॥
॥३७॥शुल्कंग्राह्यंमयाचात्रनिश्चयःप्राकृतोभवत्॥अतस्त्वांप्रार्थयेविप्रपश्चात्कन्यांददामिते
॥३८॥श्रुत्वामुनिर्गतःसद्योवरुणस्यगृहंप्रति॥अश्वानांगृह्यसाहस्रंतस्मात्तंप्रययौददौ॥३९॥
राजकन्यांददौतस्मैभार्गवायमहात्मने॥विधिवद्भयभीतःसतांगृह्यसययौवनं॥४०॥राजप
त्नीसुतांप्राहत्वदीयंभाग्यमीदृशं॥अस्माभिःकिंप्रकर्तव्यंवनवासभवंसुते॥४१॥विलप्यद्रव्यव
स्त्रादीन्दत्वापुत्रीकरेतदा॥स्वगृहंसाजगामापिवनेस्थाप्यसुतांमुने॥४२॥राजपुत्रीमहाभा
गमृचिकंप्राप्यसंस्थिता॥सेवानुकूलभावेनाभवच्चभक्तितत्परा॥४३॥तांदृष्ट्वाशीलसंयुक्तांप्र
सन्नोमुनिसत्तमः॥तदर्थंतपसातेननिर्ममेनगरंवने॥४४॥चातुर्वर्ण्यसमायुक्तंहेमरत्नविभू

षितं॥ दासीदासादिसंयुक्तं नानाविभवदं परं॥४५॥ स्वयं तपःप्रभावेन यौवनं रूपमादधे॥ रेमे तया
यथान्यायं देवेंद्रेण समो बभौ॥४६॥ निस्पृहो भोगरागेषु दृष्ट्वा स्त्रीसुखमल्पकं॥ मनसि धारया
मास व्यर्थं भ्रमणपत्नीजं॥४७॥ ॥इति श्रीमदांत्ये मौद्गले प्रथमखंडे वक्रतुंडचरित्रे ऋचिकगृह
स्थाश्रमवर्णनं नामाष्टाचत्वारिंशोध्यायः॥४८॥ ॥मुद्गल उवाच॥ एकदा राजपत्नी सा वनं शोक
समाकुला॥ आययौ दर्शनार्थं तां पुत्रीं वस्त्रधनान्विता॥ ऋचिकस्याश्रमं तत्र न ददर्श रथस्थिता॥
नगरं हेमशोभाढ्यं दृष्ट्वा सा विस्मिता भवत्॥२॥ कस्येदं नगरं दिव्यं देवैर्वा निर्मितं भवेत्॥ क्व गतो मु
निशार्दूलो जामाता मे स भार्गवः॥३॥ एवं शोकसमायुक्ता विचारमकरोद्धृदि॥ ददर्श पुरुषं कंचित्तं प
ष्टच्छ भयातुरा॥४॥ कस्येदं नगरं ब्रूहि स जगाद च तां मुने॥ ऋचिकस्य पुरं देवि वयं तस्य प्रमार्जकाः॥
॥५॥ पुनस्तं विस्मिता राज्ञी जगाद वचसां प्रतं॥ ऋषिपत्नीं च मे पुत्रीमागता जननी पुरे॥६॥ तथेति
पुरुषो गत्वा कथयामास तां ततः॥ सा स्वमातरमागम्य निनाय स्वगृहं परं॥७॥ जामातरं श्रियायु

क्तं दृष्ट्वा विस्मितमानसा ॥ उवाच स्वसुतां राज्ञी पुत्रार्थं भावसंयुता ॥ ८ ॥ मम पुत्रार्थमेवं च तव पुत्रार्थमादरात् ॥
याच स्वस्वामिनं पुत्रि समर्थं मुनिपुंगवं ॥ ९ ॥ ऋषिपत्नीपतिं तत्र याचयामास तत्तथा ॥ द्वौ च रूप्यग्निकुं
डे स चकार पुत्रलिप्सया ॥ १० ॥ द्विविधं स पुरोडाशं ब्रह्मक्षत्रप्रकाशकं ॥ अतुलं तेज आवाह्य ददौ पत्नी
करे मुनिः ॥ ११ ॥ जगाद तां मुनिश्रेष्ठस्त्वयायं भक्षितव्यतां ॥ तव मात्रा तथायं वै भक्षितव्यः शुचिस्मिते ॥
॥ १२ ॥ तदा पुत्रसमायुक्ते भविष्यथो न संशयः ॥ एवमुक्त्वा मुनिस्तीर्थे मध्यान्हार्थं ययौ किल ॥ १३ ॥ पु
त्र्या मात्रे स वृत्तांतः कथितः साब्रवीत्सुतां ॥ त्वदीयं भक्षयिष्यामि मदीयं त्वं प्रभुंक्ष्व वै ॥ १४ ॥ तथा पुत्र्या
कृतं सर्वं गता माता स्वमालयं ॥ राज्ञी गर्भवती जाता ब्राह्मणी सा प्रजापते ॥ १५ ॥ एकदा मुनिना दृष्ट्वा
स्त्र्युग्रतेजोधरावभौ ॥ उवाच तां भार्गवोपि किं कृतं क्षात्रमादरात् ॥ १६ ॥ सोवाच भयभीता तं च रुव्य
तिक्रमं मतिं ॥ मुनिरुवाच तां तत्र विस्मितो मानसेभवत् ॥ १७ ॥ तव भ्राता तपस्वी च भविष्यति न संश
यः ॥ तव पुत्रो धनुर्द्धारी दारुणः प्रभविष्यति ॥ १८ ॥ सोवाच स्वामिनं भीता द्विजं पुत्रं तु मे प्रभो ॥ देहि नो

चेज्जीवघातं करिष्यामि न संशयः ॥१९॥ ततो मुनिः स्वयं प्राह पुत्रपुत्रो भवत्प्रभो ॥ गर्भं जगाद विष्णुं वै
तपसा स तथाकरोत् ॥२०॥ ततस्तस्याभवत्पुत्रो जमदग्निर्महातपाः ॥ तस्य पुत्रः समापेदे रामः शस्त्र
भृतां वरः ॥२१॥ नवमे गाधिपत्नी सा मासे पुत्रं तपोनिधिं ॥ विश्वामित्रं महाभागं सुषुवे प्रेमविह्व
ला ॥२२॥ स तु यौवनमापन्नः संस्थाप्य वनमादरात् ॥ गाधिर्ययौ स्वराज्ये च तपसि कृतनिश्चयः ॥
॥२३॥ स राज्यमकरोत्सर्वं विश्वामित्रः प्रतापवान् ॥ एकदा मृगयार्थं वै वनेषु प्रजगाम ह ॥२४॥
मृगयित्वा मृगान्राजा क्षुधितस्तृषितोभवत् ॥ भ्रमन्समाययौ सोपि वसिष्ठाश्रममुत्तमं ॥२५॥
प्रधिश्य तत्र तं राजा ननाम भक्तिसंयुतः ॥ स सैन्यो भोजितस्तेन कामधेनुबलेन सः ॥२६॥ भुक्त्वा
तं प्रार्थयामास नंदिनीं देहि मे मुने ॥ विश्वामित्रस्ततस्तस्मै न ददौ तां महामुनिः ॥२७॥ ततो रा
जा बलान्नेतुं दूतानाज्ञापयत्खलु ॥ धेन्वा तेनाशिताः सर्वे ततस्वयमुपाययुः ॥२८॥ कषा घा १

तैश्चतांधेनुंताडयामासुराग्रहात्॥ केचित्ततोमहासैन्यंनिर्मितंत्रधेनुका॥२९॥ ततोयुद्धमभूद्घोरंसैन्य
योरुभयोर्महत्॥ नष्टंसैन्यंचसंपूर्णंविश्वामित्रस्यतत्क्षणात्॥३०॥ सोपिभग्नोगृहंगत्वाराज्यंस्था
प्यययौवनं॥ प्रधानेषुतपस्तेपेशंकरस्यमहात्मनः॥३१॥ शतेवर्षेषुसंपूर्णेप्रसन्नश्चददौशिवः॥
अस्त्रविद्यांसुसंपूर्णांतांप्राप्यस्वगृहंययौ॥३२॥ पुनर्वसिष्ठमागम्यशस्त्रास्त्रैर्बलसंयुतः॥ विश्वा
मित्रोममर्दासावग्न्यस्त्रेणतदाश्रमं॥३३॥ वसिष्ठस्ततस्तत्रयोधयामासशौनक॥ ब्रह्मदंडधरः
श्रीमान्सर्वास्त्राणिव्यमर्दयत्॥३४॥ ब्रह्मदंडेनतस्यापिपराजयःकृतोबलात्॥ विश्वामित्रः
पपालापिभयभीतःसमंततः॥३५॥ ततःसुशांतितोविप्रोवशिष्ठोब्राह्मणैस्तदा॥ स्वाश्रमंप्रविवे
शाथविश्वामित्रोगृहंययौ॥३६॥ अहोब्राह्मंबलंदीप्तंक्षात्रंतुच्छंविशेषतः॥ ब्रह्मदंडेनसर्वाणि
तमास्त्राणिहतानिच॥३७॥ एवंसनिश्चयंकृत्वाराज्यंत्यक्त्वाययौवनं॥ ब्राह्मणत्वप्रसिध्यर्थं

ततापपरमंतपः॥३८॥गायत्रीमंत्रजाप्येनपुरश्चरणमार्गतः॥नीराहारेणराजर्षिस्तापयामासवि
ष्टपं॥३९॥एवंदशसहस्राणिवर्षाणिजपतोययुः॥ततोजगादतंब्रह्मावरंब्रूहिमहामते॥४०॥स
वव्रेब्राह्मणत्वंमेदेहिदेवनमोस्तुते॥तदाब्रह्मापुनःप्राहतपस्वेतिजगामतं॥४१॥दशवारंवि
धिस्तत्रैवंसमागत्यतंमुने॥अन्यंवरंददातिसनजग्राहमहामतिः॥४२॥तस्यतपःप्रभावेनव्या
प्तमासीदिगंतरं॥देवाद्याअभवन्सर्वेतदाज्ञावशवर्त्तिनः॥४३॥स्वप्रतापेनराजर्षिर्ब्राह्मणा
न्प्राहगाधिजः॥अहंब्रह्मर्षिमुख्योवैजातस्तपःप्रतावतः॥४४॥भयभीताश्चतेसर्वेतथेत्यूचुः
प्रमाणतः॥वसिष्ठोमुनिवर्यःसतंराजर्षिंजगादह॥४५॥विश्वामित्रःक्षोभितोसौवसिष्ठहनना
यच॥नानायत्नांश्चकारोपिनममारमहामुनिः॥४६॥ततोतिदुःखितोभूत्वासंश्रितःस्वाश्रमेमु
निः॥विश्वामित्रोमहाभागस्तपस्तेजाविराजते॥४७॥तमाययौमहातेजायाज्ञवल्क्यःप्रतापवा

मु॰पु॰
१३७

न॥ब्रह्मणोंगसमुत्पन्नः साक्षाद्योगीश्वरोमहान्॥४८॥तंनमामयथान्यायंपूजयामासभक्तितः॥वि
श्वामित्रोमहातेजाउवाचप्रकृतांजलिः॥४९॥अद्यमेसफलंजन्मतपःस्वाध्यायएवच॥येनतेदर्शनं
जातंब्रह्मभूतस्यमानद॥५०॥किमर्थमागतोब्रह्मंस्तद्वदस्वमहामुने॥तवाज्ञांकर्तुमिच्छामिदासो
हंशाधिमांप्रभो॥५१॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेयाज्ञवल्क्यविश्वामि
त्रसमागमोनामैकोनपंचाशत्तमोध्यायः॥४९॥ ॥मुद्गलउवाच॥विश्वामित्रस्यभावेनसंतु
ष्टोमुनिपुंगवः॥तमुवाचमहायोगीयाज्ञवल्क्योमहामुनिं॥१॥याज्ञवल्क्यउवाच॥दुःखितत्वां
विदित्वाहमागतोमुनिपुंगवः॥नकार्यमपरंकिंचिज्जानीहित्वंमहामते॥२॥वदकिंकारणंब्र
ह्मन्दुःखस्यमेसुतापसः॥पश्चात्तंनाशयिष्यामियुक्त्याज्ञानोपदेशतः॥३॥विश्वामित्रउवाच॥ रामः
तपस्तप्तंमयाघोरंब्रह्मामेनददौवरं॥वसिष्ठोमांसराजर्षिर्जगादसर्वसन्निधौ॥४॥केनोपायेन

१३७

योगींद्रब्राह्मणेरंभवामिच॥सर्वमान्योमहाभागतंकरिष्यामियत्नतः॥५॥ततस्तंमुनिशार्दूलो
याज्ञवल्क्यउवाचह॥नचिंताकुरुराजर्षेब्रह्मर्षित्वंभविष्यसि॥६॥अभिमानंमहाघोरंत्यजत्वं
मेमुवाक्यतः॥मत्सरंत्यजदुष्टंचततःक्षेमंभविष्यति॥७॥शृणुकथंमहारम्यांकाशीविश्वे
शसंश्रितां॥येनत्वंनिर्ममोभूत्वाब्रह्मर्षिपिभविष्यसि॥८॥काशीविश्वेश्वरेणैवनसक्ताप्रलये
ऽपिच॥नवियोगःक्षणंतस्याःकाश्याःशंभोःकदाचन॥९॥तेनाहंकारसंयुक्तोजातोकाशीमहे
श्वरे॥तत्रविघ्नःसमभवदारुणःप्रवियोगजः॥१०॥मुद्गलउवाच॥याज्ञवल्क्यवचःश्रुत्वाह
र्षितःकौशिकोमुनिः॥उवाचतंमहाभागप्रेमयुक्तेनचेतसा॥११॥विश्वामित्रउवाच॥कीदृशं
विघ्नरूपंवाभवद्विमुक्तस्यशिवस्ययत॥समुत्पन्नंमहाभागतद्वदस्वविशेषतः॥१२॥याज्ञव
ल्क्यउवाच॥षष्टिवर्षाणिपर्जन्योनववर्षमहीतले॥तेननष्टंजगत्सर्वंभस्मीस्थंसचराचरं॥१३॥

मु॰पु॰
२३८

प्रजाक्षयं ततो दृष्ट्वा ब्रह्मा लोकपितामहः॥ आययौ राजशार्दूलं दिवोदासं तपःस्थितं॥१४॥ राज्यं त्यक्त्वा
स राजर्षिस्तताप परमं तपः॥ मोक्षार्थं भक्तिभावेन सूर्यवंशसमुद्भवः॥ तपसा योगभावेन बभौ सूर्य इवा
परः॥ तं ब्रह्मा स्वयमेवेदं वचनं प्रजगाद ह॥१५॥ ब्रह्मोवाच॥ दिवोदास महाभाग शृणु मे वचनं हितं॥
काशीराज्यं गृहाण त्वं मया दत्तं महामते॥१६॥ ब्रह्माणं स उवाचाथ न राज्यं प्रतिपालये॥ मोक्षार्थी
वासनाहीनो मोक्षं देहि प्रजापते॥१८॥ तं पुनः प्रत्युवाचेदं ब्रह्मा लोकहिताय च॥ कुरु राज्यं महाभा
ग मया दत्तं महामते॥१९॥ त्वयि राज्ये स्थिते वृष्टिर्भविष्यति महाद्भुता॥ अन्यथा लोकनाशः स्यात्तस्मा
त्कुरु वचो महत्॥२०॥ लोकसंरक्षणार्थाय दयायुक्तो महामतिः॥ राज्यं जग्राह काश्याश्च देववर्जि
तमुत्तमं॥२१॥ देवानामखिलं राज्यं स्वर्गेषु वर्त्तते सदा॥ मनुष्याणां पृथिव्यां वै पाताले नागरक्ष
सां॥२२॥ अतो देवतया शंभुं पूजयिष्यामि मानद॥ स्वधर्मेषु प्रस्थातव्यं मयि राज्यं प्रशासति॥२३॥

रामः
२३८

तथेतितमुवाचाथब्रह्मालोकपितामहः॥काशीराज्यंददौतस्मैदीवोदासायधीमते॥२४॥ततोब्रह्माय
योकाश्यांशंकरंप्रणिपत्यसः॥उवाचतंविशेषज्ञोमंदरंगच्छशंकर॥२५॥मरीचिःसुतपस्तेपेवरंदेहि
सदाशिव॥नोचेन्मरिष्यतितस्मैतस्माद्गच्छजगद्गुरो॥२६॥ब्रह्मणोगिरमाकर्ण्यतेनसार्द्धंययौशि
वः॥देवर्षिगणसंयुक्तोवरार्थंब्राह्मणस्यच॥२७॥तंदृष्ट्वासवरंब्रूहिशिवोवचनमब्रवीत्॥सउवाच
शिवंतत्रमुक्तिंदेहिसदाशिव॥२८॥इत्युक्त्वातपसोदुःखात्प्राणान्जहौमहामुनिः॥शिवसारूप्यतां
प्राप्तःकैलासेसगतोभवत्॥२९॥एतस्मिन्नंतरेशंभुंब्रह्मोवाचकृतांजलिः॥वसत्वंमंदरेशंभो
त्यज्यकाशींमहापुरीं॥३०॥अनावृष्टिंभवंदुःखंतन्निवृत्त्यर्थमादरात्॥राज्यंदत्तंमयादेवदिवोदा
सायशंकर॥३१॥तेनापिकथितंदेवराज्यंपृथ्व्यांनविद्यते॥तदाराज्यंकरिष्यामिनान्यथाहंकदाच
न॥३२॥मयालोकस्यरक्षार्थंदत्तंराज्यंनमाम्यहं॥क्षमापराधमेवंमेमहादेवनमोस्तुते॥३३॥तथे

व॰

तिशिवऊचेतंनिःश्वासपरमप्रभुः॥पार्वत्यागणसंयुक्तउवासमंदिराचले॥३४॥अविमुक्तंमहाक्षेत्रंदैवे
नकिंकृतंमहत्॥अधुनामुक्तरूपंचकर्मणाकेनभाविना॥३५॥नब्रह्मणोवचोमिथ्याभविष्यतिक
दाचन॥अधुनाकिंकरिष्यामिकाशीविहरदुःखितः॥३६॥अहंविश्वेश्वरःशास्त्रेमदधीनंनविद्यते॥
किंविश्वनाथनामावैव्यर्थरूपोनसंशयः॥३७॥अखिलोजीवतुल्योहंकृतस्तेनमहात्मना॥शर
णंतंविघ्नराजंगच्छामिनात्रसंशयः॥३८॥ममापिविघ्नरूपंयत्समुत्पन्नंमहाद्भुतं॥अहंकारविही
नोहंकृतस्तेनमहात्मना॥३९॥इत्येवंनिश्चयंकृत्वाशिवस्तत्राचलेतपः॥ततापगणपंध्यात्वाका
शीप्राप्त्यर्थमादरात्॥४०॥काश्यपिदुःखसंयुक्ताश्रुत्वाबभूवतद्गतिं॥तपस्ततापविघ्नेशंध्यात्वा
निश्चलतेजसा॥४१॥अहंकारविनिर्मुक्ताकाशीदुःखितमानसी॥अतुलांशिवप्राप्त्यर्थंततापपरमं
तपः॥४२॥दिवोदासस्तुतद्राज्यंजग्राहधर्मतःस्वयं॥ततोवृष्टिसमुत्पन्नासर्वेषांसुखदायका॥

॥४३॥ सकलं वृष्टियोगेन जगत्स्थावरजंगमं॥ मोदयुक्तं तदा जातं तस्मिन्राज्यं प्रशासति॥४५॥ हृ
ष्टपुष्टजनाः सर्वे वृक्षाः पुष्पफलान्विताः॥ घटदुग्धास्तदा गावस्तस्मिन्राज्यं प्रशासति॥४६॥ स्वा
हास्वधायुता देवाः पितरश्च मुदान्विताः॥ यज्ञादिभिर्बभूवुस्ते तस्मिन्राज्यं प्रशासति॥४७॥ एवं ना
नाविधैर्भाग्यैर्युताः सर्वे महामुने॥ दिवोदासः स्वयं राजा नित्ययात्रां चकार ह॥४८॥ आदौ ढुंढिं प्र
पूज्यासौ पश्चाद्विश्वेश्वरं मुने॥ जगदंबां च काशीं वै मणिकर्णिं ततः परां॥४९॥ भागीरथीं माधवं
च जैगीषव्यगुहां ततः॥ कालभैरवमेवं च दंडपाणिं महाबलं॥५०॥ जनैः स राजा मतिमान्कारया
मास सर्वदा॥ धर्महीनं जनं जघ्ने दंडपाणिरिवस्थितः॥५१॥ अशीतिवर्षसाहस्रं गतं तत्र महामुने
॥ न किंचित्स्वल्पपापस्य प्रवेशोपि बभूव ह॥५२॥ ततो देवा विचारं ते चक्रुः स्वर्गेषु विस्मिताः॥ पृथि
व्यां देवराज्यं न विद्यते नेन कारितं॥५३॥ अतो वयं किमर्थं च स्थास्यामः पृथिवीतलं॥ स्पर्द्धते नः स

मु॰पु॰
२५०

राजर्षिश्चलामस्तंततोवयं॥५४॥ततइंद्रोग्निमाहूयजगादक्रोधसंयुतः॥दिवोदासस्यराज्येतेस्था
नंमास्तुबहिःप्रभो॥५५॥इंद्रस्यवचनंश्रुत्वावन्हिरंतर्दधेतदा॥पृथिव्यांवन्हिहीनास्तेजाताःसर्वेतम
न्वयुः॥५६॥तान्दृष्ट्वासदिवोदासोवन्हिरूपेणसंस्थितः॥पृथिव्यांयत्रकुत्रापितपोबलसमन्वितः॥
॥५७॥एवंनानाविधैर्भावैर्देवाःसर्वेक्रमेणच॥गतास्ततःस्वयंराजातेषांरूपधरोबभौ॥५८॥वाग्वा
दिरूपमास्थायसराजादेवकृत्यतत्॥पृथिव्यांचजनाःसर्वेनतंजानंतिशौनक॥५९॥एवंबहुग
तेकालेदेवाःसर्वेविसिस्मिरे॥देवकृत्यंकृतंसर्वंराज्ञाप्याश्चर्यमुत्तमं॥६०॥ततोदेवगणाःसर्वे
ब्रह्मणःशरणंययुः॥पृथ्वींत्यक्त्वादिवोदासस्यमोहार्थंचनिर्जरैः॥६१॥सतुतपबलयुतोदेवा
नांकृत्यमादरात्॥स्वयंदेवस्वरूपैस्तैश्चकारपरमाद्भुतं॥६२॥वयंविहारहीनाश्चकिंकुर्मोवदभो
विधो॥तेषांवचनमाकर्ण्यब्रह्माप्रोवाचतांस्तदा॥६३॥भवद्भिस्तत्रगंतव्यंप्रार्थनीयोनराधिपः॥

रामः
२५०

सदास्यतिस्वकंस्थानंदेवानांनात्रसंशयः॥६४॥ततोदेवादिवोदासमाययुरिंद्रमुख्यकाः॥तान्दृ
ष्ट्वासहसोत्थायननामविनयान्वितः॥६५॥तमुत्थाप्यततोदेवास्तुष्टुवुस्तंनराधिपं॥सोपिदेवान्प्र
तुष्टावस्वपदानिददौतदा॥६६॥स्वयंनरस्वरूपेणैकदेहेनसमास्थितः॥अग्न्यादिस्थानभूते
षुदेवाःसर्वेसुसंस्थिताः॥६७॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेदिवोदा
समहिमावर्णनंनामपंचाशत्तमोध्यायः॥५०॥ ॥याज्ञवल्क्यउवाच॥ततःशंभुःपरांचिं
तामापेदेमनसामुने॥देवाहतोद्यमाजातास्तपसातस्यधीमतः॥१॥स्वधर्मपरएवायंत
पसाप्रसमन्वितः॥नोच्चालतुंभवेच्छक्यःकिंभविष्यतिदेवपाः॥२॥मयाकाशीकदालभ्याद
ग्धोहंविरहाग्निना॥मरिष्यामिनसंदेहोविललापमहेश्वरः॥३॥अस्थिचर्मावशेषोपिशुशो
चवहुधाशिवः॥तंदेवाःमुनयःसर्वेसांत्वयामासुरादरात्॥४॥देवर्षयऊचुः॥माकुरुष्ववृथा

मु॰पु॰
१४२

चिंतां त्वं समर्थो महेश्वरः॥ तव प्रसादयोगेन वयं काशीं जगाम हे॥५॥ नानासिद्धबलैर्लोभ्यलोकांस्त
त्र समंततः॥ तत्पापभागिनं भूपं दिवोदासं करामहे॥६॥ ततस्त्वया विशेषेण काशी ग्राह्या सदाशिव॥
एवमुक्त्वा ययुस्तत्र देवाः सर्वे प्रहर्षिताः॥७॥ तत्राभवन्गताः काश्यां नानारूपधरामराः॥ जना
न्संमोहयामासुः सिद्धिं दत्वा विशेषतः॥८॥ धर्मशीला जनाः सर्वे तेषां वाक्यं न चक्रिरे॥ एकव
र्षं प्रयत्नं ते कृत्वा शांतिं प्रलेभिरे॥९॥ ततः सदाशिवस्तत्र प्रेषयामास भैरवान्॥ तेपि यत्नैर्वि
विधैश्च न समर्था बभूविरे॥१०॥ एवं क्रमेण आदित्या वसव ऋषयः पराः॥ योगिन्यश्च गणाः
सर्वे हतोद्यमास्तथाभवन्॥११॥ ततो ब्रह्माणमागम्य प्रेषयामास शंकरः॥ तेन दशाश्वमेधा
श्च कृताः शांतिं जगाम सः॥१२॥ ततः स शंकरस्तत्र ध्याननिष्ठो बभूव॥ चरणे विघ्नराजस्य सर्वा
शापूरके परे॥१३॥ स विघ्नं मां गणाध्यक्ष निर्विघ्नं कुरु सर्वदा॥ दासोहं ते विमुक्तस्य संरक्ष विर

रामः
१४२

हात्प्रभो॥१४॥एवंनिश्चित्यचित्तेस्वेवर्षमेकंगजाननं॥ध्यानेनतोषयामासशंकरःकार्यसिद्धये॥
॥१५॥दृष्ट्वाहंकारनिर्मुक्तमत्यंतंशंकरंप्रभुः॥दर्शयामासरूपंस्वंयोगिध्येयमनुत्तमं॥१६॥सिं
हारूढंचतुर्बाहुंपाशांकुशधरंप्रभुं॥वरदाभयहस्तंचसिद्धिबुद्धिसमन्वितं॥१७॥रक्तवर्णं
सुशोभाढ्यंगजवक्त्रंमहोदरं॥विविधैःशेषनाभिंतंभूषणैःसुविराजितं॥१८॥चिंतामणि
धरंपूर्णतेजोराशिंमहाप्रभुं॥दृष्ट्वादेवंमुदायुक्तःशंकरःप्रणनामह॥१९॥ततस्तंपूजया
मासतुष्टावसयथामतिं॥देवदेवंगणाध्यक्षंवक्रतुंडंविधानतः॥२०॥शिवउवाच॥नमस्ते
वक्रतुंडायसर्वसिद्धिप्रदायच॥निराकारायदेवायसाकारायनमोनमः॥२१॥नमःसर्वप्रबो
धायनमःसर्वप्रियंकर॥गणानांपतयेतुभ्यंगणेशायनमोनमः॥२२॥ब्रह्मणेशक्तिकर्त्रेतेपा
लकायचविष्णवे॥संहर्त्रेतेहरायैवगुणेशायनमोनमः॥२३॥ब्रह्मकरायवैतुभ्यंब्रह्मभूतायते

मु.पु.
१४२

नमः॥नमःप्रपंचरूपायप्रपंचचालकायते॥२४॥अनंतगुणधारायह्यनंतविभवायते॥अनंतोदाररूपा
यहेरंबायनमोनमः॥२५॥कारणानांपरायैवकारणायनमोनमः॥अकारणायवैतुभ्यंसिंहवाहा
यतेनमः॥२६॥अहंजीवसमानश्चसंजातोनात्रसंशयः॥अविमुक्तंविमुक्तंमेजातंदेवदयानिधे॥
॥२७॥अतस्तेशरणंयातोनिर्विघ्नंकुरुमांप्रभो॥देहिकाशींगणाध्यक्षअविमुक्ततयासदा॥२८॥
त्वयापुरावरोदत्तःस्मरणेनत्वदग्रतः॥स्थास्यामिपुत्रभावेनतंपालयगजानन॥२९॥इत्युक्त्वा
पादयोस्तस्यप्रणनाममहेश्वरः॥तमुत्थाप्यगणाधीशउवाचप्रहसन्निव॥३०॥वक्रतुंडउ॥
त्वयाकृतमिदंस्तोत्रंसर्वसिद्धिकरंभवेत्॥पठतेशृण्वतेचैवभुक्तिमुक्तिप्रदंशिवं॥३१॥अन्यद्य
त्प्रार्थितंसर्वंकरिष्यामिसदाशिव॥अविमुक्तंप्रदास्यामिसार्थकंतेचसांप्रतं॥३२॥इत्युक्त्वानि
र्ममेदेहाद्ब्राह्मणंसर्वसुंदरं॥सर्वज्ञंचगणेशस्यतेजोयुक्तंप्रभाविनं॥३३॥आज्ञापयतितंदेवोग

रामः
१४२

त्वंशिवसिद्धये॥काश्यांबुद्धिविमोहंस्मजनानांकुरुसत्वरं॥३४॥मोहइत्वादिवोदासंकाशीरा
ज्यंशिवायच॥देहिमेआज्ञयाद्यत्वंसर्वपूज्योभविष्यसि॥३५॥ढुंढिर्ज्योतिर्विदंत्वांतेवदिष्यंतिज
नाद्विज॥त्वदीयवशगाःसर्वेभविष्यंतिनसंशयः॥३६॥इत्युक्त्वःसाद्विजोढुंढिंप्रणनाममुदायुतः॥
ययौप्रदक्षिणीकृत्यकाशींसगणपंस्मरन्॥३७॥ततोविष्णुंसमाहूयजगादतंगजाननः॥बौद्ध
रूपेणविष्णोत्वंकाशींगच्छममाज्ञया॥३८॥द्विजेनढुंढिनासर्वंमोहितंनगरंभवेत्॥कुरुत्वमधुना
भ्रष्टंममवाक्याज्जनार्दन॥३९॥विष्णुस्तदागणेशंतंप्रणम्यबौद्धरूपधृक्॥ययौकाशींमहाभा
गोवक्रतुंडंहृदिस्मरन्॥४०॥तौयथागणराजेनकथितंचक्रतुस्तथा॥मोहयुक्तंपुनर्भ्रष्टंनगरंस
र्वमंजसा॥४१॥अन्यच्छृणुचरित्रंत्वंविश्वामित्रतपोधन॥काशीध्यानयुतातत्रसंस्थितागणपस्य
तु॥४२॥सहस्रंतत्रवर्षाणांगतमेकंमहामुने॥तस्यास्तपप्रभावेनसंतुष्टोभूद्गजाननः॥४३॥व

रंदातुंसमायातःकाश्यैमूर्त्तिधरःप्रभुः॥सिंहारूढःप्रसन्नात्मानानाभूषणभूषितः॥४४॥तंदृष्ट्वा
सहसोत्थायकाशीपरमपावनी॥पादयोःप्रणनामाथकर्षिताविह्वलाभृशं॥४५॥पुनरुत्थायतंदे
वंपूजयामासभक्तितः॥तुष्टावसुस्थिराभूत्वानिबद्धकरसंपुटा॥४६॥काश्युवाच॥नमस्तेगण
नाथायनमस्तेनंतरूपिणे॥नमस्तेसर्वदात्रेवैमायाधारायतेनमः॥४७॥गजवक्त्रधरायैवशू
र्पकर्णायतेनमः॥सर्वभूषायवैतुभ्यंवक्रतुंडनमोस्तुते॥४८॥निराकारायनित्यायनिर्गुणा
यगुणात्मने॥वेदवेद्यायसततंब्रह्मणेतेनमोनमः॥४९॥ब्रह्मणांब्रह्मदात्रेतेसिंहारूढाय
तेनमः॥सिद्धिबुद्धिपतेतुभ्यंनमःसर्वाभयंकर॥५०॥अनाथायचसर्वेषांनाथायपालकायच॥
भक्तेभ्यःसर्वदात्रेतेविघ्नहर्त्रेनमोस्तुते॥५१॥विघ्नकर्त्रेह्यभक्तानांभुक्तिमुक्तिप्रदायच॥योगिनांहृ
दिसंस्थाययोगगम्यायतेनमः॥५२॥नमोवाणीविहीनायशांतिरूपायतेनमः॥शांतेभ्यःशां

तिदात्रेचगणेशायनमोनमः॥५॥किंस्तौमित्वांगणाध्यक्षयत्रवेदाःसशास्त्रकाः॥शांतिंप्राप्तामहा
भागअतस्त्वांप्रणमामवै॥५४॥रक्षरक्षस्वदासींतेविरहेणप्रपीडितां॥अविमुक्तंशिवस्यैवनाम
यर्थंबभूवमे॥५५॥शिवहीनाकृतादेवदैवेनपरमाद्भुतं॥अतस्तेशरणंप्राप्ताशंकरंदर्शयस्वमां
॥५६॥इत्युक्त्वापतितातस्यपादयुग्मेमहामुने॥तामुत्थाप्यगणाधीशोजगौमधुरयागिरा॥५७॥
गणेशउवाच॥माशोकंकुरुकल्याणिशंकरंदर्शयामिते॥अविमुक्तमिदंनामसार्थकंप्रभविष्य
ति॥५८॥त्वयाकृतमिदंस्तोत्रंवियोगहरणंभवेत्॥यःपठिष्यतिभक्त्याचशृणोतितस्यसुंदरि॥५९॥
यंयंमिच्छतिभावेनतंतंदास्यामिसर्वगः॥ब्रह्मभूतकरंस्तोत्रंभविष्यतिनसंशयः॥६०॥इत्युक्त्वाग
णनाथश्चतत्रैवांतरधीयत॥सापितमेवध्यायंतिस्थिताकालप्रतीक्षका॥६१॥इतिश्रीमदांत्येमौद्ग
लेप्रथमखंडेवक्रतुंडचरित्रेकाशीशिववरप्रदानंनामैकपंचाशत्तमोध्यायः॥ ॥५१॥

याज्ञवल्क्य उवाच॥ एतस्मिन्नंतरे तत्र ययौ ज्योतिर्विदुत्तमः॥ ढुंढिनामद्विजो यस्तु पुरा प्रोक्तो मयानघ॥
॥१॥ सर्वं तं नगरं तेन मोहितं तत्क्षणान्मुने॥ पश्चात्समागतो बौद्धो विष्णुर्भ्रष्टं तथाकरोत्॥२॥ ढुंढिना
सदिवोदासो बोधितः स च त्यक्तवान्॥ राज्यं बौद्धेन संतस्थौ प्रतिक्षन्छिवदर्शनं॥३॥ ताभ्यामाकारितः
शंभुः गणपं पुरः॥ कृत्वा संपूज्य तं काश्यामादौ च कारवासिनं॥४॥ स्वयं देवगणैः पश्चादृषिभि
श्च विवेश ह॥ ननाम चरणे काशीविघ्नस्य शिवस्य च॥ यथास्थानं स्थिताः सर्वे देवा ऋषिगणाः
सुखं॥ दिवोदासाय मोक्षं स शंकरः प्रददौ ततः॥६॥ ततः कदाचिद्देवेशो जगाद विश्वपं वचः॥ तु
भ्यं दत्ता मया काशी कृतं सर्वं यथातथं॥७॥ अधुनाहं महादेव यास्ये स्वं धाम शोभनं॥ यदा मे स्म
रणं कुर्यास्तदा द्रक्ष्यसि मां शिव॥८॥ इत्युक्त्वा ढुंढिविप्रेण सहितो सौ गजाननः॥ अंतर्द्धानं ययौ त
त्र देवानां पश्यतां मुने॥९॥ ततः स्वयं विश्वनाथस्तस्य मूर्त्तिं विधाय सः॥ स्थापयामास यत्ने

नरैर्वैश्यब्राह्मणैः सह ॥१०॥ विधिवत्पूजयामासचोपचारैर्मनोरमैः ॥ सर्वैः कृत्वानमस्कारंप्रदक्षिणां
चकारसः ॥११॥ सर्वं जगादविघ्नेशः शृणुतमेववचोऽखिलं ॥ आदौदुंढिंसमभ्यर्च्ययेमांलोप्यंतितस्ततः ॥
॥१२॥ तेभ्योमुक्तिंतथामुक्तिंदास्यामिनान्यथाक्वचित् ॥ काशीवासफलस्यापिदातायंवक्रतुंड
कः ॥१३॥ वेदाद्रिनारदस्यंयदन्वेषितंमहाबुधैः ॥ तन्मूलोयंहृदिप्राप्तः साक्षद्ब्रह्मपतिःप्रभुः ॥१४॥
अतोयंढुंढिराजेतिनाम्नाख्यातोभयाकृतः ॥ धर्मार्थकाममोक्षाणांदातास्यैवनसंशयः ॥१५॥
एवमुक्त्वामहादेवोनित्यंपूजापरायणः ॥ ढुंढिराजस्यसेवायांसावधानोबभूवह ॥१६॥ तथात्वमपि
देवेशविघ्नराजंभजप्रभो ॥ एकादंकारभावेनब्राह्मणःप्रभविष्यति ॥१७॥ मुकलउवाच ॥ याज्ञवल्क्य
वचःश्रुत्वाविश्वामित्रोमहातपाः ॥ जगादतंमहाभागंविनयेनसमन्वितः ॥१८॥ विश्वामित्रउवाच ॥
याज्ञवल्क्यमहाभाग त्वयाहंबोधितः खलु ॥ अधुनावदमेज्ञानंसर्वज्ञोसिमहामुने ॥१९॥ अहंकारो

मु॰पु॰
२४५

मयात्याज्यः केनमार्गेणतद्वद॥ कीदृशोमेशरीरेसौतिष्ठतिवदसांप्रतं॥२०॥ अन्यदहंगणेशानंभजा
मिविधिनाकथं॥ स्वरूपंवदतस्यापियोगींद्रोसियतःस्वयं॥२१॥ याज्ञवल्क्यउवाच॥ शृणुत्वंकौ
शिकब्रह्मन्नहंकारंवदामिते॥ तपसाब्राह्मणत्वंचकरिष्यामिनसंशयः॥२२॥ एनमेवविजानीह्य
हंकारंतंमहामते॥ तत्रत्यागेविधिंवक्ष्येतंशृणुष्वयथातथं॥२३॥ प्राप्तयेब्रह्मणत्वस्यतपामि
तपउत्तमं॥ यदादास्यतिदेवोसौतदाहंब्राह्मणोभवेः॥ यदानदत्तंदेवेनतदाराजर्षितांगतः॥
अस्तुमेसततंतच्चकोहंमेकीदृशंतपः॥ अहंसदापराधीनोदेहधारीनसंशयः॥ करोमियत्न
मत्यंतंदेवाधीनंभविष्यति॥ अनेनविधिनाविप्रतपस्तप्तंमहामुने॥ तदाप्रभवितासर्वंगताहं
कारभावतः॥२७॥ अन्यत्वंशृणुमेवाक्यंमत्सरंत्यजकौशिक॥ शरणंगणनाथस्ययाहितेनसु
खंभवेत्॥२८॥ नमत्समंतपःकस्यस्पर्द्धसेतेनवैद्विजान्॥ मत्सरेणसमाविष्टस्त्वंकुतोब्राह्मणं

रामः
२४५

भवेः॥२९॥त्वयामत्सरभावेनवसिष्ठस्यमहात्मनः॥पुत्राणांचशतंपूर्णंनाशितंरक्षसापुरा॥
॥३०॥अपरासृष्टिरारब्धात्रिशंक्वर्थंपुरात्वया॥वशिष्ठहननेयत्नंनानारूपंकरोषिवै॥३०॥तंम
त्सरंत्यजत्वंवैविधिनाशृणुतत्वतः॥नीचोहंसर्वविप्रेभ्यस्तपस्विन्योनसंशयः॥३१॥मयाकिंचि
त्तपःकार्यंमेभ्यःसंनिधिमादरात्॥एषांतपःप्रभावोपिमनसागम्यतेनसः॥३२॥एवंकृत्वा
तपस्वत्वंब्राह्मणःप्रभविष्यसि॥अन्यथायुगसाहस्रंतपस्तप्तामरिष्यसि॥३३॥सर्वेभ्योनम
नंविप्रहरिभावसमन्वितं॥कर्त्तव्यंतत्वयानित्यंराजर्षिवन्महामते॥३४॥एवमुक्त्वामहायोगी
वक्रतुंडप्रभावजं॥कथांसंश्रावयामासपूर्वभवांमहायशाः॥३५॥[illegible]कथांश्रुत्वामहा
भागोविश्वामित्रःसुविस्मितः॥उवाचतंनमस्कृत्ययाज्ञवल्क्यंतपोधनं॥३७॥विश्वामित्रउवाच॥
॥शृणुयत्नेनमाहात्म्यंपुरावृत्तंकथानकं॥कथयामिचतेप्रीत्यामदीयंज्ञानदायकं॥३९॥एक

गतोश्लोक ३८॥या
ज्ञवल्क्यउवाच

दाहंगताब्रह्मन्विकुंठंस्वर्गमुत्तमं॥तत्रनारायणंनत्वापृच्छंतंजगदीश्वरं॥४०॥किंसारंसर्वभूतेषुकस्मा
धारेणसंस्थितं॥मह्यंवदमहाभागसाक्षात्त्वंजगदीश्वरः॥४१॥सर्वमिदंत्वदाधारंभाषसेहृदिसर्वदा
॥तथापीच्छामिपृष्टुंत्वांश्रवणार्थंयथातथा॥४२॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडच
रित्रेयाज्ञवल्क्यनारायणपृश्नपृच्छानामद्विपंचाशत्तमोध्यायः॥५२॥ ॥नारायणउवाच॥गणे
शाधारमेतत्त्वंजानीहिब्राह्मणोत्तम॥हृदिबुद्धिप्रदातृत्वाद्बहिःसिद्धिप्रदानतः॥१॥अतोस्माभिः
सदादेवआदिपूज्योमहामुने॥यआदिसोपिमध्येतेतिष्ठतिनात्रसंशयः॥२॥गुणरूपावयंस
र्वेब्रह्माकारोगणेश्वरः॥सिद्धिबुद्धिपतिःसोपिसर्वपूज्यश्चभोमुने॥३॥स्वानंदोयस्यलोकोभूद्भा
वाभावविवर्जितः॥अगम्योमुनिदेवानांद्वंद्वहीनःपरात्परः॥४॥एवंगणपतिंज्ञात्वामुच्यतेस
र्वबंधनात्॥तदाधारमयंसर्वंजगद्ब्रह्ममहामते॥५॥एकदातत्वभिःसर्वैर्मत्सरेणसमन्वि

तैः॥वादः कृतोमहाभागअहंश्रेष्ठइतिध्रुवं॥६॥मदाधारमिदंसर्वंपालयामिसृजाम्यहं॥हरामि
माययातस्मात्स्वेच्छारूपोहमेवच॥७॥एवंपरस्परंसर्वेतत्वात्मानोमहाबलाः॥विवादंचक्रिरे
तत्रसामर्थ्येनविमोहिताः॥८॥ततस्तत्रगणाधीशोब्राह्मणस्यचवेशभृत्॥आययौवादशां
त्यर्थंज्ञानदानार्थमादरात्॥९॥तंदृष्ट्वाविस्मिताःसर्वेकोयमत्रसमागतः॥आत्माकारावयंस
र्वेतत्रास्यचगतिःकथं॥१०॥ततस्तंसर्वतत्वानिपपृच्छुःकोभवानिति॥कथंमार्गस्त्वयाप्राप्तो
ब्रह्माकारेषुवर्त्मसु॥११॥ततस्तान्सद्विजोहृष्टोजगादयोगमायया॥मयामार्गकृतोह्यत्रब्राह्म
णेनसुयोगिना॥१२॥किमर्थंचभवंतोपिविवादंकुरुथस्वयं॥तन्मेवदततत्वानिकरिष्यामिहि
तंमहत्॥१३॥ततोहृष्टानितत्वानितमूचुःश्रेष्ठभावतः॥कस्तिष्ठतिवदप्राज्ञआत्मसुतत्वसुप्र
भो॥१४॥तेषांवचनमाकर्ण्यतानुवाचद्विजोत्तमः॥तत्वाधारमिदंसर्वंविद्यतेनात्रसंशयः॥१५॥

विश्वंत्यक्त्वाभवंतोपितिष्ठध्वंमेप्रपश्यतः॥विश्वंविदीर्यतेसर्वंयेनत्यक्तंसवैप्रभुः॥१६॥इतिश्रुत्वाव
चःसर्वेतथेतिप्रतिपाद्यतं॥क्रमेणत्यक्तुमारब्धाआत्माकारामहाबलाः॥१७॥ब्रह्माकाराचयापृथ्वी
विश्वंत्यक्त्वास्थिताभवत्॥तथेदमखिलंविश्वंनविशीर्यतभावतः॥१८॥ततोजलेनतत्त्यक्तंतथापि
तादृशस्थितं॥ततस्तुतेजसात्यक्तंतथापिनविशीर्यत॥१९॥ततोवायुश्चतंत्यक्त्वा॥स्थितोदूरंमहामु
ने॥तथापिसकलंविश्वंपूर्ववत्संस्थितंबभौ॥२०॥आकाशेनचसंत्यक्तंतथापितादृशंबभौ॥तत
स्तन्मात्रभिस्त्यक्तंतथापिपूर्ववद्बभौ॥२१॥तन्मात्रभिःसहितानिभूतानिचमहामुने॥पंचानि
दूरतःस्थित्वाशुशुचुर्गततेजसः॥२२॥ततोज्ञानेंद्रियैस्त्यक्तंपंचभिस्तत्तथाबभौ॥ततःकर्ममयै
स्त्यक्तंतथापितादृशंबभौ॥२३॥ततइंद्रात्मकंब्रह्मत्यक्त्वादूरेस्थितंमुने॥तथापिविश्वमेवेदंपू
र्ववत्संस्थितंकिल॥२४॥एवंदेवगणाःसर्वेइंद्रियाणांप्रकाशकाः॥आत्माकारास्थितादूरं

त्यक्त्वा विश्वं महामुने ॥२५॥ तथापि सकलं विश्वं बभौ तेपि सुविह्वलाः ॥ निस्तेजसो भवंस्तत्र स्थिता
ग्नाग्निः समाययुः ॥२६॥ ततोन्नब्रह्मणा त्यक्तं विश्वं तदपि संबभौ ॥ प्राणात्मकेन संत्यक्तं तथापि
तादृशं बभौ ॥२७॥ ततो मनात्मकेनैव ब्रह्मणा त्यक्तमादरात् ॥ तथापि संबभौ विश्वं पूरितं केनचिन्मु
ने ॥२८॥ ततो विज्ञानरूपेण त्यक्तं तदपि तद्बभौ ॥ तत आनंदरूपेण त्यक्तं विश्वं बभौ तदा ॥ ततो नादा
त्मकेनैव त्यक्तं विश्वं बभौ मुने ॥ ततो विंदुमयेनैव त्यक्तं तथापि तद्बभौ ॥३०॥ सोहं ब्रह्मात्मकेनापि त्य
क्तं विश्वं बभौ मुने ॥ ततो बोधात्मना त्यक्तं तथा विश्वं च संबभौ ॥३१॥ ततो विदेहरूपेण त्यक्तं तदपि
संबभौ ॥ ततो सत्स्वस्वरूपेण त्यक्तं तदपि संबभौ ॥३२॥ ततः सत्स्वस्वरूपेण त्यक्तं विश्वं बभौ मुने ॥
ततः समस्वसंवेद्येन त्यक्तं विश्वमाबभौ ॥३३॥ ततो नेतिस्वसंवेद्येन त्यक्तं विश्वमाबभौ ॥ ततः स्वानं
दरूपेण त्यक्तं विश्वं लयं ययौ ॥३४॥ ततस्ते विस्मिताः सर्वे स्वानंदं तुष्टुवुर्मुने ॥ प्रहृष्टमनसो भूत्वा

प्रार्थयामासुरादरात्॥२५॥सकलंयत्वदाधारंत्वमस्माकंविशेषतः॥नायकःसर्वतत्वानांविनायकभ
वप्रभो॥२६॥विनायकनमस्तुभ्यंपुनर्विश्वंसृजप्रभो॥यथापूर्वंस्थितंस्वामिंस्तथाकुरुजगत्पते॥
॥२७॥एवंतैःप्रार्थितोदेवविनायकोविशेषतः॥निर्ममेसकलंविश्वंयथापूर्वंमुनीश्वर॥२८॥ततस्ते
ब्रह्मरूपत्वात्तद्विश्वंविविशुःपुनः॥यथास्वस्थानमात्मानमाश्रित्यमुमुदुस्ततः॥जगदीश्वरनामानः
सर्वेशास्त्रेप्रकीर्त्तिताः॥अनेनविधिनाब्रह्मन्ज्ञातव्यंतद्विशेषतः॥४०॥सविनायकइत्युक्तोद्विवि
धोयाज्ञवल्क्यक॥संयोगेननिजानंदोनिरानंदोह्ययोगतः॥४१॥द्विविधेनाशभूतेचयोगरूपोय
मुच्यते॥विनायकोमहातेजाब्रह्मणांनायकःस्मृतः॥४२॥तंविदित्वाततःशांतिंवयंप्राप्तामहामु
ने॥अतःशांत्यर्थमत्यंतंतमाराधयकोद्विज॥४३॥मायाभ्रांतिकरीजंतोर्वक्रासंकथितामुने॥तुंडे
नहंतितांभक्त्यातेनायंवक्रतुंडकः॥४४॥वक्रतुंडंचसर्वेशंशरणंयाहिभोमुने॥अतःशांत्यर्थमत्यं

तं॥तदायोगींद्रसेव्यस्त्वंभविष्यसिनसंशयः॥४५॥मनोवाणीमयंसर्वंगकाराक्षरसंभवं॥मनोवाणीवि
हीनंचणकारंविद्धिमानद॥४६॥तयोःस्वामिगणेशोयंयोगरूपःप्रकीर्तितः॥तंप्राप्यब्रह्मभूताश्च
भवंतिसर्वजंतवः॥४७॥इदंवेदांतसंभूतंरहस्यंकथितंमुने॥गोपनीयंप्रयत्नेनतदासिद्धिमवा
प्स्यसि॥४८॥इत्युक्त्वाविररामाथनारायणःप्रतापवान्॥गणेशायनमस्तुभ्यमित्युवाचःपुनःपुनः
॥४९॥ ॥इतिश्रीमदांत्येमौद्गलेप्रथमखंडेवक्रतुंडचरित्रेयाज्ञवल्क्यनारायणसंवादकथनंनाम
त्रिपंचाशत्तमोध्यायः॥५३॥याज्ञवल्क्यउवाच॥ततोहंपरमप्रीतस्तंप्रणम्यजनार्दनं॥ययौतपोवनं
तातयोगाभ्यासंसमारभं॥क्रमेणपंचधावृत्तिंजित्वाचित्तस्यसाधनैः॥गणपंशांतियोगेनप्राप्तोहंत
दनुग्रहात्॥१॥अतस्त्वंशरणंयाहिवक्रतुंडंविशेषतः॥तेनब्राह्मणसंबंधोभविष्यसिनसंशयः॥२॥
गायत्रीजपसंभूतंश्रेयोदेहिमहामुने॥गजाननायतेनत्वंविघ्नहीनोभविष्यसि॥४॥विश्वस्मिन्मि

मु॰पु॰
१४२

त्रभावस्त्वंमाकुरुष्वकदाचन॥विश्वामित्रश्चतेनामतदासार्थकमेष्यसि॥५॥इत्युक्त्वायाज्ञवल्क्यःसय
योतेनप्रपूजितः॥गणेशायनमोदक्षनाममंत्रंसदाजपन्॥६॥तदाप्रभृतिगायत्रींविश्वामित्रःसध
र्मवित्॥त्यक्त्वाहंकारमत्यंतंमत्सरंचतथाजपन्॥६॥गणेशार्पणभावेनगायत्रींचजजापह॥तपस्त
तापविप्रोसौध्यात्वाहृदिगजाननं॥८॥गायत्रीवेदमातेयंपिताप्रणवउच्यते॥सएवगणनाथोय
मोंकाराकृतिमस्तकः॥९॥सगुणोगुणराजोयमोंकारइतिकथ्यते॥तस्मैसमर्प्ययोगीशगायत्रीं
योगमाप्नुयात्॥१०॥ततःस्वल्पेनकालेनब्रह्मालोकपितामहः॥विश्वामित्रंययौदक्षब्राह्मणत्वंद
दौपरं॥११॥वशिष्ठमुनिनातत्रब्राह्मणैःसहपूजितः॥विश्वामित्रोमहातेजाब्राह्मणोयंप्रकीर्तितः॥
सप्तर्षीणांमहातेजाआदौप्रोक्तोमहर्षिभिः॥तथागणेशभक्तेषुमुख्योभूत्सप्रतापवान्॥१३॥नि
त्यंपूजाप्रकारेणपूजयामासतंमुनिः॥तुष्टावसुस्थिरोभूत्वायथामतिगजाननं॥१४॥विश्वामि

रामः
१४२

ऋउवाच॥नमस्तेगणनाथायविघ्नेशायनमोनमः॥निर्गुणायगुणानांच
पतयेतेनमोनमः॥१५॥नमःसर्वविदांश्रेष्ठनमःसर्वप्रियंकर॥गजाका
रायदेवायगणेशायनमोनमः॥१६॥गजवक्त्रनमस्तुभ्यंब्रह्मणांपतये
नमः॥अनाद्यैचसातत्यमादिपूज्यायतेनमः॥१७॥सर्वसिद्धिप्रदात्रैक्ष
नामायाधरायच॥मायिभ्योमोददात्रैवैतद्धीनायनमोनमः॥१८॥बुद्धिपतेन

मु॰पु॰
१५०

मस्तुभ्यंबुद्धिपंचकधारिणे॥मनोवाणीमयायैवतद्धीनायनमोनमः॥१९॥सिंहारूढायस
र्वायदेवानांपतयेनमः॥देवदेवेशसेव्यायानादिसिद्धायतेनमः॥२०॥नमश्चतुर्भुजायै
वमूषकध्वजधारिणे॥मूषकवाहनायैवहेरंबायनमोनमः॥२१॥लंबोदरनमस्तु
भ्यंशूर्पकर्णायतेनमः॥योगिनांकुलदेवाययोगीनांपतयेनमः॥२२॥एवंसंस्तुव
तिनित्यंप्रादुर्भूतोगजाननः॥अनंतादित्यसंकाशःसिंहारूढोमहोदरः॥२३॥तंदृष्ट्वा
निःपपातोर्व्यांसाश्रुनेत्रोमहामुनिः॥पुलकांकितसर्वांगोभक्तिभावेनसंप्लुतः॥

रामः
१५०

उवाच॥ नमस्ते गणनाथाय विघ्नेशाय नमो नमः॥ निर्गुणाय गुणानां च पतये ते नमो नमः॥१५॥ न
मः सर्वविदां श्रेष्ठ नमः सर्वप्रियंकर॥ गजाकाराय देवाय गणेशाय नमो नमः॥१६॥ गजवक्त्र नमस्तुभ्यं
ब्रह्मणां पतये नमः॥ अनादये च सा तत्यमादिपूज्याय ते नमः॥१७॥ सर्वसिद्धिप्रदात्रे च नानामाया
धराय च॥ मायिभ्यो मोहदात्रे वै तद्धीनाय नमो नमः॥१८॥ बुद्धिपते नमस्तुभ्यं बुद्धिसंचकधारिणे॥
मनोवाणीमयायै वतद्धीनाय नमो नमः॥१९॥ सिंहारूढाय सर्वाय देवानां पतये नमः॥ देवदेवे
शसेव्यायानादिसिद्धाय ते नमः॥२०॥ नमश्चतुर्भुजायै वमूषकध्वजधारिणे॥ मूषकवाहनायै व
हेरंबाय नमो नमः॥२१॥ लंबोदर नमस्तुभ्यं शूर्पकर्णाय ते नमः॥ योगिनां कुलदेवाय योगीनां
पतये नमः॥२२॥ एवं संस्तुवति नित्यं प्रादुर्भूतो गजाननः॥ अनंतादित्यसंकाशः सिंहारूढो महो
दरः॥२३॥ तं दृष्ट्वा निःपपातोर्व्यां साश्रुनेत्रो महामुनिः॥ पुलकांकितसर्वांगो भक्तिभावेन संस्तुतः॥

विश्वामित्रउवाच॥नमस्तेगणनाथायविघ्नेशायनमोनमः॥निर्गुणायगुणानांचपतयेतेनमोन
मः॥२५॥नमःसर्वविदांश्रेष्ठनमःसर्वप्रियंकर॥गजाकारायदेवायगणेशायनमोनमः॥२६॥गज
वक्त्रनमस्तुभ्यंब्रह्मणांपतयेनमः॥अनादयेचसातत्यमादिपूज्यायतेनमः॥२७॥सर्वसिद्धिप्रदा
त्रेचनानामायाधरायच॥मायिभ्योमोहदात्रेवैतद्धीनायनमोनमः॥२८॥बुद्धिपतेनमस्तुभ्यंबुद्धि
पंचकधारिणे॥मनोवाणीमयायैवतद्धीनायनमोनमः॥२९॥सिंहारूढायसर्वायदेवानांपतये
नमः॥देवदेवेशसेव्यायानादिसिद्धायतेनमः॥३०॥नमश्चतुर्भुजायैवमूषकध्वजधारिणे॥मूषक
वाहनायैवहेरंबायनमोनमः॥३१॥लंबोदरनमस्तुभ्यंशूर्पकर्णायतेनमः॥योगिनांकुलदेवाययो
गीनांपतयेनमः॥३२॥एवंसंस्तुवतितस्मिन्प्रादुर्भूतोगजाननः॥अनंतादित्यसंकाशःसिंहारूढो
सहोदरः॥३३॥तंदृष्ट्वानिपपातोर्व्यांसाश्रुनेत्रोमहामुनिः॥पुलकांकितसर्वांगोभक्तिभावेनसंप्लु

॥२४॥ तं दृष्ट्वा गणराजस्तु जगाद मुनिसत्तमं ॥ त्वया कृतमिदं स्तोत्रं मम प्रीतिकरं भवेत् ॥२५॥ यः पठेद्वृ
णुयाद्योपि स मे मान्यो भविष्यति ॥ मुक्तिं भुक्तिं प्रदास्यामीप्सितं तस्मै न संशयः ॥२६॥ त्वं तु मत्तो वरान्ब्रू
हि सर्वान्दास्यामि दुर्लभान् ॥ भक्तिभावेन संतुष्टस्तव योगीश्वराधुना ॥२७॥ मुद्गल उवाच ॥ गणेश
वचनं श्रुत्वा सावधानो भवन्मुनिः ॥ तं प्रणम्य महाभक्त्या जगाद हर्षसंयुतः ॥२८॥ विश्वामित्र उवाच ॥ ध
न्यो वंशो मदीयोद्य धन्यं जन्म तपो य[illegible]श ॥ धन्यो मे जनको देव त्वदंघ्रियुगदर्शनात् ॥२९॥ किं वांछा
मि गणाधीश सर्वं मायात्मकं प्रभो ॥ अतो भक्तिं त्वदीयां मे देहि नाथ नमोस्तु ते ॥३०॥ गाणपत्येषु मे दे
हि संवासं च गजानन ॥ अमुमेव वरं ब्रह्मन्मायामोहविनाशनं ॥३१॥ एवमस्त्विति तं प्रोच्य सोंतर्द्धानं य
यौ प्रभुः ॥ विश्वामित्रस्तदारभ्य गाणपत्यो बभूव ह ॥३२॥ एवं नानावताराश्च वक्रतुंडस्य धीमतः ॥
भक्तानां सिद्धिदातारो दानवानां विनाशकाः ॥३३॥ चरित्रमखिलं तेषां वक्तुं नैव प्रशक्यते ॥ अतः सं

मु॰पु॰
२५२

क्षेपतो विद्धि कथितं सुकथानकं ॥३४॥ एतद्वै वक्रतुंडस्य चरितं पापनाशनं ॥ भुक्तिमुक्तिप्रदं पूर्णं कथितं
ते प्रजायते ॥३५॥ यः शृणोति नरो भक्त्या संश्रावयति यः पुमान् ॥ पठेद्यः कृतकृत्यः स भविता नात्र
संशयः ॥३६॥ पुत्रपौत्रप्रदं चैव धनधान्यकरं परं ॥ विद्यामायुष्यदं दक्षचरितं कथितं परं ॥३७॥ सह
स्रमाघमासान्यः प्रयागे स्नाति मानवः ॥ वक्रतुंडचरित्रस्य श्रवणेन लभेत्फलं ॥३८॥ आजन्ममर
णांतं यः काशीवासं करोति च ॥ यथाविधि यथाशास्त्रं तदस्य श्रवणाल्लभेत् ॥३९॥ दृष्टापूर्त्तादिकं
यस्तु लक्षवारं करोति च ॥ संपूर्णभावयुक्तेन श्रवणादस्य तल्लभेत् ॥४०॥ यज्ञानां सांगजातानां फ
लं प्राप्नोति मानवः ॥ अस्य श्रवणमात्रेण संपूर्णं तत्प्रजायते ॥४१॥ बहुनात्र किमुक्तेन ब्रह्मभूतपदप्र
दं ॥ श्रवणेन न संदेहो जानीहि त्वं महामते ॥४२॥ सूत उवाच ॥ एवमुक्त्वा महायोगी मुद्गलो विररामह ॥
तदेतदखिलं तेद्य मयापि कथितं मुने ॥४३॥ वक्रतुंडस्य माहात्म्यं संक्षेपेण च शौनक ॥ कथितं ते

रामः
२५२

मयाविप्रभावंज्ञात्वाविशेषतः॥४४॥श्रोतुमिच्छापुनः किंतेवर्त्ततेमुनिसत्तम॥तवाहंसुप्रसादेनसंतुष्टोस्मि
नसंशयः॥४५॥वक्रतुंडस्यमहात्म्यंगुह्यंवेदरहस्यकं॥गोपनीयंप्रयत्नेनसर्वसिद्धिंलभेत्तदा॥नश्राव्यं
दुर्जनेभ्यश्चगणेशद्विषतेतथा॥पापकर्मभ्यएवेदंविषयिभ्यःकदाचन॥४६॥यदितेषांपुरश्चेदंश्रा
वितंचेन्महामुने॥प्रभवितातदाकोपोवक्रतुंडस्यनिश्चितं॥४७॥अस्यानादरमात्रेणदशपूर्वान्द
शापरान्॥नरकेश्रावितस्यैवप्रापयत्येषपौरुषान्॥४८॥अतःसाधुजनेभ्यश्चगाणपत्येभ्यएव
च॥प्रयत्नेनसुसंश्राव्यंस्वानांकोटिंसमुद्धरेत्॥५०॥श्रोतायःपृच्छकोवक्तातेषांकोटिकुलोद्भवं
पुरुषाणांसमूहंसउद्धरेन्नात्रसंशयः॥५१॥कलिकल्मषदाहाढ्यंवक्रतुंडचरित्रकं॥कृतादिषु
किमाश्चर्यंदहेत्पापंमहाग्निवत्॥५२॥अहोकलौविकुंठंयत्सर्वदैवादिकंमहत्॥गाणपत्यंवि
शेषेणगतिदंचसदाभवेत्॥५३॥इदंमुनेचरित्रंतेवक्रतुंडस्यभावतः॥कथितंतेनविप्रर्षेकृतकृत्यो

मुं॰पु॰
२५२

स्मिसांप्रतं॥५३॥धन्योहंभवतांसंगाद्येनसंस्मरणंकृतं॥गणेशस्यपरेशस्यसफलोमेभवोभवत्॥
॥५५॥ ॥इतिश्रीमदांत्येमहापुराणेप्रथमखंडेवक्रतुंडचरित्रसमाप्तिवर्णनंनामचतुःपंचाशत
मोध्यायः॥ ॥इतिप्रथमखंडसमाप्तिरगमत्॥वक्रतुंडचरित्रंसमाप्तिः॥ ग्रंथसंख्यापं
चोनाष्टशतोत्तरद्विसहस्रं ३७९५

रामः
२५२

॥श्रीगणेशायनमः॥श्रीगुरुगणपतिइष्टदेवताभ्योनमः॥श्रीसरस्वत्यैनमः॥श्रीशौनकाद्याऊचतुः॥
॥सूतत्वयामहाभागकृत्यकृत्यावयंकृताः॥अतुलंवक्रतुंडस्यचरितंश्रावितंमहत्॥१॥धन्योसि
त्वंमहाबुद्धेसर्वज्ञोसिविशेषतः॥परिपृच्छामहेतुस्त्वांतद्वदस्वयथार्थतः॥२॥श्रुत्वाश्रुत्वानमेतृ
प्तिर्जायतेमृतपानवत्॥अतस्त्वमेकदंतस्यचरित्रंवदसांप्रतं॥३॥कस्मिन्ब्रह्मणिसंस्थोयमेक
दंतोगजाननः॥कतितस्यावताराश्चकिंकर्मावदनिश्चितं॥४॥इतिसंप्रार्थितःसूतउवाचतान्म
हामुनीन्॥प्रश्रयावनतोभूत्वाभक्त्यातेषांप्रणोदितः॥५॥सूतउवाच॥एवंश्रुत्वासदक्षेणप
रिपृष्टोमहामुनिः॥मुद्गलस्तमथोवाचतच्छृणुध्वंमुनीश्वराः॥६॥दक्षउवाच॥पुरातनंमहापु
ण्यमस्तिमेमुनिसत्तमः॥तेनतेदर्शनंजातंसर्वज्ञस्यनसंशयः॥७॥वक्रतुंडचरित्रेणश्रुतेनतेमुखां
बुजात्॥तेनविश्रांतिताप्राप्ताहृदयेमेविशेषतः॥८॥यज्ञविध्वंसशोकोपिममगतोधुनाप्रभो

॥हर्षयुक्ततयाभक्त्याढुंढेस्तुमुनिपुंगव ॥९॥एकदंतचरित्रंमेकथयस्वविशेषतः॥किंकर्माकथमु
त्पन्नएकदंतोगजाननः॥१०॥किंवाहनसमायुक्तःकीदृशंब्रह्मतस्यवै॥सर्वमखिलमित्यादिवद
मांकरुणानिवै॥११॥सूतउवाच॥एवंपृष्टोमहातेजाउवाचतंप्रजापतिं॥भक्तिंज्ञात्वाविशेषेणग
णेशेसर्वसिद्धिदे॥१२॥मुद्गलउवाच॥शृणुदक्षत्वयापृष्टंसर्वपापप्रणाशनं॥एकदंतस्यमहात्म्यं
भुक्तिमुक्तिफलप्रदं॥१३॥धन्योसित्वंमहाभागयेनतेश्रवणेरतिः॥गजाननस्यदेवस्यचरित्रेस
र्वभावतः॥१४॥अत्रतेवर्णयिष्येहमितिहासंपुरातनं॥गृत्समदस्यसंवादंप्रल्हादस्यमहात्म
नः॥१५॥श्रुत्वामुद्गलवाक्यंतद्दक्षोहृष्टमनामुने॥उवाचतंमहर्षिंसःप्रश्रयावनतःस्वयं॥१६॥
दक्षउवाच॥ब्रह्मणःसृष्टिमारभ्यसृष्टिमार्गंवदप्रभो॥त्रिभुवनंयथासृष्टंब्रह्मणाविश्वयोनि
ना॥१७॥तत्रप्रल्हादमहात्म्यंस्वयमेवागमिष्यति॥गृत्समदस्यसंवादंयथाचद्वर्णयप्रभो॥१८॥

॥सूतउवाच॥दक्षस्यवचनंश्रुत्वामुद्गलस्तमुवाचह॥सृष्टिमार्गंपुरावृत्तंशापमोहितमादरात्॥१९॥
मुद्गलउवाच॥शृणुदक्षमहाबुद्धेब्रह्मालोकपितामहः॥ससर्जविविधंविश्वंतथातेकथयाम्यहं॥
॥२०॥गणेशवरदानेनब्रह्मास्रष्टुंमनोदधे॥योगमायांसमासाद्यविवेशासौजनार्दनं॥२१॥निली
यतस्मिन्नात्मानंनाभिपद्माद्विनिःसृतः॥वरदानेनविष्णोश्चपुत्रत्वमगमद्विधिः॥२२॥तत्रपद्मेसमा
सीनोध्यायन्हेरंबमंतरि॥ततस्तस्यविधेर्देहाज्जलंचनिःसृतंबहुः॥२३॥पश्यतस्तस्यसर्वत्रजलं
व्याप्तंदिशोदश॥तस्मिञ्जलेनिमग्नोभूद्भ्रामश्रांतमानसः॥२४॥सस्मारगणनाथंतंविभोपाहि
भयानकात्॥मज्जंतंमांजलाद्ढुंढेवक्रतुंडनमोस्तुते॥२५॥स्मृतमात्रेणतत्रासौददर्शवटमुत्तमं
॥तस्यपत्रेगणेशानंसुप्तंदृष्ट्वाप्रहर्षितः॥२६॥त्रिनेत्रंचचतुर्बाहुंशुंडादंडविराजितं॥महोदरंशे
षनाभिंभालचंद्रकिरीटिनं॥२७॥सर्वावयवसंपूर्णंनानाभूषणभूषितं॥वस्त्रैराच्छादितंबाल

मंगुष्ठपरिमाणकं॥२८॥एतादृशंगणेशानंदृष्ट्वाविस्मितमानसः॥महाबलेवटोहोयमवशिष्टंकथं
जले॥२९॥वटस्यसन्निधानेसययौब्रह्माप्रजापते॥ब्रह्मणि गणनाथःसशिषेचशुंडयाजलं॥३०॥
तेनहृष्टःस्वयंब्रह्मातुष्टावतंगजाननं॥बद्धांजलिपुटोभूत्वाभक्तिनम्रात्मकंधरः॥३१॥ब्रह्मोवाच॥
नमस्तेगणनाथायप्रलयांबुविहारणे॥वटपत्रशयायैवहेरंबायनमोनमः॥३२॥चतुर्भुजधरायै
वनाभिशेषायतेनमः॥गजवक्त्रायसर्वेशलंबोदरनमोस्तुते॥३३॥एकदंतायतुभ्यंवैनानाशोभा
समन्वितः॥अंगुष्ठपर्वमात्रायस्वरूपधारिणेनमः॥३४॥सिद्धिबुद्धियुतायैवभक्तिसंरक्षकायच॥
अनंतविभवायैवगणेशायनमोनमः॥३५॥निर्गुणायगुणाधारसगुणायनमोनमः॥एकाने
कादिभेदैश्चलीलाकरनमोस्तुते॥३६॥अनादिबालरूपायसृष्टिस्थित्यंतकारिणे॥मायाविभ्यो
महामोहदात्रेतुभ्यंनमोनमः॥३७॥निवारयमहाविघ्नंसृष्टिंकर्तुंगजानन॥जलंप्राप्तंमहाघोरंतत्रा

हंमज्जितोबलात्॥शरणंत्वांप्रपन्नोस्मिरक्षमांभक्तवत्सलः॥तवदेवेशदासोहंकृपांकुरुकृपानि
धे॥३९॥ब्रह्मास्तुत्वापुनश्चित्रंतस्यतुंडेददर्शह॥विश्वंचराचरंपूर्णंसंस्थितंसेश्वरंकिल॥४०॥
ततोनासासमीरेणनीतोब्रह्मामहोदरे॥तत्रविश्वंददर्शासौनानाश्चर्यमयंपुनः॥४१॥एवं
नानांडसंयुक्तमुदरंपश्यचप्रभो॥रोमद्वारेणब्रह्मासौबहिर्यातोयथापुरा॥४२॥ददर्शतं
गणेशानंबालरूपंसुविस्मितः॥तमुवाचततोदेवोब्रह्माणंव्यक्तमुत्तमं॥४३॥श्रीगणेश
उवाच॥त्वयाकृतमिदंस्तोत्रंममप्रीतिकरंभवेत्॥सर्वार्थसाधकंचैवभुक्तिमुक्तिफलप्रदं॥
॥४४॥यःपठेच्छृणुयाद्वापिसमेमान्योभविष्यति॥यंयंचिंतयते[illegible]भावंतंतंदास्यामिनिश्चि
तं॥४५॥नाभिकमलतोविष्णोर्निःसृतोवरदानतः॥तत्रादौमेस्मृतिंपूजांविस्मृतस्त्वंपितामह॥
॥४६॥तेनत्वंविघ्नसंयुक्तोजातःपुनर्नसंशयः॥अधुनामेस्मृतिंकृत्वाकुरुत्वंसिद्धिमेष्यसि॥

॥४८॥ यथादृष्टंमदीयेयज्जगत्स्थावरजंगमं॥ उदरेतादृशंविश्वंसृजत्वंमेधुनाज्ञया॥४९॥ इत्युक्त्वां
तर्द्दधेसद्योगणेशोबालरूपधृक्॥ ब्रह्मापद्मेसमासीनोयथापूर्वंबभूवह॥५०॥ ततोगणेश
मंत्रंचजजापकमलासनः॥ पूजयित्वायथान्यायंध्यानसंस्थोबभूवह॥५१॥ तस्यहृद्देशमध्ये
सौप्रकटोभूद्गजाननः॥ तंनमामस्वयंब्रह्मापूजांचक्रेसमानसीं॥५२॥ दक्षिणावसरेतत्र
सिद्धिर्बुद्धिरुभेपरे॥ आगतेहृदिमध्येचतेददौविघ्नहारिणे॥५३॥ यथाशास्त्रविधानेनतस्यपू
जांप्रगृह्यसः॥ अंतर्धानंययौसद्योगणेशःसर्वनायकः॥५५॥ ॥इतिश्रीमदांत्येद्वितीयखं
डेएकदंतचरित्रेब्रह्मसृष्टिप्रारंभोनामप्रथमोध्यायः॥१॥ ॥श्रीमुद्गलउवाच॥ गणेशंमन
साध्यात्वासृष्टिंकर्तुंमनोदधे॥ आदौतस्यविधेर्देहादविद्यासाविनिःसृता॥१॥ सापंचधाततोभि
न्नास्वयंजाता [illegible] प्रजापते॥ तांदृष्ट्वाविस्मितोब्रह्मामनसिदुःखितोभवत्॥२॥ अविद्याभ्रां

तिरूपात्रह्यनंतविभवात्मिका॥ स्तुताकृष्णातथाश्वेतानानाश्चर्यमयीबभौ॥३॥ त्रिविधानांप्रसू
तिश्चजगत्त्रयविमोहिनी॥ तयाविमोहितंविश्वंभ्रांतियुक्तंभवेत्त्रिषु॥४॥ तमोमोहोमहामोहः
शृणुदक्षमहाद्भुतं॥ तामिश्रश्चांधतामिश्रः पंचधाजगतिस्थिता॥५॥ तमोज्ञानंस्वरूपंयत्तेन
संछादितंजगत्॥ देहस्वार्थसमायुक्तंबभूवभ्रांतमानसं॥६॥ मोहःसकामनायुक्तंकर्मनाना
विनिर्ममे॥ तेनविश्वंशरीरस्यकरोतिकर्मभोगदं॥ महामोहेनसंसृष्टाविकर्मविविधंप्रभो॥ तेन
देहस्यभोगार्थंपापानिकुरुतेनरः॥८॥ तामिश्रेणफलंसृष्टंरोगदारिद्रकारकं॥ तेनाधिव्याधि
संयुक्तंविश्वंबभूवपीडितं॥९॥ अंधतामिश्रजंदक्षनरकंयातनात्मकं॥ तेनस्वकर्मदोषेणया
तनांबुभुजेजगत्॥१०॥ एषाविद्यागणेशानंस्मृत्वासार्थपराभवत्॥ ततोब्रह्माविनिंद्यैनांपु
नःसृष्टुंप्रचक्रमे॥११॥ ततस्तस्यशरीरेभ्यश्चतुःपुत्राःप्रजज्ञिरे॥ सनकश्चमहायोगीसनं

दनस्तथापरः॥२२॥सनातनोमहातेजाः सनत्कुमारसंज्ञितः॥तेषांमातृस्वरूपेषाविद्याज्ञा
नात्मिकाबभौ॥२३॥बोधरूपानिराकारांसाक्षादात्ममयींपरां॥तांदृष्ट्वाहर्षयुक्तोभू
द्ब्रह्मासर्वपितामहः॥२४॥सहजस्यधरस्तत्रसनकःसंबभौसुतः॥समयोगभरोदक्षस
नंदनःप्रतापवान्॥२५॥ज्ञानयोगमयोयोगीसनातनइतिस्मृतः॥कर्मयोगस्वरूपश्च
सनत्कुमारआबभौ॥२६॥तान्दृष्ट्वाहर्षसंयुक्तउवाचजगदीश्वरः॥स्मृत्वासृजतसंसृष्टिग
णेशंतैःकृतंतथा॥२७॥नानाविधंयोगमार्गंससर्जुस्तेमहौजसः॥तान्दृष्ट्वानाभ्यनंदत्सब्रह्मा
प्रोवाचतान्पुनः॥२८॥अलंयोगमयींसृष्टिंमाकुरुतमहौजसः॥तथेतितेमहाभागाऊचुस्तं
संस्थितावभुः॥२९॥ब्रह्माज्ञानमयींसृष्टिंततोदृष्ट्वाचुकोपह॥कोपात्तस्यललाटाद्वैशंभुपुत्रो
बभूवह॥३०॥तुष्टावतेजसादीप्तंपंचवक्त्रधरंप्रभुं॥त्रिनेत्रंदशबाहुंतंचंद्ररेखाविभूषितं॥३१॥

मु॰ पु॰
५

अर्द्धनारीनरंप्रज्ञंत्रिशूलादिसुचिन्हितं॥जटाधरंमहाकायंव्याघ्रेभचर्मबिभ्रतं॥२२॥सहसाजात
मात्रेणरुदितंशंकरेणच॥तंब्रह्मासांत्वयामासकिंरोदसिवृषध्वज॥२३॥ब्रह्माणमवदद्बालः
स्थानंदेहिपितःप्रभो॥मह्यंनामानिसर्वेशकार्यंकथयविस्तरात्॥२४॥तंप्रत्युवाचधातास
रोदनाद्रुद्रसंज्ञितः॥शिवःसर्वसुखाकारस्त्वंजातोसिमहेश्वरः॥२५॥वरदानप्रभावेनाधुनास
र्वेश्वरःप्रभो॥साक्षाल्लंकरवेषेणपुत्रताम्मेसमागतः॥२६॥पृथ्वीजलंतथातेजोवायुराकाश
मेवच॥चंद्रसूर्यादीक्षितोष्टौतवस्थानानिशंकर॥२७॥अष्टमूर्त्तिधरःसर्वःसर्वेभ्यःफलदाय
कः॥तवनामानिदेवेशएकादशात्मिकानिवै॥२८॥कुरुसृष्टिंमहादेवध्यात्वादेवंगजाननं
॥तथेतिसृष्टिमारेभेध्यात्वागणपतिंशिवः॥२९॥रुद्रान्नानाविधान्संभुःससर्जभूरितैजसा॥
न्॥अनंतान्विविधाकारानमृतरूपधारकान्॥३०॥तान्दृष्ट्वाब्रह्मदेवोपिमाकुरुष्वजगत्पते॥जन्म

मृत्युयुतान्शंभोसृजस्वविविधंतथा॥ ततःशिवोविधातारमुवाचनसृजाम्यहं॥जन्ममृत्युयुता
न्देवःस्थिररूपोबभूवह॥३२॥ तेनस्थाणुरितिप्रोक्तंनामतस्यमहात्मनः॥ऊर्ध्वरेताःस्वयंशंभु
स्थितोगणपतिंभजन्॥३३॥ततोब्रह्मामुखेभ्योवैवेदान्शास्त्रसमन्वितान्॥पुराणानिससर्जासौ
तानुवाचकृतांजलीन्॥३४॥ सृजध्वंविविधांसृष्टिंतथेतिगणपंतथा॥ तपसातोषयामासुःससर्ज्ज
तद्वनैःप्रजाः॥३५॥ कर्माणिविविधानीतेससर्ज्जपरमादरात्॥तानिसृष्ट्वाविधातासौहर्षयुक्तो
बभूवह॥३६॥ ततोयज्ञसमारेभेब्रह्माविष्णुमचिंतयत्॥पुत्रार्थंतंमहाभागंसोपितत्पुत्रतांग
तः॥३७॥ यज्ञाच्चतुर्भुजोदेवोयज्ञरूपोजनार्द्दनः॥समुद्भूतःस्वयंविष्णुरुवाचतंकृतांजलिः॥आज्ञां
देहिपितर्मात्वंततस्त्वंविधिरब्रवीत्॥सृष्टिंकुरुगणेशंत्वंस्मृत्वातथाचकारसः॥यज्ञान्कर्मसमु
द्भूतान्ससर्जविविधान्हरिः॥नानाफलप्रदान्पूर्णकल्पवृक्षानिवप्रभुः॥४०॥तान्दृष्ट्वाहर्षितोब्रह्मा

ततः ससस्रजे पुनः ॥ तस्य देहात्समुत्पन्नाः पुत्रा दशमहौजसाः ॥ ४१ ॥ मरिचिं भृगुमत्रिं च पुलस्त्यं पु
लहं क्रतुं ॥ दक्षमंगिरसं चैव वसिष्ठं नारदं प्रभो ॥ ४२ ॥ तानुवाच स्वयं ब्रह्मा सृजध्वं विविधाः प्रजाः ॥
ओमित्युक्त्वा ययुः सर्वे तपसे वनमुत्तमं ॥ ४३ ॥ ततो नारद आद्यंतमुवाच पितरं मुनिः ॥ नाहं सृजा
मि देवेशं भजामि गणनायकं ॥ ४४ ॥ मायामयमिदं सर्वं मिथ्याभूतं भ्रमात्मकं ॥ तदर्थं कः श्रमे
ज्ञात्वा मूर्खवन्नात्र संशयः ॥ ४५ ॥ ततस्तं पुनरप्याह सृजत्वं विविधाः प्रजाः ॥ अंते वयसि देवेशं गणे
शं भज पुत्रक ॥ ४६ ॥ स उवाच किमर्थं मां बोधसि त्वं प्रजापते ॥ मिथ्यारूपार्थमादौ कः सृजति भ्रांतिसंयु
तः ॥ ४७ ॥ ततस्तं शप्तवान्ब्रह्मा पतत्वं शूद्रयोनिजः ॥ गंधर्वश्च तथाभावी नानास्त्रीभोगकारकः ॥ ततस्तं
नारदस्तातं शशाप क्रोधसंयुतः ॥ अपूज्यो भविता सि त्वं वृथा शपसि मां यतः ॥ ४९ ॥ ततो नारद एवा
सौ गत्वा तपसि संस्थितः ॥ गणेशं तोषयामास मंत्रेणैकाक्षरेण च ॥ ५० ॥ दिव्यवर्षे शते पूर्णे तं ययौ

गणपः स्वयं॥ वरंवृणुमहाभाग दास्यामिनमसेप्सितं॥५१॥ततस्तंस्तुतवान्देवंगणेशंसर्वसिद्धिदं॥अहणोत्तंवरम्मेत्रशापंतंविनिवर्त्तय॥५२॥ततस्तंगणराजःसउवाचभक्तवत्सलः॥पित्रशापंकथंमिथ्याकरोमिवदसांप्रतं॥५३॥मयावरस्तथादत्तोब्रह्मणेनेनमत्सवाक्॥अतःशृणुमहाभागवचनम्मेसमाहितं॥५४॥गंधर्वोभवितासित्वंतत्रज्ञानंददामिते॥सदास्त्रीभिःसमायुक्तंवांमायानप्रबाधते॥५५॥पुनस्त्वंभूयोनोचभविष्यसिनसंशयः॥तत्रसंन्यासिभिःसंगोभविष्यतिकदानघ॥५६॥तेभ्योज्ञानंसमाश्रित्यागमिष्यसिक्नेषुच॥तत्रवैत्वमाग्नेषुत्वंसक्तोभविष्यसि॥५७॥तदेहपातनाद्भावीपुनस्त्वंब्रह्मणःसुतः॥नारदोनात्रसंदेहस्तत्रशंभुभजिष्यसि॥५८॥नारायणमुखात्तत्रमंत्रंज्ञात्वामत्प्रियामुना॥भविष्यसिचयोगींद्रोगाणपृषानसंशयः॥५९॥इत्युक्त्वागणनाथस्तंतत्रैवांतरधीयत॥नारदस्तंनमस्कृत्यशापंमुक्तादिवंगतः॥६०॥

मु०पु० ७

पुनः सनारदोजातः शिवभक्तिपरायणः॥नारायणेनसंज्ञप्तोगाणपत्यंबभूवह॥६१॥ ॥इतिश्री
महांत्ये० नारदशापनिवर्त्तनन्नामद्वितीयोध्यायः॥२॥दक्षउवाच॥कथंनारायणेनासौबोधि
तोमुनिसत्तमः॥तन्मेकथययोगींद्रनतृप्यामिकथामृतात्॥१॥मुद्गलउवाच॥एकदानारदो
[illegible]दक्षपर्यटन्शंकरंगतः॥तत्रसंपूजयंतंतंगणेशंसददर्शह॥२॥मू
र्त्तिंचिंतामणेःसाक्षात्स्थापितांरत्ननिर्मितां॥शुंडादंडमुखींचैवशंकरस्तांपुपूजह॥३॥तं
दृष्ट्वानियमेसंस्थंविस्मितोनादरोमुनिः॥प्रययौतंनमस्कृत्यविकुंठेविष्णुमादरात्॥४॥तं
प्रणम्यमहातेजानारदोविनयान्वितः॥उवाचभक्तिसंयुक्तोनारायणनमोस्तुते॥५॥त्वंसाक्षा
ज्जगतामीशोनुदमेसंशयंप्रभो॥कैलासमगमंद्रष्टुंशंकरंमहमुत्सुकः॥६॥तत्रशोपिगणे
शस्यमूर्त्तिंस्थाप्यजनार्दन॥तान्पुपूजन्महाभक्त्यारोमांचितशरीरवान्॥७॥अश्रुप्रवाहसंयुक्तं

रामः ७

तया१

त्रेम्णाचैवपरिप्लुतं॥ध्यानस्थंशंकरंदृष्ट्वामौनवानभवंप्रभो॥७॥नंद्यणोम्यमहाविस्मोत्वंतिक
मुपागतः॥त्वमपिगणराजस्यवदसिनाममंत्रकं॥९॥शंकरान्नूपरंकिंचिद्व्यक्तंब्रह्मकथ्यते॥
शिवोविकारहीनश्चसर्वसिद्धिप्रदोमतः॥१०॥त्वंनरीयामहाशक्तिर्नारायणाकृयात्रप्रभो॥सदा
नंदस्वरूपेणसर्वात्मकश्चकथ्यते॥११॥कोसौगणेश्वरोनामानंकथंस्मरसिप्रभो॥विघ्ननाथ
कथंशंभो तंप्रपूजतिनित्यशः॥१२॥ [illegible] एतन्मेसंशयंदेवं
छेत्तुमर्हसिकेशव॥सर्वज्ञस्त्वंरमानाथशरणंमांशिष्यमागतं॥१३॥सुऊलउवाच॥नारदस्यवचः
श्रुत्वाप्रहृष्टः केशवोब्रवीत्॥तंगणेशस्यसंभक्तंपात्रंदृष्ट्वायथार्थतः॥१४॥श्रीनारायणउवा
च॥शृणुनारदमेवाक्यंसंशयंकुरुमासुने॥योगशांतिस्वरूपोयंगणेशोनात्रसंशयः॥१५॥सि
द्धिबुद्धिपतिः साक्षात्स्वानंदाख्येपुरेस्थितः॥तस्यभक्तिप्रभावेणवयंचसर्वसिद्धिदाः॥१६॥वि

नायकस एको वै वयं नायकसंयुताः ॥ भजामो भक्तियुक्तास्तं योगशांत्यर्थमादरात् ॥ १७ ॥ एकदाहं गत
स्तत्र कैलासे शंकरालये ॥ गणेशं पूजयंतं तं दृष्ट्वा शिवं सुविस्मिता ॥ १८ ॥ तस्य नित्यं विधिं पूर्णं जातं
दृष्ट्वा तमब्रुवं ॥ त्वं साक्षान्निर्विकारेण मोहहीनः सदाशिवः ॥ १९ ॥ अव्यक्तं ब्रह्म यत्प्रोक्तं ब्रह्माधिप
तिसंज्ञितं ॥ त्वमेव वेदवादेषु कथं भजति विघ्नपं ॥ २० ॥ कोसौ गणेश्वरो नामाममवदस्व तत्प्रभो ॥ सर्व
ज्ञस्त्वं सदा शंभुः शिष्यं ते तारयस्व मां ॥ २१ ॥ श्रीशिव उवाच ॥ शृणु विष्णो रहस्यं मे शांतिदं योगसे
वया ॥ योगं पूर्णं गणेशाख्यं ब्रह्मभूतपदप्रदं ॥ २२ ॥ पंचधा चित्तवृत्तिर्या सा बुद्धिः कथ्यते बुधैः ॥
पंचभेदतया सर्वं भुनक्ति प्रकृतिः परा ॥ २३ ॥ तत्र मोहप्रदा सिद्धिर्नानाभ्रांतिप्रकाशिका ॥ सिध्यर्थं
पंचधा चित्तं यत्नयुक्तं बभूव ह ॥ २४ ॥ धर्मार्थकाममोक्षाणां सिद्धिः सर्वत्र कथ्यते ॥ ब्रह्मभूतकरी
साक्षाज्ज्ञानी हि पुरुषोत्तम ॥ २५ ॥ ब्रह्मणि ब्रह्मभूतो यस्तस्य किं भ्रांतिरुच्यते ॥ धर्मार्थकाममोक्षा

णांब्रह्मभूतस्यवाविभो॥२६॥तस्यपंचविधंचित्तंनाम्नाजानीहिनिश्चितं॥तद्योगीसमाख्यातोग
णेशभेदतांगतः॥संज्ञज्ञानसमाधिस्थोगकारःकथ्यतेबुधैः॥असंज्ञज्ञातरूपोवैणकारोवेद
वादिभिः॥तयोंसंगमिगणेशायंशांतियोगमयःसदा॥नेतिरूपोहमव्यक्तस्तंसमात्मकउच्य
तो॥२९॥कुत्रतत्रदृश्यंतेवयंसर्वेभवात्मकाः॥भवप्रत्ययोयोगस्थोगणेशःपंचधाभवत्॥३०॥
भूतुमायामयःप्रोक्तोवेदेषुपश्यकेशव॥मायादीनोगणेशनउपायप्रत्ययात्मकः॥३१॥
साक्षाद्गणेशरूपेचमायामुक्तविमुक्तिता॥नास्तितस्मात्सदाशांत्यालभ्यतेनान्यथाक्वचित्॥
॥३२॥गणेशंदंसदाब्रह्मब्रह्मणंपतिरंजसा॥योगोयंगाणपत्याख्यःकथितस्तेमयाप्रभो॥३३॥अ
नेनविधिनाज्ञानंगणेशाख्यंभविष्यति॥यत्कापंचविधंचित्तंचिंतामणिभवप्रभो॥३४॥एवमुक्तो
महादेवोविररामचनारद॥मयातेकथितंज्ञानंगणेशाख्यंमहामुने॥३५॥अस्माकंपददातास

मौ॰ पु॰ ब्रह्मभूतप्रदस्तथा॥ गणेशः कुलदेवश्च तस्मात्तं प्रभजामहे॥३६॥ मुद्गल उवाच॥ तं विष्णुं प्रणिपत्या
९ थ नारदः प्रययौ मुनिः॥ तपोवनं समाप्य योगाभ्यासरतोभवत्॥३७॥ गणेशं मनसा ध्यायन्जजाप मं
त्रमुत्तमं॥ दशवर्षैः प्रसन्नो भूद्गणेशस्तं ययौ मुनिं॥ तं दृष्ट्वा विस्मितोत्यंतं नारदः प्रणनाम च॥
कृतांजलिपुटो भूत्वा तुष्टाव गणपं मुनिः॥३९॥ नारद उवाच॥ नमामि गणनाथं तं सर्वविघ्नवि
नाशनं॥ वेदांतागोचरं तज्ज्ञैर्गम्यं ब्रह्मैव संस्थितं॥४०॥ मनोवाणीविहीनं नो मनोवाणीमयं न च॥
ब्रह्मेशानं कथं स्तौमि सिद्धिबुद्धिपतिं परं॥४१॥ त्वद्दर्शनेन हेरंब कृत्यकृत्योहमंजसा॥ इत्युक्त्वा
पूजयामास भक्तिभावसमन्वितः॥४२॥ पूजयित्वा गणेशानं पुनस्तुष्टाव नारदः॥ रोमांचितशरीरो
सौ भावयुक्तो महामुनिः॥४३॥ नमो नमो गणेशाय विघ्नराजाय ते नमः॥ भक्तानां विघ्नहंत्रे चाभ
क्तानां विघ्नकारिणे॥४४॥ अमेयमायया चैव संयुक्ताय नमो नमः॥ योगरूपाय वै तुभ्यं योगि

भ्योयोगदायिने॥४५॥विनायकायसर्वेशचिंतामणेनमोनमः॥अनंतमहिमाधारनमस्तेचंद्रमौल
ये॥४६॥एकदंतायदेवायमायिभ्योमोहदायते॥नमोनमःपरेशायपरात्परतमायच॥४७॥निर्गु
णायनमस्तुभ्यंगुणाकारायसाक्षिणे॥मूषकवाहनायैवमूषकध्वजधारिणे॥४८॥अनादयेन
मस्तुभ्यंज्येष्ठराजायढुंढये॥हर्त्रेकर्त्रेसदापात्रेनानाभेदमयायच॥४९॥त्वद्दर्शनसुधापानाद्गतं
मेभ्रांतिजंमहत्॥मरणंभिन्नभावाख्यंगणेशोहंकृतस्त्वया॥५०॥नभिन्नंपरिपश्यामित्वदृतेगण
नायक॥शांतिदंयोगमासाद्यप्रसादात्तेनसंशयः॥५१॥भक्तिंदेहिगणाधीशत्वत्पादपद्मयोःपरां
॥कुरुमांगाणपत्यंत्वंप्रेमयुक्तंचतेयदि॥५२॥इत्युक्त्वाविररामाथतंपुनर्गणपोवदत्॥मदीयाभ
क्तिरत्यंतंभविष्यतिसदाचला॥५३॥नयोगाच्चलनंक्वापिभविष्यतिमहामुने॥सदायोगींद्रपूज्यस्त्वं
सर्वमान्योभविष्यति॥५४॥त्वयाकृतमिदंस्तोत्रंशांतियोगप्रदंभवेत्॥पठतेशृण्वतेचैवभुक्तिमुक्ति

प्रदायकं॥५५॥तस्यहृदयइत्युक्त्वालीनोययौगजाननः॥सदाहृदिगणेशानंपश्यतिस्वमुनिःस्वयं॥५६॥
इतिनारदीयाख्यानंकथितंतेप्रजापते॥यःशृणुयात्पठेद्वायःसोपिसद्गतिमाप्नुयात्॥५६॥ ॥इतिश्री
मदांत्ये॰नारदीभक्तिवर्णनंनामतृतीयोध्यायः॥३॥ ॥मुद्गलउवाच॥ततोब्रह्माससर्जासौमुख
तोब्राह्मणान्स्वयं॥बाहुभ्यःक्षेत्रियान्सर्वान्रूरुभ्योवैश्यकांस्तथा॥१॥पद्भ्यःशूद्रान्महादेवोसस
र्जगणपेरितः॥संन्यासंशिरसस्तद्वद्धृदयाद्वनकाश्रमं॥२॥नाभ्याश्चब्रह्मचर्यंसिजंघाभ्यांगृहिणं
तथा॥वर्णाश्रमान्ससंसृष्ट्वाहर्षितोभूत्पितामहः॥३॥ततोधर्मंस्वयंब्रह्माससर्जोरप्रदेशतः॥पृ
ष्ठतोधर्मरूपंचसुरासुरप्रवर्त्तकौ॥४॥ततोदेवांश्चगंधर्वानप्सरोयक्षकादिकान्॥असुरान्मातुधा
न्यांश्चससर्जदेहतःस्वयं॥५॥सर्पान्पक्षिगणांश्चैवपशुमानवकादिकान्॥क्रियायुक्तान्ससर्जासौ
स्वदेहंप्रददौतथा॥६॥तेसर्वेब्रह्मणोदेहात्समुत्पन्नामहौजसः॥संव्यवहारकादक्षवरधुर्नतथा

पिते॥ तेषां सर्गप्रमाणं च मुख्यं शृणु प्रजापते॥ संक्षेपेण प्रवक्ष्यामि प्राकृतं विकृतं परं॥८॥ प्रथमो म
हतः सर्गो ब्रह्मणः स तु कथ्यते॥ तन्मात्राणां द्वितीयस्तु भूतसर्गः प्रकीर्त्तितः॥९॥ वैकारिकस्तृतीय
स्तु सर्गेंद्रियकः स्मृतः॥ इत्येते प्राकृताः स[illegible]र्गाः संभूता बुद्धिपूर्वकाः॥१०॥ मुख्यसर्गश्चतुर्थ
स्तु मुख्या वै स्थावराः स्मृताः॥ तिर्यक्श्रोतस्तु यः प्रोक्तस्तिर्यग्योन्यः स पंचमः॥११॥ तथोर्ध्वश्रोत
सां षष्ठो देवसर्गस्तु स स्मृतः॥ ततोर्वाक्श्रोतसां सर्गः सप्तमः स तु मानवः॥१२॥ अष्टमो भौतिकः स
र्गो भूतादीनां प्रकीर्त्तितः॥ नवमश्चैव कौमारो ज्ञातव्यो विबुधैस्तथा॥१३॥ विकृताः षट् समाख्याताः
प्रकृताश्च त्रयो मताः॥ नव सर्गाः प्रविज्ञेयाः प्राकृता विकृता इमे॥१४॥ प्राकृताद्यत्रयः सर्गा बुद्धिपू
र्वाः प्रकीर्त्तिताः॥ बुद्धिपूर्वं प्रवर्त्तंते तत्वाद्यैः सर्वजंतवः॥१५॥ एवं सृष्ट्वा स्वयं ब्रह्मा प्रजा नानाविधाः प्र
भो॥ ववृधुर्न प्रजास्तस्य तेन संदुःखितोभवत्॥१६॥ ततस्तस्य शरीराद्वै दांपत्यं निःसृतं परं॥ वामां

गात्प्रकृतीरम्याशतरूपा च सा स्मृता ॥१७॥ दक्षिणांगा तु संभूतः पुरुषः समनुः स्मृतः ॥ स्वायंभुवो महा
भाग आद्यः क्षत्रियधर्मवित् ॥१८॥ बद्धांजलिपुटौ भूत्वा ब्रह्माणमूचतुर्वचः ॥ आज्ञां कुरु महाभाग किं क
रावः प्रजापते ॥१९॥ ततो ब्रह्मा स्वयं तातौ जगाद तौ प्रहर्षितः ॥ अतुलां सृजतं सृष्टिं मैथुनी तपसो बला
त् ॥२०॥ ततस्तौ तं प्रणम्यादौ जग्मतुर्वनमुत्तमं ॥ प्रतेपाते तपो घोरं गणेशं हृदि चिंत्य च ॥ ततो विधा
तृच्छायायाः कर्दमो मुनिसत्तमः ॥ समुत्पन्नश्च तं दृष्ट्वा ब्रह्मोवाच सृजप्रजाः ॥२२॥ स मुनिर्वनमागम्य
ततापपरमं तपः ॥ विष्णुं ध्यात्वा प्रजाकामः शुक्लरूपं यथाविधि ॥२३॥ एतस्मिन्नंतरे जातौ विष्णुकर्ण
मलोद्भवौ ॥ मधुकैटभानामानौ दैत्यौ परमदारुणौ ॥२४॥ ताभ्यां स्वभुजवीर्येण जितं त्रिभुवनं तथा ॥
देवाः सर्वे भयोद्विग्नाः पपतुः सर्वतो दिशं ॥२५॥ ब्रह्माणं भक्षितुं यातौ तेन निद्रास्तु ता तदा ॥ निद्रया
विष्णुरव्यक्तो मुक्तः समुत्थितो बभौ ॥२६॥ तेन युद्धं महाघोरं कृतं ताभ्यां भयानकं ॥ मल्लयुद्धेन तौ जे

नुंनशशाकजनार्दनः॥२७॥पंचवर्षमदत्त्वाणियुयुधेहरिरव्ययः॥ततोहरिंमहादेवोममर्दतुंबलान्वितो॥२८॥ततोविलुंबमात्मानमंतर्धायपपालच॥शरणंशंकरस्यैवययौभावसमन्वितः॥२९॥
प्रणिपत्यमहेशानंजगादभयसंकुलः॥त्वांतंबुद्धसंभूतंजयोपायंवदत्वमे॥३०॥तेनसंकथितं
तस्मैगणेशंविस्मृत्योभवान्॥तमाराधयत्नेननतःसिद्धिमवाप्स्यसि॥३१॥षडक्षरंमहामंत्रं
गणेशस्यददौशिवः॥सयत्नेनपसेदेशेदंडकारण्यसंज्ञिके॥३२॥तत्रपद्मासनंदत्वादेवेदेवं
गजाननं॥षडक्षरविधानेनततापपरमंतपः॥३३॥सहस्रवर्षपर्यंततपस्तप्तंसुदारुणं॥तदा
तंवरदेजातोविलुंगणपतिर्ययौ॥३४॥तंदृष्ट्वाप्रणनामाथपूजयामासभक्तितः॥महाविलुंप्र
सन्नात्माप्रणनामगजाननं॥३५॥बद्धांजलिपुटोभूत्वातुष्टावतंगणेश्वरं॥नानाभावसमायु
क्तंवरदंभक्तवत्सलं॥३६॥महाविलुरुवाच॥नमोगणपतेतुभ्यंविघ्नराजायतेनमः॥नमःकृपा

निधेढुंढेभक्तसंरक्षकायते॥३७॥सिद्धिबुद्धिपतेतुभ्यंनमस्तेविघ्नहारिणे॥अभक्तेभ्यःसदाविघ्नदात्रे
हेरंबरूपिणे॥३८॥निर्गुणायगुणानांवैचालकायनमोनमः॥नमःप्रपंचरूपायप्रपंचरहिता
यते॥३९॥ब्रह्मभ्योब्रह्मदात्रेचब्रह्मणेब्रह्मरूपिणे॥नरकुंजररूपायनानामायामयायते॥
॥४०॥कारणानांचदेवेशकारणायनमोनमः॥ज्येष्ठराजायवैतुभ्यंकारणंरहितायच॥४१॥
योगिनांहृदिसंस्थाययोगिभ्योयोगदायिने॥योगरूपधरायैवगणेशायनमोनमः॥४२॥मा
याश्रयायमायायआधारायनमोनमः॥मायिभ्योमाययात्वंवैमोहदातनमोनमः॥४३॥
त्वांस्तोतुंकःसमर्थःस्याद्योगाकारेणवर्त्तसे॥यत्रवेदाविकुंठाश्चशास्त्रैःसर्वैःसहांगकाः॥४४॥
मनोवाणीविहीनस्त्वंनेतिदेवकृपाकर॥मनोवाणीमयोनैवकथंतंस्तौमिविघ्नपं॥४५॥तथा
पिबुद्धिदातात्वंत्वत्प्रसादेनसंस्तुतः॥धन्योहंदेवदेवेशतवदर्शनतोधुना॥४६॥साक्षाद्दृष्ट्वा

गणेशंवांनेनादंब्रह्मरूपकः॥जानोनास्यत्रसंदेहोयोगीश्वेयोगदायकः॥४७॥इत्युक्त्वाहंप्र
णम्यासोननर्तभक्तिभावतः॥रोमांचितशरीरस्फुर्योश्रुभिःपरिप्लुतः॥४८॥तमुवाचगणा
धीशोवरंवृणुजनार्दन॥तपसाभक्तिभावेनतुष्टोदास्यामिवांछितं॥४९॥त्वयाकृतमिदंस्तोत्रं
सर्वसिद्धिप्रदायकं॥भविष्यतिनृणांविघ्नोपद्रवांस्तृणवत्सदा॥५०॥धर्मार्थकाममोक्षाणां
साधकंत्रभविष्यति॥ईप्सितार्थप्रदंसद्यःप्रसादान्मेवकेशव॥५१॥मुद्गलउवाच॥गणेश
वचनंश्रुत्वाविस्मुर्षसमन्वितः॥जगादतंप्रणम्यादोवांछितंसंतृणोतिसः॥५२॥विस्मुरुवाच॥
यदिप्रसन्नतांयातस्तदाभक्तिंसुदुर्लभां॥नवपादयुगेदेहिदृढामव्यभिचारिणीं॥५३॥अन्यंदेहि
गणाधीशयशोमेह्यतुलंभवेत्॥कीर्तिसर्वत्रगांदेहिसामर्थ्यंविविधंतथा॥५४॥मधुकैटभनाशा
र्थमुपायंवरसंप्रतं॥अन्यान्दैत्यांश्चहननेसामर्थ्यंदेहिवेघ्नप॥५५॥तस्यतद्वचनंश्रुत्वातथे

तिगणपोब्रवीत्॥युद्धायगच्छदेवेशदैत्यौज्ञेष्यसितौबलात्॥५६॥तयोर्मरणमत्यंतंसंगुप्तंब्रह्मणाकृ
तं॥समयेवरदानस्यतपसातोषितेनच॥स्वमुखेनयदामृत्युंदैत्यौतौकथयिष्यतः॥तदातेनप्रकारेण
जहिदैत्यौमहाबलौ॥अहंमायांसमाश्रित्यतवयोर्हृदिस्थितःप्रभुः॥वासंकृत्वाचतेधीनौकरिष्यामि
नसंशयः॥मदीयस्मरणंचित्तेकरिष्यसियदाभवान्॥जयोपायंतदाविष्णोज्ञास्यसिदैत्यनाशकं॥६०॥
एवमुक्त्वांतर्दधेसौगणेशोब्रह्मनायकः॥विष्णुस्तत्रमहामूर्त्तिंस्थापयामासविप्रवैः॥६१॥पूजयामास
तांमूर्त्तिंनानोपचारसंयुतः॥सिद्धिक्षेत्रंसुविख्यातंतदादिसंबभूवह॥६२॥अनुष्ठानकृतेतत्रनानासि
द्धिप्रदंपरं॥क्षेत्रंबभूवविख्यातंगणेशंसिद्धिसेवितं॥६३॥तत्रविष्णुसदावासंचकारभक्तिसंयुतः॥सदा
रःपरिवारेणपूजतिनित्यमादरात्॥६४॥तंप्रणम्यगणाधीशंययौयुद्धायसत्वरः॥गणेशंमनसा
ध्यात्वातौचिच्छेदमहाबलौ॥६५॥ ॥इतिश्रीमदांत्येमौद्गलपुराणेमधुकैटभवधोनामचतुर्थो

ध्यायः॥४॥मुद्गलउवाच॥नवब्रह्मसुताः प्रोक्तास्तेपुस्तेपरमंतपः॥दिव्यवर्षसहस्रंचगणेशंहृदिचिंतका
ः॥१॥एकाक्षरविधानेनपुपूजुस्तंचनित्यशः॥वायुमात्राशनः सर्वेतोषयामासुरादरात्॥२॥ततस्ते
षांप्रसन्नोभूद्गणेशोभक्तवत्सलः॥आययौतान्वरंदातुंमूषकोपरिसंस्थितः॥३॥अनंतसूर्यसं
काशंदृष्ट्वातेहर्षसंयुताः॥कृत्वासौम्यंप्रणेमुस्तंनिबद्धकरसंपुटाः॥४॥तुष्टुवुःपरमात्मानंग
णेशंदक्षमुख्यकाः॥तद्दर्शनजबोधेनभक्तिनम्रात्मकंधराः॥५॥प्रजापतयऊचुः॥नमस्तेविघ्न
नाथायनमस्तेसर्वसाक्षिणे॥सर्वात्मनेस्वसंवेद्यरूपिणेतेनमोनमः॥६॥योगायजगतांपात्रे
ब्रह्मपात्रेनमोनमः॥योगीनांगम्यरूपायशांतियोगप्रदायते॥७॥स्रष्टेपात्रेचसंहर्त्रेनानारूप
धरायते॥अव्यक्तायचव्यक्तायव्यक्ताव्यक्तायतेनमः॥८॥ब्रह्मणेविष्णवेचैवशंकरायचभानवे
॥शक्तयेंद्रस्वरूपाययमायतेनमोनमः॥९॥अग्नयेनैर्ऋतायैववरुणायचवायवे॥कुबेराय

चरुद्रायशेषायतेनमोनमः॥२०॥ग्रहनक्षत्ररूपायसिद्धसाध्यामयायच॥पशवेनररूपायवृ
क्षाकारायतेनमः॥२१॥पर्वतायसमुद्रायनदीनदस्वरूपिणे॥दैत्यायदैत्यनाथायराक्षसाय
नमोनमः॥२२॥अन्नायफलरूपायरसरूपायतेनमः॥पंचभूतमयायैवसर्वाकारायतेनमः॥
॥२३॥चिद्रूपायचबोधायविदेहायनमोनमः॥असत्यायचसत्यायसमरूपायतेनमः॥२४॥स्वा
नंदायह्ययोगाययोगायगणधारिणे॥गणेशायनमस्तुभ्यंसर्वशांतिप्रदायच॥२५॥कस्त्वांस्तोतुं
समर्थस्याच्चिंतामणिं [illegible] प्रकाशकं॥चित्तस्यचित्तवृत्तिनामतस्त्वांप्रणमामहे॥२६॥मुद्गल
उवाच॥एवंस्तुत्यागणेशंतंप्रणतास्तेप्रजापते॥तानुवाचगणाधीशोवृणुध्वंविविधान्वरान्॥
॥२७॥भवद्भिर्यत्कृतंस्तोत्रंममममान्यंभविष्यति॥यःपठिष्यतिभावेनश्रोष्यतिसर्वसिद्धिदं॥२८॥
पुत्रपौत्रकलत्रादिप्रदंतेभ्योभविष्यति॥वंध्यदोषहरंधान्यधनदंपशुदंपरं॥२९॥भुक्तिमुक्ति

प्रदंस्तोत्रंब्रह्मभूतकरंभवेत्॥मनेप्सितप्रदंपुण्यंनराणांनात्रसंशयः॥२०॥गणेशवचनंश्रुत्वात
एवंहर्षसंयुताः॥तंप्रणम्यमहाभक्ताऊचुःप्रांजलयोभवन्॥२१॥तऊचुः॥यदिप्रसन्नतांयात
स्तदादेहिगजानन॥त्वदीयामचलांभक्तिंययामोहविनश्यति॥२२॥सामर्थ्यमतुलंसृष्टेदेहिनो
विघ्ननायक॥यंयमिच्छामहेढुंढेतंतंसिध्यतुसर्वदा॥२३॥ओमित्युक्त्वागणाधीशोंतर्धानंप्र
चकारवै॥तेपितंमनसाध्यात्वाययुःस्वस्वपदंततः॥२४॥ततोब्रह्मापुनर्दक्षंजगादपुत्रमुत्तमं
॥शक्तेस्तपस्त्वयाकार्यंसातेपुत्रीभविष्यति॥२५॥ततोदक्षेणतपसाराधिताशक्तिरादरात्॥श
तवर्षैःप्रसन्नासाययौतस्यांतिकंस्वयं॥२६॥ततस्तांप्रणनामाथतुष्टावप्रकृतांजलिः॥दक्ष
उवाच॥नमस्तेशक्तिरूपायैमायामोहस्वरूपिणि॥२७॥जगद्धात्र्यैनमस्तुभ्यंजगन्मातर्नमोन
मः॥सर्वेषांप्राणदात्र्यैतेसर्वरूपात्मनेनमः॥२८॥अनाद्याआदिभूतायैपार्वत्यैतेनमोनमः॥

लक्ष्म्यै गायत्री सावित्री स्वरूपायै ते नमो नमः ॥ प्रकृतिपुरुषायै ते नामरूपप्रकाशिनि ॥ निर्गुणायै
गुणानां वै धारकाय नमो नमः ॥ ३० ॥ प्रसीद भव मे पुत्री दाक्षायिण्यै नमो नमः ॥ ततस्तं पार्वती प्रा
ह भक्तं दक्षप्रजापतिं ॥ ३१ ॥ शक्तिरुवाच ॥ भविष्यामि सुतां तेहं नानारूपधरा सुत ॥ जगच्च पूरयिष्या
मि जनयित्वा सुतासुतान् ॥ ३२ ॥ त्वया कृतं मदीयं यत्स्तोत्रं ख्यातिं गमिष्यति ॥ सर्वकामप्रदं पूर्णं यठ
ते शृण्वते भवत् ॥ ३३ ॥ अंतर्धानं ययौ देवी पश्यतस्ते प्रजापते ॥ त्वया गणेशनाम्नश्च स्मरणं त्यक्तमद्य
वै ॥ ३४ ॥ मंत्रस्तस्य परित्यक्तस्तेन दुर्बुद्धिधारिणा ॥ त्वया तिरस्कृता पुत्री सती भस्म त्वमागता ॥ ३५ ॥
त्वमपि शोकसंयुक्तः कृतो विघ्नेश्वरेण वै ॥ पूर्वसंस्कारयोगेन तव स्मृतिसमागता ॥ ३६ ॥ अधुना भावयु
क्तस्त्वं शृणोषि तत्कथामृतं ॥ राज्यलक्ष्मीश्च संप्राप्ता यस्य तस्य प्रमादिनी ॥ ३७ ॥ तया युक्तः पुमान्स
द्यो मदांधो जायते किल ॥ अतः संतश्च नेच्छंति लक्ष्मीं ज्ञानविनाशिनीं ॥ ३८ ॥ मनुः स्वायंभुवः ख्यातः सप

त्रीकोयथौक्तं॥अष्टाक्षरविधानेनतोषयामासविघ्नपं॥३१॥ततस्तपस्तपोघोरंदिव्यवर्षसहस्रकं॥
प्रसन्नोभूत्तदातस्मैवरंदातुंसमाययौ॥४०॥तंदृष्ट्वाप्रणनामादौमनुःस्वायंभुवःप्रभो॥पुपूजमरया
भक्त्यातत्तुष्टावविघ्नपं॥४१॥स्वायंभुवउवाच॥नमस्तेगजवक्त्रायहेरंबायनमोनमः॥ॐकारात्मक
रूपायसगुणायनमोनमः॥४२॥निर्गुणेगजरूपायसदाब्रह्मसुखात्मने॥गणेशायसदाभक्तपोष
कायनमोनमः॥४३॥नरकुंजररूपाययोगाभेदायतेनमः॥चतुर्बाहुधरायैवपुरुषार्थप्रसिद्धये॥४४॥
नानाभोगधरायैवानंतलीलास्वरूपिणे॥विघ्नराजायहेरंबायभक्तविघ्नविदारिणे॥४५॥सत्यासत्यस
मायैवाभक्तभेदात्मनेनमः॥स्वानंदपूर्तयेलुभ्यंसदास्वानंददायिने॥४६॥नमस्तेमूषकारूढसर्वांत
रिसुभोगिने॥नानाभूतसमूहैकक्रीडाकरनमोस्तुते॥सिद्धिबुद्धिपतेलुभ्यंदेधामायाप्रसारिणे॥भक्ते
ष्वायोगदात्रेचयोगाकारायतेनमः॥४८॥वेदोपनिषदालभ्यमहावाक्यमयायते॥ब्रह्मभूतायवेलुभ्यं

नमस्तेब्रह्मराशये॥४९॥किंस्तौमिस्तंगणाधीशयत्नवेदाविसिस्मिरे॥योगिनःशेषमुख्याश्चवेशंकरा
द्यामदेश्वराः॥५०॥तथापित्वदीयेनैवदृष्टेनैवगजानन॥स्मृतिःप्राप्तानयानाथसंस्तुतोसिमया
प्रभो॥५१॥अहोभाग्यमहाभाग्यंयेनदृष्टोगजाननः॥वेदांतागोचरोगम्योधन्योऽजगतीतले॥५२॥
धन्योमेजनकोद्यत्वपोज्ञानंकुलंप्रभो॥विद्याब्रह्मादिकंसर्वंधन्यंतेपादर्शनात्॥५३॥इतिस्तुत्वा
गणाधीशंभक्तापरमयायुतः॥सरोमांचोभवत्तत्रप्रणानामपुनःपुनः॥५४॥तमुत्थाप्यगणाधीशो
जगादभक्तमुत्तमं॥वरंवृणुमहाभागयत्तेमनसिवर्त्तते॥५५॥त्वयाकृतंमदीयंयत्स्तवनंतोषकारकं
॥सर्वदापठतेमर्त्यस्तवनेभविष्यतितन्मना॥५६॥विभवंपुत्रपौत्रादिप्रदंशोकविनाशनं॥धनधान्यसमृ
द्ध्यादिप्रदंभाविनसंशयः॥५७॥धर्मार्थेकाममोक्षाणांसाधनंब्रह्मदायकं॥भक्तिर्दृढकरंचैवभ
विष्यतिनसंशयः॥५८॥धर्मार्थेकाममोक्षाणांसाधनंब्रह्मदायकं॥ब्रुवंतंविघ्ननाथंतमुवाचमनु

सत्तमः॥ स्वायंभुवः प्रसन्नात्मा कृतांजलिरुदारधीः॥५५॥ मनुरुवाच॥ यदि प्रसन्नतां यातस्तदा देहि गजा
नन॥ भक्तिं दृढां त्वदीयां मे ययामोहो न विद्यते॥६०॥ सृष्टिकरणसामर्थ्यं धर्मपालनमुत्तमं॥ प्रजारक्ष
णतां देहि देवदेवेश मे वरं॥६१॥ यं यमिच्छामि विघ्नेशतं तं सिद्ध्यतु सर्वदा॥ तव भक्तेषु वासो मे सदा भवतु
मानद॥६२॥ तथेति तमुवाचादावंतर्धानं चकार ह॥ गणेशानो निजे लोके जगाम भक्तवत्सलः॥६३॥
॥ ॥ इति श्रीमदांत्ये मौद्गलपुराणे स्वायंभुववरदानो नाम पंचमोध्यायः॥५॥ ॥ मुद्गल उवाच॥
ततः स्वायंभुवो यातो ब्रह्माणं प्रणनाम सः॥ शतरूपा तथा तं वै जग्मतुस्तौ तदाज्ञया॥१॥ राज्यं
चकार धर्मेण मनुः शस्त्रधरः प्रभुः॥ धर्मयुक्तो महातेजा गाणपत्यप्रियोभवत्॥२॥ द्वौ पुत्रौ शत
रूपायां कन्यास्तिस्रः प्रजापते॥ मैथुनेनैव मार्गेण समुत्पाद्य बभौ मनुः॥३॥ प्रियव्रतोत्तानपा
दौ पुत्रौ तस्य च धीमतः॥ आकूतिर्देवहूतिश्च प्रसूतिश्च सुलोचनाः॥४॥ कन्यास्तिस्रः समाख्या

तामनोस्तस्यमहात्मनः॥प्रसूतिंसददौतुभ्यमाकूतिंरुचयेतथा॥५॥देवहूतिंमनुस्तत्रकर्दमा
यददौस्वयं॥एवमादिमहाराजश्चकारविधिनोदितः॥६॥कर्दमस्तपसाविष्णुंस्तोषयामासय
त्नतः॥शतवर्षैःप्रसन्नोभूद्ययौदातुंवरंद्विजं॥७॥तंव्ययाचसपुत्रस्त्वंभवमेजगदीश्वर॥वरं
दत्वास्वयंविष्णुंर्ययौविकुंठमंजसा॥८॥ततःसदेवहूत्यांवैकपिलोविष्णुरूपधृक्॥तस्यपुत्र
त्वमापन्नोवरदानप्रभावतः॥९॥आकूत्यामिथुनंजज्ञेरुचेश्चमानसंपरं॥यज्ञश्चदक्षिणादेवीया
भ्यांसंवर्द्धितंजगत्॥१०॥यज्ञोविष्णुर्महाभागोदक्षिणायांसुतान्शुभान्॥द्वादशाञ्जनयामास
यामादेवाश्चतेस्मृताः॥११॥ततोयज्ञस्तपोयुक्तोबभूवसस्त्रीकःप्रभुः॥गणपंयोगमार्गेणतोष
यामाससर्वदा॥१२॥चतुर्भुजांगणेशस्यमूर्त्तिंकृत्वामणिमयीं॥नित्यंमुनिगणैर्युक्तःपुपूजभ
क्तिभावतः॥१३॥ततोगणपतिःप्रीतोददौयोगंमहाद्भुतं॥तेनयोगींद्रमुख्योसौगाणपत्योबभू

वह ॥२४॥ हेरंबेति सदा मंत्रं यज्ञो जजाप सर्वदा ॥ शिष्येभ्यः सददौ योगं गाणपत्यं मुदान्वितः ॥२५॥ प्र
सूत्यां जनयामास कन्या दक्षप्रजापतिः ॥ चतुर्विंशति संख्याताः शक्त्यंशाः सर्वमातरः ॥२६॥ श्र
द्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ॥ बुद्धिर्लज्जा वपुः शांतिः सिद्धिः कीर्त्तिस्त्रयोदश
॥२७॥ ददौ धर्मायपत्न्यर्थं दक्षो हृष्टमना मुने ॥ ब्रह्मणा नोदितश्चैव तासां सूतिं वदामि वः ॥
श्रद्धा पुत्रः स्मृतः कामोर्थश्च लक्ष्मीसुतोभवत् ॥ धृत्यास्तु नियमः पुत्रस्तुष्ट्या संतोषसंज्ञितः
॥२९॥ पुष्ट्या लाभः सुतो जज्ञे मेधा पुत्रः शमः स्मृतः ॥ क्रियायाश्च भवत्पुत्रौ दंडः समय एव च ॥
॥३०॥ बुध्या बोधो भवत्पुत्रश्चाप्रमादः प्रकीर्त्तितः ॥ लज्जाया विनयश्चैव पुरुषो व्यवसायकः
॥३१॥ शांतिपुत्रस्तथा क्षेमः सिद्धेः सिद्धः सुतोभवत् ॥ यशः कीर्त्तिसुतः प्रोक्त इत्येते धर्मसूनवः ॥३२॥

कामस्याभूत्सुतो हर्ष आनंदश्चापरस्मृतः॥ इत्येषः सुखरूपस्तु सर्गो धर्मस्य कीर्त्तितः॥२३॥ प्रसंगात्त्वां वदिष्या
मि सर्गो धर्मस्य दुःखदं॥ ब्रह्मणः पृष्ठतस्तद्वन्मिथुनं च समुद्भवं॥२४॥ अधर्मश्च तथा हिंसा तयोः पुत्रो नृत
स्मृतः॥ निःकृतिश्च सुता प्रोक्ता तयोर्जज्ञे भयं तथा॥२५॥ नरकश्च तथा माया वेदना च सुते स्मृते॥ भ
याज्जज्ञे तथा माया मृत्युं सर्वापहारिणं॥२६॥ नरकाद्वेदना जज्ञे दुःखं संतापकारकं॥ मृत्योर्व्याधि
जराशोकस्तृष्णा क्रोधस्य जज्ञिरे॥२७॥ दुःखोदर्का स्मृता सर्वे ह्यधर्मप्रभवा मुने॥ नैतेषां प्रसवोस्ति
वै सर्वे तऊर्ध्वरेतसः॥२८॥ एकादश सुताः शिष्टास्तासां वंशं निबोध च॥ सतीं ददौ स रुद्राय ख्यातिं च भृ
गवे तथा॥२९॥ मरीचये च संभूतिं स्मृतिमंगिरसे ददौ॥ पुलस्त्याय तथा प्रीतिं क्षमां च पुलहाय वै॥
॥३०॥ संततिं कृतवे चासावनसूयां तथात्रये॥ ददावूर्जं विशिष्टाय स्वाहां च वह्नये मुने॥३१॥ पितृभ्य
श्च स्वधां देवीं ददौ दक्षः प्रहर्षितः॥ नियोगाद्ब्राह्मणः साक्षात्तासां वंशं वदामि ते॥३२॥ सत्यां च शंक

राज्ञेकार्त्तिकेयोमहाबलः॥ देवसेनापतित्वेसाबभिषिक्तःस्वधेसा॥३३॥ख्यात्यांभृगोःसमुत्पन्नाल
क्ष्मीर्नारायणप्रिया॥ देवोधाताविधातारौमेरोर्जामातरौस्मृतौ॥३४॥आयतिर्नियतिश्चैवकन्येमेरोः
स्मृतेमुने॥तयोर्धातृविधात्रोश्चजातौद्वेस्तेसुतावुभौ॥३५॥मृकंडोन्यस्तथाप्राणोमार्कंडेयोमृकंड
नः॥नथावेदशिराःप्रोक्तःप्राणस्यद्युतिमान्सुतः॥३६॥मरीचिरपिसंभूत्यांपूर्णमासमसूयत॥कन्याच
नुष्टयंचैवंसर्वलक्षणमंडितं॥३७॥कुर्षिर्दृष्टिस्तथाकृष्टिश्चतुर्थ्यंपचितिर्मुने॥विरजाःपर्वतश्चैवपूर्णमा
सस्यतोसुतौ॥३८॥क्षमाचसुषुवेपुत्रान्पुलस्याच्चप्रजापतेः॥कर्मश्रेष्ठंवरीयांसंसहिष्णुमुनिपुंगवं॥३९॥
तथावनकनीयांसंनपस्तेजांश्चिनंसुतं॥अत्रेर्वंशंप्रवक्ष्यामिशृणुशौनकमादृतः॥४०॥अत्रिःसंजनया
मासानस्यायांसुतान्शुभान्॥सोमंदुर्वाससंचैवदत्तंयोगधरंसत्रीन्॥४१॥त्रयोदेवाःस्मृताःप्रोक्ताअत्रेःपु
त्रामहात्मनः॥जज्ञाभवक्त्रविस्फुर्ज्यकलांशेनप्रजाभराः॥४२॥स्मृतासामंगिरसोजज्ञेसिनीवालीसुतोच

ना॥कुहूराकातथापुत्रीचानुमतिःपतिव्रता॥४३॥प्रीसांपुलस्त्ययोगीशाद्देहोग्निरभवत्सुतः॥पूर्वजन्मनिवि
प्रेशोगस्त्योयंपरिकीर्त्तितः॥४४॥देवबाहुस्तथाकन्यासर्वांगशोभिनीस्मृता॥संतत्यांषष्टिसाहस्रंपुत्राणा
मसृजत्क्रतुः॥४५॥तदूर्ध्वरेतसःसर्वेवालखिल्याइतिस्मृताः॥वशिष्ठःसप्तपुत्रान्सऊर्जायांजनयत्प्रभुः॥
॥४६॥कन्यांकमलपत्राक्षींचित्रकेतुःसुरोचकः॥विरजामित्रसंघश्चउल्वणोवसुभृत्परः॥४७॥द्युमान्शक्त्या
दयश्चान्येसप्तपुत्रामहौजसः॥योसौरुद्रात्मकोवह्निःस्वाहायांतनयांश्चत्रीन्॥४८॥जनयामासतेजस्वी
तेग्नयःपरिकीर्त्तिताः॥पावकःपवमानश्चशुचिस्तेजनयन्सुतान्॥४९॥पंचदशचप्रत्येकमेकोनपंचाश
दग्नयः॥सर्वेतेजस्विनःप्रोक्ताःसर्वेयज्ञेषुभोगिनः॥५०॥निर्मथ्यःपवमानस्तुससुतःपरिकीर्त्तितः॥वैद्यू
तःपावकःप्रोक्तःससुतःशास्त्रसंमते॥५१॥सूर्येतपतियोग्निश्चसपुत्रःसशुचिःस्मृतः॥सर्वत्रगःसरुद्रात्मा
ब्रह्मपुत्रोग्निरुच्यते॥५२॥अमूर्त्तयोह्यग्निष्वात्ताबर्हिषदःसमूर्त्तयः॥पितरश्चस्वधातेभ्योजज्ञेद्वेतनयेतथा॥

मेनाचधरणीनाम्नीतउभेब्रह्मवित्तमे॥असूतमेनामैनाकंक्रौंचंहीमवतोमुने॥५४॥गंगांलोकप
वित्रींचपार्वतींपरमेश्वरीं॥तेउभेशंकरंदेवंलेभातेपतिमुत्तमं॥५५॥तपसागिरिराजेनमेनयाराधि
तासती॥वरदानप्रभावेणपार्वतीतनयाभवत्॥५६॥धरणीमेरुशैलस्यपत्नीकन्याप्रजापते॥सु
षुवेआयतिंचैवनियतिंकथितेपुरा॥५७॥एषादक्षस्यकन्यासुसंततिःकथितामया॥पठतेशृ
ण्वतेचैवसर्वकामफलप्रदा॥५८॥ ॥इतिश्रीमदांत्ये० दक्षकन्यावंशवर्णनंनामषष्ठोऽध्यायः॥
॥६॥मुद्गलउवाच॥दक्षकन्याप्रसूतीनांपितरःपरमाताः॥गणेशाराधनंताभ्योददुःप्रत्येक
मादरात्॥१॥नानामंत्रान्यथान्यायंसाधइत्याचतेवने॥गत्वाजेपुश्चहेरंबंध्यात्वातपसिसंस्थि
ताः॥ततोवर्षसहस्रेणपरितुष्टोगजाननः॥वरंदातुंययौतत्रभक्तिभावेनतोषितः॥तंदृष्ट्वा
तुष्टुवुःसर्वेबद्धांजलिपुटाःप्रभुं॥भक्तिभावसमायुक्तागणेशंसर्वसिद्धिदं॥४॥ऋषिपुत्राऊ

मु॰पु॰
२०

॥नमस्तेवक्रतुंडायभक्तरक्षकरूपिणे॥ब्रह्माकारायदेवायब्रह्मभूतायतेनमः॥५॥नमोवागातिरूपाय
मनोवचोगमूर्त्तये॥योगाकाराययोगाययोगिनेतेनमोनमः॥६॥निराकारायविघ्नेशभक्तिविघ्ननिवा
रणः॥शांतिरूपायसर्वत्रशांतिदायनमोनमः॥७॥सृष्टिरक्षणसंहारकारिणेतेनमोनमः॥सर्वपू
ज्यायसर्वायसर्वादिमूर्त्तयेनमः॥८॥मायाविकारहीनायमायिनेमोहदायिने॥मायाधारायमायाया
श्चालकायनमोनमः॥९॥अनंतविभवायैवानंतोदारपराक्रमः॥अनंताननहस्तायसर्वसाक्षिन्नमो
नमः॥१०॥वेदांतागम्यरूपस्त्वंदृष्टोसिभाग्यगौरवात्॥स्तुतिंकर्त्तुंसमर्थानतववयंगजानन॥
॥११॥धन्योनोजनकोदेववयंधन्यतमाविभो॥विद्याव्रतंतपोमंत्रोस्माकंगणेशदर्शनात्॥१२॥वरद
श्चेदेकदंतभक्तिंदेहिदृढांत्वयि॥ययामायामयोमोहोनश्यतिवरदप्रभो॥१३॥स्वस्वकार्येषुसामर्थ्यं
देहिदेवगजानन॥यंयमिच्छामहेतंतंसफलंभवतुप्रभो॥१४॥एवमुक्त्वापुपूजस्तमुपचारैरनेक

रामः
शः २०

प्रणेमुर्भक्तियुक्तास्त्वं सरोमांचा बभूविरे ॥१५॥ ततस्तानब्रवीद्देवो भवतां यच्चिकीर्षितं ॥ तदेव सफलं सर्वं भ
विष्यति न संशयः ॥ भक्तिर्मदीयेष्वादेषु भविष्यति सुखप्रदा ॥ सामर्थ्यं स्वस्वकार्येषु दृढं ख्यातिं गमिष्यथ ॥
॥१७॥ भवस्तेतमिदं स्तोत्रं सर्वसिद्धिकरं भवेत् ॥ यः शृणोति नरो भक्त्या पठति तस्य सिद्धिदं ॥१८॥ एकविंश
तिवारं च तावदिनानि यः पठेत् ॥ स सद्यः फलमाप्नोति मनेप्सितं न संशयः ॥१९॥ एवमुक्त्वा गणाधीशस्तत्रैवांत
रधीयत ॥ ते च स्वस्वगृहे सर्वे ययुर्हर्षसमन्विताः ॥२०॥ स्त्रियश्च पुरुषाः सर्वे दक्षकन्यासमुद्भवाः ॥ सुखि
नः स्वस्वकार्येषु बभूवुर्ज्ञानसंयुताः ॥२१॥ शौनक उवाच ॥ अत्रिपुत्रा महाभागा ब्रह्मविष्णुशिवात्मकाः ॥ तेषां
विस्तारकं श्रोतुमिच्छामि सूत तद्वद ॥२२॥ सूत उवाच ॥ ब्रह्मणोंशसमुद्भूतः चंद्रस्तपसि संस्थितः ॥ गणेशा
त्सवरं लब्ध्वामृतरूपो बभूव ह ॥२३॥ कलाभिः सर्वदेवानां पोषकः स तथा नृणां ॥ किरणैरन्नभावेन वृद्धिक
रः सदाभवत् ॥२४॥ ततो विष्णुः कलांशेन संभूतो योगधारकः ॥ क्रमेण योगमार्गेण नानाब्रह्मसुसंस्थितः
॥२५॥ चंडोन्मत्तपिशाचादिबालानंदादिकामुने ॥ अवस्था साधयामास नानाभूमिप्रकारतः ॥२६॥ तं दृ

ष्ट्वायोगिनंसर्वेसेवायामभवन्पराः॥द्विजाद्याःसर्ववर्णाश्चाश्रमस्थाभक्तिभावतः॥२७॥क्षणंविश्राममसंतंन
लेभेमुनिसत्तमः॥दत्तोविह्वलतांयातःकिंकरोमीत्यधारयत्॥२८॥ततस्तेनजलेविप्रमज्जितंयोगधारिणा
॥प्रतीक्षयंतस्तंतीरेस्थिताःसर्वेभवज्जनाः॥२९॥ततोदत्तेनसिद्ध्याचमोक्षलक्ष्मीःप्रकाशिता॥गृहीत्वा
वामभागेतांनिःसृतोजलमध्यतः॥३०॥दक्षिणेमद्यकुंभंसहस्तेधृत्वापपौस्वयं॥स्त्रियासहविलासेन
भोगयुक्तोबभूवह॥३१॥त्यक्तस्तैरत्रिजोयोगीभ्रष्टोयमित्यभावतः॥सुखेनयोगमास्थायसंस्थितोत्रिस
मुद्भवः॥३२॥गतेकियतिकालेचदेवासुरसमुद्भवं॥युद्धंदारुणरूपंवैजातंतत्रसमीपतः॥दैत्यैर्देवास्ततो
भग्नाःपपलुःसर्वतोदिशं॥तत्राययुःसुसंभीतारक्षरक्षतमब्रुवन्॥३४॥ततोसुराययुःसर्वेभग्नश
स्त्रधरावलात्॥तान्दृष्ट्वामरसंघास्तेपलायनपरायुतः॥३५॥दैत्यान्दृष्ट्वामहालक्ष्मींमोक्षरूपांस्व
रूपिणीं॥तांगृहीत्वाययुःसर्वेमस्तकेधृत्यमोहतः॥३६॥मोक्षलक्ष्मीश्चतैस्तत्रयदिपादेषुसंधृता॥

तदा तेषां जयः प्राप्तिर्भविता नात्र संशयः ॥३७॥ अतो निस्तेजसा स्पृष्टा दैत्या देवैः प्रताडिताः ॥ पपलुस्तद्भ
यात्सर्वे पातालं विविशुः पुनः ॥३८॥ मोक्षलक्ष्मीस्ततस्तेषां पश्यतां मुनिसत्तम ॥ अंतर्धानं ययौ देवी ब्र
ह्मणि ब्रह्मभाविता ॥३९॥ शौनक उ० ॥ सूतकूटं त्वया प्रोक्तं न बुद्धं तन्मयाधुना ॥ मोक्षलक्ष्मीं शिरस्पृ
ष्टा दैत्यानां दुःखदा कथं ॥४०॥ सूत उ० ॥ सम्यक्प्रष्टं त्वया ब्रह्मन्कथयामि यथाश्रुतं ॥ व्यासात्सर्वज्ञमु
ख्याच्च शृणु शौनक यत्नतः ॥४१॥ रजस्तमोयुता दैत्या भोगलक्ष्मीपरायणाः ॥ परद्रव्यहताः सर्वे प
रस्त्रीगामिनस्तथा ॥४२॥ परापकारकर्त्तारो जंतुभ्यो दुःखदाः स्मृताः ॥ सदा मद्यादिभिर्युक्ताः पापाचा
राविशेषतः ॥४३॥ साधूनां मुनिमुख्यानां देवानां योगिनां तथा ॥ वेदशास्त्रपुराणानां निंदकाभयदा
यकाः ॥४४॥ इत्यादिबहुभिर्दोषैः संयुक्तास्ते महासुराः ॥ सदा भोगप्रिया ज्ञेया मुक्तौ नार्हा अतः क
दा ॥४५॥ देहं सर्वक्रियाणां ते कर्त्तारं प्राप्य दैत्यपाः ॥ सर्वथा मुक्तिमुत्सृज्य भोगेच्छायामनो दधुः ॥

॥४६॥ अतस्तैश्चरणाघातैर्हतामुक्तिर्विशेषतः॥ भोगलक्ष्मीः शिरोभिस्तैर्वंदिता तत्र यत्नतः॥४७॥ देवर्षे
यः सदा यत्नैर्मुक्तिमिच्छंति सर्वदा॥ अतस्ते मस्तके देवीं धारयामासुरंजसा॥४८॥ असुरैर्योगिसंगे
न धृता मुक्तिर्यदा मुने॥ सिरशिशुभदा सा न कारणं कथयामि ते॥४९॥ दुराचारादिसंयुक्ता भोग
बुद्धिपरायणाः॥ तेभ्यः सा शुभदा कुत्र पिता मा जानिहंति वै॥५०॥ गृहीता विषयासक्तैर्नेच्छिता पश्य
शौनक॥ चरणाघातकैर्देवी ताडिता भोगभावतः॥५१॥ अतो भोगेप्सुभिर्विप्रवंद्या भोगप्रदायिनी॥
यदि मुक्तिर्दुराचारैर्धृता सा नाशयिष्यति॥५२॥ इति ते कथितं सर्वं कारणं मुनिसत्तम॥ तथा मो
क्षेप्सुभिर्भोगलक्ष्मीश्चरणताडिता॥५३॥ यत्र भोगः प्रियो नित्यं तत्र मुक्तिर्न विद्यते॥ यत्र मुक्तिः प्रि
यात्यंतं तत्र भोगः कुतो भवेत्॥५४॥ वासनायुक्तरूपा च भोगलक्ष्मीर्न संशयः॥ निर्वासनमयी मो
क्षलक्ष्मीर्जानीहि शौनक॥५५॥ ॥इति श्रीमहांत्ये॰ भोगमोक्षवर्णनं नाम सप्तमोध्यायः॥७॥ ॥

मुद्गलउवाच॥एवंदत्तस्मयोगेनयोगभूमिंसमाचरेत्॥नानाचेष्टायुतोदक्षअवधूतंप्रकाशति॥गोव
द्भक्षणसंयुक्तःपशुवत्पक्षिवत्कदा॥मूत्रादिदेहचेष्टांस्मचकारमुनिसत्तमः॥२॥सहजावस्थयायुक्तो
बभूवांतेत्रिसंभवः॥तत्रांतर्यामितांज्ञात्वाखेदयुक्तोबभूवह॥३॥व्यक्ताव्यक्तसमंनेत्यादिकब्रह्मसुसं
स्थितः॥योगेननसशांतोभूद्ययौस्वपितरंततः॥४॥प्रणम्यभगवानत्रिदत्तोयोगिसमावृतं॥साक्षा
द्ब्रह्ममयंपूर्णंप्रांजलिःपुरतोभवत्॥५॥अत्रिणामानितःसोपिनिषसादासनेस्वयं॥उवाचब्रह्म
पुत्रंतमत्रिंविनयसंयुतः॥६॥दत्तउवाच॥स्वामिन्नानाविधंब्रह्मयोगेनसाधितम्मया॥तत्रोपाधिः
समादृष्टउपाधि [illegible] रहितोभवं॥७॥उपाधिंनिरुपाधिंचत्यक्त्वासाम्येहमास्थितः॥तंत्यक्त्वातू
र्यभूतेवैसहजेसंस्थितोभवम्॥८॥तत्रदृष्ट्वामहायोगिन्स्वाधीनत्वंसदाप्रभो॥तेनशांतिविहीनो
हंकिंकरोमिवदस्वमां॥९॥सहजान्नपरंब्रह्मलभ्यतेयोगसेवया॥अतोमांशांतियोगंत्वंकथयस्व

महामुने॥१०॥दत्तस्य वचनं श्रुत्वा ब्रह्मपुत्रो महातपाः॥अत्रिरुवाच तं पुत्रं शांतिमिच्छंजगाद यत्॥११॥
अत्रिरुवाच॥शृणु पुत्र प्रवक्ष्यामि शांतियोगं सनातनं॥ब्रह्मणा कथितं मे तं येन शांतोहमंजसा
॥१२॥अस्माकं कुलदेवत्वं प्राप्तो गणपतिः प्रभो॥स वै देवादिदेवानां कुलदेवः प्रकीर्त्तितः॥१३॥शां
तियोगस्वरूपं तं जानीहि त्वं महामते॥भजस्व सुप्रयत्नेन तदा शांतिमवाप्स्यसि॥१४॥गणेशात्स
र्वमुत्पन्नं तेन संस्थापितं सुत॥तस्याराधनमात्रेण कृतकृत्याः शिवादयः॥१५॥नामरूपात्मकं सर्वं
जगत्ब्रह्म प्रकथ्यते॥तदेव शक्तिरूपाख्यं ब्रह्मा सद्रूपकं परं॥१६॥तत्रामृतमयं भानुमात्माकारे
ण संस्थितं॥सद्रूपं तं विजानीहि ब्रह्मवेदैः प्रकीर्त्तितं॥१७॥तयोरभेदतो ब्रह्म समं सर्वत्र संस्थितं॥
सदसन्मयगं विष्णुं जानीहि वेदवादतः॥१८॥तेभ्यो विलक्षणस्तूर्यो नेतिरूपः प्रकीर्त्तितः॥निर्मो
हः शिवसंज्ञश्च स्वाधीनं ब्रह्म तद्बुधैः॥१९॥चतुर्णां ब्रह्मसंयोगे स्वानंदः कथ्यते बुधैः॥स वै माया

मयः साक्षाद्गणेशो वेदवादिभिः ॥२०॥ अंतर्वाह्यक्रिया सर्वा ब्रह्मकारा प्रदृश्यते ॥ कर्मयोगः स विज्ञेयः संयोगः
कर्मणां सुत ॥२१॥ ज्ञानात्मचक्षुषा ज्ञानं यद्यद्भवति योगिनां ॥ तेषामभेदको योगो ज्ञानयोगः प्रकीर्त्ति
तः ॥२२॥ ज्ञानानां कर्मणां चैव भेदे योगः समात्मकः ॥ आनंदात्मकरूपो यं द्वैधनाशे स प्राप्यते ॥२३॥
॥ स्वेच्छया कर्मयोगश्च धृतो येन महात्मना ॥ स्वेच्छया ज्ञानयोगश्च स्वेच्छयानंदयोगकः ॥२४॥ स्वेच्छया स
त्रिभिर्हीनः सहजाख्यः प्रकथ्यते ॥ सदा स्वाधीनरूपश्च स्वेच्छया क्रीडते स्वयं ॥२५॥ ब्रह्मभूतात्मको योगः
स्वानंदाख्यः प्रकीर्त्तितः ॥ तत्रास्वाधीनता पुत्र पराधीनत्रिधा कुतः ॥२६॥ ब्रह्मणि ब्रह्मभूतस्य स्वतः पर
त एव च ॥ उत्थानं नास्ति संयोगात्स्वस्वरूपिणि योगिनः ॥२७॥ स्वानंदे सुत संयोगो जगतां ब्रह्मणां भ
वेत् ॥ सर्वाभेदेन योगो यं तस्मान्मायासमन्वितः ॥२८॥ अयोगात्मकयोगश्च सदा संयोगवर्जितः ॥
॥ जगतां ब्रह्मणां तत्र प्रवेशो तो न विद्यते ॥२९॥ सदा निर्मायिको योगः स्वसंवेद्यविवर्जितः ॥ स्वकीया
भेदहीनत्वान्निवृत्तिर्योगिभिर्धृता ॥३०॥ ब्रह्म ब्रह्मणि संस्थं यन्नागतं न गतं पुनः ॥ स्वानंदनाशतो तुभ्यं

ब्रह्मभूतमयोगकं॥३१॥ब्रह्मस्वानंदवासीसगणेशःकथ्यतेबुधैः॥नस्वानंदात्मकःप्रोक्तोविदेवुवेदवादिभिः॥
॥३२॥क्रीडात्मकगणेशानःस्वानंदःपरिकीर्त्तितः॥संयोगात्मकरूपेणस्वस्वरूपिणीतिश्रुतौ॥३३॥क्रीडा
सिनोगणेशानोयोगरूपःप्रकीर्त्तितः॥निरानंदात्मकत्वेनसदाब्रह्मणिसंस्थितः॥३४॥संयोगायोग
योर्योगेनेयोनाथगणेश्वरः॥शांतियोगात्मकःप्रोक्तोयोगिभिर्योगसेवया॥३५॥पूर्णयोगात्मकस्त
त्रगणेशःपरिकीर्त्तितः॥मायायुक्तविहीनत्वंभ्रांतिमात्रंप्रकीर्त्तितं॥३६॥पंचचित्तस्वरूपांत्वंबुद्धिजानीहिपु
त्रक॥तत्रमोदकरीसिद्धिर्भ्रांतिरामोदरूपिणी॥३७॥धर्मार्थकाममोक्षाणांसिद्धिर्भिन्नाप्रदृश्यते॥ब्रह्मभू
तमयीसिद्धिः कथितायोगिभिस्तथा॥३८॥पंचधाचित्तवृत्तिर्यातत्रयद्धिंबेतसुतं॥तरेवगणराजस्यरूपं
विंबात्मकंपरं॥३९॥धर्मार्थकाममोक्षेषुब्रह्मभूतेषुयत्स्मृतं॥ऐश्वर्यमोदंजनुर्भ्रमतियत्रलोलसः॥४०॥
पंचैश्वर्येषुयद्धिंतंरेवगणपस्यच॥जीवंजानीहिपुत्रत्वंशांतियोगस्यसेवया॥४१॥पंचचित्तप्रनाशेवैपंचै
श्वर्येत्वयंगते॥अधुनागणराजस्त्वंभवितासिनसंशयः॥४२॥सजावभूतमार्गेतंभवावभूतमुख्यकः॥अ

वधूयमदचित्तंमदैश्वर्यमादरात्॥४३॥सदाशांतिंभजस्वत्वंयोगेनदत्तस्यत्वरं॥ददामितेमहामंत्रं
गणेशस्यविधानतः॥४४॥ननएकाक्षरंमंत्रंददौपुत्रायभावलः॥अत्रिर्योगविदांश्रेष्ठस्तंप्रणम्यप
यावजः॥४५॥साक्षाद्विष्णुस्वरूपश्चदत्तोयोगविदांवरः॥गंगायादक्षिणेतीरेपूजयामासविघ्नपं
॥४६॥मत्काश्रमिस्वरूपंसशांतिमास्थाययोगवित्॥अभजत्तंसुभावेनगणपंहृदिचिंतयन्॥म
त्योगीस्वयंदत्तोवर्षणैकेनशेनक॥शांतिंप्राप्तोविशेषेणगा णपत्योभवद्वद॥४८॥तंद्रष्टुं
गणपस्तत्रययौभक्तिंनिजेच्छया॥भक्तवात्सल्यभावेनदत्तात्रेयंसुशांतिदं॥४९॥तंदृष्ट्वासदसोत्थ
यप्रणनामकृतांजलिः॥तुष्टावसुस्थिरोभूत्वाविघ्नेशंकुलदेवतं॥५०॥दत्तउवाच॥नमोगणपतेतुभ्यं
नमोयोगस्वरूपिणे॥योगिभ्योयोगदात्रेचशांतियोगात्मनेनमः॥५१॥सिद्धिबुद्धिपतेतुभ्यंपंच चित्त
प्रधारक॥नानाविहारशीलायगणेशायनमोनमः॥५२॥सिद्धिदात्रेसमस्तेभ्योनानैश्वर्यप्रधारिणे॥

मु॰पु॰
२५

मोहहंत्रेमोहकर्त्रेहेरंबायनमोनमः॥५३॥स्वानंदवासिनेतुभ्यंसंयोगाभेदधारिणे॥नानामायाविहारायविघ्ने
शायनमोनमः॥५४॥सांख्यायब्रह्मनिष्ठायबोधहीनायधीमते॥परतोत्थानस्वरूपायविदेहायनमोनमः॥
बोधायसर्वरूपायदेहदेहिमयायच॥स्वतउत्थानरूपाय [illegible] प्रकृतिंलयतेनमः॥५६॥
सोहंकारायदेवायजगदीशायतेनमः॥महतेबिंदुरूपायजगद्रूपायतेनमः॥५७॥नादात्मकगुणेशायनाना
वेशप्रधारिणे॥ब्रह्मणेसृष्टिकर्त्रेचपितामहनमोस्तुते॥५८॥हरयेपालकायैवनानादेहधरायच॥संह
र्त्रेशंकरायैवकर्माकारायभानवे॥५९॥शक्तयेचक्रियामूर्त्तेदेवमानवरूपिणे॥नागासुरमयायैवढुंढि
राजायतेनमः॥६०॥स्थावरायनमस्तुभ्यंजंगमायनमोनमः॥जगद्रूपायदेवायब्रह्मणेतेनमोनमः॥
॥६१॥किंस्तौमित्वांगणाधीशयोगाकारेणसंस्थितं॥वेदादयःसमर्थानत्वामतःप्रणमाम्यहं॥६२॥
धन्योदेहोमदीयोद्यपितरौकुलमेवच॥विद्यायोगस्तपश्चैवत्वदंघ्रियुगदर्शनात्॥६३॥इत्युक्त्वाभ

राम:
२५

क्तिभावेनपरिप्लुतोमहामुनिः॥ननर्त्तहृष्टरोमासावानंदाश्रुसृजन्मुहुः ६४॥ततस्तंस्वकरैर्धृत्वागणना
थः ससस्वजे॥उवाचयोगिनंपूर्णंवचनंपरमाद्भुतं॥६५॥गणेशउवाच॥धन्योसिदत्तयोगींद्रोजातो
सिमदनुग्रहात्॥शांतिंलभसिपूर्णांत्वमचलांमयिसर्वदा॥६६॥नभेदोमेकदापितेभविष्यतिमहामु
ने॥त्वत्प्रीतिसंप्रवृद्ध्यर्थमत्रस्थास्यामिनिश्चलः॥६७॥गणेशज्ञानमाहात्म्यंत्वयात्रेचमुखाच्छ्रुतं॥
साक्षात्कारंकृतंतस्मादिदंविज्ञानक्षेत्रकं॥६८॥विज्ञानोगणपोदत्तनाम्नाख्यातोभवाम्यहं॥दर्शना
च्छांतिसंदाताभविष्याम्यत्रमानद॥६९॥अत्रवासंप्रकुर्वंतिमदर्थंभक्तिसंयुताः॥शांतियोगंसदातेभ्यो
दास्यामितेप्रसन्निधौ॥७०॥अत्रपुराशिवेनैवज्ञानंसाक्षात्कृतंपरं॥विज्ञानेश्वरनामामेकृतोमया
सशंकरः॥७१॥तस्यात्रसान्निधिंस्थित्वात्वयातथासुसाधितं॥अतःशंकरमित्रत्वंप्राप्तोसिमदनुग्रहा
त्॥७२॥त्वयाकृतमिदंस्तोत्रंयोगशांतिप्रदंभवेत्॥पठतांशृण्वतांनृणांब्रह्मभूतकरंतथा॥७३॥ध

मु॰पु॰ २६

र्मार्थकाममोक्षाणांदायकंप्रभविष्यति॥सर्वसिद्धिप्रदंचैवसर्वेषांज्ञानदायकं॥७४॥इत्युक्तंतद्देवेन
त्रगणेशोभक्तवत्सलः॥दत्तःखिन्नश्चतंध्यात्वालस्योत्तत्रप्रजापते॥७५॥ततस्तत्कृपयातेनस्वात्मात
त्रसमर्पितः॥योगाभेदमयत्वेनजातआत्मानिवेदकः॥७६॥दत्तोभक्तोगणेशस्यस्वामितस्येतिनाम्नि
तं॥स्वामिनि सेवकःसोपिनदाकारेणसंस्थितः॥७७॥इयंभक्तिर्गणेशस्यात्मनिवेदनरूपिणी॥द
त्तेनसाधितामुख्याशांतियोगमयत्नतः॥७८॥एतस्मिन्नंतरेतत्रप्रकटीभूत्वयंशिवः॥विज्ञानेश्व
रनामासौदत्तंतंपरिसस्वजे॥७९॥अहोदत्तमहाभागमममित्रत्वमागतः॥अत्रैवादंगणेशानंध्याया
मियोगसेवया॥८०॥ततोदत्तंपुरस्कृत्यशंकरोब्रह्मणैः सह॥गणेशंस्थापयामासगंगायादक्षि
णेतटे॥८१॥विज्ञानगणराजोयंनाम्नाचक्रेमहर्षिभिः॥तदादिक्षेत्रविख्यातंवभूवगणपस्यतत्॥८२॥वि
ज्ञाननामकंपुण्यंशांतियोगफलप्रदं॥सर्वसिद्धिकरंसेव्यंयात्राकारिजनस्यच॥८३॥ज्येष्ठम्युक्तंच

राम॰ २६

तुर्थ्यां वि स्थापितो गणनायकः॥ अतस्तत्र महोत्साहस्तद्दिने कुर्वते नराः॥८४॥ योगिभिर्देवगंधर्वैः सिद्धैर्ना
गैश्च मानुषैः॥ नानाजनैस्तथा दक्षसेवितं क्षेत्रमुत्तमं॥ एतद्दत्तस्य माहात्म्यं यः शृणोति नरोत्तमः॥ प
ठति भविता तस्य सर्वसिद्धिर्न संशयः॥८६॥ ॥इति श्रीमदांत्ये॰ दत्तचरित्रं नामाऽष्टमोऽध्यायः॥८॥
सूत उवाच॥ दुर्वासाः शंकरस्यांशस्तताप परमं तपः॥ स तु ब्रह्मणि संजातो ब्रह्मभूतो महामुनिः॥१॥ त
मतिक्रोधसंयुक्तमशांतं शांतिलालसं॥ संवीक्ष्य दत्तवज्ज्ञानं ददावत्रिर्महामुनिः॥२॥ स मयूरेशक्षे
त्रे तं गणेशं ध्यानमास्थितः॥ स्वभक्त्या गणराजेन शांतियोगयुतः कृतं॥३॥ तदारभ्य महायोगी दुर्वासाः
शांतिकारकः॥ क्रोधहीनः स्वभावः स संजातो ब्रह्मवित्तमः॥४॥ एतदत्रिसुतानां ते चरित्रं कथितं मया॥
यथा दक्षाय भो विप्र मुद्गलेन प्रकाशितं॥ अधुना कथयिष्यामि स्वायंभुवस्य संततेः॥ चरित्रं सर्वपापघ्नं कथितं मु
द्गलेन तत्॥६॥ शौनक उवाच॥ कथं मुद्गलविप्रेण कथितं तस्य धीमतः॥ चरित्रवद सर्वं मे यथा दक्षेण
संश्रुतं॥७॥ सूत उवाच॥ शापमोहितदक्षस्तु श्रुत्वा त्रेयसमुद्भवं॥ चरितं योगरूपं समुद्गलं पुनरब्रवीत्॥

॥८॥ दक्ष उवाच॥ धन्यो त्रिर्यस्य पुत्रा वै गाणपत्या महौजसः॥ योगिनो योगदातारः श्रुतं तेषां चरित्रकं॥९॥
अधुना वद मे ब्रह्मन्सृष्टिमार्गं पुरातनं॥ स्वायंभुवमनोः पुत्रौ चक्रतुः किं महौजसौ॥१०॥ सूत उवाच॥ दक्षस्य
वचनं श्रुत्वा हर्षयुक्तेन चेतसा॥ जगाद तं महायोगी मुद्गलः परमार्थवित्॥११॥ मुद्गल उवाच॥ स्वायंभुवम
नोः पुत्रौ संजातौ पूर्णधार्मिकौ॥ प्रियव्रतोत्तानपादौ नाम्ना ख्यातौ प्रजापतेः॥१२॥ प्रियव्रतो वनं ज्येष्ठो ज
गाम साधने रतः॥ देहादिनश्वरं मत्वा भूत्सखिन्नो मनुस्ततः॥१३॥ जगाम नारदस्तत्र सहसा तं मनुर्जगौ॥ पु
त्रं प्रियव्रतं विप्र बोधयस्व विधानतः॥ तथेति नारदस्तत्र ययौ प्रियव्रताश्रमे॥ तं दृष्ट्वोत्थाय राजर्षिः प्रणना
म कृतांजलिः॥१५॥ स्वकीयाज्ञावशं पुत्रमासने वीक्ष संस्थितं॥ तं जगाद महातेजा नारदो राजसत्तमं॥१६॥
नारद उवाच॥ शृणु पुत्र महाभाग प्रियव्रत महामते॥ देहादिनश्वरं सर्वं त्वयाज्ञातं महाद्भुतं॥१७॥ तथापि
नरदेहोयं मृणैस्त्रिभिः समन्वितः॥ नरदेहकृतं कर्म तन्मूलं सकलं जगत्॥१८॥ सर्वेषामन्नरूपोयं नरदेहो
न संशयः॥ तेषां पोषणमत्यंतं कर्त्तव्यं देहधारिणा॥१९॥ स्वधर्मपालनेनैव वर्णाश्रमविधानतः॥ देहिना

कृतपुण्येनान्नेनविश्वंप्र[illegible]पोषितं॥२०॥यज्ञादिभिर्ऋणंदैवंश्राद्धादिभिश्चपैतृकं॥पुत्रोत्पादनमार्गेणमानु
ष्यंनाशमेष्यति॥२१॥अधुनाऋणयुक्तस्त्वंवनंकस्मात्समागतः॥कुरुराज्यंमहाभागस्वधर्मनिरतोमुदा॥
॥२२॥पुत्रेषुराज्यमात्मीयस्थापयित्वाचशाश्वतं॥पश्चात्त्वंवनमाविश्ययोगाभ्यासरतोभवत्॥२३॥मु
द्गलउवाच॥नारदस्यवचःश्रुत्वाहर्षितोराजसत्तमः॥उवाचतंमनोःपुत्रःप्रांजलिश्रद्धयान्वितः॥२४॥प्रिय
व्रतउवाच॥स्वामिन्विज्ञप्तुमिच्छामिवदमेत्वंमहामते॥केनोपायेनयोगींद्रब्रह्मभूतोभवेन्नरः॥२५॥ना
रदउवाच॥शृणुपुत्रप्रवक्ष्यामिब्रह्मभूतपदप्रदं॥मार्गंतंसाध्यशांतिंचलभतेमानवःस्वयं॥२६॥गणे
शंयोगरूपंतंज्ञात्वायोब्रह्मनायकं॥ब्रह्मभूतोभवेज्जंतुःसाधनेनमहामते॥२७॥गणशब्दःसमूहस्य
वाचकःपरिकीर्त्तितः॥समूहायोगरूपाश्चबाह्यांतराद्यभेदतः॥२८॥अन्नानांसकलानांवैसमूहेन्नमयं
सुतः॥कथितंब्रह्मवेदेयंदेवंनानागणास्मृताः॥२९॥तेषांपतिंगणेशानंतंज्ञात्वायोगिनःपुरा॥शांतिंप्रा
प्ताविशेषेणशांतियोगमयंपरं॥३०॥अस्माकंकुलदेवत्वंसंप्राप्तोसौगजाननः॥तमाराधययत्नेनततः

क्षेमंभविष्यति॥२१॥गणेशेगणराजंतंसंपूज्यभक्तिभावतः॥वरंवव्रेसभूतश्चभक्त्यास्माकंपितामहः॥२२॥
तस्यपुत्राःसमाख्याताब्रह्माविष्णुर्महेश्वरः॥तस्यैःशक्तिश्चपंचैतेनंसमाराध्यमोगिनः॥२३॥ततस्तेशं
निमसंतंप्राप्ताविश्वेश्वराःसुत॥ब्रह्मणश्चवयंपुत्राभजामस्तंगणाधिपं॥२४॥तमोयोगींद्रमुख्याश्च
वयंजाताःप्रियव्रत॥सर्वज्ञानसमापुक्तावंधदीनाविप्रोषतः॥२५॥तथात्वमपिराजेंद्रगणेशंभजभावनः॥
तवातःसुलभंसर्वंभविष्यतिसरानघ॥२६॥ततएकाक्षरंमंत्रंददौतस्मैमहामुनिः॥गणेशाराधनंसर्वं
बोधयामासयत्नतः॥२७॥एतस्मिन्नंतरेतत्रब्रह्मणासदृसागतः॥स्वायंभुवोमनुःसुत्रस्तोदृष्ट्वाप्रण
तोसुतौ॥ब्रह्मणानोदितैस्तैतंपुनःपौत्रःप्रियव्रतः॥मनुनासदृराजर्षियोत्वनगरेतदा॥२९॥स्वायंभु
वःस्वयंपुत्रोराज्येस्थाप्यवनंययौ॥योगेनाराधयामासगणेशंभक्तिसंयुतः॥३०॥क्रमेणयंचभूमीनांवि
नस्परमागतः॥सकाचित्तमहायोगीब्रह्मभूतोबभूवह॥३१॥शांतियोगंसमाश्रित्यब्रह्मलोकंजगा
मह॥तत्रैवसंस्थितोभूत्वागणेशंभजनेरतः॥३२॥प्रियव्रतःस्वयंराजापालयामासमेदिनीं॥धर्मेणमि

तिदानेनत्यागेनयशआर्जयत्॥४३॥स्वस्वधर्मरताःसर्वेजनावर्णाश्रमान्विताः॥मुदिताःसत्यशीलाश्चरा
ज्यंस्थितेप्रियव्रते॥४४॥ ॥इतिश्रीमदांत्ये० प्रियव्रतराज्यप्राप्तिर्नामनवमोध्यायः॥९॥मुद्गलउ०॥ ॥
प्रियव्रतस्यपुत्राश्चदशोत्पन्नामहौजसः॥तेजस्विनोधर्मशीलाविख्यातावलवत्तराः॥१॥आग्नीध्रइध्म
जिह्वश्चयज्ञबाहुस्तथामहान्॥वीरोहिरण्यरेताघृतपृष्ठःसवनःपरः॥२॥मेधातिथिर्वीतिहोत्रःकविः
पितृसमाबभुः॥कविःसवनवीरौचनराज्येदधिरेमतिं॥३॥सप्तद्वीपेश्वरास्तेत्रसप्तपुत्राःकृताःपरे॥जंबू
द्वीपेश्वरंपुत्रमाग्नीध्रमकरोन्नृपः॥४॥प्लक्षद्वीपेश्वरस्तेनेध्मजिह्वश्चकृतःसुतः॥शाल्मलेशंयज्ञबाहुं
राजानमभिषिक्तवान्॥५॥कुशद्वीपेश्वरंचक्रेहिरण्यरेतसंसुतं॥क्रौंचद्वीपेश्वरंचैवघृतपृष्ठंचकारह॥
मेधातिथिंपतिंचक्रेशाकद्वीपस्यशाश्वतं॥पुष्करेशंसराजानंवीतिहोत्रंचकारह॥७॥ततःप्रियव्रतो
राजावनंययौप्रतापवान्॥नारदाद्योगमास्थायगाणपत्योबभूवह॥८॥अंतेगणेशरूपश्चसंजातोयो
गसेवया॥प्रियव्रतसमोराजानभूतोनभविष्यति॥९॥पुष्करेवीतिहोत्रस्यपुत्रौद्वौसंबभूवतुः॥रमणधा

धातकिनाम्नौमहावीर्यौसुधार्मिणौ॥१०॥रमनेस्यस्मृतंवर्षंतन्नाम्नाचमहात्मनः॥धातकिश्चापिखंडोवैधातकिरु
च्यतेबुधैः॥११॥एकोद्रिमानसाख्यश्चतन्मध्यवलयाकृतिः॥योजनानांसहस्राणिदशोच्छ्रयः समंततः॥१२॥जी
वनंदशसाहस्रंवर्षाणांतत्रविद्यते॥तत्रब्रह्मास्वयंसाक्षात्तिष्ठतिपुष्करस्थितः॥१३॥तंसुरामानवाद्याश्चपूज
यंतिनिरंतरं॥स्वादूदकेनवैदक्षवृतोद्वीपः समंततः॥१४॥षोडशानांचतुःषष्टिःसमुद्रपरमाद्भुतः॥तत्रांतेपर्व
तोरम्योलोकालोकाह्वयात्मकः॥एकत्रलोकसंवासएकत्रलोकवर्जितः॥लोकालोकाचलादत्रप्रकाशः
सूर्यचंद्रयोः॥१६॥तस्मात्परत्रभोदक्षअंधकारःसमंततः॥लोकालोकाचलस्तेनकथितोमुनिभिःपुरा॥
॥१७॥पुष्करेवहवोनद्योमानसाचलसंभवाः॥स्वादूदकाःपुण्यरूपानिर्मलाःसर्वभाविताः॥१८॥तासांज
लस्यपानेनरोगानश्यंतिदुःखदाः॥क्लमःस्वेदादिकंसर्वंभवतिनकदाचन॥१९॥शाकद्वीपेश्वरस्याथसप्त
पुत्रास्तथाभवन्॥पुरोजवोमनोजवःपवमानस्तथापरः॥२०॥धूम्रानीकश्चित्ररेफोबहुरूपोजगद्धरः॥स
प्तखंडाश्चतद्वीपिपर्वताःसप्तमुख्यकाः॥२१॥पुरोजवस्तस्यनाम्नावर्षंप्रथमसंज्ञितं॥मनोजवस्यतन्ना

म्नाखंडमन्यंप्रकथ्यते॥२२॥पवमानस्यखंडंवैपावमानात्मकंततः॥धौम्रानीकंचतुर्थंवैपंचमंचित्ररे
फकं॥२३॥बहुरूपस्यतन्नाम्नावैश्वाधारंचसप्तमं॥पालयामासुरव्यग्राःस्वस्वखंडंप्रजापते॥२४॥
तत्रैवदशसाहस्रंवर्षाणांजीवनंस्मृतं॥नराणांदोषहीनानांसदायौवनशालिनां॥२५॥दधिमंडो
दकाख्येनसंवृतोद्वीपउत्तमः॥तावतामानयुक्तेनयोजनानांप्रजापते॥२६॥द्वात्रिंशल्लक्षविस्ता
रोयोजनानांसमंततः॥द्वीपस्यचनरास्तत्रयजंति वायुमीश्वरं॥२७॥क्रौंचद्वीपस्यविस्तारःषोडशं
लक्षमेवच॥योजनानांसमाख्यातःखंडास्तत्रचसप्तवै॥२८॥पर्वताःसप्ततत्रैवनद्यःसप्तप्रकीर्त्ति
ताः॥अन्यांक्षुद्रस्वरूपाश्चनद्यःसर्वत्रसंस्थिताः॥२९॥घृतपृष्ठसुतास्तत्रसप्तखंडेश्वरास्मृताः॥
स्वस्वनाम्नासमाख्याताःखंडास्तेषांप्रजापते॥३०॥आमोसधूरुहःसप्तघृतपृष्ठःसुधामकः॥भ्राजि
ष्ठोलोहितार्णश्चवनस्पतिरितिस्मृताः॥३१॥एकादशसहस्रंतुवर्षाणांजीवनंनृणां॥यजंत्यापो

मयंतत्रनारायणंसदाजनाः॥३२॥क्षीरोदेनसमंताश्चसंवृत्तोद्वीपआदरात्॥तावद्विस्तारभूतेनश्वेतद्वीपो
पिसःस्मृतः॥३३॥हिरण्यरेतसःसप्तकुशद्वीपपतेःसुताः॥वसुश्चवसुदानश्चदृढरुचिस्तृतीयकः॥३४॥ना
भिगुप्तःस्तुतव्रतःविविक्तोनामदेवकः॥स्वस्वनाम्नाचतेषांवैखंडाःसप्तप्रजापते॥३५॥तत्रैवपर्वताःसप्त
मर्यादागिरयःस्मृताः॥नद्यःसप्तमहावेगाःसुजलादुःखहारकाः॥३६॥दशसाहस्रवर्षाणांजीवनंतत्र
विद्यते॥अष्टलक्षप्रमाणेनयोजनानांकुशद्विपः॥३७॥घृतोदेनावृतःसम्यक्तावदायामरूपि
णा॥सर्वतस्तत्रदेवेशंहव्यवाहंयजंतिते॥३८॥शाल्मलीद्वीपनाथस्ययज्ञवाहोसुताःस्मृताः॥सुरोच
नःसौमनस्योरमणोदेववर्षकः॥३९॥पारिभद्रोआप्यायनोविज्ञातःसप्तमस्मृताः॥तत्तन्नाम्नाचवि
ख्याताःखंडास्तेषांप्रजापते॥४०॥नद्याःसप्तमहावेगाःपर्वताःसप्ततत्रवै॥योजनानांचतुर्लक्षंविस्ता
रस्तस्यसर्वतः॥४१॥सुरोदेनावृतःसोपितावदायामरूपिणा॥नराणांजीवनंतत्राष्टसाहस्रंसमंकि

ल॥४२॥प्लक्षद्वीपेश्वरस्याथेध्मजिह्वस्यसुतास्तथा॥शिवोयवयसश्चैवसुभद्रःशांतक्षेमकौ॥४३॥अमृतो
भयसंज्ञश्चसप्तैतेपरिकीर्त्तिताः॥स्वस्वनामांकिताःखंडास्तेषांतत्रप्रकीर्त्तिताः॥४४॥गिरयःसप्ततत्रैवन
द्यःसप्तमहाबलाः॥नराणामायुषंतत्रपंचसहस्रवर्षकं॥४५॥द्विलक्षयोजनानांचविस्तारस्तस्यसर्वतः॥
इक्षुरसोदकेनैवतावतापरिसंवृताः॥४६॥प्लक्षद्वीपेयजंतेवैसूर्यंधर्मपरायणाः॥वृष्टिसंस्राविणंदेवंते
जोरूपेणसंस्थितं॥४७॥प्लक्षद्वीपादिषुज्ञेयंशाकद्वीपांतिकेषुवै॥वर्णाश्रमविभागेनस्वधर्मसंस्थि
ताजनाः॥४८॥पुष्करेसर्वधर्मज्ञाएकमार्गसमाश्रिताः॥एकवर्णाश्रमस्तत्रसमशीलाःप्रजापते॥४९॥
नतेषुयुगमानंचयुगधर्मस्वभाजनं॥सदासमानकालश्चस्वधर्मस्तादृशस्मृतः॥५०॥नलोभोनचमात्स
र्यंपरस्परहितेरताः॥नरास्तेपुण्यशीलावैस्वदारतोषिणोबभूः॥५१॥कर्मणांफलभोक्तारोद्वीपेषुतेषुशौ
नक॥बभूवुर्भाविकाःसर्वेदेवक्रीडनेरताः॥५२॥स्वस्वद्वीपस्थितंदेवमभजंस्तस्यवैसुखं॥संप्रायुस्तेजनाः

व१

मु॰पु॰
३२

सर्वेसालोक्यादिचतुष्टयं॥ ॥इतिश्रीमदांत्ये॰ द्वीपवर्णनंनामदशमोध्यायः॥१०॥ ॥मुद्गलउवाच॥जंबू
द्वीपेश्वरस्याथनवपुत्राबभूविरे॥नाभिःकिंपुरुषश्चैवतथाहरिरिलावृतः॥१॥रम्योहिरण्मयःकुरुर्भद्रा
श्वःकेतुमालकः॥स्वस्वनाम्नांकिताःखंडास्तेभ्यःपिताददौस्वयं॥२॥एवंदत्वाचसप्तैतेप्रियव्रतसुतास्त
तः॥ययुर्वनंतपस्तप्त्वागाणपत्याबभूविरे॥३॥ययुर्गणेश्वरंधामतदंतेब्रह्मवादिनः॥पुनरावृत्तिशून्यं
यद्योगाभेदप्रभावतः॥जंबूद्वीपस्यविस्तारएकलक्षंसमंततः॥योजनानांतथादक्षलवणोदेनसंवृतः॥
॥५॥तत्रमध्येमहाशैलोमेरुर्हेममयःशुभः॥नानाधातुविचित्रांगोनानौषधिसमन्वितः॥६॥नदीभिः
सुजलाभिश्चयुतोसौकनकाचलः॥गुहाभिश्चयथादक्षनानाजंतुसमन्वितः॥७॥लक्षयोजनउच्छ्रे
द्यस्तस्यप्रोक्तोमहात्मनः॥षष्टिसहस्रमत्यंतंयोजनानांप्रमाणतः॥८॥बहिःस्थितःस्तथाद्वात्रिंशत्स
हस्रमधःस्थितः॥अष्टौसहस्रसंख्यैश्चयोजनानांसमंततः॥९॥अधऊर्ध्वविभेदेनस्थितोसौकन

रामः
३२

काच्चलः॥पद्माकारस्वरूपेणभूमिमध्येस्थितोबभौ॥२०॥पद्मपत्रसमानेनह्याकारेणव्यवस्थिताः॥पर्वताः
सर्वतस्तस्यनानाधातुमयोबभुः॥२१॥तेषुसर्वत्रदेवानांगुह्यकानांचपक्षिणां॥योगिनांरक्षसांचैवसिद्धानां
चमहात्मनां॥२२॥नागेंद्राणांमुनींद्राणांगंधर्वाणांप्रजापते॥पिशाचानांचभूतानांनिवासाअद्भुताब
भुः॥२३॥उद्यानानिविचित्राणिदेवक्रीडनकानिच॥जराशोकहराणीवजलानिसर्वतोबभूः॥२४॥कै
लासाद्यष्टशैलेंद्रादिक्षुतस्यव्यवस्थिताः॥तेषुरुद्रादिदेवेंद्रावसंतिदिगिशाःसुखं॥२५॥मध्यस्थानं
महारम्यंब्रह्मणःपरमेष्ठिनः॥इत्यादिसर्वदेवानांसुखदःसगिरिर्बभौ॥२६॥तस्यदक्षिणभागेचद्वीप
खंडास्त्रयोभवन्॥उत्तरेचतथाखंडास्त्रयस्तस्यप्रकीर्त्तिताः॥२७॥पूर्वपश्चिमभागेद्वौवर्षौतस्यहिधीमतः
॥मध्येसमंततोवर्षएकस्तस्यप्रजापते॥२८॥एवंखंडाःसमाख्याताःनवद्वीपेचमध्यमे॥हिमाचलादय
स्तेषुमर्यादागिरयःस्मृताः॥२९॥द्विसहस्रंसमुच्छ्रेधायोजनानांप्रजापते॥अष्टौचैवप्रविस्तारामहाशै
लाःसमंततः॥३०॥सहस्रंयोजनानांचनवखंडस्यविस्तरः॥प्रत्येकंभिन्नभावेनतेषुलोकावसंतिच॥३१॥

वर्षेषुपर्वतास्चैवनद्योनानाविधाःस्मृताः॥तत्रसर्वेजनादक्षसंतिसुखभोगिनः॥२२॥अजन्माभविहीनाश्चखं
डाअष्टोप्रकीर्तिताः॥तेषुस्वाभाविकीसिद्धिःस्थिरभावेनसंस्थिताः॥२३॥सदायौवनयुक्ताश्चनरानार्यःसु
रूपिणः॥इवतत्सुखभोक्तारोबभुःसाधुगणान्विताः॥२५॥परस्परेषुसंयुक्ताःसमानकालभोगिनः॥वर्ण
श्रमरताःसर्वेधर्मयुक्तक्रियान्विताः॥२५॥नतत्रयुगधर्मश्चसहासामान्यधर्मिणः॥शीतोष्णादिभवंदुःखं
नास्तिखंडेषुमानद॥२६॥एकादशशतानांचसहस्रंतेषुकुत्रचित्॥शतानिनवदशनिवैत्रयोदशशता
निच॥२७॥शतानिकुत्रचित्संचदशनिचप्रजापते॥शतानिपंचवर्षाणिजीवंतिमानवाःकिल॥२८॥नाभिः
खंडोजनाभश्चरिमाचलसमीपगः॥कर्मात्मकःसमाख्यातःसर्वमान्योबभूवह॥२९॥तत्रकर्माणिकृ
त्वातुनरायांतिसमंततः॥द्वीपेषुसर्वेखंडेषुतथापातालभूमिषु॥३०॥स्वर्गेनुभोगप्राप्त्यर्थंकर्मणांफ
लरूपकं॥तेषुभुक्त्वापुनर्मर्त्यत्रयांतिकर्मार्थमंजसा॥३१॥अथवापापकर्माणिकृत्वात्रैवव्रजंतिते॥नर
केषुनरानार्यःपुनरत्रव्रजंतिच॥३२॥अत्रयोगेनयोगीद्रोभवतिनात्रसंशयः॥गाणपत्यस्वरूपंचलङ्

क्त्यालभतेनरः॥३३॥अतःश्रेष्ठतमःप्रोक्तोवर्षोयंचहिमाह्वयः॥सर्वदातृत्वमापन्नोमान्यस्तेषांप्रजायते॥
॥३४॥भोगेषुस्वल्परूपोयंसर्वेभ्यःकथितोबुधैः॥शीतोष्णादिसमायुक्तोनानारोगसमन्विताः॥३५॥तत्रवर्णा
श्चचत्वारस्तेषांवैव्यभिचारतः॥वर्णानानाविधाप्रोक्ताभिन्नधर्मात्मकाःप्रभो॥३६॥अत्रयुगभवंमानंयुग
धर्मासमंततः॥नराःप्रकृतिभिन्नाश्चस्वार्थादिभिःसमन्वितः॥३७॥बहवोत्रबभुःशैलाविंध्यसह्याद्रिकाद
यः॥तेभ्यःप्रसूतिकानद्योबह्व्यःसर्वत्रसंस्थिताः॥३८॥पुण्यदाःस्नानमात्रेणमिष्टतोयामहामते॥नराः
कर्मकरास्तत्रत्रिविधाचारसंयुताः॥३९॥तीर्थानितत्रदेवानांस्थानानित्वग्रजन्मनां॥तत्सेविभ्योधिकानी
चकर्मफलप्रदानिवै॥४०॥एवमाद्यगुणैर्युक्तोवर्षोजिनाभसंस्थितः॥कर्मणांभरणात्सुज्ञैर्भारतोयंप्र
कीर्त्तिताः॥एतद्भूमंडलंकृत्स्नंकथितंतेसमासतः॥श्रवणात्पठणाच्चापिपापापहरणंभवेत्॥४२॥ ॥
इतिश्रीमदांत्ये॰भूगोलवर्णनंनामैकादशोध्यायः॥११॥ ॥मुद्गलउवाच॥प्रसंगात्सर्वलोकानांवदा

मि संस्थितिं परां॥ स्वर्गाणां तत्र संक्षेपान्मुख्यानां कथयामि ते॥१॥ भूर्ल्लोकोथ भुवर्ल्लोकः स्वर्ल्लोकश्च महोज
नः॥ तपोलोकस्तथा सत्यो लोकाः खंडोद्भवाः स्मृताः॥ अर्यमा चंद्रमा यावत्किरणैरवभासते॥ तावान्भूर्ल्लोक
आख्यातः पुराणेषु प्रजापते॥३॥ अद्भ्यानरैर्भवद्गम्यं तदेव शास्त्रसम्मते॥ भूर्ल्लोकः कथितो दक्षसप्तद्वीपात्म
कः खलु॥४॥ प्रमाणमखिलं यावद्भूर्ल्लोकस्य समंततः॥ तावच्चैव भुवर्ल्लोकः परिमानेन कथ्यते॥५॥ भूर्ल्लो
कात्सूर्यपर्यंतं भुवर्ल्लोकः प्रकीर्त्तितः॥ तस्माच्चाध्रुवपर्यंतं स्वर्ल्लोकः कथितो बुधैः॥६॥ तत्र वायोः समाख्याता नेम
योष्टविधाः प्रभो॥ आवहः प्रवहश्चैव तथैवान्नहवै परः॥७॥ संवहो विवहश्चाथ तदूर्ध्वं च परावहः॥ तथा परिव
हश्चोर्ध्वं वहस्तस्मात्परः स्मृतः॥८॥ भूमेर्योजनलक्षे तु भानोर्यन्मंडलास्थितं॥ लक्षे दिवाकरप्रोक्तं चंद्रमंडल
मास्थितं॥९॥ [illegible] नक्षत्रमंडलं कृत्स्नं तस्माल्लक्षे प्रकाशते॥ ऋषीणां मंडलादूर्ध्वं लक्षमात्रे
स्थितो ध्रुवः॥१०॥ मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः॥ वायुरश्मिध्रुवः सोपि चालयं ज्योतिषां गणं॥
तस्माल्लक्षे ऋषीणां यन्मंडलं च प्रकाशते॥२

॥१२॥ दशयोजनसाहस्रं मंडलं भास्करस्य च॥ तथा द्वादशसाहस्रं मंडलं शशिनः स्मृतः॥१३॥ सूर्याध
स्तात्स्थितो राहूर्दशसाहस्रयोजनः॥ त्रयोदशसहस्रं च मंडलं तस्य कथ्यते॥१४॥ तमोमयं तमस्थानं
पर्वणि गत्यधावति॥ छायया चंद्रसूर्यावाछादयामास वैरतः॥१५॥ देवग्रहणं दक्षकथ्यते शास्त्रवादि
भिः॥ अखिलं तमसा व्याप्तं मंडलं रविसोमयोः॥१६॥ चंद्रस्य षोडशो भागो मंडलं भार्गवस्य च॥ भा
र्गवात्पादहीनं यद्विज्ञेयं च बृहस्पतेः॥१७॥ बृहस्पतेः पादहीनं मंडलं भौमसौरयोः॥ विस्तराच्च तयोः पा
दहीनं बुधस्य मंडलं॥१८॥ तारानक्षत्ररूपाणि हीनानीतु परस्परात्॥ शतानि पंच चत्वारि त्रीणि द्वे योज
नानि वै॥१९॥ सर्वावरनिकृष्टानि ताराणां मंडलानि तु॥ योजनाद्यर्द्धमात्राणि तेभ्यो न्यूनं न विद्यते
॥२०॥ उपरिष्टाच्च यस्तेषां ग्रहायते दूरसर्पिणः॥ सौरांगिरसौ भौमश्च विज्ञेया मंदगामिनः॥२१॥ तेभ्यो
धस्ताच्च चत्वारः पुनरन्ये महागृहाः सूर्यः सोमो बुधश्चैव भार्गवश्चैव शीघ्रगाः॥२२॥ अयने द्वे स

मु॰पु॰ दूर्ध्वं बुधः स्मृतः॥ भौमः सोमसुतादूर्ध्वं तस्मादूर्ध्वं बृहस्पतिः॥२५॥ शनैश्चरस्ततोऽर्ध्वं तस्मा ३+

३४

श्र१ मास्थाय भानुरतिसर्वदा॥ प्रशूं सर्वग्रहात्स र्वाधस्तात्प्रसर्पति॥२३॥ विस्तीर्णं मंड
लं दत्वा तस्योर्ध्वे च इतिः शशी॥ नक्षत्रं मंडलं कृत्स्नं सोमादूर्ध्वं प्रसर्पति॥२४॥ नक्षत्रे
भ्यः कविश्चोर्ध्वं तस्मात्सप्तर्षिमंडलं॥ ऋषीणां चैव सप्तानामूर्ध्वं ध्रुवो व्यवस्थितः॥
थ४ २६॥ नवयोजनसाहस्रो भास्करस्य रथः स्मृतः॥ इसीदंडस्तथैवास्य द्विगुणो च प्रजायते॥२७॥ ल
खं५ क्षप्रमाणमक्षश्च ध्रुवाधारेण संस्थितः॥ द्वितीये क्षे ततश्चक्रं संस्थितं मानसाचले॥२८॥ च
क्रं राशिमयं तस्य द्वादशारं प्रकीर्त्तितं॥ हयाश्छंदोमयास्तस्य सप्त गायत्रीमुख्यकाः॥२९॥
मानसोपरि माहेंद्रि प्राच्यां दिशि महापुरि॥ दक्षिणे धर्मराजस्य वरुणस्य च पश्चिमे॥३०॥ उत्त
रे च कुबेरस्य तन्नामानि निबोधमे॥ प्रमरावतिसंयमनी सुखा चैव विभाक्रमात्॥३१॥ दक्षि
णायणमासाद्य क्षिप्रक्षिप्रः प्रसर्पति॥ पदोत्तरगतो भानुः क्षिप्रश्चैव सर्पति॥३२॥ ज्योतिषां राम

३४

चक्रमादायदेवदेवप्रजापतिः॥उदयंचमहेंद्रस्यनगर्यांसप्रकाशते॥३३॥यमपूर्यांचमध्याह्नेसायाह्ने
वरुणस्यच॥निशामध्येचकौवेर्यामेवंचरतिभास्करः॥३४॥उदयास्तमनेनासंसर्वकालसमाम
गः॥अशेषासुदिशास्वेवंसर्वदाविदिशासुच॥३५॥कुलालचक्रवल्लोकेषुभ्रमतिदिनेश्व
रः॥स्वस्वबोधसमानेनभिन्नंकालंप्रकाशयन्॥३६॥करोत्यहस्तथारात्रिःकिरणैःस्थापयन्प्रजाः
॥दिवाकरकरैरेतत्पूरितंभुवनत्रयं॥३७॥जलंस्थलंनभःसद्भिर्लोकानांस्थानमुत्तमम्॥आदित्यं
मूलमेतच्चत्रिविधंनात्रसंशयः॥३८॥भवत्यस्माज्जगत्कृत्स्नंसदेवासुरमानुषं॥मध्यभागेत
दाधारमंतत्रप्रतिष्ठितं॥३९॥ब्रह्मविष्णुमहेशेंद्रंचंद्रताराग्निनागगं॥विधुविप्रादिकानां
यस्तेजस्तद्रविसंभवं॥४०॥द्युतिर्द्युतिमतांकृत्स्नात्तत्तेजःसार्वलौकिकं॥विभज्यस्वय
मेवेशःक्रीडतिस्मदिवाकरः॥४१॥सर्वात्मासर्वलोकेशोगणेशांसःप्रभाकरः॥मूलंत्रि
भुवनस्यायंकर्मरूपीचदैवतं॥४२॥ ॥इतिश्रीमदांत्ये सूर्यमंडलवर्णनंनामद्वादशो

ध्यापः॥०१२॥०॥मुद्गल उवाच ॥सूर्यकलांशसंभूतादशान्येचभानवः॥ [illegible] द्वादशे
षुहिमासेषुतपंतिलैरतिस्थिताः॥१॥ [illegible]
[illegible] सरयोधिष्ठितोदेवैरादित्यैर्मुनिभिस्तथा॥गंधर्वैरप्सरोभिश्चयामणीसर्पराक्षसैः॥
२॥धातार्यमाथमित्रश्चवरुणःशक्रसंज्ञितः॥विवस्वानथपूषाचपर्जन्यश्चांशुरेवच॥३॥भ
गस्त्वष्टाथविष्णुश्चद्वादशेतेचभानवः॥तपंतिरथसंस्थावैवसंतादित्रमेणच॥४॥पुलस्त्यः
पुलहोथात्रिर्वसिष्ठश्चांगिरांभृगुः॥भरद्वाजोगौतमश्चकश्यपःक्रतुरेवच॥५॥जमदग्निः
कौशिकोथमुनयोब्रह्मवादिनः॥स्तुवंतिपुरतोदेवंछंदोभिर्विविधैस्तथा॥६॥रथकृच्चरथोजा
वैरथचित्रंस्वबाहुकः॥रथस्वनोथवरुणःसुषेणःसेनजित्तथा॥७॥तार्क्ष्यश्चारिष्टनेमिर्वैरथ
जित्सत्यजित्तथा॥ग्रामण्योदेवदेवस्यकुर्वतेभिस्वसंग्रहः॥८॥अथहेतिःप्रहेतिश्चपौ
रुषेयोवधस्तथा॥सर्पोव्याघ्रस्तथाव्याधोवातोविदुर्दिवाकरः॥९॥ब्रह्मोपतश्चभोद[illegible]

हयज्ञोपेतःस्तथापरः॥राक्षसःप्रवराएतेप्रयांतिपुरतःक्रमात्॥१०॥वासुकिःकंबलीरोथत
क्षकोरंभमुख्यकः॥एलापत्रःशंखपालस्तथैरावतसंज्ञितः॥११॥धनंजयोमहापद्म
स्तथाकर्कोटकोपरः॥कंबलाश्वतरौचैववहत्येनंप्रभाकरः॥१२॥नागाद्वादशमासेषुय
थाक्रमंप्रजायते॥तुंबरुर्नारदोहाहाहूहूर्विश्वावसुस्तथा॥१३॥उग्रसेनोवसुरुचिरवि
था५ वसुस्तथापरः॥चित्रसेनस्तथोर्णायुर्धृतराष्ट्रःप्रजायते॥१४॥सूर्यवर्चाद्वादशैतेगंधर्वागायतांपु
रः॥घनस्तनाचरंभावैस्तथान्यापुंजिकस्थली॥१५॥मेनकासहजन्याचप्रम्लिचाथप्रजायते
॥अनुम्लोचाघृताचीचविश्वाचीचोर्वशीपरा॥१६॥अन्याचपूर्वचित्तिर्यादिवाकरंतिलोर्म
॥तांडवैस्तोषयंत्येनंवसंतादिषुचैक्रमात्॥१७॥एवंदेवैवसत्यर्कंद्वौद्वौमासौक्रमेणतु
॥सूर्यमाप्याययंत्येतेतेजसातेजसांनिधिं॥१८॥गृपितेस्वैर्वचोभिस्तंस्तुवंतिमुनयोरविं॥
गंधर्वाप्सरसश्चैनंगेयैर्नृत्यैरुपासते॥१९॥ग्रामणीरक्षभूतानीकुर्वतेभिसुरसंगृहं॥

सर्पावहंति देवेशं यातुधानाः प्रयांति तं ॥ २० ॥ बालखिल्या नयंत्यस्तं परिवार्योदयाद्र
विं ॥ एते तपंति वर्षंति भांति वांति सृजंति च ॥ २१ ॥ भूतानामशुभं कर्म व्यपोहंत्यनुकी
र्तिताः ॥ एते सदैव सूर्येण भ्रमंति दिवि सर्वदा ॥ २२ ॥ विमानेधिष्ठिता नित्यं कामगे वा
तरंहसि ॥ वर्षंतश्च तपंतश्च ह्लादयंत सदा प्रजाः ॥ २३ ॥ गोपायंतीह भूतानि सर्वाण्येते यु
गक्षये ॥ एतेषां रूपमास्थाय सूर्यस्तपति नित्यशः ॥ २४ ॥ अहोरात्रव्यवस्थानां कारणं स
प्रजापतिः ॥ पितृदेवमनुष्यादीन्नित्यमस्थापय द्रविं ॥ २५ ॥ एवमेषो गणेशांशो देवदेवो दिवा
करः ॥ करोति नियतं कालं कालात्मा भगवान्स्वयं ॥ २६ ॥ अन्ये चाष्टग्रहाः प्रोक्ता ध्रुवे बद्धा
भ्रमंति वै ॥ दिवाकरकरैः पुष्टास्तं रविं वातरश्मिभिः ॥ २७ ॥ रथस्त्रिचक्रः सोमस्य कुंदाभ
स्तस्य वाजिनः ॥ वामदक्षिणतो युक्ता दशतेवै क्षपाकरः ॥ २८ ॥ वीथ्याश्च पणनक्षत्रं चरति स
रविर्यया ॥ ह्रासवृद्धिसमायुक्तो ध्रुवाधारेण सर्वदा ॥ २९ ॥ स सोमः शुक्लपक्षे तु भास्क
रेपतः स्थिते ॥ आपूर्यत कलामात्रं सततं तस्य या प्रभा ॥ ३० ॥ क्षीणे पीतं सुरैः सोम

ममाप्याय[illegible]तिनित्य[illegible]॥ एकेनरश्मिनादक्षसुषुम्णाख्येन भास्करः॥३१॥ [illegible] एवं सूर्यस्य वीर्येण सो
ममाप्यायिता तनुः॥ दृश्यते पौर्णमासं स्थः संपूर्णो दिवसक्रमात्॥३२॥ संपूर्णमर्द्धमासेन तं सोमममृ
तात्मकं॥ पिबंति दैवताः सर्वे क्रमेणामृतभोजिनः॥३३॥ ततः पंचदशे भागे किंछिष्टे कलात्मके
॥ पितरश्च परान्हेतं जघन्यं पर्युपासते॥३४॥ पिबंति द्विलवं कालं शिष्टा तस्य कलेतु या॥ स्व
धात्मकमयी पुण्या चंद्रस्य तत्र तत्प्रिया॥३५॥ निसृतं तदमावास्यां गभस्तिभ्यः स्वधामृतं॥ मास
तृप्तिकरं तेषां पितरः संति निर्वृताः॥३६॥ न सोमस्य विनाशः स्यात्सुधा देवैश्च पीयते॥ एवं सू
र्यनिमित्तेस्य क्षपो वृद्धिश्च सर्वदा॥३७॥ [illegible] विनाशः स्यात्सुधा देवैश्च पीयते॥ सोमपुत्रस्य चा
ष्टाभिर्वाजिभिर्वायुवेगिभिः॥ स्यंदनस्तैः सपायुक्तस्तेनासौ याति सर्वतः॥३८॥ भार्गवस्य रथोष्टा
श्वः स्यंदनो हेमनिर्मितः॥ अष्टाभिरपि भौमस्य रथो हेमसुशोभनः॥३९॥ बृहस्पतेरथाष्टाश्वः
स्यंदनो हेमनिर्वृतः॥ [illegible] रथो दृढतरोष्टाश्वो मंदस्यायसनिर्मितः॥४०॥ स्वर्भानोश्च तथा

केतोरथोष्टाभिर्हयैर्वृतः॥ एते नवग्रहाणां वै समाख्याता महारथाः॥ ४१॥ सर्वे ध्रुवा बद्धा वात
रश्मिभिरादरात्॥ ग्रहर्क्षताराधिष्ठानि ध्रुवे बद्धानि सर्वदा॥ ४२॥ भ्रमंति भ्रामयंत्येतान्
सर्वाशानिलरश्मिभिः॥ इदमतो ध्रुवाधारं ज्योतिश्चक्रं प्रजायते॥ ४३॥ श्री॥ इति श्रीमदा
त्ये० नवम० नवग्रहरथादिवर्णनं नाम त्रयोदशोध्यायः॥ १३॥ श्री॥ मुद्गल उ०॥ ध्रुवादूर्ध्वं मह
र्ल्लोकः कोटीयोजनदूरतः॥ कल्पाधिकारिणस्तत्र वसंति सुखभोगिनः॥ १॥ जनलोको मह
र्ल्लोकः कोटियोजनदूरतः॥ [illegible] सनकाद्याः सुता
स्तत्र त्र्यसरेणुविमानगाः॥ २॥ जनलोकात्तपोलोकः कोटियोजनदूरतः॥ अपुनर्भवरूपा च
ब्रह्मणो वसतिः पराः॥ ३॥ सत्यलोकस्तपोलोकात्कोटियोजनदूरतः॥ वैराजास्तत्र वै देवाः स्थि
ता भयविवर्जिताः॥ ४॥ तत्र लोके गुरुर्ब्रह्मा विश्वात्मा विश्वभावनः॥ आस्ते सयोगिभिर्नि
त्यं पीत्वा योगामृतं परं॥ ५॥ वसंति यतयस्तत्र नैष्ठिका ब्रह्मचारिणः॥ व्रतिनस्तपसा सिद्धा याज

काः परमेष्ठिनः ॥ ६ ॥ द्वारं तद्योगिनामेकं गच्छंतां गणकं परं ॥ न तद्वर्णयितुं शक्यं ज्वालामालासमाकुलं ॥ ७ ॥
तस्मादूर्ध्वं निरालंबं विश्वरूपविवर्जितं ॥ सत्यलोकांतमद्वैतं वैराटं रूपमुत्तमं ॥ ८ ॥ पंचकोटिमयं पूर्णं
तस्माद्दशगुणा मही ॥ ब्रह्माकारा च विज्ञेया पंचाशत्कोटिविस्तरा ॥ ९ ॥ विधेः कोटिमये संस्थो योजनानां
प्रजायते ॥ शक्तिलोको निराधारो ज्योतिर्मयविराजितः ॥ १० ॥ तेजपुंजमये दक्षमहामायासमाश्रिते
॥ निष्कामाः शक्तिभक्ता ये तत्र गच्छंति योगिनः ॥ ११ ॥ दशसाहस्रविस्तारे समंताज्जनसंकुले ॥ योज
नानां महाभाग शक्तयस्तत्र संकुले ॥ १२ ॥ स्वतेजसा विनिर्माय पुरुषान्समरूपिणः ॥ तैः समक्रीडने स
क्ताः स्त्रीभावेन जगन्मया ॥ १३ ॥ तस्मात्कोटिचतुष्के च सूर्यलोकः पुरातनः ॥ योजनानां महातेजः
पुंजरूपो विराजते ॥ १४ ॥ निराधारे सदा नित्यं निष्कामास्तत्र यांति वै ॥ शुक्लगत्या महाभागाः साक्षाद्भा
नुनिवासिनी ॥ १५ ॥ अन्ये सूर्यस्य ये भक्ता निष्कामभजने रताः ॥ तत्र गच्छंति ते दक्षभानुतेजःसमप्र
भाः ॥ १६ ॥ तस्यापि विस्तरस्तावान्शक्तिलोकसमेन वै ॥ तत्र क्रीडति यो भानुः पुरुषाकारसंज्ञितः ॥ १७ ॥

स्ववामांगाच्च निर्माय मायाकर्ममयी प्रभुः॥ संज्ञांतया सरमैपुरुषो ब्रह्मसंज्ञितः॥१८॥ योजनानां
ततः कोटिष्वष्टासु विष्णुसंस्थितः॥ सदा विकुंठवादासीय आनंदमयमूर्त्तिमान्॥१९॥ विस्ता
रस्तस्य लोकस्य वक्ष्यामि ते प्रमाणतः॥ अप्रतं योजनाकारः समंताच्च विराजते॥२०॥ निराधारे
सदा नित्ये ज्योतिरूपमये परे॥ तत्र गच्छंति निष्कामा वैष्णवा भक्तितत्पराः॥२१॥ सदानंदसमायु
क्तास्तत्र नित्यं सुखे रताः॥ जनास्तिष्ठंति नार्यश्च स्वेच्छागतिविहारिणः॥२२॥ वामभागात्स
निर्माय भोगलक्ष्मीः प्रजापते॥ दक्षणांगात्तथा मुक्तिलक्ष्मीस्ताभ्यां प्रक्रीडति॥२३॥ सदानंदम
यः साक्षाद्विष्णुः परमधर्मवित्॥ द्विविधं मायया दत्वा खेलति स्वेच्छया विभुः॥२४॥ तस्मात्षोड
शसंख्यासु योजनानां च कोटिषु॥ दूरे शंकरलोकश्च कैलासः परमाद्भुतः॥२५॥ निराधारे सदा
लोके मोहहीनसुखप्रदे॥ निष्कामाः शिवभक्ताश्च तत्र गच्छंति मानवाः॥२६॥ ज्योतिर्मयस्व
रूपे च सदा कल्याणदायके॥ लोके तत्र स्वयं शंभुर्वसति स्वेच्छयात्मकः॥२७॥ अप्रतं योजनाका

गो

रंसोपि विस्तारतोविधे॥ तत्रयोगेनयोगज्ञः शंकरः क्रीडतिप्रभुं॥२८॥ वामांगंप्रदात्याकारंदक्षिणां
गंप्रजापते॥ पुरुषाकारमेतस्यशंकस्यमहात्मनः॥२९॥ संयोगउभयस्तस्यकायातस्यापतिःशिवः
॥नारायणमयीशक्तिरर्द्धनारीनरोह्यतः॥३०॥ साशक्तिस्तस्यदेवस्यत्रिधारूपीधराबभौ॥ द
दा४ ताभिन्नाशिवेनापिजगदानंदरूपिणी॥३१॥ तयाव्यक्तोमहादेवोमोहहीनःस्वभावतः॥ क्रीडंतीसत
तंदक्षमायाधारःस्वलोकगः॥३२॥ तस्मात्परंपृथिव्यास्तुब्रह्मस्वानंदसंज्ञितं॥ स्वपदान्नपरंकिं
चिद्वेदादिषुप्रतिष्ठितं॥३३॥ स्वसंवेद्यंहियत्ब्रह्मचतुर्द्धातद्बभौस्वयं॥ चतुर्णांतत्रसंयोगस्तन्म
यःकथितोबुधैः॥३४॥ अव्यक्तंशिवसंज्ञंचब्रह्मनिर्मोहरूपकं॥ तस्मात्समंतथाब्रह्मवैष्णवैः
परिकीर्तितं॥३५॥ तस्मादात्मस्वरूपंयत्सूर्याकारंचतत्स्मृतं॥ तस्मादसंन्मयंब्रह्मशक्तिरूपेण
संस्थितं॥३६॥ तेषामभेदसंप्राप्तिःस्वानंदःपरिकीर्त्तितः॥ एवंतत्वेषुसर्वेषुस्वस्वस्वानंदउच्य
ते॥३७॥ ब्रह्मनानाविधंप्रोक्तमाकाशादिवभेदतः॥ क्रमार्थंतत्रस्वानंदःस्वमहिम्निस्थितेभ

त्वा

वत्॥३८॥अंतेपूर्णत्वमापन्नेसाक्षाद्गुणपतेःस्मृतः॥स्वानंदः [illegible] स्थितेसर्वसंयोगेसमाधिःपूर्व
उच्यते॥३९॥स्थाने स्थानेनिजानंदेगणेशःसंस्थितःस्वयं॥कलांशेनविहारार्थंसर्वेषांसर्वसिद्ध
ये॥४०॥एवमूर्ध्वस्थलोकायेकथितास्तेप्रजापते॥अतिसंक्षेपभावेनश्रवणात्सर्वकामदाः
॥४१॥श्री॥इतिश्रीमदांत्ये॰ऊर्ध्वलोकवर्णनंनामचतुर्दशोध्यायः॥१४॥मुद्गल उ॰॥अतलंवि
तलंचैवसुतलंचतलातलं॥महातलंरसातलंचपातालंसप्तमंस्मृतं॥१॥अतलंशामवर्णंचभूमेरध
ःसुसंस्थितं॥अयुतेयोजनानांवैविस्तारोलक्षयोक्षनः॥२॥मयपुत्रेणसंयुक्तंतथानमुचिपूर्वकैः॥
तथान्यैर्विविधैर्नागैरतलंशोभितंप्रभो॥३॥वितलंश्वेतवर्णंचतस्मादधस्तथास्मृतं॥अयुतयोजनेषु
तद्विवरमिवसंस्थितं॥४॥तत्रनागासुराश्चैववसंतिसुखभोगिनः॥कंबलःशंकुकर्णश्चहय
ग्रीवश्चजंभकः॥५॥सुतलंपीतवर्णंतत्तद्वदधःप्रतिष्ठितं॥तत्रैववैनतेयाद्विपक्षिणोदैत्यपोबली॥६
॥कालनेम्यादयश्चान्येनानादैत्याःस्थितासुखं॥नागाश्चभयसंहीनावसंतितेविहारिणः॥७॥त

लातलं तथा ज्ञेयं शार्करं तत्र वासिनः ॥ मयासुरादयश्चैव बाणांधकमुखाः परे ॥ ८ ॥ वसंति सुखभा
वेन नागा ये विगतज्वलाः ॥ कालकेया महादेहा निवातकवचस्तथा ॥ ९ ॥ महातलं दाल्लवर्णं तत्र त
ति ३ क्षकपन्नगाः ॥ अन्ये च बह्वो नागा वसंति सुखभोगिनः ॥ १० ॥ हिरण्यपुरधि[illegible]श्च दैत्या अन्ये सह ष्ठा ३
स्रशः ॥ देवानां भयमुत्सृज्य निवसंति प्रजापते ॥ ११ ॥ रसातलं शैलमयं तद्वदधः स्थितं महत्
॥ वासुकेः प्रमुखैर्नागैर्दैत्यैर्नानाविधैस्ततं ॥ १२ ॥ विवरे सर्वशो भाद्ये नानासुखप्रदे परे ॥ त
त्र तेजस्विनस्तीक्ष्णा विषोग्राः प्रवसंति वै ॥ १३ ॥ पातालं नीलवर्णं तत्तस्मादधः प्रतिष्ठितं
॥ तत्र स्थानं च शेषस्य कार्यार्थं संकृतं तदा ॥ १४ ॥ तत्र दैत्यासुरा नागास्तं सदा पर्युपासते ॥ भक्ति
युक्ता विचेकेन नागराजं महौजसं ॥ १५ ॥ पातालविवरेष्वत्र ग्रहा नानाविधाकृताः ॥ वनानि च
तथा ग्रामा नगराणि प्रजापते ॥ १६ ॥ विचित्रभोगयुक्ताश्च वृक्षा नाना[illegible]वि[illegible]नि ध्या २
च ॥ मंदिराणि प्रभावंति सरांसि सोत्पलानि च ॥ १७ ॥ तत्र स्वर्गसमं दक्षभोगं कुर्वंति जंतवः ॥

वासुकिप्रमुखाः सदा ॥ असुराश्चैव प्रल्हादमुखाः सैव परायणाः ॥२४॥ उपासंति विनिलास्तं ६॥ +

हृष्टपुष्टजनाः सर्वे युंजंति तवषेण जीवति ॥१८॥ अपारायुः समायुक्ता महातेजस एव ये ॥ देवादी-
नां सुदुर्धर्षाः वसंति छंदचारिणः ॥१९॥ तस्मादधः सहस्राणि योजनानि प्रजापते ॥ त्रिंशत्त
त्र स्वयं शेषः सदा तिष्ठति नागतः ॥२०॥ गणेशभक्तिसंयुक्तो गणेशांशसमुद्भवः ॥ विष्णोः क
लावतारश्च कालरुद्रस्तथा स्मृतः ॥२१॥ सहस्राननएकोसौ तेनानंतः प्रकीर्तितः ॥ ब्रह्म
णो ॥ यस्य विषभवाज्वाला दहंति सकं जगत् ॥ २२॥ मृत्युवर्जित एकोसौ महाभोगो महा
बलः ॥ ब्रह्मणो दिवसांते वैलयं कृत्वा स्वयं स्थितः ॥२३॥ अभजं नागराजं स्तेन तथान्ये ना
गपन्नगाः ॥ न नाम कार्यसिध्यर्थमनंतं भक्तितत्पराः ॥२५॥ कच्छपस्य ततोधस्ताद्विष्णोश्चैवा
वतारिणः ॥ स्थानं सहस्र एकस्मिन्योजनानां स्थितं प्रभो ॥२६॥ तत्र त्वं वरुणाद्याश्च सेवंते भा
वतत्पराः ॥ साक्षात्कर्मस्वरूपश्च नारायणमनामयं ॥२७॥ योजनानां ततोधस्तात्सहस्रे संस्थि
तं स्वयं ॥ वराहरूपधारी च विष्णुः परपुरंजयः ॥२८॥ तं धरित्रिमुखाः सर्वे सेवंते भक्तित

त्पराः॥ महादेवं करालास्यं स्वभक्तेभ्यो भयप्रदं॥२९॥ शेषाधारमिदं सर्वं कूर्माधारः स वै स्मृतः
॥ कूर्मो वाराहरूपस्याधारेण समवस्थितः॥३०॥ वराहश्च निराधारो गणेशं हृदि संस्मरन्॥
स्थितः स्वेन प्रभावेन सर्वाधारः स वै स्मृतः॥३१॥ तस्मादधो रौरवाद्या नरकाश्च समास्थिताः
॥ पातनाकारिणः सर्वे पापीनां शुद्धिकारकः॥३२॥ रौरवश्चैव तामिस्रो महारौरवसंज्ञितः॥ अं
धतामिस्रसंज्ञं च तथा शुचिमुखोपरः॥३३॥ लोहदंडस्तप्तवालुकस्तथा खड्गपत्रकः॥ ला
लामुखः कृमिभक्ष इत्याद्या बहवः स्मृताः॥३४॥ नरकेषु प्रपच्यंते पापकारिण एव च॥ एता
वान्ब्रह्मगोलिः ससंक्षेपेण निरूपितः॥३५॥ विस्तरान्नैव शक्यश्च वर्णितं वै प्रजापते॥ शाप
मोहस्य वेगेन तत्वभ्रांतिः समागता॥३६॥ गणेशाराधनेनाद्य भ्रांतिनाशो भविष्यति॥ तदा
त्वं तत्वतः सर्वं ज्ञास्यति नात्र संशयः॥३७॥ वरो सर्वेषु सामान्यं ब्रह्मांडेषु बभौ जगत्॥ अष्ट
वरणयुक्तेषु गुणेशाधारकेषु वै ३८॥ इदं गणपतेरूपं ब्रह्मांडात्मकसंस्थितं॥ कथितं ते समा

गणपत्यामहाभागाः सर्वभेदविवर्जिताः ॥४॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ४॥

सेनसर्वसिद्धिप्रदम्मया ॥३९॥ यः शृणोति नरो भक्त्या पठति तस्य सर्वदं ॥ भुक्तिमुक्ति
करं भाविपापकंचुकनाशनं ॥४०॥ श्री ॥ इति श्रीमहांत्ये पातालवर्णनं नाम पंचद
शोध्यायः ॥ श्री ॥ मुद्गल उवाच ॥ प्रियव्रतात्मजास्यासीदाग्नींध्रस्य महासुतः ॥ ना
भिस्तस्याभवत्पुत्रो [illegible] ऋषभो यज्ञकर्मणि ॥१॥ यज्ञरूपं स्वयं विष्णुः कलारूपे
ण देहभृत् ॥ पुत्रभावसमायुक्तः स्थितस्तस्य स वेश्मनि ॥२॥ तस्य पुत्रशतं जज्ञे भरता
ग्रं प्रजापते ॥ एकाशितिश्च पुत्रा वै ब्राह्मणास्तपसाभवत् ॥३॥ नवयोगिन एवान्ये भवस्त
त्र कलायनः ॥ आविर्होत्रोपद्रुमिलश्चमसः करभाजनः ॥५॥ सदा योगधरा मुख्या ऊर्ध्व
रेतस एव च ॥ सर्वगाः सम्मान्या भ्रमंति भुवनेषु च ॥६॥ नव तत्र च राजानो जंबुद्वीपप्र
जापते ॥ खंडेषु तेषु मुख्यो वै भरतो ज्येष्ठपुत्रकः ॥७॥ सभ्रातॄणां नवानां वै सम्राड्भावेन सं
स्थिताः ॥ एवं विभज्य राज्यं स्वमृषभश्च वनं ययौ ॥८॥ तत्र नानातपः कृत्वा क्रमेण सव

राम

भूवच ॥ अवधूतो महाभागो योगमभ्यस्य योगवित् ॥ नानायोगविभेदेन नानाभूमिं विशोध
यन् ॥ जडोन्मत्तपिशाचादि ततः सहजसंस्थितः ॥ १० ॥ सहजं शांकरं ब्रह्ममोहहीनं चतुर्थकं ॥ स्वाधी
नं नेतिरूपं यदव्यक्तं तेन संश्रितं ॥ ११ ॥ तेनासौ शांभवो जातः शिवमार्गप्रकाशकः ॥ यत्र तत्रा चर
द्योगी जनानां बोधयन् शिवं ॥ १२ ॥ ततो योगेन तत्रैव स्वाधीनं ब्रह्मदुष्टकं ॥ दृष्ट्वा शांतिं परित्यज्य वि
५म स्मितः प्रबभूव ह ॥ १३ ॥ ब्रह्माणि तत्परा धिनं स्वाधीनं वा कदाचन ॥ शिवः स्वाधीनरूपोयं न यो
गींद्रमतो भवेत् ॥ १४ ॥ एवं विचार्य विक्षेपाच्छंकरालयमाययौ ॥ तं प्रणम्य स्थितो योगी शिवे
न मानितो भृशं ॥ १५ ॥ तत्र स्थिता महाभागा योगिनः शिवशिष्यकाः ॥ गाणपत्याः सतां दृष्ट्वा वि
स्मितो मानसे भवत् ॥ १६ ॥ ततो वसरमासाद्य शिवं नत्वा कृतांजलिः ॥ जगाद तं स योगींद्रं भ
क्तियुक्तेन चेतसा ॥ १७ ॥ ऋषभ उ० ॥ नमस्ते शंकराय एव नमस्ते योगरूपिणे ॥ नमस्ते भगदाधा
र ब्रह्माधिपतये नमः ॥ १८ ॥ शांतियोगं वदस्वामीन्पूर्णशांतिप्रदायकं ॥ दासोहं ते धुना शिष्यो मह्यं दे

वदयानिधे ॥१९॥ सहजान्नपरं ब्रह्ममया ज्ञातं विवेकतः ॥ तत्र स्वानंदतादृष्टा तया शांतिर्गता च
मे ॥२०॥ मुद्गल उवाच ॥ ऋषभस्य वचः श्रुत्वा शंकरो हर्षनिर्भरः ॥ जगाद तं महाभक्तं पूर्णया श्रु
पतं वचः ॥२१॥ श्रीशिव उ॰ ॥ त्वया पृष्टं महायोगिंस्तारकं योगिनामतं ॥ कथयामि महत्प्रीत्या शृ
णुष्वैकाग्रमानसः ॥२२॥ शांतियोगात्मकः साक्षाद्वेदेषु कथितः पुरा ॥ गणेशो योगरूपाख्यो यो
गिभिः सेवितः सदा ॥२३॥ तस्मात्सर्वं समुद्भूतं तदाधारेण संस्थितं ॥ जंत इदं तदाकारं योगेन
भवति प्रभो ॥२४॥ सामवेदे प्रकथितं शृणु वेदरहस्यकं ॥ येन त्वं शांतिसंयुक्तो भविष्यसि न
संशयः ॥२५॥ मनोवाणिमयं सर्वं दृश्यादृश्यस्वरूपकं ॥ गकारात्मकरूपं तत्र ब्रह्मगकारकः ॥२६
॥ मनोवाणिविहीनं च संयोगायोगसंस्थितं ॥ णकारात्मकं रूपं वै णकारस्तत्र संस्थितः ॥२७
॥ विविधानि गकाराच्च प्रसूतानि महामते ॥ ब्रह्मणि तानि कथ्यंते तत्त्वरूपाणि योगिभिः ॥२८
॥ णकाराच्च तथा ब्रह्मणि प्रसूतानि महामते ॥ निरोधात्मकरूपाणि कथितानि समंततः ॥२९॥

गकारश्च नकारश्च नाम्नि गणपते स्थितौ। तदा जानीहि भो योगी ब्रह्माकारौ श्रुतेर्मुखात्॥३०
॥तयोः स्वामी गणेशानो योगरूपेण संस्थितः॥ तं भजस्व विधानेन शांतिमार्गेण पुत्रक॥३१
शा२ ॥मनोवाणीमयं सर्वं गणेशाकारभावितं॥ मनोवाणिवीहीनं चेदकारं प्रभावया॥३२॥ मनोवाणिम
यं सर्वं मायारूपं प्रकथ्यते॥ मनोवाणीविहीनं यत्तदेव तादृशं मतं॥३३॥ चित्तस्य पंच भूमी
नां प्रकाशककरः स्मृतः॥ तेन चिंतामणिर्नाम जातो सौ गणनायकः॥३४॥ तं भजस्व महायो
गिन्योगाकारेण संस्थितः॥ भूमीनां त्यागमार्गेण चित्तस्य शांतिमाप्स्यसि॥३५॥ गणेशस्तु ग
णेशोयं संयोगायोगवर्जितः॥ मायया भ्रांतिरुत्पन्ना तां त्यक्त्वा सुखमाप्स्यति॥३६॥ इत्युक्त्वा विर
रामायशिवः शिवकरः सतां॥ ऋषभोपि प्रसन्नात्मा तं प्रणम्य ययौ वनं॥३७॥ कथितं शंकरेणै
वतं योगमभ्यसन्स्वयं॥ क्रमेण पूर्णयोगी स जातो शांतस्वरूपधृक्॥३८॥ तथापि गणपं दृष्ट्वा न शा२
मुमोच क्षणं मुनिः॥ तेन तस्य समीपे सौ गणेशानः समाययौ॥३९॥ आगतं गणपं दृष्ट्वा भक्ति

मु.पु.

४३

भावेन पंचितं॥ प्रणनामसप्तसाष्टांगं हर्षगद्गदभाषणः॥ ४०॥ सरोमांचशरीरश्च साश्रुनेत्रो
महायशाः॥ तुष्टावतं गणाधीशं प्रांजलिर्हृष्टमानसः॥ ४१॥ ऋषभउ॥ नमस्ते ब्रह्मरूपा
य गणेशकरुणानिधे॥ भेदाभेदादिहीनाय गणानां पतये नमः॥ ४२॥ निराकाराय नित्याय जग
दाकारमूर्त्तये॥ अनंताय परेशाय परात्परतराय ते॥ ४३॥ आदिमध्यांतहीनाय गुणाकाराय
ते नमः॥ गुणेशाय जगत्स्रष्ट्रे पालकाय हराय च॥ ४४॥ नमो नानावतारायभक्तपालनहेतवे
॥ सुरासुरमयायैव सुरासुरसुपूजित॥ ४५॥ योगाय योगदात्रे च योगाकाराय ते नमः॥ योगा
नां पतये तुभ्यं ब्रह्मणां पतये नमः॥ ४६॥ सर्वादये गणाध्यक्ष सर्वपूज्याय ढुंढवे॥ सर्वांते ह्य
वसिष्ठाय विघ्नेशा नमो नमः॥ ४७॥ हेरंबाय निजानंदवासिने सिद्धसेवत॥ सिद्धिबुद्धि
पते तुभ्यं नानाखेलकराय ते॥ ४८॥ धर्मार्थकाममोक्षाणां दायकाय नमो नमः॥ ब्रह्म
भूतकराय ब्रह्मभूतमयाय च॥ ४९॥ किं स्तौमि त्वां गणाधिशयोगशांतिमयं प्रभो॥

रा५

राम

४३

ऋषभं गणनाथं जगाम दक्षतमुत्तमं ॥ शिवशिष्यं शिवप्रज्ञं साक्षाद्दिवसनाशनं ॥ ५३ ॥ ३

यं स्तोतुं न समर्थाश्च वेदाद्याः शिवमुख्यकाः ॥ ५० ॥ तथापि बुद्धिप्रामाण्यमतेन संस्तुतो मया
॥ भक्तिं देहि त्वदीयाम्ये दृढामव्यभिचारिणीं ॥ ५१ ॥ मुद्गल उ० ॥ इत्युक्त्वा निपपातोर्व्यामिदं गृ
ह्य महायशाः ॥ गणेशस्य च तेनापि समुत्थापितः प्रादरात् ॥ ५२ ॥ गणेश उवाच ॥ मदीया भक्ति
रत्यंतं भविष्यत्यचलानघ ॥ स्तोत्रं त्वया कृतं मे तु शांतिदं प्रभविष्यति ॥ ५४ ॥ यं यमिच्छति तं
न्ना ५ तं वेदास्यामि स्तोत्रपाठतः ॥ श्रवणान्नात्र संदेहो भावपूरं मतं सदा ॥ ५५ ॥ इत्युक्त्वांतर्दधे देवो गणे
शो गणवल्लभः ॥ ऋषभस्य सदा शांतो योगी गाणेशतां गतः ॥ ५६ ॥ इदं चरित्रमुख्यं वै यः शृणो
ति नरोत्तमः ॥ ऋषभस्य महापुण्यं पठति तस्य सर्वदा ॥ ५७ ॥ भविष्यति न संदेहो ते ब्रह्मभुव
दायकं ॥ शांतिदं शांतचित्तेभ्यः कथितं भक्तिसंयुतं ॥ ७ ॥ इति श्रीमदांत्ये० ऋषभचरित्रं
नाम षोडषोध्यायः ॥ १६ ॥ श्री ॥ मुद्गल उ० ॥ ऋषभेन कृताचर्या नानायोगप्रकाशिनी ॥ प्रादौ तां भूमि
पो दृष्ट्वा जग्राहेहं ग्रहे स्थितः ॥ १ ॥ दुर्बुद्धिः सततं भ्रष्टः कर्ममार्गं विमुच्य वै ॥ पशुवद्धर्महीनांश्च कारयामास

मु १

४४ मानवान्॥२॥ जैनमार्गः समुत्पन्नस्तदादिश्च प्रजापते॥ भरतेन सुसंछिन्नः कर्ममार्गानुसारिणा॥३॥ तदेव कलि
लेर कालेवै भविष्यंति ग्रहे ग्रहे॥ निरर्काः संग्रहिष्यंति कलिदोषेण संयुतः॥४॥ ऋषभेण ग्रहं त्यक्त्वा चरितोन्यासि
नां महान्॥ ग्रहस्थैः संधृतो मार्गो नरकप्रद उच्यते॥५॥ ऋषभस्याग्रजः पुत्रो भरतो धर्मतत्परः॥ राज्यं च
कारधर्मेण रंजयन्सकलाः प्रजाः॥६॥ पुत्रे राज्यं समप्यासौ वनं ययौ महायशाः॥ तत्र देहं क्रमेणैव तपसा
शोषयन्स्थितः॥७॥ शालिग्रामाश्रमे तिष्ठन्विष्णुध्यानपरायणः॥ तताप तप उग्रं स राजा परमधर्मवित्॥
८॥ एकदा स नदीतीरे संस्थितस्तर्पयन्पितॄन्॥ अकस्मात्सिंहसंनादो बभूव भयदायकः॥९॥ तं श्रुत्वा ह
रणि तत्रांतर्वत्नी सहसा स्वनं॥ उत्पपात नदीतीरे वै भयेन प्रपलासा॥१०॥ उत्पतंत्या नदीतीरे गर्भस्त
स्याः प्रपाहत॥ सापि दूरे ययौ दक्षमृता दुःखेन तत्क्षणात्॥११॥ भरतेन मृगो बालो जनस्थः संधृतो भवत्॥
करणायुतचित्तेन पालयामास यत्नतः॥१२॥ मृगी शिशौ ततस्तस्य प्रीतिर्जाता महात्मनः॥ लीलयामा
[illegible]सभावेन खेलयांस भूमिपः॥१३॥ क्रमेण प्रगतं सर्वं नित्यं तस्य तपोमयं॥ मृगेणासक्तचित्तस्य सं राम

गदोषमपश्यतः॥१४॥एकस्मिन्दिवसेसोपिमृगोमृगैःसमन्वितः॥ययौवनांतरेकुत्रनज्ञातक्षत्रिणा
प्र२ मुना॥१५॥भरतस्तंमृगंतत्रनददर्शयदाभो॥तदादुःखसमायुक्तोबभ्रामसवनेवने॥१६॥नदद
र्शमृगंकुत्रविललापमहीपते॥नित्यंशोकसमायुक्तोममारकालवेगतः॥१७॥मरणेसमृगस्तेनद
ष्टःस्वसमीपस्थितः॥बभूवमृगयोनौससंगदोषप्रभावतः॥१८॥तत्रपूर्वंतथायुक्तोजातिस्मरोब
भूवसः॥ज्ञानयुक्तस्वयंसंगात्संभीतोविचचारह॥१९॥मृगसंगंपरित्यज्ययपौपूर्वाश्रमेततः॥त
त्राहिंसासमायुक्तोद्वंद्वभावपराङ्मुखः॥२०॥शुष्कतृणादिकंभक्षन्सोस्मरद्विष्णुमव्ययं॥तीर्थस्नां
नंसदाकुर्वन्साधुदर्शनलालसः॥२१॥एकदावनमध्येसमृगोबभ्रामलीलया॥अपश्यत्पूर्वपुण्ये
नपुलहाश्रममुत्तमं॥२२॥तत्रमुनीश्वराःकेचिदवसंस्तत्परायणाः॥महाभागास्तपोयुक्ताग
णेशभजनेरताः॥२३॥तत्रासौमृगजातिस्थोभरतोमुनिसन्निधौ॥वासंचकारपंदृष्ट्वासाधु
संगपरायणः॥२४॥एकदाब्रह्मदेवोपजगामपुलहाश्रमं॥तंदृष्ट्वापुलहाद्यास्तेप्रनेमुस्तं

४५ पितामहं ॥२५॥ तं पुपुजं महाभक्त्या पुलहं सर्वसंयुतः ॥ पूजइत्वा स्वयं देवं पादसंवाहने स्थि-
तः ॥२६॥ परिपप्रच्छ तं स्तुत्वा पुलहो भावसंयुतः ॥ अदिदेवं महाभागं गाणपत्यं स्वभावजं ॥२७
॥ पुलह उ० ॥ तात दुःखयुता सर्वे जंतवः केन भोगिनः ॥ मोक्षिणो ब्रह्मभूताश्च जायंते तद्वद
स्व मे ॥२८॥ मुद्गल उ० ॥ पुलहस्य वचः श्रुत्वा धाता तमब्रवीत्प्रभुः ॥ पुत्रं विनयसंयुक्तं प्रांजलि
कृतमास्थितं ॥२९॥ ब्रह्मोवाच ॥ शृणु पुत्र प्रवक्ष्यामि यत्पृष्टं मे त्वयापरं ॥ तत्सर्वं सर्वपापघ्नं
शांतिमार्गप्रकाशकं ॥३०॥ विघ्नराजमनादृत्य नरा दुःखसमन्विताः ॥ जायंते सर्वलोके
षु विघ्नयुक्ता भयाकराः ॥३१॥ यद्यद्दुःखकरं तत्तद्विघ्नरूपं न संशयः ॥ नरकादि महाघोरं विक
र्मफलदं मतं ॥३२॥ कर्मयुक्तं च सर्वं तत्स्वर्गभोगप्रदं मतं ॥ तदेव दुःखरूपं तज्जानीहि पुत्र निश्चि
तं ॥३३॥ स्वर्गेषु द्वंद्वभावश्च विद्यते नात्र संशयः ॥ स्त्रीपुंयुक्तं तथा विघ्नं मोहदं पश्य तत्स्मृतं ॥३४
त्र१ ॥ दैत्यारिभ्यो भयैर्युक्ता देवास्तत्र वसंति ते ॥ भयहीनाश्च तान्हत्वा लयेमृत्युभयप्रदे ॥३५॥ उत्पति राम

नाशसंयुक्तं ब्रह्माडं केसलं मतं ॥ त्रिगुणादिव्यपायुक्तं विघ्नेन ग्रसितं स्मृतं ॥ ३६ ॥ अकर्मणा नरो
मोक्षं लभते नात्र संशयः ॥ तदेव विघ्नसंयुक्तो मोक्षश्चैव शृणु सुत ॥ ३७ ॥ देहीदेहश्चतुर्भिश्च मो
हितो बंधनगतः ॥ स एव साधनं कृत्वा बंधहीनः प्रजायते ॥ ३८ ॥ मोहेन युक्तहीनोयं देही सर्वत्र संम
तः ॥ तदेव विघ्नरूपं च तत्र प्राप्तं महामते ॥ ३९ ॥ देहीदेहमये योगे ब्रह्म तत्कल्पनात्मकं ॥ तदेव विघ्न
रूपं च स्वतउत्थानसंज्ञकं ॥ ४० ॥ निर्विकल्पेन योगेन स्वमहिम्नि स्थितं भवेत् ॥ तदेव विघ्नसं
युक्तं विकल्पयुक्तहीनतः ॥ ४१ ॥ सांख्यब्रह्मात्मनिष्ठं तत्र बोधो न विद्यते ॥ अस्वात्मनिष्ठमन्यं
चेत्तदा स्वात्ममयं भवेत् ॥ ४२ ॥ स्वात्मनिष्ठं धृतं तेन तस्मादस्वात्मनिष्ठकं ॥ समुत्पन्नं महाभागन
कृतमपि पुत्रकं ॥ ४३ ॥ [illegible] तदेव विघ्नरूपं वै परतोत्थानभावतः ॥ सांख्यं ब्रह्म न संदेहो बी
जमुत्थायधारकं ॥ ४४ ॥ स बीजं तद्धि निर्बीजं तदेव जायते स्वयं ॥ अतोयोगिभिरत्यंतं मानितं न कदा
चन ॥ ४५ ॥ स्वानंदं ब्रह्मपत्प्रोक्तं समाधिरूपधारकं ॥ स्वकीयस्तत्र संयोस्तदाकारेण जायते ॥ ४६ ॥
नं

भा.१

सर्वाभेदस्वरूपेण संयोगात्मक उच्यते ॥ स्वसंवेद्यात्परो नास्ति संयोगाभेदैव कः ॥ ४७ ॥ तदेव
योगिभिस्तस्मात्कथितं विघ्नसंयुतं ॥ तस्माज्जातमिदं तत्र योगेनाभेदतां गतं ॥ ४८ ॥ अन्यथात्म
कदोषेण विघ्नरूपं प्रकाशितं ॥ अतो न मान्यतां प्राप्तं शांतिमार्गेषु सर्वदा ॥ ४९ ॥ ततो योगस्वरू
पं यत्सदाभिन्नं प्रकीर्त्तितं ॥ न तत्र कस्यचिद्योगस्तस्य कुत्रापि नो भवेत् ॥ ५० ॥ ब्रह्मभिन्नमयोगा
ख्यमतो विघ्नसमाकुलं ॥ व्यतिरेकात्मको दोषो ह्यशांतिकर उच्यते ॥ ५१ ॥ संयोगत्वमयोगत्वं त्यक्त्वा
शांतिं प्रयच्छति ॥ तत्र विघ्नविहीनत्वं प्राप्तं पुत्र न संशयः ॥ ५२ ॥ चित्तभूमिस्वरूपं यत्पंचधा
त्यजविघ्नप ॥ योगाभेदस्वरूपस्त्वं भविष्यसि न संशयः ॥ ५३ ॥ पंचधा चित्तरूपा वै बुद्धिर्माया प्रकी
र्त्तिता ॥ पंचधैश्वर्यमोहेषु मोहदा सिद्धिरुच्यते ॥ ५४ ॥ तत्र विघ्नगणेशस्य पतितं योगरूपतः
॥ द्वैधमायापुतं प्रोक्तं विंबभावं त्यज प्रभो ॥ ५५ ॥ आदौ पुरा मया पुत्र कथितं कलदैवतं ॥ गणेश
म.१ रूपं तस्माकं त्वया राधितमादरात् ॥ ५६ ॥ तेन त्वं पात्रभूतश्च योगशांतो महामुने ॥ अधुना कथि

गो १

तंपुत्रपूर्णशांतिस्वरूपकं॥५७॥शांतियोगेननित्यत्वंतंभजस्वविधानतः॥गणेशानोभविता
सितदावेनात्रसंशयः॥५८॥एवमुक्त्वास्वयंब्रह्मांतर्दधेसप्रजापते॥पुलहस्तत्रयोगंतमसा
धतपसिस्थितः॥५९॥श्री॥इतिश्रीमदाप्ते॰पुलहोपदेशवर्णनंनामसप्तदशोध्यायः॥१७॥छ मु
द्गलउ॰॥क्रमेणयोगशांतिंचप्राप्तोसौपुलहस्वयं॥नित्यंगणेशमूर्तिंप्रपूजभक्तिसंयुतः॥१॥
ध्यावनिछःसदायोगितमेवाचिंतयत्प्रभुं॥ततःकियतिकालेतंगणेशानोययौमुनिं॥२॥नबु
धसतंविप्रोध्याननिष्ठातयायदा॥तस्यहृष्टिस्थितोढुंढिर्गणेशेनप्रलोपितः॥३॥अंतर्हितंहृ
दिस्थंतंगणेशंनदद्दर्शह॥तदाभ्रांतइवापश्यद्ददर्शगणपंबहिः॥४॥उत्थायसहसाविप्रस्त
न्ननामदातांजलिः॥विधिवत्पूजयामासविनायकमनायकं॥५॥पूजयित्वानमसात्पतु
ष्टावतंतोंदोजतिः॥सरोमांचशरीरःसन्हर्षगद्गदयागिरा॥६॥पुलहउवाच॥नमस्तेविघ्न
राजायभक्तानांविघ्नहारिणे॥विघ्नदात्रेह्यभक्तेभ्योगणेशायनमोनमः॥७॥ब्रह्मणेब्रह्म

रूपाय निराकाराय ते नमः॥ साक्षिणे सर्वसंस्थाया नादिसिद्धाय ते नमः॥८॥ अनामयाय
देवाय प्रतर्क्याय महौजसे॥ वक्रतुंडाय वै तुभ्यं हेरंबाय नमो नमः॥९॥ स्वानंदवासिने
तुभ्यं भक्तसंरक्षकाय च॥ योगानंदाय पतये चैव योगदायिन्नमो नमः॥१०॥ शांताय
शांतरूपाय शांतिनां पतये नमः॥ भक्तिभ्यः शांतिदात्रे च योगशांताय ते नमः॥११॥ ना
नावताररूपैश्च जगदाधारमूर्त्तये॥१२॥ सूरासूराणामिशाय सर्वगाय नमो नमः॥१२॥
सर्ववंद्याय वै तुभ्यं सर्वादौ संस्थिताय च॥ सर्वांत एकरूपाय मध्ये नानास्वरूपिणे॥१३॥
आदिमध्यांतहीनाय सृष्टिस्थित्यंतकारिणे॥ अनंतोदरसंस्थाय लंबोदराय नमोस्तु ते॥
१४॥ जगवक्त्राय वै तुभ्यं गजाकाराय ते नमः॥ गजकर्णाय पूर्णाय गजानन नमोस्तु ते॥१५॥
मूषकः केतनायैव मूषकारूढरूपिणे॥ पाशांकुशधरायैव विभूतिभिस्तुताय च॥१६॥ चतु
र्भुजधरायैव चतुर्वर्गमयाद्वच॥ ब्रह्मभूतस्वरूपाय देहधारिन्नमो नमः॥१७॥ यं स्तोतुं वेद

वादीनोयोगाः सांगाश्चयोगिनः॥ शिवभि[illegible]ष्णुमुखादेवानसमर्था भवंतिवै॥१८॥ तै
कैर्योगात्मैस्तेनतुष्टोभवाम्यहं॥ तंकथस्तोमिदेवेशंयोगरूपमयंप्रभुं॥ अतस्त्वांप्रणमामिवै
प्रसन्नोभवसर्वदा॥१९॥ वरमेदेहियोगात्मन्स्तेनतुष्टोभवाम्यहं॥ तवभक्तिंदृढांदुंढेव्यभिचारविव
र्जितां॥२०॥ एवमुक्त्वातुविस्तत्रनवर्तप्रेमविह्वलः॥ तंभक्तिरससंयुक्तउवाचगणनायकः॥२१॥
गणेशउवाच॥ मदीयास्तुदृढाभक्तिर्व्यभिचारविवर्जिता॥ भविष्यतिमहायोगिंस्तवचानंददा
यका॥२२॥ यदामेस्मरणंत्वंवैकरिष्यतिमहामते॥ तदामांद्रक्षसेब्रह्मन्त्वंस्थितंतेप्रसन्नि
धौ॥२३॥ भवदातंमदीयंयत्स्तोत्रंभक्तिप्रदंभवेत्॥ यःपठिष्यतियोमर्त्यःशृणुयात्सर्वसौख्यभा
क्॥२४॥ भुक्तिमुक्तिप्रदंप्रोक्तंशांतियोगप्रदायकं॥ भविष्यतिनसंदेहोयथात्वंसतथाभवेत्
॥२५॥ मुद्गलउ०॥ एवमुक्त्वागणाधीशस्तत्रैवांतर्दधेप्रभुः॥ पुलहस्तत्रसंतस्थावभजत्तंगणा
धिपं॥२६॥ मृगरूपधरस्तत्रभरतःपृथिवीपतिः॥ सस्थितस्तत्रशुश्रावपूर्णज्ञानंघानतः॥२७॥

शिवविष्णादयः सर्वे जंतवश्च तथापरे ॥३३॥ धन्या भक्तिर्महाताया वैष्णवी परमाद्भुता ॥६॥

ब्रह्मणा कथितं यच्च पुलहाय सुधीमते ॥ तदेव तेन भूपेन धृतं स्वहृदि सर्वदा ॥२८॥ मनसि
ध्यानसंयुक्तो बभूव मृगदेहजः ॥ गणेशस्य सदा दृष्टस्तत्र वासं चकार सः ॥२९॥ ततस्तेन च
संगीतं तच्छृणुष्व प्रजापते ॥ अहो विघ्नो महाधीरो मया प्राप्तसुर्जयः ॥३०॥ राज्यं त्यक्त्वा वने
नित्यं संस्थितोहं हरिं स्मरन् ॥ तत्रापि मृगसंगेन संजातो मृगरूपधृक् ॥३१॥ विष्णुमुख्यामरे
शाना विघ्नयुक्ता न संशयः ॥ तत्र कोहं मनुष्यो वै जयामि विघ्नमुल्बणं ॥३२॥ विघ्नराप्रसादेन
विघ्नं जयति दुर्जयं ॥ यया संस्कारसंयुक्तं संप्रसं[illegible]ज्ञानमुत्तमं ॥३४॥ गाणपत्यो महायोगि
दृढो वै पुलहो मया ॥ अहो [illegible] भाग्यं ऽहोग्यं मदीयं परमं तपं ॥३५॥ येनाहं गाणपत्यानां सं
गेतिष्ठामि नित्यशः ॥ विघ्नहीनस्वभावेन भजामि गणनायकं ॥३६॥ एवं गणेशभक्त्या वै संयुतो
मृगसत्तमः ॥ कालेन गणं पंध्यात्वा देहत्यागं चकार ह ॥३७॥ श्री ॥ इति श्रीमदांत्ये॰ भरतमृ
गदेहत्यागो नामाष्टादशोध्यायः ॥१८॥ श्री ॥ मुद्गल उवा॰ ॥ आंगिरसकुले विप्रो बभूव मुनि

राम

सत्तमः॥ततःपुत्रोभवेतस्यभरतोनृपसत्तमः॥१॥तत्रापिसंगभीसौज्ञानयुक्तोमहामुनिः॥ग
णेशंमनसाध्यायन्संस्थितोमुनिसंन्निधौ॥२॥तत्रवेदादिषुप्रोक्तंगणेशस्यमहात्मनः॥स्तवनं
संश्रुतंज्ञानंतेनपूर्वंदृढंदातं॥३॥जडवत्संगसंभीतोबभूवब्राह्मणोत्तमः॥चतुर्थेसकलंगोप्य
सोतिष्ठत्सवसन्निधौ॥४॥विवाहादिभयात्सर्वंजडत्वंसंप्रकाशितं॥मुर्खवच्चेष्टयातत्रबा
लभावेनतिष्ठत॥५॥तसांपवीतदानंसचकारांगिरसोमुनिः॥पश्चात्संध्यादिकंकर्मशौ
चाचारमशिक्षयत्॥६॥पित्राकथितमत्यंतंनजग्राहमहामतिं॥अन्यथासचकारापि
ताडितोयदियोगिपः॥७॥हस्तंधृत्वापितातस्यकारयामासवैदिकं॥आचमनादिकंसर्वं
तथातेनदातंकिल॥८॥पुनःपित्राचसंस्पृष्टंनसस्मारतदास्वयं॥जडवत्सर्वमाचारंत्य
क्त्वाबभूवसः॥९॥ततस्तस्यदातंनामसर्वैर्लोकैःप्रजायते॥जडोयंसततंलोकःक
थ्यतेयत्रतत्रतैः॥१०॥तत्रादरापमानादितिरस्कारादिकंमहत्॥समभवच्चतेनापिजड

वत्याजितविधे॥११॥ लोकाः सर्वे वदंस्तत्र न ज्ञानमस्य निश्चितं॥ निंदास्तुत्यादिकं सर्वं म
हामुर्खोयमंजसा॥१२॥ जडत्वादिकदोषेण विवाहादिकमस्य च॥ न दातं जनकेनैव समा
नंदमवापसः॥१३॥ कालेन निधनं तस्य गतस्ततः पिता मुनिं॥ माता सती गुणैर्युक्ता सह गानं
संबभूव हः॥१४॥ मातृसपत्नाजास्तस्य भ्रातरो नव एव च॥ तेषामाधीनतां यातो द्विजोसौ
शांतियोगधृक्॥१५॥ भ्रातृपत्न्यो मदोत्सिक्ताश्चक्रुः स्नेहं न स्वल्पकं॥ उच्छिष्टं कुत्सितं चा
न्नं ज्वलितं तदुदुस्तुषं॥१६॥ वस्त्राद्यैर्भ्रातरः सर्वे भाषणैः सदा तं न तं॥ चक्रुः स्नेहं परि
त्यज्य कुलपांशुवदंति ते॥१७॥ तथामृतं समं सर्वं कुत्सितं क्लृप्तदग्धकं॥ अन्नं च भक्ष
योगीशश्चीरवस्त्रैः समाधृतः॥१८॥ तदपि भ्रातृजायास्ता अन्नं तस्मै च नो ददुः॥ द्वित्रि
दिवसमध्ये स एव भुगभवमुनिः॥१९॥ क्षुधया पीडितो योगिगाणपत्यो प्रजापते॥ ब
भ्रामान्नार्थमत्यंतं गृहे गृहे विचक्षणः॥२०॥ तत्र लोकैः स्वकायार्थं ग्रहितो यत्र तत्र

सः॥ चकारं सकलं कार्यं तेषामन्नार्थमादरात्॥२१॥ ~~[illegible]~~ ततस्ते
हर्षिताः सर्वे वस्त्रान्नादिकमादरात्॥ ददुः सोपि प्रसन्नात्मा कामकारो भवत्स्वयं॥२२॥
ततस्तैर्भ्रातृभिर्दृष्टं मानयाग्रहे स्वके॥ स्वकामकारिणां चक्रुर्भ्रातरो हर्षसंयुतः॥२३॥ तद
पि भ्रातृजायास्ताः कुत्सितान्नं ददुस्तुषं॥ सुधासमं बभक्षान्नं सोपि भावं प्रदर्शयन्॥२४॥ क
दाचित्पक्वशालीनां क्षेत्रेषु स्थापितो मुनिः॥ भ्रात्रभिरक्षणार्थं स रात्रौ वै दिवसे प्रभो॥२५॥ त
त्रायं संस्थितो विद्वांश्चकार तत्तथा स्वयं॥ अन्नार्थं देहभावज्ञः सुखदुःखादिके समः॥२६॥ त
त्र चित्रमभूत्तस्य तच्छृणु प्रजापते॥ रोचौणां स्वामिनां देवि भद्रकालिश्च संस्तुता॥२७
॥ मम यदि लभेद्द्रव्यं विपुलं चेज्जगन्मये॥ तदा पुरुषरूपं ते दास्यामि पशुमुत्तमं॥२८॥ द्रव्यं
तस्य तथा प्राप्तं तेनाहं प्रेषिका स्वकाः॥ चौराणां स्वामिना देवी स्तत्रा जग्मुर्यदृच्छया॥२९
अंतं गृहीत्वा बलात्सर्वे जग्मुस्थानं स्वकं खलाः॥ योगिनां देहप्रारब्धं ज्ञातं च तादृशं स्वके॥३०॥

तत्रचौराधिपेनैवसत्कृतपूजनादिभिः॥ भोजनंसचकारापिस्वादुंद्विजेंद्रियसत्तमः॥
३१॥ तंपुरक्षत्यवादित्रैर्नदद्भिःसपयोखलः॥ देवीसन्निधमानंदात्पूजपरमादरात्॥३२
॥पूजयित्वामहाकालीततस्तमुनिपुंगवं॥पुरस्तात्पासिनाहंतुंनग्नखड्गंचकारसः॥३३
मरणंदेहिभावस्यदृष्ट्वासौयोगिसत्तमः॥नकिंचिक्षुब्धवांस्तत्रसंसारगणयंहृदि॥३४॥
अद्यैवपतितोदेहोथवास्तुचिरजीवकः॥तत्रकिंकारणंमेनगजाननननमोस्तुते॥३५॥
एतस्मिन्नंतरेतत्रदेविकोपसमन्वति॥गाणपत्यामहाकालीनिःसृतामूर्तिमध्यमैः
॥३६॥खड्गंचौराधिपस्यापिहस्ताज्जग्राहलीलया॥तेनतस्यशिरश्छित्वापपौरुधिरमु
त्तमं॥३७॥अन्येसमागताश्चौरास्तेपिखड्गेननाशिता॥विक्रीडस्वगतेर्देविगणेशगान
तत्परा॥३८॥तांप्रणम्ययथौदक्षबभ्रायमयत्रतत्रसं॥स्वेच्छारीचोमहायोगीभिक्षाशी
गणयंस्मरन्॥३९॥श्री॥इतिश्रीमदांत्ये॰चौरवधोनामैकोनविंशतिध्यायः॥श्री॥१९॥

॥मुद्गल उवाच॥ सिंधुदेशाधिपो राजा रहूगण इति स्मृतः॥ पूर्वसंस्कारयोगेनाथांतनिष्ठो बभूव ह
॥१॥ राजा शांत्यर्थमत्यर्थं यत्नवान्प्रापतां नसः॥ ययौ गंगासमीपस्थं कपिलाश्रममादरात्॥२॥
गौतमीदक्षिणे कुले श्रुतवान्द्विजपुंगवात्॥ निजग्रामपुराद्राजा शिबिकायां समास्थिताः॥३॥ ग
च्छ मार्गे त्वरायुक्तः श्रोतवाहो महीपतिः॥ धृत्वान्यान्योजयामास वाहार्थं स्वजनैः सदा॥४॥ तत्रै
दैवप्रसंगेन समालब्धं महामुनिः॥ आंगिरसवरं तं ते च दार्वाहकमंजसा॥५॥ ज्ञात्वा देह
गतिं योगी प्रारब्धाधीनमादरात्॥ वाहको नृपतेर्दक्षबभूव विगतज्वरः॥६॥ अहिंसा परमो
योगी मार्गे जंतुमवेक्षसः॥ स्वपादक्षपणं तत्र च काजंतुवर्जितः॥७॥ तेन सर्वे बभूवुश्च वाहा
कामंदगामिनः॥ डोलयामानया राजा शीबिकया सुदुःखितः॥८॥ ततः क्रोधसमाविष्टो रहूगण
उवाच तान्॥ सम्यक् शिबिकां वहावहध्वं प्रयतात्मना॥९॥ ततो भीताश्च ते सर्वे तमूचु
रधुना नृपं॥ आनीतसदुरात्मायं चलति मद्यपो यथा॥१०॥ ततो राजा महात्मानमुवाच

५१ किं त्वया शठ ॥ उन्मत्तवद्गतिर्दुष्टा क्रियते मे प्रसन्निधौ ॥ ११ ॥ ततो भावी बलेनासावांगीरस उ-
वाच ह ॥ ज्ञात्वा तं योगमिच्छंतं पात्रभूतमनादरात् ॥ १२ ॥ जडभरत उ॰ ॥ मया मयमिदं सर्वं भ्रां-
तिरूपसमत्वकं ॥ तत्र राजा जनानां वै जनाः कुत्र प्रदृश्यते ॥ १३ ॥ पेषयित्वा वयं द्वंद्वं समभा-
वेन संस्थिताः ॥ शिक्षाकर्ता भवेद्राजास्माकं कथं महाबलः ॥ १४ ॥ तेन किं योगमार्गं त्वं त्यक्त्वा
तिष्ठेम सांप्रतं ॥ तदधीना भवामः किमज्ञानेन वदत्ययं ॥ १५ ॥ इत्युक्त्वा मौनमास्थाय शिबि-
ह ५ कां पूर्ववद्दहनं ॥ आंगिरसो महायोगी चचाल गणपं भजन् ॥ १६ ॥ राजाश्रमहावाक्यं यो-
गव्यथितमुत्तमं ॥ भयभीतो भवत्तस्य प्रोत्पयास महीतले ॥ १७ ॥ दृष्ट्वा तं मलिनं विप्रं य-
ज्ञोपवीतसंयुतं ॥ बिभ्रतं चीरवस्त्रं च ब्रह्मतेजसनातनं ॥ १८ ॥ प्रणनाम ससाष्टांगं तोदो-
जनिपुरं स्थितः ॥ जगाद भयभीतस्तं रहूगणः स धर्मवित् ॥ १९ ॥ रहूगण उवाच ॥ अपराधं
महातन्मे क्षमस्व त्वं दयानिधे ॥ अज्ञानेन दातं ब्रह्मन्किं विप्रोसि वदस्व मां ॥ २० ॥ अवधूता

महात्मानंश्चरंतियत्रकुत्रचित्॥तथात्वमपिमेभासियज्ञोपवीतधारक॥२१॥कपिलोनारदःकिं
त्वमंगिराःपुलहऋतुः॥दत्तोवायाज्ञवल्क्यश्चवदमांकरूणानिधे॥२२॥अहंविभेमिविप्रेंद्रब्राह्म
णानांप्रधर्षनात्॥नब्राह्मसमंकिंचिद्दैवतंसन्नराचरे॥२३॥साक्षात्परमेश्वरस्यापितनवोब्रा
ह्मणामताः॥कर्माधाराश्चज्ञानानांमाधाराब्रह्मधारकाः॥२४॥ब्राह्मणस्यमुखेनैवयद्भुतंतत्स
मागतं॥देवस्थानेतुदेवानांमुदरेनात्रसंशयः॥२५॥ब्राह्मणेभ्यश्चयदत्तंतदक्षयपदप्रदं॥उ
द्धरायजनानांवैब्राह्मणासंमताःसदा॥२६॥मंत्राधीनाःसदादेवाविप्राधीनामताश्चते॥देवा
नांजीवनंसर्वंद्विजाधीनमतःप्रभो॥२७॥मंत्रहीनंदातंकर्मनिष्फलंजायतेतत्॥कर्माधीनं
जगत्सर्वंमतोब्राह्ममूलकं॥२८॥कर्मनिष्ठास्तपोनिष्ठाज्ञाननिष्ठाद्विजोत्तमाः॥योगिनश्चभ
वंतीहतारकाजगतीस्थिताः॥२९॥सर्वेषांगुरवोविप्राज्ञानदास्तैःसुसम्मताः॥~~[illegible]~~
~~[illegible]~~साक्षाब्रह्मस्वरूपत्वाब्राह्मणानात्रसंशयः॥३०॥तेषांहेलनमात्रेणपतंतिशिवमुख्यका
ः॥सेवनेनसदातेषांसर्वंसलभेजनाः॥३१॥ब्राह्मणानांचशापेनविष्णुमुख्याःसुरेश्वराः॥प

तिता अवतारेषु पुनः संस्थापिता द्विजैः ॥३२॥ अतो विभेमि विप्रेशवदकस्त्वं महामते ॥ विष्णुशि
वादिदेवेभ्यस्तथाहं न बिभेमि वै ॥३३॥ एवमुच्चा मुनेः पादौ गृह्यतां प्रणनामसः ॥ पादयोर्नेशिरस्थाप्य
रुरोद दक्षभयविह्वलः ॥३४॥ ततोसौ करुणाविष्टो जडभरतस्तमब्रवीत् ॥ उत्थाप्य नृपशार्दूलं प्रश्र
यावनतं वचः ॥३५॥ श्री ॥ इति श्रीमदांत्ये जडभरतहूगणमिलनं नाम विंशतिमोध्यायः ॥२०॥ श्री ॥
जडभरत उ॰ ॥ अहमांगिरसो नाम जडभरतः प्रकथ्यते ॥ स्वायंभुविर्महीपालो भरतश्चाधुना जडः ॥१॥ मा
चिंतां कुरु राजर्षे ह्यज्ञानेन त्वया दाते ॥ हेलनम्मे शरीरस्य पापदं न भविष्यति ॥२॥ गच्छ राजन्यथेच्छं त्वं
मत्तस्तेन भयं भवेत् ॥ गमिष्यामि स्वतंत्रोहं प्रारब्धेन नियंत्रितः ॥३॥ मुद्गलउ॰ ॥ तस्य योगींद्रमु
ख्यस्य श्रुत्वा वचनमुत्तमं ॥ रहूगण उवाचाथ तं प्रणम्य महायशाः ॥४॥ रहूगण उ॰ ॥ धन्यं कुलं मदीयं वै
पितरो ज्ञानमाश्रमः ॥ तवो विद्यायशोदानं तवांघ्रियुगदर्शनात् ॥५॥ अहं सिंधुमहीपालो रहूगण
इति स्मृतः ॥ राजादिविषयं त्यक्त्वा निःसृतो मुनिसत्तम ॥६॥ शांत्यर्थं कपिलं यामि गौतमीतीरवासितं
॥ त्वं साक्षाद्ब्रह्मरूपश्च दैवेन दर्शनं गतः ॥७॥ शिष्यं तारय मां योगीन्योगबोधेन सत्तम ॥ साक्षाच्छां

तिवदस्वत्वंपयाशांतोभवाम्यहं॥८॥तस्यतद्वचनंश्रुत्वादापपापरयायुतः॥जगादतंनृपेंद्रंसआगि
रसोमहाद्युतिः॥९॥श्रृराजन्स्त्वयापृष्टंवेदगुह्यंसदुर्गमं॥कथयामितथापितेयोगशांतिकरंपरं॥१०॥
देहश्चतुर्विधःप्रोक्तस्तत्रदेहीचतुर्विधः॥भ्रांत्याभिन्नत्वमाश्रित्यैकोपिभातितदात्मकः॥११॥देहानां
ब्रह्मयत्प्रोक्तंबिंदुमात्रंप्रदर्श्यते॥देहिनांब्रह्म[illegible]रूपंयत्सोहंमात्रात्मकंमतं॥१२॥तयोःसंयोगए
वासौबोधात्मकउदाहृतः॥स्वतोत्थानमिदंमिदंब्रह्मविकल्पाद्विविधंमतं॥१३॥बोधनाशेमहीपा
लउत्थानंजायतेनच॥सांख्यरूपंहितद्ब्रह्मकेवलंस्वसुखेरतं॥१४॥यत्रपरसुखंनास्तितत्रवैस्वसु
खंकथं॥तेनलत्परतोत्थानयुक्तंब्रह्मप्रकीर्तितं॥१५॥तत्रोत्थानस्यबीजंयस्थितंभिन्नात्मकंपरं॥
ही३ स्वसुखंनिष्टरूपंबोधहीनप्रभावतः॥१६॥स्वतःपरतउत्थायहीनंस्वानंदवाचकं॥संयोगाभेदरूपं
वैजानीहिनृपसत्तम॥१७॥स्थानंदःपंचभेदेनसर्वत्रसंस्थितस्वयं॥सत्यासत्यसमानेननेतिरू
पंचतुर्थकं॥१८॥स्वतपरंतउत्थानमेतन्नामप्रकीर्त्तितं॥८तयोरनुभवोयःस्यात्तदेवतस्य

रूपकं॥१९॥ताभ्यां नानाविधं ब्रह्मान्नादिवेदे प्रकीर्त्तितं॥जगन्नानाविधं तद्वज्जानीहि राजसत्तम॥
२०॥नामरूपमयं सर्वमसत्यं परिकीर्त्तितं॥शाक्तं ब्रह्म समाख्यातं वेदेषु वेदवादिभिः॥२१॥नामरू
पात्मकेषु यत्सदाखंडमयं स्मृतं॥अमृतं सौरमात्मा तद्ब्रह्म सर्वप्रकाशकं॥तयोरभेदकर्त्ता सौ वि
ष्णुरानंदसंज्ञिकः॥द्वयोः समं च तद्ब्रह्म भावाभावामयं परं॥२३॥त्रिभिर्हीनं तुरीयं यन्नेति कर्त्ता
शिवः स्मृतः॥अव्यक्तं मोहहीनं यत्स्वाधीनं ब्रह्म तन्मतं॥२४॥चतुर्णां चैव संयोगो यत्राभेदमयस्मृ
तः॥तदेव स्वस्वरूपाख्यो मयायुक्तो विनायकः॥२५॥संयोगे योगिनां राजन्निवृत्तिरूपजायते॥स्व
कीयाभेदहीनत्वात्तद्ब्रह्मा योगसंज्ञिकं॥२६॥अत एव स्वनाशाख्यं निवृत्ता तच्च लभ्यते॥मायया स
र्वसंयोगस्तद्धीनं ब्रह्म तत्स्मृतं॥२७॥अयोगश्चैव संयोगो योगेनैतौ प्रदृश्यते॥तदेव गणनाथो हि
गं शांतिमयः स्मृतः॥२८॥मायायुक्तश्च मायावी मायाहीनश्च केवलः॥तदेव भ्रांतिमात्रं यत्पत्रव्यं
योगिभी सदा॥२९॥चितं पंचविधं प्रोक्तं तदैश्वर्यं महामते॥मोदहं द्विविधं त्यक्त्वा शांतिरूपो भ

विष्यसि॥३०॥एवंरहूगणोराजासाधयित्वाविधानतः॥शांतिप्राप्तोमहातेजागणपत्योबभू
वह॥३१॥श्री॥इतिश्रीमदांत्ये॰रहूगणसिद्धिप्राप्तिवर्णनंनामैकविंशतिमोध्यायः॥श्री॥
२१॥मुद्गलउवाच॥ततआंगिरसोयोगीविचचारमहीतले॥मयूरेशस्यक्षेत्रस्यजाययौदैवयोगतः
॥१॥तत्रपूर्णावतारश्चगणेशस्यमहात्मनः॥दृष्ट्वाज्ञात्वास्थितंस्तंसध्यायन्नेकत्रमूढवत्॥२॥वर्षमा
त्रेगतेतस्यदर्शनार्थंययौस्वयं॥गणेशोमूषकारूढःसिद्धिबुद्धिसमन्वितः॥३॥तंदृष्ट्वाप्रणनामा
दौतुष्टावप्रांजलिःप्रभुं॥रोमांचःसाश्रुनेत्रःसभक्तिभावनिमज्जितः॥४॥जडभरतउ॰॥नमःशां
तिस्वरूपायशंशांतिदायदापालवे॥विघ्नेशायनमस्तुभ्यंहेरंबायनमोनमः॥५॥सिद्धिपतेचतदात्रे
भक्तानांभयभंजन॥भक्तिप्रियायवैतुभ्यंभक्तभक्तायतेनमः॥६॥बुद्धिपतेचदात्रेचसर्वविद्या
कलात्मने॥ज्ञानरूपप्रकाशायगणेशायनमोनमः॥७॥मूषकारूढवैतुभ्यंचतुर्बाहुधरायच॥स्वा
नंदवासिनेदेववक्रतुंडायतेनमः॥८॥नानाविहारयुक्तायानंतरूपायतेनमः॥अमेयायस्वदायोग

शांतिस्थायनमोनमः॥९॥धन्योहंदातदात्योहंयेनदृष्टोगजाननः॥वेदादौगोचरोयंनदापयासह
सांगतः॥१०॥मयाकिंतेदातंदेवदर्शनार्थंकिमागतः॥भक्तिसमंनकिंचित्तेप्रियंज्ञानंमयाधुना
॥११॥भक्त्यात्वांहृदिसंध्यायन्संस्थितोजडवत्प्रभो॥त्वमेवमोहितोभक्त्याममसन्निधिगःदातः
॥१२॥अतोभक्तिसमंकिंचिन्नैवदृष्टंनचश्रुतं॥ययायंशांतियोगस्थोमोहितसहसागतः॥१३
॥त्वदीयांशसमुत्पन्नंसकलंब्रह्मनायक॥किंददामिगणेशानयेनतुष्टोभविष्यसि॥१४॥अत
स्त्वांनमनंकुर्वेदेहोयंतेनिवेदितः॥वरंदेहीमहाबाहोयेनतृप्तोभवाम्यहं॥१५॥त्वच्चरणेदृढां
भक्तिंव्यभिचारविवर्जितां॥देहिनापदयासिंधोनान्यंयाचेकदाचन॥१६॥एवमुक्त्वागणा
ध्यक्षंननामसपुनःपुनः॥प्रेम्णाननर्तयोगींद्रस्तमुवाचगणाधिप॥१७॥श्रीगणेशउवाच॥
भवितासुदृढाभक्तिर्ममयामुनिसत्तम॥व्यभिचारविहीनानआरसनसंशयः॥१८॥त्वयादा
त्तमिदंस्तोत्रंमदीयंयोगशांतिदं॥भविष्यतिमहाभागममप्रीतिकरंपरं॥१९॥यंयमिच्छसितं

तवैदास्यामिसोत्रपाठतः॥ शृणुयात्तस्यतद्वच्च भविष्यतिनसंशयः॥२०॥ एवमुक्त्वांतर्दधेसौगण
नाथप्रजापते॥ समुनिर्भक्तिसंयुक्तस्तत्रैवसंस्थितोभवत्॥२१॥ अंतेगणेशरूपोसौजातो
योगींद्रसत्तमः॥ तत्रगुहाप्रसिद्धावैप्रवर्त्ततेमहामुने॥२२॥ गणेत्तरभागेचसन्मुखेक्रोश
दूरतं॥ स्थानमांगिरसस्यापिभरतस्यजडात्मकः॥२३॥ तत्रपेदर्शनंतस्यकुर्वंतिमानवादयः॥
तेषांमुक्तिर्भवेद्दक्षशाश्वतीनात्रसंशयः॥२४॥ चरितंजडभरतस्यकथितंपरमाद्भुतं॥ यः
शृणुयान्नरोभक्त्यापठेद्वाभुक्तिमुक्तिदं॥२५॥ एवमादिचरात्मानःप्रियाव्रतान्वयेभवत्॥ उ
त्पन्नाःसर्वधर्मज्ञानानादेवपरायणाः॥२६॥ श्री॥ इतिश्रीमदांत्ये जडभरतचरित्रंनामद्वा
विंशोध्यायः॥ श्री॥ छ॥ मुद्गलउ॥ स्वायंभुवमनोःपुत्रोउत्तानपादसंज्ञितः॥ सराज्यंम
ध्यदेशस्यचकारधर्मसंयुतः॥१॥ स्ववशंनितोराजातयाविमोहितः॥ सूनीतिंमन्यतेनस्म
मसापिप्रजापते॥२॥ तस्यभार्येप्रविख्यातोसुनीतिःसरूचिस्तथा॥ स्ववशंनीतोराजातयावि

सुरूच्या२ सुनीत्या१

त३

माहितः॥३॥एकदाध्रुवपुत्रश्चाययौराज्ञःसमीपगः॥इच्छंतोत्रोढुतत्संगेसंस्थितस्तस्यसन्नि
धौ॥४॥तत्रावसानितस्तेनसुरुच्यादुष्टभावतः॥ततोध्रुवोवनंदक्षजगामक्रोधसंयु
त॥५॥मार्गेवैगच्छतस्तस्यनारदोदृष्टिमागतः॥तन्ननाममहाबुद्धिर्बालोपिधर्मधारकं॥६॥
वृत्तांतमखिलंज्ञात्वानारदेनमहात्मना॥उपदिष्टोमहामंत्रोविष्णोश्चद्वादशाक्षरः॥७॥
नारदंसंप्रणम्यादौमथुरायांययौततः॥तत्रतपश्चकारासौध्यायन्विष्णुंसनातनं॥८॥
सहस्रवर्षमत्यंतंततापपरमंतपः॥प्रसन्नोभगवान्स्तत्रतंययौभक्तिभावितः॥९॥ददौरा
ज्यमखंडंवैपृथिव्याःपरमाद्भुतं॥अंतेस्वर्गस्यराज्यंयद्यदविष्णोर्ध्रुवात्मकं॥१०॥ततः
स्वग्रहमागत्योनमामपितरौध्रुवः॥तंराजामानयामासबहुलंतेजसायुतं॥११॥कालेनतं
ध्रुवंराजाचकारसधराधिपं॥वनंययौमहातेजास्तापपरमंतपः॥१२॥तत्रागत्यचगाणे
शोनारदस्तमुवाचस॥भेदाभेदादिहीनंत्वंगणेशंभजपार्थिव॥१३॥शिवविष्णादयोदेवायो

गिनः सनकादयः॥ ऋषिगणावशिष्टाद्या भजंते तं न संशयः॥१४॥ तं गणेशं विना शांतिं लभ्य
ते राजसत्तमः॥ स्वायंभुवादिभूपालैः सेवितो गणनाथ॥१५॥ एवं मत्वा गणेशस्य ददौ मंत्रं षडा
क्षरं॥ राजा मंत्रप्रभावेण गाणपत्यो बभूव ह॥१६॥ मरणे गणनाथं वै सस्मार स नृपोत्तमः॥ सायु
ज्यं गणनाथस्य प्राप्तं महात्मनः॥१७॥ ध्रुवो राज्यं चकाराथ धर्मयुक्तो महीपतिः॥ जगाम सहसा
तत्र नारदः करुणानिधिः॥१८॥ तं दृष्ट्वा प्रणनासौ पूजयामास भक्तितः॥ स्वगुरुं पूर्णभावेन कृ
जलिः पुरस्थितः॥१९॥ मुते वाचमहायोगिनारदो दिव्यदर्शनः॥ स्वशिष्यभक्तिसंयुक्तं दयया च
दयानिधिः॥२०॥ नारद उवाच॥ शृणु ध्रुव वचो रम्यं विकुंठादागतोधुना॥ विष्णुना प्रेषितोहं वै
तव हेतोर्महामते॥२१॥ क्षेत्रं यन्मयूरेशस्य भुवि ब्रह्ममयं परं॥ तत्र गत्वा महायात्रां कुरु त्वं विधि
वत्सुतः॥२२॥ तेनाक्षयपदं ते वै भविष्यति मदीयकं॥ नान्यथा विघ्नसंयुक्तः पतिष्यसि न संश
यः॥२३॥ अन्यच्च क[illegible]पितं तेन विष्णुना करुणावता॥ एकाक्षरं गणेशस्य महामंत्रं जपस्व वै
॥२४॥ तेन मंत्रप्रभावेन पालयेब्रह्मदिनोद्भव॥ ध्रुवपदं लयं गच्छेत्तदा त्वं शांतिमेष्यसि॥२५॥

ब्रह्मणि ब्रह्मभूतश्च भविष्यसि न संशयः ॥ अन्यथा योगशांतित्वं प्राप्स्यसि न कदाचन ॥ २६ ॥
ततस्तं नारदो योगी ददौ मंत्रविधानतः ॥ एकाक्षरं गणेशस्य राजा सिद्धो बभूव सः ॥ २७ ॥ क्षे
त्रं वै मथुरेशस्य ध्रुवः सद्यः समागतः ॥ चकार विधिवद्यात्रां द्वारादिचिन्हसंयुतां ॥ २८ ॥ गणे
शं स्थापयामास ब्राह्मणैर्मंत्रकोविदैः ॥ ऊर्द्ध्वक्रोशगणेशानात्पूर्वद्वारसमीपकं ॥ २९ ॥ देवा
लयं वरो [illegible] सौ महामौल्यं सुविस्तृतं ॥ सुवर्णशिखरं रम्यं पूजितं सुभक्तितः ॥ ३० ॥
नामस्तस्यां वरो राजा ध्रुवविनायकस्तदा ॥ वर्षमात्रं निवासं न्यध्रुवस्तत्र चकार ह ॥
३१ ॥ पश्चात्स्वनगरे गत्वा राज्यं चक्रे महाबलः ॥ अंगारकस्वर्गमंदे स ध्रुवाख्यं ज्योतिषां ध
रं ॥ ३२ ॥ तत्र गणपतिध्यायन्संस्थितो सौ महायशाः ॥ ध्रुवपदस्य नाशं ते गतः स्वानंदमंजसा
॥ ३३ ॥ ध्रुवविनायकं दृष्ट्वा भुक्तिमुक्तीं सुनीश्चलां ॥ लभते मानवस्तत्र श्रुत्वा ध्रौव्यसिदं तथा
॥ श्री ॥ इति श्रीमदांते ध्रुवचरित्रं नाम त्रयोविंशोध्यायः ॥ २३ ॥ श्री ॥ ० ॥ ० ० ०
॥ मुद्गल उ· ॥ ध्रुवस्यान्वयसंभूतोंगस्तेजस्वी महीपतिः ॥ धर्मात्मा सर्वमान्यश्च पितृवत्या

लकोभवत्॥१॥मृत्युकंन्याभवद्भार्याराज्ञस्तस्यमहात्मनः॥तस्यांतस्मात्समुत्पन्नःपुत्रोवेनः
सुदारूणः॥२॥तंपितासिक्षयन्श्रांतोनसाधुरभवत्सुतः॥राज्यंत्यक्त्वावनंराजादुःखयु-
क्तोजगामह॥३॥ततोराजविहीचदेशेचौराप्रबभुवह॥तैर्लुंठितंजनानांस्मसर्वस्वंयत्रतत्रहि
॥४॥प्रजासर्वोभयोद्विग्नाब्राह्मणाशरणंययुः॥ब्राह्मणैराज्यसंसिक्तःसवेनःपैतृकेततः॥५॥
सराज्यंप्राप्यदुर्धर्षश्चौरान्हत्वासमंततः॥राज्यंचकारदेशेषुकंपयन्वरसुधातलं॥६॥नयमार्गपरि
त्यज्ययथेच्छाकारकोभवत्॥तेनवर्णाश्रमाचारसंयुक्तादुःखितांकृताः॥७॥पुनस्तेतापसास्ता
न्वैशरणंजग्मुरादरात्॥तापसैर्वारितोवेनउवाचतांद्विजोत्तमान्॥८॥वेनउ॰॥अहंपूज्य
श्चसर्वेषांपालकोनात्रसंशयः॥मांभजध्वंमुनींद्रावैयोगक्षेमकरंसदा॥९॥तस्यतद्वचनंश्रु
त्वाकुपिताब्राह्मणास्ततः॥शापेनमारयामासुस्तंनृपंनयवर्जितां॥१०॥तस्यांगंमेवासंभूतंम
येपुर्नपहेतवे॥तस्मात्क्रूरःसमुत्पन्नस्तस्यपापमयोनरः॥११॥ह्रस्वकायःश्यामवर्णःश्मश्रुलः

पिंगलोचनः॥ तं दृष्ट्वा ब्राह्मणाः प्रोचुर्निसीदेति प्रजापते॥१२॥ तेन निषादनामासौ जातस्त
स्मै वनांतरे॥ स्थानं ददुर्द्विजश्रेष्ठा नेषादास्तत्समुद्भवाः॥१३॥ पुनश्च दक्षिणांगं ते ममंथुर्द्वि
जसत्तमाः॥ वनस्य दंपती तस्मात्समुद्भूतौ महौजसौ॥१४॥ विष्णोः कलापुतौ साक्षाद्ब्राह्मणा
नमतु पुरा॥ ब्राह्मणैर्नृपवर्यः समं सिन्मो राज्यकर्मणि॥१५॥ पृथुर्नाम महीपालो विख्यातो भूच्च मंड
ले॥ स्वधर्मनिरतः साक्षिक्षात्रधर्मनिवृत्तकः॥१६॥ तेन संवर्द्धिता लोका वर्णाश्रमयुगाविधौ॥ मुमु
दुश्च पुरे देशो यत्र तत्र सुसत्कृताः॥१७॥ गते कियति काले वै लोका अन्नविवर्जिताः॥ क्षुधया पीडि
ताः सर्वे तं नृपं शरणं ययुः॥१८॥ वेनस्याधर्मभावेन भूम्यसर्वं समादृतं॥ पुनर्दातुमशक्ता भूर्द्धर्मरूपे
नराधिपे॥१९॥ कोलोनां दुःखमाकर्ण्य कुपितोसौ नराधिपः॥ विचार्य धनुरादाय शरं श्रेष्ठं युयो
ज च॥२०॥ भूमिं हंतुं मनश्चक्र आकर्णाकर्षितं धनुः॥ यावद्बाणं सचिक्षेप तावद्भिता भवद्ध
रा॥२१॥ गोरूपेण भयोद्विग्ना पपाल यत्र तत्र सा॥ आत्तबाणो नृपः पश्चाद्ययौ यमइवापराः॥२२॥

शरणं लालभद्भूमिस्तमेव शरणं ययौ॥ उवाच प्रांजलिं कृत्वा नृपं कंपसमन्विता॥२३॥ स्त्रियं गां मां
कथं हीसी भूमिपालवसुंधरा॥ शरणागतरूपांते रक्षहे त्रिकुलोद्भव॥२४॥ भूमेर्वचनमाकर्ण्य ज
गाद तां नृपोत्तमः॥ शृणु त्वां मारयिष्यामि मत्वा सनपरङ्मुखीं॥२५॥ जीवितुं मिच्छसि प्राज्ञे तदा
न्नं विविधं धरे॥ कुरूपकटरूपत्वं सदा कालं न संशयः॥२६॥ ततस्तं विनयं छत्वा जगाद सा वसुंध
रा॥ मया ग्रस्ता समग्राया ओषधयो नृपात्मज॥२७॥ भक्षितास्ताः पुनर्दातुं कथं शक्ता भवामि भो
॥ अतस्त्वं मां समामादौ कुरूपार्थिवसत्तम॥२८॥ गोरूपाहं स्थितां भूपवत्सं कृत्वा स्वभावजं॥ सक
लादुग्धरूपेणौषधयस्ते ददाम्यहं॥२९॥ दोहकः कल्प्यतां शीघ्रं तदा सर्वं शुभं भवेत्॥ अन्यथा
मां महीपाल हनीष्यसि वृथा कथं॥३०॥ तस्या वचनमाकर्ण्य धनुः कोट्या नृपोत्तमः॥ पर्वतांदीश्चु
चूर्णासौ मां भूमिं चकार ह॥३१॥ पुरग्रामादिकानां नारचनारचिता ततः॥ तेनैव पृथुना दक्षय
था योग्यधरातले॥३२॥ तदादि नगराद्याश्च रचनासप्रवर्त्तिता॥ पुत्रीत्वे सधरां चक्रे पृथ्वी नाम्नी

ततो भवत्॥३३॥मनुं वत्स ततः कृत्वा दोहकश्चाभवत्स्वयं॥षड्रसान्नमयं दुग्धं दुदोहे जगृहुः प
समात्तमा॥३४॥ततः सर्वे त्रिलोकः स्थादुदुहुस्तां वसुंधरां॥सस्वान्नमयं दुग्धं ते जेगृहुः परमा
दृताः॥३५॥ब्रह्माणं वेदरूपं सवत्सं दात्वा बृहस्पतिः॥दोहके दुग्धमादाश्च संस्थितो विगत
ज्वरः॥३६॥रूद्रं वत्सं ततः कृत्वा दोहकः पिशितात्मकं॥कालाग्निरूद्रसंज्ञश्च दुदोहकं द्रजीवनं
॥३७॥विष्णुवत्सं च कारापि दोहको समाप्तो यजमानदोहकः॥यज्ञाधारमयं दुग्धं दुदोह कर्म
संभवं॥३८॥सूर्यं वत्सं च कारापि दोहको ध्रुवमादरात्॥ज्योतिषां जीवनं दुग्धं दुदोह सक
लं ततः॥३९॥शेषं वत्सं च संगृह्य दुदोह वासुकिः स्वयं॥सर्पाणामन्नरूपं वै दुग्धं दुग्धप्रिय
स्ततः॥४०॥शिववत्सं प्रकल्प्यैव दोहको नंदिकेश्वरः॥विद्यात्मकं महादुग्धं दुदोह गतमत्सरः
॥४१॥एवं सर्वे दुदुहुस्तां भूमिं पृथुभावितां॥च[illegible]चरमया जीवा ईश्वराश्च प्रजापते॥४२॥प्रथु
स्तां पूजयामास धरणीं धरणीप्रियः॥पुत्रीत्वे कल्पिता हर्षात्सा स्थिता मुदिता तथा॥४३॥एवं दु

ग्धाधरित्रींसपृथुःप्रथुःपराक्रमः॥राज्यंचकारनीतिज्ञः॥पृथिव्यामेकराट्स्वयं॥४४॥ततोय
ज्ञांश्चकारासौशतसंख्यान्महाबलः॥अश्वमेधात्मकात्राजाभूरिदक्षिणसंयुतान्॥४५॥त
स्ययज्ञेस्वयंब्रह्माविष्णुःशंकरएवच॥इंद्राद्याआययुःसर्वेगंधर्वाद्यामहामते॥४६॥ऋष
यःकश्यपाद्याश्चशेषाद्यानागमुख्यकाः॥जनानानाविधाजग्मुःसस्त्रिकाश्चविशेषतः॥
४७॥शतेयज्ञेसमारब्धेशक्रश्चिंतातुरोभृशं॥जटाचीरधरोभूत्वातस्याश्चंसहसाहरत्
॥४८॥तस्यपुत्रेणसंदृष्टस्तपस्वीतेनमोचितः॥हयंत्यक्त्वाभयोद्विग्नोंतर्धानंसचकारह॥४९
॥पुनरस्थिधरोभूत्वाभस्मांगलेपकारक॥जहारास्वंप्रथुःपृथुपराक्रमः॥५०॥एवंषड्वारमु
श्वंससंजहारपुरंदरः॥ततःस्तंहंतुमुद्युक्तःप्रथुःप्रथुपराक्रमः॥५१॥तंब्रह्मासांत्वयामासम
हेंद्रंनजघानह॥एकोनशतयज्ञात्सचकारातेजसायुतः॥५२॥बृहस्पतिनोदितःसाक्षादिं
द्रंस्तंप्रणनामह॥प्रथुर्वैरंसमुत्सृज्यदेवेंद्रंतंप्रसस्वजे॥५३॥सकलाःपूजितास्तेनदेवा

द्याः स्वस्थलं ययुः ॥ सोपि राज्यं स्वधर्मस्थश्चकार पालयन्प्रजाः ॥ ५४ ॥ श्री ॥ ७ ७ ३
इति श्रीमदांत्ये प्रथुयशोवर्णनं नाम चतुर्विंशोध्यायः २५ ॥ ७ ॥ मुद्गल उवाच ॥ जेना
नां धर्ममार्गं सोशीक्षयन्नृपसत्तमः ॥ विष्णुरूपं स्वयं साक्षाद्विष्णुतल्यपराक्रमः ॥ १ ॥ संस्थि
तः स्वपुरे राजा लोकान्संरंजयन्प्रभो ॥ तत्राजग्मुश्च योगींद्राः सनकाद्या विधेः सुताः ॥ २ ॥ च
त्वारः सूर्यसंकाशाः सर्वे दोलवयोचिताः ॥ पूर्वेषां पूर्वजामान्यागतभ्रांतय एव च ॥ ३ ॥ ता
न्दृष्ट्वा सहसोत्थाय संभ्रमेण नृपोत्तमः ॥ ननाम दंडवद्भूमौ शिरस्थाप्याघ्रिसंनिधौ ॥ ४ ॥
उत्थाय तामहाभक्त्या पाद्यार्घविष्टरादिभिः ॥ पुपूजविधिवद्राजा हर्षितोत्यंतभावतः ॥ ५ ॥
पादसंवाहनं तेषां चकार स्वयमादरात् ॥ उवाच मधुरं वाक्यं प्रथुर्वाक्यविशारदः ॥ ६ ॥ प्र
थुरु ॥ धन्यं पंधरणी त्वद्य धन्यं नगरमुत्तमः ॥ मंदिरं सत्कृतं सर्वं भवतामागमेन मे ॥
७ ॥ धन्यो वंशोत्कुलं धन्यं पीतरौ ज्ञानमाश्रमः ॥ तोपि द्यादिके म्मे च भवतां पाद

दर्शनात्॥८॥सनाथोहं कृतोनाथा भवद्भिर्नात्रसंशयः॥अनुग्रहकृतोत्यंतंदयालुभिर्वि
शेषतः॥९॥पूर्वजन्मार्जितंमेकिंफलितंपुण्यमुत्तमं॥अन्यथादर्शनंनस्याद्भवतांब्रह्मरू
पिणां॥१०॥निःस्पृहायोगनिष्ठायेसर्वज्ञाःस्वपरायणं॥दृष्ट्वाकुर्वंतिकार्यार्थमाज्ञांतस्यहि
तापच॥११॥अतआज्ञांमहाभागाममकुर्वंतुसांप्रतं॥तयाहंकृतदात्यश्चभवामि
नात्रसंशयः॥१२॥मुहुर्मुहु॥पृथोर्वचनमाकर्ण्यसनकाद्यास्तमब्रुवन्॥तृप्ताभावेन
तस्याथयोगींद्रायोगभाविताः॥१३॥सनकाद्याऊचुः॥धन्योसिनृपवर्यत्वंप्रथोप्रथुपरा
क्रम॥विनयंतेप्रदृष्ट्वावैसंतुष्टावयमादरात्॥१४॥नकार्यलिप्सयायुक्तावयनग्नामहाम
ते॥दर्शनार्थंचतेयाताःसाधोस्वर्गेश्रुतंयशः॥१५॥आज्ञांदेहिगमिष्यामोब्रह्मलोकंसना
तनं॥कीर्त्तिःश्रुतायथादृष्टातृप्ताहर्षसमन्विताः॥१६॥तेषांतद्वचनंश्रुत्वाप्रथुस्ता
न्विनयान्वितः॥जगादभक्तिसंयुक्तोयोगींद्रान्नृपसत्तमः॥१७॥प्रथुरुवाच॥भुक्तंराज्यं

महाभागा नानाभोगसमन्वितं॥ अधुना शांतिसिध्यर्थं योगं ब्रूत तपोधनाः॥१८॥
प्रथोर्वचनमत्यंतं श्रुतं योगिभिरादरात्॥ पात्रं दृष्ट्वा महाभागा ऊचुस्तं ब्रह्मशाश्वतं॥
१९॥ सनकाद्या ऊ॰॥ धन्योसि नृपशार्दूल बुद्धिस्ते परमाद्भुतां॥ निर्वेदं राज्यभोगेभ्यः संप्रा
प्ताप्रथुलश्रवः॥२०॥ योगशांतिमयं पूर्णं गणेशं विद्धि भूमिप॥ तं भजस्व महाभक्त्या तपा
शांतिं गमिष्यसि॥२१॥ एकदास्म वयं सर्वे संगताः शंकरालयं॥ वटमूले समासीनं पश्या
मो ध्यानसंस्थितं॥२२॥ तं प्रणम्य स्थिताः सर्वे वयं विनयसंयुताः॥ स्तोत्रैस्तं बोधयंतश्च ततं
शिवो बुबोध वै॥२३॥ त्यक्त्वा ध्यानं गणेशाय नमो वदंतमादरात्॥ श्रुत्वा भ्रांता वयं तस्मपृ
च्छामः संशयान्विताः॥२४॥ कोसौ गणाधिपः स्वामिन्नमसि तं कथं प्रभो॥ शिवः सहज
रूपस्त्वं स्वाधीनः सततं मनः॥२५॥ अस्माकं वचनं ~~ब्रह्मयत्कथ्यते वेदैस्तत्र कथं प्रवर्त्तते~~
॥ जगादज्ञानमाद्यं पद्गाणपत्यं सुशांतिदं॥२६॥ श्रीशिव उवाच॰॥ ब्रह्मयत्कथ्यते वेदैस्तत्र

श्रुत्वा शिवो हर्षसमन्वितः॥२

ला नां संयोगो ब्रह्मणि जायते ॥ तेन कर्मात्मकं ब्रह्म तद्वज्ज्ञानादिकं मतं ॥२९॥ समूहात्मकश २

कथं प्रवर्त्तते ॥ स्वाधीनं सहजं विप्राः पराधीनं त्रिधा भवं ॥२७॥ कर्मयोगादिभेदेन वेदेषु
वेदवादिभिः ॥ नानाविधं वर्णितं यत्र ब्रह्म तन्मायया न्वितं ॥२८॥ कर्मणां सकृद्वश्च गण इत्यादि
धीयते ॥ बाह्यांतरादिभेदानां संयोगे समूहो मतः ॥३०॥ अन्नप्राणादिकाः शब्दा ब्रह्मणो वा
चका मतः ॥ ते सर्वे गणरूपाश्च तेषां स्वामिगणेश्वरः ॥३१॥ संयोगा योगकाद्या ये नानायो
गा मता बुधिः ॥ योगानां योगरूपोयं गणपाशो नात्र संशयः ॥३२॥ गणो योगात्मकः प्रोक्तस्तस्मा
त्तस्य गणा वयं ॥ योगरूपा विशेषेण न मामा भक्तिसंयुतः ॥३३॥ मया विघ्नात्मिका प्रोक्ता
भ्रांतिदा बीबनावतः ॥ तां जयंति जना ईशा विघ्नराजस्य सेवया ॥३४॥ ब्रह्मभूता भ
वंति ते योगींद्रा गाणपाः स्मृताः ॥ अहं गणेशरूपो वै भिन्नं मायामयं मतं ॥३५॥ चि
तं पंचविप्रोक्तं सा बुद्धिर्विविधात्मका ॥ तत्रैश्वर्यं च यत्प्रोक्तं सिद्धिः सा परमा न्दूता ॥३६
तत्र यद्वीवभावेन गणेशः प्रतितिष्ठति ॥ मायाभ्यां मोहितोत्यंतं सर्वत्रासौ विराजते ॥३७॥

बीबिभावंपरित्यज्यगणेशस्यैवसेवया॥पंचधाचित्तमुत्सृज्यस्वयंचिंतामणिर्भवे
त्॥३८॥गणेशोहंयदाविप्रास्तदाकुत्रप्रवर्त्तते॥संयोगोमेतथायोगशांतियोगंतले॥
३९॥नभिन्नोहंकदातस्माद्गणेशान्नात्रसंशयः॥योगिंद्रःशांतियोगेनब्रह्मभूतोभविष्य
ति॥४०॥एतदेवमदीयंयद्गुह्यंध्यानप्रकीर्तितं॥अतोगणेशदासोहंतन्नमामिसदाद्वि
जाः॥४१॥एवमुक्त्वामहायोगीविररामसशंकरः॥उच्छिन्नसंशयोराज्ञाःसनकाद्यावयंनृ
प॥४२॥विचरामोमहीमेतांस्वर्गेषुविवरेषुच॥योगमार्गेणयोगीशागाणपत्यस्वभा
वतः॥४३॥गणेशदर्शनेजातालालसावयमादरात्॥तस्मिन्काले गणाधीशकश्य
पस्यात्मजोभवत्॥४४॥काशीराजोमहाभक्तोगाणपत्यपरायणः॥तस्यग्रहे
गतौदेवःस्वकीयाचार्यसाधनात्॥४५॥दर्शनार्थंवयंतत्रगताःकाश्यांमहामते
॥दर्शयामोगणेशंस्मब्रह्मचारिस्वरूपिणं॥४६॥तंप्रणम्यवयंराजन्स्थिताभक्त्यास

राम

मन्विताः॥ बालरूपधरं देवं स्तौमः स्म बालपूर्वगं॥४७॥ सनकादयाऊ॥ नमो विनायकाषैव
कश्यपप्रियसूनवे॥ अदितिजठरोत्पन्नब्रह्मचारिन्नमोस्तुते॥४८॥ गणेशाय शाय सदा मायाधा
राय तद्विवर्जित॥ भक्तधीनाय वै तुभ्यं हेरंबाय नमो नमः॥४९॥ त्वं ब्रह्म शाश्वतं देवं ब्रह्मणां पति
रजंसा॥ योगायोगादिभेदेन क्रीडसे नात्र संशयः॥५०॥ आदिमध्यांतरूपास्त्वः प्रकृतिः पुरुषः
स्तथा॥ नादानंदौ च सूक्ष्मस्त्वं स्थूलरूपो भवान्प्रभो॥५१॥ सूरासूरमयः साक्षान्नरनागस्वरू
पधृक्॥ जलस्थलादिभेदेन शोभसे त्वं गजानन॥५२॥ सर्वेभ्यो वर्जितस्त्वं वै मायाहीनः स्वरूप
धृक्॥ मायामायिकरूपश्च को जानाति गतिं परां॥५३॥ कथं स्तौमो गणाधिशं योगाकारमयं
सदा॥ वेदांनशंभुमुख्याश्च शक्त्या स्तोतुं कदाचन॥५४॥ वयं धन्या वयं धन्या येन प्रत्यक्षतां ग
तः॥ अस्माकं योगीनां ढुंढे कुलदेवस्त्वमंजसा॥५५॥ इत्युक्त्वा मौनमास्थाय नमो मोदंडवस्मृ
तं॥ उवाच नो गणाधीशो भक्तिभावनियंत्रितः॥५६॥ विनायकऊ॥ भवद्भिर्यस्तुतं स्तोत्रं म

दीयंयोगशांतिदं॥ भविष्यतिमहाभागाः पठते शृण्वते सदा॥५७॥ यंयमिच्छतितंतंवै
दास्यामिस्तोत्रभावनः॥ भवंतोगाणपत्याश्च भविष्यथयथाशिवः॥५८॥ एवमुक्त्वास्वयंबा
लश्चिक्रीडप्राकृतोयथा॥ बालकैः सहयोगात्माकाश्यपः पूर्ववन्नपः॥५९॥ वयंकाशीपतेरा
जन्दर्शनार्थंगतास्ततः॥ तेनापिमानिताः सम्यक्भुक्त्वाचस्वपदेपुनः॥६०॥ एतत्तेकथितं
सर्वंयोगशांतिपयंमहत्॥ ज्ञानंपुण्यगणेशाख्यतंभजस्वगणाधिप॥६१॥ मुद्गल उ॰॥ एव
मुक्त्वाविधेर्लोकेययुस्तेसनकादयः॥ प्रथुपुत्रेषुराजंस्त्वंविभजचवनंययौ॥६२॥ तत्रयो
गक्रमेणैवगाणपत्योबभूवह॥ पत्न्यासहविनीतात्मागणेशंतेलयंययौ॥६३॥ एतत्पृथुलका
पि त्तिकश्चचरितंकथितंप्रथोः॥ यःशृणुयात्पठेद्वापिसर्वदंतस्यसंभवेत्॥६४॥ इतिश्रीम
दांत्ये॰ पृथुचरित्रंनामपंचविंशतिमोध्यायः॥ श्री॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀

मुद्गलउ॰॥ तदन्वये च संभूतो बर्हिषो नाम पार्थिवः॥ धर्मात्मा शस्त्रधारी च प्रजानां पालने रतः॥१॥
स यज्ञान्विविधान्चक्रे कर्ममार्गपरायणः॥ प्राचीनाग्रकुशैः सर्वां छादयामास मेदिनिः॥२॥ मृगया
र्थं वनं यातः समुद्रतनयां कदा॥ उपयेमे स्म भूपालस्तस्यां पुत्रा दशाभवन्॥३॥ सर्वे समानवर्णा
स्ते समाचारा प्रजापते॥ समानमानसास्तेन नाम्ना ख्याताः प्रचेतसः॥४॥ प्रजार्थं ते समुद्रस्य
समीपे तपसि स्थिताः॥ सरो नारायणाख्ये च तत्र विष्णुं पुपूजिते॥५॥ प्राचीनबर्हीराजर्षिस्वगृहे
कर्मकारकं॥ स्थितं ज्ञात्वा समायातो नारदः करुणानिधिः॥६॥ तं पुपूज महाभक्त्या कृतांजलि
पुटस्थितः॥ तमुवाच मुनिश्रेष्ठो राजानं ज्ञानदायक॥७॥ नारदउ॰॥ किं राजन्कर्मणा वै भ
विष्यति वद प्रभो॥ बंधदं कर्मवेदेषु प्रोक्तं तन्नात्र संशय॥८॥ यज्ञैर्नामाविधैः सर्वं कृतं कर्म त्व
यामहत्॥ घोरं हिंसात्मकं नित्यं नानापशुवधाश्रयं॥९॥ प्रपहताः पशवः सर्वे त्वां प्रतिक्षंत ओ
जसा॥ एवं बधार्थमत्यंतं क्रोधयुक्तान संशयः॥१०॥ अधुना वृद्धरूपस्त्वं त्यक्त्वा कर्म महीप

ते॥ कर्मांकुरूनिरूपं हि ज्ञानमार्गं समाश्रय॥११॥ मुद्गल उ॰॥ नारदस्य वचः श्रुत्वा विस्मितः स नृपो
ब्रवीत्॥ तं पुनस्तस्य भावज्ञो विनयेन समन्वितः॥१२॥ प्राचीनबर्हीरु॰॥ अहं कर्मपरं भावं जा
नामि मुनिसत्तम॥ कर्मणा सकलं जंतुर्लभते नात्र संशयः॥१३॥ वदज्ञानविभोक्तिं तत्कर्म
मूलनिकृंतनं॥ दयया च दया सिंधो तारयं मां भवार्णवात्॥१४॥ तस्य तद्वचनं श्रुत्वा ज्ञात्वा
कर्मपरायणं॥ कर्मणा शुद्धरूपं तमुवाच मुनिसत्तमः॥१५॥ ज्ञानं योगमयं विद्धि योगो भेदा
त्मकः स्मृतः॥ ब्रह्मणि ब्रह्मभूतश्च योगी योगेन जायते॥१६॥ देहेस्मिन्वस्य राजेंद्र वीवगणप
तेः स्मृतं॥ मोहयुक्तं तदाकारं जीवरूपं हृदि स्थितं॥१७॥ पंचधा चित्तं वृत्तिश्च वर्त्तते नृपस
त्तम॥ क्षिप्ता मूढा च विक्षिप्तैकाग्रा निरोधसंज्ञिका॥१८॥ यत्र क्षिप्तं नरेणैव चित्तं तज्जायते
हृदा॥ तदेव क्षिप्तरूपं त्वचित्तं जानीहि पार्थिव॥१९॥ क्षिप्तं चित्तं नरेनैतन्मूढवन्न बुबोध
तं॥ यद्दातद्दा भवेज्ज्ञानं मूढरूपं च तत्स्मृतं॥२०॥ मुमुक्षूणां भवेच्चित्तं विक्षिप्तं ब्रह्मलालसं

॥नसंसारमुख्यैमग्नंब्रह्मणित्तंन्नसंगतं॥२१॥एकाग्रसर्वभावेषुह्यात्माकारेणसंस्थितं॥अंतज्ञानेनतद्रूपं
पश्यतियोगसेवया॥२२॥निरोधंदेहिदेहिभ्योहीनंनिवृत्तिदायकं॥संयोगायोगरूपांतंलभतेयोगसेवया
॥२३॥पंचधाकथितं[illegible]पचित्तंसाबुद्धिरुत्तमा॥जानीहिहृदयेस्थित्वाखेलतिगणपेनवै॥२४॥पंचधा
चित्तवृत्तिर्यात्तत्रमोहःप्रकीर्त्तितः॥स्वस्वस्थानकरूपस्थैश्वर्यात्मकोमहामते॥२५॥ऐश्वर्यभ्रांतिरूपा
सासिद्धिःसर्वत्रवर्त्तते॥धर्मार्थकाममोक्षब्रह्मभूतापंचधास्मृताः॥२६॥भ्रामयतीहभूतानिखेलतिगणपे
नच॥मयासाकथितामायानृपनास्त्यत्रसंशयः॥२७॥ज्ञानरूपास्वयंबुद्धिरैश्वर्यासिद्धिरुच्यते॥तयोर्बीबंगणे-
शस्यभ्रमतिजीवसंज्ञितं॥२८॥मायामयंसदाजातंमायासुखेप्रलालसं॥बंधयुक्तंमहीपालंहृदिपश्यप्रका
शकं॥२९॥पंचधाचित्तवृत्तिश्चतेनसर्वाप्रकाशिता॥चिंतामणिरितिख्यातींगणेशस्यवंदंत्यतः॥३०॥दे
हश्चतुर्विधःप्रोक्तःस्थूलःसूक्ष्मःसमात्मकः॥नादरूपश्चतुर्थोवैबिंदुस्तेषांपरागतिः॥३१॥देहेषुदेहभोग
स्थोदेहीभ्रांत्यांचतुर्विधः॥एकोपिब्रह्मतेषांवैसोहंविद्धिनृपाधिप॥३२॥तयोर्योगेस्वतोत्थानंब्रह्म-

तो
वेदे प्रतिष्ठितं ॥ परस्याभयरूपं च सदा सांख्यमयं परं ॥ ३३ ॥ तयोर्योगे स्वयं वेद्यं ब्रह्म पंचविधं
स्मृतं ॥ सप्तासप्तसमाकारनेति भेदकरं परं ॥ ३४ ॥ संयोगो ब्रह्मणां तत्र योगभेदेन शाश्व
तं ॥ समाधिसुखदं प्रोक्तं स्वानंदे इति कथ्यते ॥ ३५ ॥ अयोगं त इति तं वै ब्रह्मनिवृत्तियकं
॥ संयोगायोगयोगन्यायोगशांतिप्रदायकं ॥ ३६ ॥ गणेशोयं महाराज समूहानां नांपतिस्मृ
॥ समूहा ब्रह्मरूपाश्च ज्ञातव्या ज्ञातव्या ज्ञानचक्षुषा ॥ ३७ ॥ तं भजस्व महीपाल हृदिस्थं
गणनायकं ॥ बुद्धिप्रकाशकं पूर्णबुद्धिशांतिदायकं ॥ ३८ ॥ एवमुक्त्वा महायोगिन्दार
दोविरराम ह ॥ सोपि श्रुत्वा प्रणम्यादावुवाच मुनिपुंगवं ॥ ३९ ॥ प्राचीनबर्हिरू ॥ भो भो यो
गिन्द्र यासिंधो तारिहं त्वयाधुना मत्समिपस्थीता विप्रा न जातेति त्विदं परं ॥ ४० ॥ नारदो
तर्दधे सद्यः प्रत्ययो गणपं स्मरन् ॥ वीणागाणरतो योगिस्वेच्छाचारी सदा सुखी ॥ ४१ ॥
प्राचीनबर्हीराजर्षी स्त्वत्कामात्येषु त्वरं ॥ राज्यं वनं ययौ सोपि गणेशध्यानतत्परः ॥ ४२ ॥

नारदेनयथातस्यकथितंज्ञानमुत्तमं॥तथायोगक्रमेणापियोगीगाणेशकोभवत्॥४३
॥अंतेलीनंययौराजागणेशेब्रह्मरूपिणे॥ब्रह्मभूतोनृपःश्रेष्ठःकथितोसौप्रजापते
॥४४॥प्राचीनबर्हिराजर्षेश्चरितंयःशृणोतिच॥पठतितस्यपापंहिनश्यसर्वदंभवेत्
॥४५॥श्री॥इतिश्रीमदांत्ये·प्राचीनबर्हिषश्चरितंनामषड्विंशोध्यायः॥२६॥ छ
मुद्गलउवाच॥प्राचीनबर्हिषःपुत्रास्तेपुस्तेतपउत्तमं॥सहस्रवर्षपर्यंतंततस्तुष्टोजनार्दनः॥१॥आययौ
तान्वरंदातुंगरुडगश्चतुर्भुजः॥तंदृष्ट्वातेप्रणेमुश्चपुपूजुःस्तुष्टुवुर्मुदा॥२॥प्रचेतसउवाच॥नमस्तेगरु
डा॥नमस्तेकेशवायैवनमस्तेभूतभावनः॥निराकारायकृष्णायविष्णवेप्रभविष्णवे॥३॥आदिमध्यांत
हीनायवासुदेवायतेनमः॥सर्वाज्ञानविनाशायज्ञानदात्रेकृपाप्लवे॥४॥लक्ष्मीपतेनमस्तुभ्यंभक्त
संरक्षकायच॥भक्तिप्रियायदेवायशेषशायिन्नमोस्तुते॥५॥भुक्तिमुक्तिप्रदायैवविकुंठपतयेनमः॥

नारायणाय शांताय सत्वयुक्ताय ते नमः ॥ ६ ॥ वयं स पितरो धन्या यैः प्रदृष्टो जनार्द्दनः ॥ वरं देहि विशेषेण सृ
ष्टिसामर्थ्यदायकं ॥ ७ ॥ एवं स्तुतः प्रसन्नात्मा तानुवाच स्वयं हरिः ॥ सामर्थ्यमतुलं सृष्टेर्भविष्यति च वः पुमा
न् ॥ ८ ॥ तपसा सिद्धरूपाश्च भवंतो नात्र संशयः ॥ यं यमिच्छथ तं तं वा सफलं प्रभविष्यति ॥ ९ ॥ भवत्कृत
मिदं स्तोत्रं भुक्तिमुक्तिप्रदं भवेत् ॥ पठतां शृण्वतां चैव मत्प्रसादकरं परं ॥ १० ॥ एवमुक्त्वांतर्दधे सो विष्णुः पुरः
पुरंजयः ॥ ते पित्यक्त्वाश्रमं सद्ये जग्मुः स्वगृहमुत्तमं ॥ गच्छतां पथि तेषां वै मार्गे वृक्षा अनेकशः ॥ अराजके
समुत्पन्ना मार्गरोधनकारकाः ॥ १२ ॥ तान्दृष्ट्वा क्रोधयुक्तास्ते ससृजुर्वन्हिमुल्वणं ॥ तेन दग्धा वने वृक्षाः स
फला यत्र तत्र च ॥ तेषु स्वल्पस्थितेषु वै चंद्रस्तत्र समागतः ॥ वृक्षजां च सुतां गृह्य ददौ तेभ्यो यथाविधिः ॥ १४ ॥
ऋषिवर्यात्समुत्पन्नाप्सरसि वृक्षपालिता ॥ तां गृह्य शांतिमापन्ना अग्निं चक्रुः सुशांतकं ॥ १५ ॥ स्वराज्यं
प्राप्य ते सर्वे पालयामासुरादरात् ॥ प्रजाः पुत्रानिवाध्यक्षाः प्रचेतसः सुयंत्रिताः ॥ १६ ॥ मारिषायां प्रचे

तेभ्योदक्षत्वंचभविष्यसि॥रुद्रशापेनसर्वज्ञस्तथापितेजसायुतः॥गणेशवरदानेनब्रह्मपुत्रत्वमंजसा॥नगमिष्य
तितेदक्षप्रजापतिर्भविष्यसि॥१८॥दक्षंराज्येसमास्थाप्ययुर्वनंप्रचेतसः॥तेयुस्तत्रतपोघोरंयोगशांत्यर्थमा
दरात्॥तत्रापिनारदोयोगीगणेशगानतत्परः॥आययौपरमप्रीतःप्रचेतसांहितंचरत्॥२०॥तंदृष्ट्वाहर्षिताः
सर्वेप्रचेतसोमहौजसः॥श्रोतुंतत्कथयिष्यामिभवतांभावतोषितः॥२१॥नारदस्यवचःश्रुत्वाजगुस्तंतेप्रचेतसः
वदत्वंशांतिदंयोगंकृपयाकरुणानिधे॥२२॥श्रुत्वासवचनंतेषांहर्षेणमहतावृतः॥उवाचसकलंयोगंयोग
शांतिपदप्रदं॥२४॥नारदउवाच॥शांतियोगात्मकंभूयागणेशंकथयंतिवै॥योगज्ञाब्रह्मभूताश्चतंभजध्वं
प्रचेतसः॥२५॥अहंगणेशाभेदश्चयोगोयंशांतिदायकः॥कथितोविष्णुनापूर्वंमह्यंशांतिप्रदःपरः॥तेन
शांतिसमास्थायचरामिगणपंस्मरन्॥गतभ्रांतिश्चसर्वत्रहर्षयुक्तेनचेतसा॥२७॥चित्तस्यपंचभूमीनांभ्रां
तिंत्यक्त्वानरःसदा॥योगरूपोनसंदेहोभवतिशांतिशांतिगः॥२८॥सर्वंमायामयंप्रोक्तंभ्रांतिदंबुद्धिलालि

तं॥ त्यक्त्वा तं योगिनः शांता भविष्यथ प्रचेतसः॥२९॥ एवमुक्त्वा महायोगिनारदः स्वेच्छयां ययौ॥ हेरंबेति स्म
रन्स्वर्गे कैलासं हर्षसंयुतः॥३०॥ तेपि प्रचेतसः सर्वे कथितं योगमादरात्॥ क्रमेण साधयित्वा तं गाणपा अभ
वन्पराः॥३१॥ अंते गणेशदेहे ते तदाकाराः प्रजापते॥ जाता ब्रह्ममयाः शांताः प्रचेतसो महौजसः॥३२॥ प्र
चेतसां चरित्रं यः पठति यः शृणोति वा॥ तस्य भुक्तिश्च मुक्तिर्वै भविष्यति सुखप्रदा॥३३॥ ॥इति श्रीमदांत्ये
प्रचेतसां चरित्रं नाम सप्तविंशतिमोध्यायः॥२७॥ ॥मुद्गल उवाच॥ दक्षः प्रचेतसो राजा ततापत उत्त
मं॥ शतवर्षैर्गणाध्यक्षः प्रसन्नो वरदो भवेत्॥१॥ गणेशवरदानेन ससिद्धः ससृजे प्रजाः॥ देवा यक्षा मनुष्या
श्च पिशाचाद्याः समुद्भवाः॥२॥ नानाविधाः प्रजाः स्रष्टा ववृधुर्न यदा तदा॥ विरण्यां मैथुनीं सृष्टिं ससृजे स
प्रजापतिः॥३॥ दशाभवन्सहस्राणां पुत्रास्तस्मान्महौजसः॥ तानुवाच स्वयं दक्षः सृजध्वं तपसा युताः॥४॥ त
थेति तं प्रणम्यादौ गतास्तयोर्थमादरात्॥ तेषां मार्गे ब्रह्मपुत्रो नारदः सहसागतः॥५॥ उवाच विधिवत्तान्सद्योगमा

र्गे सनातनो॥ तेन युक्ताः च ते सर्वे भ्रमहीना जितेंद्रियाः॥७॥ ज्ञात्वा नष्टान्स्वपुत्रान्सः पुनर्दक्षः ससर्ज ह॥ असिक्न्यां
चैव पुत्राणां सहस्रं तेजसा युतं॥८॥ स तानुवाच प्रीतात्मा तपसा सृष्टिमुत्तमां॥ कुरुतं ते प्रणम्यादौ तं वनं ययु
रादरात्॥९॥ पुनस्तान्नारदस्तद्वद्ददौ ज्ञानं सुनिर्मलं॥ तेपि योगयुताः सर्वे ययुः स्वेच्छाविहारिणः॥१०॥ ज्ञात्वा वृत्तां
तमुग्रं वै दक्षः क्रोधसमन्वितः॥ शशाप नारदं ब्रह्मपुत्रं परमभाविकं॥११॥ त्वया पुत्रा मदीयाश्च नाशिताः
कर्ममार्गतः॥ वर्णाश्रमक्रमेणैव युक्ता भ्रष्टाः कृताः खल॥१२॥ नारद त्वमतो दुष्टप्रजाहीनो भविष्यसि॥ द्वि
मुहूर्त्तात्परं कालं न स्थातुं शक्यते त्वया॥१३॥ यत्र कुत्र महीद्देशे स्वर्गे पातालके पदे॥ भ्रमिष्यसि महादुष्टमच्छा
पान्नात्र संशयः॥१४॥ एवं शप्त्वा स्वयं दक्षो ययौ ब्रह्माणमादरात्॥ तं प्रणम्य जगन्नाथमुवाच विनयान्वि
तः॥१५॥ सृष्टिं करोमि देवेश केन मार्गेण तद्वद॥ नारदो दुष्टभावेन मोघां सृष्टिं समेकरोत्॥१६॥ तमुवा
च ततो ब्रह्मा सृज कन्याः सुलोचनाः॥ तथेति स ययौ स्थानं स्वकीयं सृष्टुमारभत्॥१७॥ षष्टिर्दक्षो सृजत्कन्या

वैरण्यांतेजसान्विताः॥चारुरूपामहाभागामातरःसर्वदेहिनां॥ददौसदृशधर्मायकश्यपायत्रयोदश॥स
प्तविंशच्चचंद्रायचतस्रोरिष्टनेमये॥१९॥दद्वदौबहुपुत्रायद्वेकृशाश्वायभावतः॥द्वेपुत्रेंगिरसेतद्वद्वक्षेतासां
चविस्तरं॥२०॥मरुत्वतीयसूर्यामीलंबाभानुररुंधती॥संकल्पाचमुहूर्त्तावैसाध्याविश्वाचभामिनी॥२१॥
धर्मपत्न्योदशैताश्चतासांपुत्रान्निबोधच॥विश्वेदेवास्तुविश्वायासाध्यान्साध्यजनत्सुतान्॥२२॥मरुत्व
त्यांमरुत्वंतोवसोस्तुवसवःस्मृताः॥भानोश्चभानवःसर्वेमुहूर्त्ताश्चमुहूर्त्तजाः॥२३॥लंबायानादघोषौच
नागवीथीस्तुयामिजः॥पृथिव्यामिषमंसर्वमरुंधत्यामजायत॥२४॥संकल्पायास्तुसंकल्पाधर्मपुत्राइमे
स्मृताः॥भानोश्चभानवःसर्वेतेषांपुत्रैश्चपुत्रीभिरखिलंवर्त्ततेजगत्॥२५॥आपोध्रुवोथसोमश्चधरश्चै
वानलोनिलः॥प्रत्यूषोथप्रभासश्चवसवोष्टौप्रकीर्त्तिताः॥२६॥अदितिदितिर्दनुःकद्रुररिष्टास्तूरसा
तथा॥सुरभिर्विनताचैवताम्राक्रोधवशात्विरा॥२७॥मुनिःस्वसाचधर्मज्ञातासांपुत्रानिबोधवै॥विव

स्वानथधाताचभगस्त्वष्टातथांशकः॥२८॥वरुणाद्याश्चदेवायेसर्वेतेचादितेःसुताः॥दितेश्चसकलाःदैत्याः
पुत्राःशास्त्रेषुसम्मताः॥२९॥तथैवचदनोःपुत्रास्ताराद्यादानवास्मृताः॥तारोथविप्रचित्तिश्चशंबरःक
पिलस्तथा॥३०॥शंकरश्चैवस्वर्भानुर्वृषपर्वाचवीर्यवान्॥प्राधान्येनासुराःश्रेष्ठादानवाःकथितामया॥३१॥
सुरसायाःसहस्रंचसर्पाणामभवत्तथा॥अरिष्टाजनयामासगंधर्वाणांसहस्रकं॥३२॥शेषाद्याश्चमहाना
गाःकद्रोपुत्राःप्रजापते॥ताम्राचजनयामासकन्याषट्कंसुलोचनं॥३३॥शुकीश्येनींचभासींचसुग्रीवांग्र
थिकांशुचिं॥तासांपुत्रादिभिःसर्वंपक्षिवृंदंबभूवच॥३४॥सुरभिर्जनयामासमहीषीगाःप्रजापते॥इरा
वृक्षलतावल्लीतृणजातिश्चसर्वशः॥३५॥मुनेःपुत्रास्तथादक्षाःपुण्यजनास्तथा॥रक्षोगणंक्रोधवशाज प्रोक्ताः
नयामासदारुणं॥३६॥विनतायाश्चपुत्रौद्वावरुणोगरुडोपरः॥खसायाःखेचराःपुत्राःप्रेताद्याश्च
प्रजापते॥३७॥एतेकश्यपदायादाःस्थावराजंगमात्मकाः॥वैवस्वतेंतरेह्यस्मिन्प्रख्याताःकथितामया॥३८॥अ

रिष्टनेमिपुत्राश्चवेधसोरूपधारकाः॥ वहुपुत्रस्यपत्न्योस्तुचतस्रोविद्युतस्मृताः॥३९॥ अंगिरसस्तथापत्न्यो
ऋषयोवृषसत्कृताः॥ कृशाश्वस्यचदेवर्षिर्देवप्रहरणःसुतः॥४०॥ एतेयुगसहस्रांतेजायंतेपुनरेवच
॥मन्वंतरेषुसर्वेषुतुल्यकार्यैःस्वनामभिः॥ पुत्रान्ब्रह्मर्षिरुत्पाद्यकश्यपस्तोषवर्जितः॥ ततापतपउ
ग्रंवैपुत्रार्थेपरमार्थवित्॥४२॥ तस्यैवंतपतःपुत्रौप्रादुर्भूतौमहौजसौ॥ वत्सरश्चासितोनाम्नातावुभौ
ब्रह्मवादिनौ॥४३॥ वत्सरानैर्ध्रुवोजज्ञेरैभ्यश्चसुमहायशाः॥ रैभ्याच्चजज्ञिरेरुद्राःपुत्राद्युतिमतांवराः॥
॥४४॥ च्यवनस्यसुताभार्यानैध्रुवस्यमहात्मनः॥ सुमेधाजनयामासपुत्रांश्चकुंडपायिनः॥४५॥ अ
सितस्त्वेकपर्णायांब्रह्मिष्ठःसमपद्यतः॥ नाम्नावैदेवलःपुत्रोयोगाचार्यश्चसस्मृतः॥४६॥ शांडिल्यःप
रमोयोगीसर्वतत्त्वार्थविच्छुचिः॥ इत्याद्यावहवःपुत्राःकश्यपश्यमयोदिताः॥४७॥ एतेषांस्मरणाज्जंतोः
कामपूराभवंतिच॥ पठनान्नात्रसंदेहोमूलरूपाःप्रकीर्त्तिताः॥४८॥ इतिश्रीमदांत्ये॰॥ कश्यपसृष्टि

वर्णनंनामाष्टाविंशोध्यायः॥२८॥ ॥मुद्गलउवाच॥ तृणबिंदोःसुताश्रेष्ठानाम्नेलविलकास्मृता॥पु
लस्त्यायसराजर्षिदक्षोविनयसंयुतः॥१॥तस्यांजज्ञेपुलस्त्यादेविश्रवामुनिसत्तमः॥तस्यपत्न्यश्चतस्तु
सुरूपावामलोचनाः॥२॥पुष्पोत्कटातथोराकाकैकसीदेववर्णिनी॥ज्येष्ठंवैश्रवणंतस्मात्सुषुवेदेववर्णि
नी॥३॥कैकस्यजनयत्पुत्रांरावणंलोकरावणं॥कुंभकर्णंशूर्पनखांपुत्रींतथाविभीषणं॥४॥रावणंकुंभ
कर्णंचविभीषणाःप्रतापवान्॥सविपुलंतपस्तेषुःसदस्त्राणांदशैवच॥५॥प्रसन्नश्चततोब्रह्मावरदस्ता
नुमाययौ॥रावणोवरयामासराज्यंनिर्दग्धकंटकं॥६॥भ्रातुर्वैःखड्गयाणंसलोकानांबलगर्वितः॥सर्वेभ्यो
मृतिंनोहिस्मृतःकपिमानुषौ॥७॥कुंभकर्णोभवद्राणंमोस्तिवरमुत्तमं॥वरमासनिद्रायायुक्तंवव्रेतंवर
दंप्रभुं॥८॥विभीषणस्तुधर्मात्मास्वधर्मेरुचिरंवरं॥वरयामासधातारंविष्णुभक्तिंसुभावनः॥९॥ब्रह्मा
त्वावरांस्तेभ्योयथोक्तानिजगंततः॥तेरक्षःप्रवराजातास्त्रिषुलोकेषुविश्रुताः॥१०॥जित्वात्रिभुवनंदश

रावणः षष्टिलक्षकं॥ वर्षाणां मानुषाणां स राज्यं चक्रे सहानुजः॥११॥ रामेण संहतो दुष्टकुंभकर्णश्च रावणः॥
विभीषणं ततो राज्ये स्थापयामास राघवः॥१२॥ वैश्रवणस्तपस्तप्त्वा गणेशस्य महात्मनः॥ एकाक्षरविधानेन तो
षयामास विघ्नपं॥१३॥ दशवर्षसहस्रैस्तु प्रसन्नोभूद्गजाननः॥ भक्तिं स्वचरणे तस्मै ददौ शंकरमित्रतां॥१४॥
उत्तरे दिगीशं चक्रे धनपादपदं तथा॥ ततो देवेषु विख्यातः कुबेरप्रबभूव ह॥१५॥ पुष्पोत्कटा विश्रवसो जनय
च्च महोदरं॥ महापार्श्वं प्रहस्तं च खरं कुंभीनसीं सुतां॥ राकासंजनमासत्रिशिरसं च दूषणं॥ विद्युज्जिह्वम
हाकालं विश्रवसः प्रजापते॥१७॥ इत्येते क्रूरकर्माणः पौलस्त्या राक्षसा दश॥ विख्याता पुरुषश्रेष्ठा राक्षसा
नां महाबलः॥१८॥ पुलहस्य मृगाः सर्वे पुत्रा व्यालाश्च दंष्ट्रिणः॥ पिशाचा बहवो भूताः शूकरा हस्तिनस्तथा॥
॥१९॥ अनपत्यक्रतुश्चात्र स्मृतो वैवस्वतांतरे॥ मरीचेः कश्यपः पुत्रः स जातो वै प्रजापतिः॥२०॥ भृगोः पुत्रस्तु
मेधावी दैत्याचार्यो महायशाः॥ स्वाध्यायनिरतः काव्यो बभूव च प्रजापते॥२१॥ शैवमार्गरतो भूत्वा सदा

शंकरपूजकः॥ कैलासंप्रापशांत्यर्थंहरेयाबोधितोभवत्॥२२॥ शांतियोगप्रसिद्ध्यर्थंगणेशमभजत्कविः॥ क्र
मेणशांतिमापन्नोगाणपत्योबभूवसः॥२३॥ अत्रेःपुत्रोभवत्सोमोमृतरूपमयोमहान्॥ अरुंधत्यांवशिष्ठा
द्वैशक्तिःपुत्रोबभूवह॥२४॥ तस्मात्पराशरःसाक्षात्तपोनिधिःसमुद्भवः॥ शंकरस्यसदाभक्तिंचकारपरमा
दरात्॥२५॥ वशिष्ठयोगशास्त्रज्ञंपितामहमनिंदितं॥ स्वकर्मकुशलंशांतंपप्रच्छशांतिहेतवे॥२६॥ पराशरउ
शिवोयंमोहहीनश्चनेतिकर्त्ताव्ययःस्मृतः॥ कथंब्रह्मणिनिर्मोहोमोहोभवेत्भ्रमप्रदः॥२७॥ मुद्गलउवाच॥
पराशरवचःश्रुत्वावसिष्ठस्तमुवाचह॥ हर्षयुक्तःस्वपौत्रायशांतियोगंसनातनं॥२८॥ वसिष्ठउवाच॥ शृ
णुपुत्रप्रवक्ष्यामिब्रह्मणाकथितंचमे॥ योगशांतिकरंतुभ्यंकथयामिविशेषतः॥२९॥ अहंशांत्यर्थमत्यं
तंभ्रमितोनलभेचतां॥ गतोलोकेप्रविख्यातेब्रह्मणःपरमेष्ठिनः॥३०॥ तत्रसंपूजयंतंवैब्रह्माणंदृष्टवानहं॥
गणेशंमूर्त्तिगंपुत्रसंस्थितोहंप्रणम्यतं॥३१॥ पूजाविधिंसमाप्यासौसभायांसमुपागतः॥ तत्राहंविनतोभू

त्वाह्यमेदंतंमहाद्युतिं॥३२॥त्वत्तःसर्वाणिभूतानिजायतेनात्रसंशयः॥त्वयिनाथप्रलीयंतेत्वत्तःपरंनविद्यते॥३३॥
त्वयासौपूजितःस्वामिन्कःश्रेष्ठोवदसांप्रतं॥बहुविधमहंभ्रांतोनलभेशांतिमुत्तमं॥३४॥मदीयवचनंश्रुत्वा
ब्रह्माहर्षसमन्विता॥जगादमांयथायोग्यंपात्रंदृष्ट्वापितामहः॥३५॥ब्रह्मोवाच॥शृणुपुत्रमहाभागगणे
शोयोगशांतिदः॥अस्माकंकुलदेवश्चसर्वेषांसोपिनिश्चितं॥३६॥तस्माद्वयंसमुत्पन्नास्तेनसंस्थापिताःपदे॥
सर्वसिद्धिप्रदातारंतंभजामिनिरंतरं॥३७॥अंतेतत्रैवलीयंतेवयंपुत्रनसंशयः॥तस्मादादिगणेशानः
पूज्योमातापितास्मृतः॥३८॥ज्येष्ठराजेपदंपश्यवेदेषुकथितंसुत॥तस्माज्ज्येष्ठोनवेदेष्वादिःसर्वेभ्योगणे
श्वरः॥३९॥यआदिःसभवेदंतेकथितंशास्त्रसंमतो॥अतस्तत्रवयंलीनाभविष्यामोनसंशयः॥४०॥मध्ये
नानाविधःसोपिकलांशेनगजाननः॥क्रीडतितत्कलांशांश्चवयंतस्मात्स्मृताःसुत॥४१॥शांतिमिच्छसित्वं
पुत्रतांवदामिसमासतः॥पंचधाचित्तवृत्तित्वंत्यक्त्वाशांतोभविष्यसि॥४२॥क्षिप्तंमूढंचविक्षिप्तमेकाग्रंच

निरोधकं॥चिंतामणिसमाख्यातस्तेनचित्तंप्रकाशितं॥४३॥अहंगणेशरूपश्चेत्संयोगायोगताचमे॥नास्तिभि
न्नत्वभावश्चतेनभ्रांतिर्गताभवेत्॥४४॥जगत्सूब्रह्मसूप्रोक्तमैश्वर्यमतुलंबुधैः॥जानीहिसिद्धिरूपंत्वंभ्रांति
दायकमंजसा॥४५॥जगत्ब्रह्ममयाकाराबुद्धिःशास्त्रेषुकथ्यते॥पंचधासासमाख्याताचित्तरूपानसंशयः
॥४६॥तयोःप्रकाशितंबिंबंगणेशस्यमहात्मनः॥मोहितःपश्यमायाभ्यांतदाकारंहृदिस्थितं॥४७॥बीं
बंभावंत्यजेत्वंवैतदाशांतिंगमिष्यसि॥चित्तमैश्वर्यमोहोश्चबींबंनैवप्रदृश्यते॥४८॥एवमुक्त्वास्वयंमांस
विररामपितामहः॥अहंप्रणम्यतंदेवंप्रादक्षिण्येननिर्गतः॥४९॥गत्वावनांतरंपुत्रअतपंतपउत्तमं॥
एकाक्षरेणमंत्रेणध्यात्वाजपपरायणः॥५०॥क्रमेणयोगभूमीनांभ्रांतिंत्यक्त्वामहामुनिः॥चिंताम
णिःस्वयंसाक्षादभवंशांतियोगधृक्॥५१॥तथापिगणराजस्यमंत्रध्यानंमहात्मनः॥दर्शनार्थंतपश्चो
ग्रमकरंवर्हितावहं॥५२॥पूर्णवर्षशतेषुमांययौदेवोगजाननः॥प्रत्यक्षंमूषकारूढोयोगशांतिस्वरू

पृथक्॥१३॥इतिश्रीमदांत्ये वशिष्ठतपोवर्णनंनामैकोनत्रिंशोध्यायः॥२९॥मुद्गलउवाच॥आग
तंगणराजंसदृष्ट्वाहर्षसमन्वितः॥ननामदंडवद्भूमौतुष्टावतंयथामतिः॥१॥वशिष्ठउ॰॥अद्येयंध
रणीधन्यापितरोतपआश्रमः॥विद्याव्रतादिमेधन्यंदर्शनात्तेपदस्यच॥२॥तंकर्त्ताकारणंचैवकारणा
नांनसंशयः॥गम्यागम्यमयःप्रोक्तोवेदेषुवेदवादिभिः॥३॥सर्वरूपश्चसर्वैस्त्वंहीनःसर्वप्रकाशकः॥
योगाभेदमयस्त्वंत्वांकथंस्तौमिगणाधिपं॥४॥तथापिभक्तिपाशेनयंत्रितस्त्वंगजानन॥अनुग्रहा
र्थमायातोनामरूपधरःप्रभो॥५॥त्वद्दर्शनजबोधेनस्तौमित्वांब्रह्मनायकं॥वेदादिभिःशिवाद्यै
श्चसंस्तुतंयोगिभिःपरं॥६॥नमस्तेगणनाथायनमस्तेसर्वसाक्षिणे॥सर्वाकारायवैतुभ्यंस्वसं
वेद्यायतेनमः॥७॥सिद्धिबुद्धिपतेतुभ्यंसिद्धिबुद्धिप्रदायच॥अमेयशक्तयेदेवदेवदेवनमोनमः॥
॥८॥असंप्रज्ञाततुंडायसंप्रज्ञातशरीरिणे॥तयोर्योगिचयोगात्मदेहायतेनमोनमः॥९॥शांतियो

गप्रकाशाय शांतियोगमयाय ते॥ योगिभ्यो योगदात्रे च योगेशाय नमो नमः॥२०॥ वक्रतुंडाय वै तुभ्यमेक
दंतधराय च॥ ब्रह्माकारात्मकानां ते चिन्हानां धारिणे नमः॥२१॥ स्तुवतस्तस्य हर्षेण कंठरोधः समा
ययौ॥ ननर्त हृष्टरोमा वै देहभानविवर्जितः॥२२॥ भक्तिरंशेनिमग्नं तं वीक्ष्य देवो गजाननः॥ तमुवा
च महाभक्तं भावज्ञो भावपूरकः॥२३॥ श्रीगणेश उ०॥ त्वया कृतमदीयं यत्स्तोत्रं भक्तिरसप्रदं॥ धर्मा
र्थकाममोक्षाणां दायकं प्रभविष्यति॥२४॥ अचला मदीया भक्तिस्तवानघ भविष्यति॥ स्मृतमात्रश्च
तेग्रेहं स्थास्यामि मुनिसत्तम॥२५॥ एवमुक्त्वा गणाधीशोंतर्दधे तस्य पश्यतः॥ सोपि तं हृदये पश्य
न्स्थितः शांतिसमन्वितः॥२६॥ गाणपत्यस्वभावेन मूर्त्तिपूजापरायणः॥ वसिष्ठः स महाभागो योगि
वंद्यो बभूव ह॥२७॥ वसिष्ठ उ०॥ एतत्ते कथितं वत्स शांतियोगप्रदं शुभं॥ ज्ञानं तेनैव मार्गेण गणेशं भज भ
क्तितः॥२८॥ एवमुक्तः प्रणम्यादौ मुनिं पौत्रः पराशरः॥ वने गत्वा चकारासौ तपः परमदारुणं॥ पितामहे

नयत्ज्ञानंकथितंयोगदंमहत्॥तादृशंसाधितंतेनयोगभूमिक्रमेणच॥२०॥त्यक्त्वाभूमिंस्वयंयोगीगाणप
त्योबभूवह॥तस्यपुत्रत्वमापन्नोव्यासोविष्णुःस्वयंप्रभुः॥२१॥तथापिमुनिनातेनपत्न्यावत्सलयासह॥
तपस्तप्तंमहाघोरंगणेशस्यमहात्मनः॥२२॥संकल्पंपुत्रकामार्थंचकारसमहामुनिः॥गणराजःस्वयंमे
वैभवितापुत्रउत्तमः॥२३॥दशवर्षसहस्रैस्तुप्रसन्नोगणनायकः॥वरंदातुंसमायातोभक्तिभावेन
तोषितः॥२४॥तंदृष्ट्वासहसोत्थायप्रणम्यप्रकृतांजलिः॥तुष्टावसुस्थिरोभूत्वापत्न्यासाकमुदार
धीः॥२५॥पराशरउ॰॥नमस्तेगजवक्त्रायगजाकारायतेनमः॥नरकुंजररूपायगणेशायनमोनमः॥
॥२६॥निर्गुणायगुणाधाररूपिणेपरमात्मने॥परात्परायदेवायानादिसिद्धायतेनमः॥२७॥अनंता
ननधारायानंतपाण्यंघ्रिरूपिणे॥अनंतविभवायैवगकारायनमोनमः॥२८॥सर्वहीनायदेवायमा
याभ्यांवर्जितायते॥सदाब्रह्ममयायैवणकारायनमोनमः॥२९॥तयोश्चस्वामिनेतुभ्यंगणेशायनमो

नमः॥ स्वानंदवासिने पूर्णभुक्तिमुक्तिप्रदायते॥३०॥ किं स्तौमि देवदेवेश वेदवेदांतवादिभिः॥ संपादितं प
रं ब्रह्म त्वामतः प्रणमाम्यहं॥३१॥ यदि तुष्टोसि देवेश तदा पुत्रो भव प्रभो॥ आवयोर्गणनाथ त्वं तदा मे
स्यात्स्थिरं मनः॥३२॥ अस्माकं कुलदेवश्च त्वमेव गणनायक॥ ब्रह्मभावेन त्वां नित्यं भजामि तत्र वि
घ्नप॥३३॥ पुत्रभावेन देवेश भजामि संसृतौ गतः॥ संसारसफलस्तेन ब्रह्मरूपो भवेच्च मे॥३४॥ श्रु
त्वैवं वचनं तस्य पराशरस्य भक्तिगं॥ तमुवाच गणाधीशो भक्तं योगधरं परं॥३५॥ गणेश उ॥ त्व
या यत्प्रार्थितं विप्र तत्सर्वं सफलं भवेत्॥ तव पुत्रो भविष्यामि गजासुरवधाय च॥३६॥ त्वया स्तो
त्रं कृतं यच्च तत्सर्वं कामदं भवेत्॥ भुक्तिमुक्तिकरं तेषां पठतां शृण्वतां नृणां॥३७॥ एवमुक्त्वांतर्दधे
सौ गणेशो ब्रह्मनायकः॥ पराशरः प्रसन्नात्मा सपत्नीको बभूव ह॥३८॥ ॥इति श्रीमदांत्ये पराशरवरप्रदानो नाम त्रिंशोध्यायः॥३०॥ ॥दक्ष उवाच॥ को सौ गजासुरः नाम्ना दैत्यः परमदारुणः॥

वरदस्यचरित्रंमेवधपर्यंतमुत्तमं॥१॥यदर्थेगणराजोयंमुनिपुत्रोभवत्प्रभो॥मुद्गलतन्नसामान्यंजन्मादि
रसुरस्यच॥२॥सूतउवाच॥दक्षस्यवचनंरम्यंश्रुत्वायोगींद्रसत्तमः॥जगादसकलंतस्यचेष्टितंदैत्यप
श्यवै॥३॥मुद्गलउवाच॥शृण्वदक्षपुरावृत्तमितिहासंवदामिते॥पापप्रशमनंपूर्णंभुक्तिमुक्तिफल
प्रदं॥४॥महिषासुरनाशंचचकारजगदंबिकां॥तस्यपुत्रोमहातेजागजासुरइतिस्मृतः॥५॥पितुर्व
धेनसंतप्तोदेवानांवधकांक्षया॥शुक्रोपदिष्टमंत्रेणशंकराराधनेरतः॥६॥ततापसतपोघोरंनि
राहारसमन्वितं॥पंचाक्षरविधानेनतोषयामासशंकरं॥७॥दशवर्षसहस्रैस्तुप्रसन्नोभूच्छिवः
स्वयं॥आयरौतंवरंदातुंगजासुरतपोवने॥८॥काष्ठवत्संस्थितंदैत्यंदृष्ट्वाविस्मयमागतः॥जगादत्तं
स्वभक्तंवैशंकरःकरुणानिधिः॥९॥श्रीशिवउ॰॥वरंवरयमत्तस्त्वंगजासुरमहामते॥तपसापरितुष्टो
हंदास्यामिदुर्लभंहिते॥१०॥शंकरस्यवचःश्रुत्वाहर्षयुक्तोमहासुरः॥प्रणम्यपूजयामासषोडशैरु

पचारकैः॥११॥अथर्वशिरसाशंभुंतुष्टावदैत्यनायकः॥वरंवव्रेमहाक्रूरंतच्छृणुष्वमहामते॥१२॥गजासुर
उ॥यदितुष्टोसिदेवेशवरंदेहिमहेश्वर॥ब्रह्मांडवासिनःसर्वेतेभ्योमृत्युर्नमेभवेत्॥१३॥राज्यंब्रह्मांडगो
लस्यदेहिसामर्थ्यमुत्तमं॥सर्वातिगंमहेशाननान्यंयाचेपरंवरं॥१४॥तथेतितमुवाचाथशिवोंतर्द्धानगोभ
वत्॥हर्षयुक्तोमहादैत्योगृहंततःसमाययौ॥१५॥मात्रासंमानितःसोपिसुहृद्भिश्चगजासुरः॥दैत्याःस
माययुःसर्वेज्ञात्वाक्रूरंगजासुरं॥१६॥शंकरंतेसमाश्रित्यग्रहेतस्यमहात्मनः॥स्वयंगत्वागुरुंशुक्रंमान
यामासदैत्यपः॥ततोमुनिगणैःसार्द्धमभिषेकंचकारसः॥१७॥दैत्यानांदानवानांचराजाभूत्सगजासुरः
॥तैर्युक्तःपृथिवींजित्वाययौस्वर्गंमहाबलः॥१८॥देवाःपलायिताःसर्वेज्ञात्वाक्रूरंगजासुरं॥शंकरंते
समाश्रित्यस्थिताःसर्वेभयातुराः॥१९॥दैत्यःसमावृतःसोपिकैलासमगमत्ततः॥शंकरःक्रोधसंयुक्तं
तंययौदेवसंवृतः॥२०॥युद्धायशंकरस्तेनागतोज्ञात्वामहासुरः॥स्वयंसैन्यंपुरस्कृत्वाययौरणविधित्सया॥

देवानांदानवानांचयुद्धंपरमदारुणं॥संजातंचततोदैत्याःपलायनपराययुः॥२२॥तंदृष्ट्वाक्रोधसंयुक्तोगजासु
रप्रतापवान्॥बाणवृष्टिंमहोग्रांससमसर्जदेवनाशिनीं॥२३॥बाणैर्निपतितास्तस्यदेवाःसर्वेधरातले॥छिन्नां
गामरणप्रायाःप्रलयंमेनिरेतदा॥२४॥इंद्रादयश्चदिक्पालाःपतिताबाणपीडिताः॥अहनद्गदयाविष्णुं
सोपिभूतलमाश्रितः॥२५॥ततःक्रोधसमायुक्तःशंकरःशूलमाददे॥तेनाहनन्महादैत्यंप्रलयाग्निस
मेनसः॥२६॥त्रिशूलेनहतःसोपिनचचालासुराधिपः॥वरदानप्रभावेणशस्त्राणिव्यर्थतांययुः॥२७॥
सहसागत्यदैत्येशोगृह्यपादौहरस्यवै॥भ्रामयित्वामहेशानंचिक्षेपरणमूर्द्धनि॥२८॥ततोदेवगणाः
सर्वेपलायनपरायणाः॥ययुर्दशदिशोदृष्ट्वादैत्यसंत्रासतापिताः॥२९॥दैत्योपिशिवलोकंतंदैत्यैः
सहसमाययौ॥स्थापयामासदेवानांपदेषुश्रेष्ठदानवान्॥३०॥विकुंठादिपदेषुतेस्थितास्तेनसुमा
निताः॥स्वर्गभोगकरासर्वेकृतादैत्यासुरारिणा॥३१॥कैलासेसरुरुंदैत्यंस्थापयामासवीर्यवान्॥स

यंसमागतोदक्षपृथिव्यांदैत्यपैर्वृतः ॥३२॥ महिषाख्यपुरेदुष्टः संस्थितोदैत्यपैः
सह ॥ चकारसोतुलंराज्यंत्रैलोक्यस्यमहाबलः ॥३३॥ गतेबहुतरेकालेदेवाः सर्वेभ
यातुराः ॥ पर्वतांतरसंगुप्ताः संस्थिताअभयान्द्विजैः ॥३४॥ विचारमखिलाश्चक्रुर्ग
जासुरवधायते ॥ तत्रविष्णुर्जगादेदंवचनंसर्वतोषदं ॥३५॥ श्रीविष्णुरु० ॥ ब्रह्मांडवासि
नोयेवैतेभ्योमृत्युर्नविद्यते ॥ दैत्यस्यवरदानेनतेनसर्वेपराजिताः ॥३६॥ स्वानंदलोक
गः साक्षाद्गणेशोदेवनायकः ॥ ब्रह्मांडवर्जितंब्रह्मतस्मात्तस्यमतिर्भवेत् ॥३७॥ अतस्तंदे
वदेवेशंतपसादुष्करेणवै ॥ आराधयामैषंदेवाः सर्षिगणाः परं ॥३८॥ सहत्वातंमहा
दैत्यंपदानिवः प्रदास्यति ॥ यदिहितंसुराः कार्यंवचनंमेसुखप्रदं ॥ विष्णोर्वचनमाकर्ण्यदे

देवामुनिगणास्तथा॥ साधुसाधितितत्रोचुस्तपसिसंस्थितावभुः॥४०॥ केचिन्मंत्रजपंचक्रुः केचि
न्नामजपंतथा॥ केचिन्मानसपूजायांनिरताश्चबभूविरे॥४१॥ केचिद्ध्यानंगणेशस्यचक्रुः के
चित्स्तुतिंविभोः॥ निराहारंतथाकेचिद्वायुपत्रादिभक्षकाः॥४२॥ केचिद्धोमंचपंचाग्निंधूम्रपा
नंतथापरे॥ इत्यादितपसादेवंतोषयामासरादरात्॥४३॥ शतवर्षेषुतेषांवैप्रादुर्भूतोगजान
नः॥ पुरतस्तानुवाचेदंवचनंभक्तवत्सलः॥४४॥ गणेशउवाच॥ देवाश्चमुनयःसर्वेवरंब्रूतम
नेप्सितं॥ दुर्लभंतदपिदास्येतपसातोषितोभृशं॥४५॥ गणेशवचनंश्रुत्वादृष्ट्वादेवंपुरस्थितं॥
प्रणेमुर्मुनयोदेवादंडवत्पृथिवीतले॥४६॥ पुपूजुःपरयाभक्त्याब्रह्मेशंब्रह्मभाविताः॥ तुष्टुवुः
संप्रहृष्टास्तेसरोमांचाःप्रजापते॥४७॥ देवर्षयऊचुः॥ नमोनमोगणेशायगणपालकमूर्तये॥ ग
णरूपेनसर्वत्रसंस्थितायनमोनमः॥४८॥ मूषकारूढकायैवानादिरूपायतेनमः॥ आकारादि

भक्तसंरक्षकायच॥भक्तवत्सलभावायविघ्नेशायनमोनमः॥५०॥सिद्धिपतेनमस्तुभ्यं १

विहीनायाकाररूपायतेनमः॥४९॥हेरंबायनमस्तुभ्यंसिद्धिदात्रेचढुंढये॥बुद्धिदात्रेधियःपात्रे
सर्वांतश्चारिणेनमः॥५१॥स्वानंदपतयेतुभ्यंस्वसंवेद्यायतेनमः॥योगरूपायशांताययोगानांप
तयेनमः॥५२॥आदिमध्यांतहीनायकर्त्रेहर्त्रेनमोनमः॥पालकायत्रिभिर्हीनगुणेशायनमोन
मः॥५३॥वक्रतुंडायदेवायलंबोदरधरायच॥सर्वेषांहृदिसंस्थायविनायकनमोस्तुते॥५४॥
यंस्तोतुंनसमर्थाश्चवेदाःसांगाःकदाचन॥वयंतत्रचकेदेववेदैर्ज्ञानधरायतः॥५५॥एवंस्तुत्वा
गणेशानंपेतुस्तेतस्यपादयोः॥धृत्वामनसितद्रूपंभक्तिभावेनयंत्रिताः॥५६॥पुनरुत्थायते
सर्वेतमूचुर्भयविह्वलाः॥कृतांजलिपुटादेवंगणेशंसर्वनायकं॥५७॥यदितुष्टोसिदेवेशज
हिदैत्यंगजासुरं॥पदभ्रष्टावयंतेनकृताकर्मविवर्जिताः॥५८॥भक्तिंतेदेहिविघ्नेशसर्वदुःखविना
शनीं॥एतदेववरोस्माभिर्वांछितोद्विरदानन॥५९॥देवार्षीणांवचःश्रुत्वाभक्तवत्सलभावतः॥उ

वाचतान्गणाध्यक्षो हर्षयन्वचनंशुभं॥ ६०॥ गजासुरवधंदेवामुनयश्चसुदुष्करं॥ तथापिभवतांवा
क्याकरिष्येहंनसंशयः॥ ६१॥ अचलामदीयाभक्तिर्भविष्यतिसुदुर्लभा॥ पराशरस्यपुत्रोहंभवि
ष्यामिवधायवै॥ भवत्कृतमिदंस्तोत्रंममप्रीतिविवर्द्धनं॥ भुक्तिमुक्तिप्रदंपूर्णंभविष्यतिनसं
शयः॥ ६३॥ पठतेशृण्वतेविप्रादेवाःसर्वार्थसिद्धिदं॥ दुःखघ्नंसततंतेषांभविष्यतिसुसिद्धि
दं॥ ६४॥ इत्युक्त्वांतर्दधेदेवोगणेशःसर्वसिद्धिदः॥ वत्सलोदरगोभूत्वापराशरसुतोभवत्॥
॥ ६५॥ जातकर्मादिकंसर्वंचकारमुनिसत्तमः॥ ब्रह्मणैर्हर्षितोभूत्वापत्न्यास्वयमुदारधीः॥ ६६॥
सबालोववृधेतत्रहर्षयन्मातरंनिजां॥ पितरंचेष्टितैःस्वीयैर्बालक्रीडनकैस्तथा॥ ६७॥ पंचमेव्रत
बंधंसचकारमुनिसत्तमः॥ वेदानध्यापयामाससांगांस्तान्गणपायच॥ ६८॥ विवाहमकरोत्तस्य
सिद्धिर्बुद्धिश्चशाश्वते॥ मरीचेश्चसुतेजातेदत्तेतेनविधानतः॥ ६९॥ इतितेकथितंसर्वंपराशरसु

तात्मकं॥ चरितं गणनाथस्य दैत्यस्य चेष्टितं शृणु॥७०॥ ॥इति श्रीमदांत्ये० पराशरसुतोत्पत्तिं ना
मैकत्रिंशोध्यायः॥३१॥ए॥मुद्गल उ०॥ एकदा स्वसभायां वै संस्थितं दैत्यपुंगवं॥ आययौ सहसा तं च
नारदो कौतुकी मुनिः॥ दैत्येन मानितो दक्षतमुवाच महामुनिः॥ शृणु दैत्याधिपः प्राज्ञ हितं ते वचनं
महत्॥२॥ अरण्ये मुनिभिर्देवैर्गणेशो भक्तिभावतः॥ आराधितो वधार्थं ते पराशरसुतोभवत्॥३॥
इत्युक्त्वा प्रययौ तस्मान्नारदो दिव्यदर्शनः॥ दैत्यरोषसमाविष्टो देवर्षीणां वधे रतः॥४॥ आययौ यत्र
ते देवा मुनयः संस्थिताः खलः॥ दैत्यैः समावृतः सर्वैर्महाबलपराक्रमैः॥५॥ धृत्वा स सकलान्देवान्ख
लः सर्षिगणांस्तदा॥ तान्हंतुं शस्त्रमादत्ते तावतैर्विघ्नपः स्मृतः॥६॥ स्मृतमात्रो गणाध्यक्षो बुद्धि
भेदं चकार ह॥ दैत्यस्य तेन दैत्येन मनसि धारितं महत्॥७॥ ममाधीना इमे विप्रा देवाश्चैव न संशयः॥
एषां दंडः प्रकर्त्तव्यो येन सत्वं गमिष्यति॥८॥ पश्चात्क्रियति काले हं हनिष्यामि बलात्किल॥ एवं निश्चि

तंसंकल्पउवाचतान्गजासुरः॥९॥गजासुरउ॰॥देवामुनिगणासर्वेशृण्वंतुमेवचोहितं॥कर्त्तव्यं
जीवितुंतच्चयदीछतत्वरान्वितैः॥१०॥कर्णौसंपीड्यपाणिभ्यामुत्तमांगंधरातले॥नित्यमास्फा
लयध्वंहिवैममपादस्यसन्निधौ॥११॥तदामुंचामिदेवेशान्नान्यथामुनिसत्तमान्॥शिरश्छे
दंचसर्वेषांकरिष्यामिनसंशयः॥१२॥भवद्भिःप्रार्थितोदेवोगणेशोदेववल्लभः॥पराशर
सुतोजातःकुरुध्वंतेनसंयुता॥१३॥एवंतस्यवचःश्रुत्वोवाचतंविष्णुरादशत्॥गणेशंमन
सास्मृत्वासामयुक्तंवचःशुभं॥१४॥त्वयायत्कथितोदंडोवयंतंकरवामहे॥सर्वान्देवमु
नीन्मुंचंगमिष्यामोगजाननं॥१५॥आनयित्वाचदेवेशंतेनसार्द्धंप्रयत्नतः॥त्वत्पादकमले
नित्यंकरिष्यामोयथातथं॥१६॥गणेशमाययाभ्रांतोदैत्यराजप्रतापवान्॥सकलान्मोच
यामासदेवान्ऋषिसमन्वितान्॥१७॥दिवसेपंचमेप्राप्तेनागताम्मेप्रसन्निधौ॥तदासर्वान्ह

निष्यामिगणेशेनसमन्वितः॥१९॥तथेत्युक्त्वागताःसर्वेपराशरग्रहंप्रति॥तत्रगजाननंदृष्ट्वाप्र
णेमुर्दंडवत्क्षितौ॥१९॥पराशरोविस्मितोसौपूजयामासतान्स्वयं॥सहसासकलान्प्राप्तान्देवा
न्मुनीन्विशेषतः॥२०॥पराशरेणसंयुक्ताःसर्वेतेकथयंस्तदा॥स्तुत्वाचविविधैःस्तोत्रैर्गजासुरवि
चेष्टितं॥२१॥कर्णौसंपीड्यदेवेशशिरःस्फालनमंजसा॥कथंकुर्मोसुरस्याग्रेचरणावनताःप्र
भोः॥२२॥नीचस्यमननाद्देवमरणंहिवरंस्मृतं॥तस्मात्त्वंजहिदेवान्वादैत्यंमुनीन्गजानना॥
॥२३॥मुद्गलउ०॥देवादीनांवचःश्रुत्वास्मित्वातान्ब्रवीत्प्रभुः॥भक्तवात्सल्यभावेनयंत्रितःस
प्रजापते॥२४॥गणेशउ०॥चिंतानैवप्रकर्त्तव्याहनिष्याम्यसुरंक्षणात्॥कुरुध्वंमेवचोरम्यंस
र्वेषांसुखदंभवेत्॥२५॥दैत्येंद्रेणकथितोयंदंडस्तदेवमेप्रियः॥ममपादस्यसामीप्येकुरुध्वंस
र्वभावतः॥२६॥तदादैत्यंमहाघोरंहनिष्यामिप्रपश्यतां॥भवतांनात्रसंदेहःक्षणार्द्धेनचसत्तमाः॥

द्वि॰ खं॰

मु॰पु॰
७८

॥२७॥ गणेशस्य वचो रम्यं श्रुत्वा देवर्षिसत्तमाः॥ परस्परं मुखालोकमकुर्वन्स्मितपूर्वकाः॥२८॥
तत्र शंभुरुवाचेदं वचनं हितकारकं॥ अस्माकं कुलदेवोयं तस्मात्कुर्वंतु सत्तमाः॥२९॥ इत्यु
क्त्वा शंकरस्तत्र पाणिभिः श्रुतयस्वयं॥ पीडयित्वा शिरोभिस्तच्चरणेध्वनिराचरत्॥३०॥ मृदुमधु
ररूपं सशब्दं च शिरसा भवं॥ श्रुत्वा गजाननो हृष्टो बभूव परमं तदा॥३१॥ ततो विष्णवादिभि
र्देवैर्भृग्वादिप्रमुखैस्तथा॥ मुनिभिः प्रकृतं दक्षं ततोत्यंतं मुमोद सः॥३२॥ मूषकारूढको भू
त्वा चतुरायुधभूषितः॥ गजासुरवधार्थाय ययौ गणपतिः स्वयं॥३३॥ माहिषाख्ये पुरे ग
त्वा सिंहनादं चकार सः॥ तेन भ्रांता असुरास्ते गजासुरस्तथा स्वयं॥३४॥ एतस्मिन्नंतरे तत्र गु
ल्मस्था असुराययौ॥ छिन्नभिन्नकृतांगा वै शशंसुर्देवचेष्टितं॥३५॥ असुरा उ॰॥ गणेशेन स
मायुक्ता देवाः मुनिगणाः प्रभो॥ आययुर्योद्धुमत्यंतं मदयुक्ता गजासुर॥३६॥ तेषां वचनमा

रामः
७८

कर्ण्यगजासुरप्रतापवान्॥ सर्वानाज्ञापयामास दैत्यान्सज्जीभवंतु च॥३७॥ स्वयंतु सज्जितो भूत्वा
रथारूढश्च निर्ययौ॥ तमनु दैत्यसैन्येषा दैत्यास्ते निर्ययुः पुरात्॥३८॥ अपारसेनया युक्तं ददर्श
तं गजासुरं॥ गजाननः प्रसन्नात्मा कालस्य भयदायकं॥३९॥ ततो गजासुरः कोपाद्दैत्यानाज्ञाप
यत्तदा॥ हनध्वममरान्सर्वान्मुनीन्यक्षादिसंयुतान्॥४०॥ दैत्येंद्रेण समाज्ञप्ता असुरा जयशालि
नः॥ अस्त्रैः शस्त्रैश्च ते देवान्पीडयामासुरोजसा॥४१॥ देवाक्रोधसमाविष्टा मरणे कृतनिश्चयाः॥
दैत्यान्प्रहरणैर्जघ्नुः शस्त्रैर्नानाविधैस्तदा॥४२॥ दैत्यानां चैव देवानां युद्धं परमदारुणं॥ बभूव तुमु
लं तत्र परस्परविनाशनं॥४३॥ असृक्नदी प्रवृत्ता च महौघा वीरमोहिनी॥ भग्ना दैत्यगणाः स्त
त्र प्रहारवीरपीडिताः॥४४॥ त्यक्त्वा दैत्यगणा लज्जां पपतुस्ते दिशो दश॥ तं दृष्ट्वा दैत्यराजस्तु विस्मि
तोभूत्प्रजापते॥४५॥ ततो दैत्याधिपाः क्रूराः प्रधानप्रमुखा रणं॥ आययुर्देवसेना ते निजघ्नुश्च म

हावलाः॥४६॥ततइंद्रादिभिस्तेवैरणंकृत्वासुदारुणं॥निहितामूर्छिताःकेचिद्रणेभूमौनिपातिताः॥४७॥
हाहादैत्यगणाःकृत्वापपतुःसर्वतोदिशं॥तंदृष्ट्वादैत्यराजःसविस्मयंपरमंययौ॥४८॥विपरीतंमया
दृष्टंवन्हिःशीतोयथाभवेत्॥तथादेवैर्मदीयेयंसेनासर्वापराजिताः॥४९॥एवंमनसिसंतप्तःक्रो
धारुणविलोचनः॥रथारूढःस्वयंयोद्धुमाययौसगजासुरः॥५०॥ ॥इतिश्रीमदांत्ये॰गजासुरसै
न्यवधोनामद्वात्रिंशोध्यायः॥३२॥ ॥मुद्गलउ॰॥समागतंमहादैत्यंदृष्ट्वादेवाभयातुराः॥गजा
ननंनिजंनाथंययुर्वृत्तांतमीरितुं॥देवमुखात्सवृत्तांतंश्रुत्वाक्रोधसमन्वितः॥परशुपाशमुग्रंच
गदांधृत्वाययौतदा॥२॥मूषकारूढमाद्यंतंपुरुषंदैत्यनायकः॥दृष्ट्वागजाननंदिप्तमुवाचबल
गर्वितः॥३॥गजासुरउ॰॥किमर्थंरणभूमौत्वमागतोब्रह्मणाधम॥तपःकार्यंत्वयानित्यंकथं
क्षात्रसमाश्रितः॥४॥ब्रह्मादयोजितायेनतेनसार्द्धंत्वयाद्विज॥युद्धंकर्त्तव्यमत्यंतंवृथामरण

माप्स्यसि॥५॥गच्छस्वमाश्रमंविप्रन्हन्मित्वांसमागतं॥वालभावात्कृतंकर्मसहामिनात्रसंशयः॥
॥६॥इत्युक्तवंतमालोक्यशंभुःक्रोधसमन्वितः॥उवाचतंमहादैत्यंवचस्तद्धितकाम्यया॥७॥
शिवउवाच॥मूर्खोसिदैत्यराजत्वंनायंब्राह्मणसत्तमः॥गणेशोयंसदासेव्योयोगिभिःपरमा
दृतैः॥पराशरस्यपुत्रोभूत्तपसाराधितःस्वयं॥वरदानप्रभावेनत्वांहनिष्यतिनिश्चितं॥९॥त्य
क्त्वावैरंगणेशस्यशरणंदैत्यनायक॥एहिनोचेच्चसर्वस्वंहित्वामृत्युमवाप्स्यसि॥१०॥वसपा
तालभूमौत्वंनगणेशोहनिष्यति॥एवंश्रुत्वावचःशंभुंतताडगदयासुरः॥११॥मूर्छयापतितो
भूमौशंकरस्तत्रसंगरे॥शस्त्रास्त्रस्तेनदैत्येनमूर्छिताश्चकृताःसुराः॥१२॥विष्णुकाद्यादयोतत्रप
तिताःपीडिताभृशं॥दैत्याधिपंततोदृष्ट्वागणेशोस्त्रमुपाददे॥१३॥परशुंमंत्रयामाससंहारास्त्र
विधानतः॥तत्याजदैत्यसेनायांमहास्त्रयमसन्निभं॥१४॥परशुनाहतादैत्यायत्रतत्रस्थिताम

धे॥पश्यतोदैत्यराजस्य प्रधानाश्च मृताः सुताः॥१५॥ संहारास्त्रनिवृत्त्यर्थं नानायत्नमथाकरोत्॥सर्वं
तंनिष्फलंजातंगजासुरस्य संयुगे॥१६॥एकएवमहादैत्योवरदानप्रभावतः॥उर्वरितः ससंहारात्प
रशुनाहतोनच॥१७॥ततोदैत्योययौक्रोधात्समीपेविघ्नपश्यच॥शस्त्राणिसहसात्यक्त्वामल्लयुद्धो
द्यतोभवत्॥१८॥तादृशंतंगणेशानोदृष्ट्वाक्रोधसमन्वितः॥दर्शयामासदैत्यायरूपंस्वानंदगंपरं॥
॥१९॥अनंतादित्यसंकाशंगजवक्त्रविराजितं॥ज्योतिषांज्योतिरापूर्णंयोगरूपंसुशांतिदं॥२०॥तंध
र्तुंदैत्यराजस्मपततेसमीपास्थितं॥आकाशवन्नतद्रूपंहस्तगंभवतिप्रभो॥२०॥आश्चर्यंहृदयेमत्वा
दैत्येशोविह्वलोभृशं॥अहोमयाधृतोढुंढिर्हस्तगोमेनहस्तगः॥२२॥किमिदंकौतुकंपूर्णंगणेशोयं
सनातनः॥ब्रह्माकारोनसंदेहोहनिष्यतिसमांध्रुवं॥२३॥धन्यंजन्ममदीयंवैपितरोवाश्रमादिकं॥ग
णेशहस्तशस्त्रेणमरिष्यामिनसंशयः॥२४॥शुकाद्यायोगिनोयंवैप्राप्तायोगैःसुदुश्चरैः॥आयासेनवि

नासोयंमयासोयंगजाननः॥२५॥तंप्रणम्यमहाभक्त्यादैत्येशोवरकांक्षया॥जगादगणनाथंवैभावभा
वितमादरात्॥२६॥जहिमांब्रह्मब्रह्मेशदासंतेगणनायक॥वरंप्रयच्छमेतेननमामित्वांपुनःपुनः॥२७॥
नसंसारसुखेचित्तंमदीयंतेप्रदर्शनात्॥त्वयाहतोभविष्यामिब्रह्मभूतोनसंशयः॥२८॥प्रार्थयितंमहा
दैत्यमंकुशेनजघाननं॥गणेशःसोपिसायुज्यंतस्यप्राप्तःप्रजापते॥३०॥शंकराद्यासुरास्तत्रमुनयो
मोहसंयुताः॥नविदुश्चेष्टितंतस्यभ्रांताइवस्थितावभुः॥३१॥हतंदैत्यंसमालोक्यहर्षितास्तेतदाभव
न्॥गणेशोपिस्वकंरूपंलीनंकृत्वास्थितःपुरः॥३१॥पूर्वाकारंचतंदृष्ट्वातुष्टुवुस्तेसुरर्षयः॥पुपूजु
र्भक्तिभावेननेमुश्चननृतुःपुरः॥३२॥देवर्षयऊचुः॥नमस्तेगजवक्त्रायगजाननस्वरूपिणे॥परा
शरसुतायैववत्सलासूनवेनमः॥३३॥व्यासभ्रात्रेशुकस्यैवपितृव्यायनमोनमः॥अनादिगणना
थायस्वानंदवासिनेनमः॥३४॥रजसासृष्टिकर्त्रेतेसत्वेसंपालकायवै॥तपसासर्वसंहर्त्रेगुणेशाय

नमोनमः॥३५॥प्रकृतिपुरुषाकाररूपिणेपरमात्मने॥बोधाकारायवैतुभ्यंकेवलायनमोनमः॥स्वसंवेद्या
यंदेवायायोगायगणपायच॥शांतिरूपायतुभ्यंवैनमस्तेब्रह्मनाय॥३७॥विनायकायवीरायगजा
सुरस्यशत्रवे॥मुनिमानसनिष्ठायमुनीनांपालकायच॥३८॥देवरक्षाकरायैवविघ्नेशायनमो
नमः॥वक्रतुंडायधीरायचैकदंतायतेनमः॥३९॥त्वयायंनिहितोदैत्योगजासुरोमहाबलः॥ब्र
ह्मांडेमृत्युसंहीनोमहाश्चर्यंकृतंविभो॥४०॥हतेदैत्येधुनाकृत्स्नंजगत्संतोषमेष्यति॥स्वाहास्व
धायुतंपूर्णंस्वधर्मस्थंभविष्यति॥४१॥एवमुक्त्वागणाधीशंसर्वेदेवर्षयस्ततः॥प्रणम्यतूष्णींभा
वंतेसंप्राप्ताविगतज्वराः॥४२॥कर्णौपीड्यगणेशस्यचरणेशिरसोध्वनिः॥मधुरःप्रकृतस्तैस्तुतेन
तुष्टोगजाननः॥४३॥तानुवाचमदीयायेभक्ताःपरमभाविकाः॥तैश्चनित्यंप्रकर्त्तव्यंभवद्भिर्नमनं
यथा॥४४॥तेभ्योहंपरमप्रीतोदास्यामिमनसीप्सितं॥एतादृशंप्रियम्मेचनमनंनात्रसंशयः॥

एवमुक्त्वा मुनीन्सर्वान्सिद्धिबुध्यादिसंयुतः ॥ अंतर्दधे ततो देवा मुनयः स्वस्थलं ययुः ॥ ४६ ॥ वत्सलानाम्न
मातावै पराशरः पिताप्रभो ॥ शोकसागरमग्नौतौ कृत्वावार्तां निपेततुः ॥ ४७ ॥ ततः कारुणिको देवस्तं
योर्हृदिप्रकाशिनः ॥ योगशांतिमयंज्ञानं बोधयामास शाश्वतं ॥ मदीयांमूर्त्तिकांकृत्वासंस्थाप्यश्रास्त्र
णेसदा ॥ तस्माः पूजाप्रकर्त्तव्याभवद्भ्यांनित्यमादरात् ॥ देहव्यापारतातत्रकर्त्तव्याहृदिशांतिदं ॥
योगरूपेधरंदेहंकालंमाक्रमतंसदा ॥ ५० ॥ एवमुक्त्वाहरिस्तौसोगणेशंतंदधेनतः ॥ कृतवंतौ
महाभागौतथास्तुयोगिनौ ॥ ५१ ॥ अचलास्थापितामूर्त्तिः सिद्धिदासाभवत्सदा ॥ दर्शनान्मोक्ष
दारक्षसकामानांप्रकामदा ॥ ५२ ॥ एतत्तेकथितंसर्वंगजासुरवधाश्रितं ॥ चरितंगणनाथस्यस
र्वपापहरंशुभं ॥ ५३ ॥ यःशृणोतिनरोभक्त्यापठतिवाप्रजापते ॥ तस्मैभक्तिप्रदंपूर्णंमुक्तिदंप्रभवि
ष्यति ॥ ५४ ॥ ॥ इतिश्रीमत्सत्ये श्रीगजाननावतारचरित्रवर्णेनंगजासुरवधेनामत्रयस्त्रिंशो

ध्यायः॥३३॥ ॥मुद्गल उवाच॥ पराशरस्य पुत्राद्व्यासः साक्षाज्जनार्दनः॥ वेदादिभागसिद्ध्यर्थं
देवैः संप्रार्थितः पुरा॥१॥ स एव ज्ञानगर्वेण न सस्मार गजाननं॥ न खन्न प्रकर्त्तव्यं मया विष्णु
स्वरूपिणा॥२॥ ततस्तस्य गतं ज्ञानं सकलं वेदशास्त्रगं॥ प्रययौ दुःखितस्तेन ब्रह्मणः शरणं
पुरा॥ ब्रह्मणा बोधितो व्यासः पुराणं श्रुतवान्प्रभो॥ गाणेशमादिभूतं तत्तेन सज्ञानवान
भूत्॥४॥ तपस्तप्त्वा सुविपुलं गाणपत्यो बभूव ह॥ शांतियोगधरः साक्षाद्व्यासो नारायणः
स्वयं॥५॥ ततो व्यासेन वेदानां शाखाभिन्नाः कृताः पराः॥ सुलभार्थं नराणां वै कर्मादिज्ञानसिद्ध
ये॥६॥ आदौ वेदं यजुः संज्ञं तं चतुर्द्धा विभज्य सः॥ चातुर्होत्रं चकारैव कर्म सर्वं प्रजापते॥ यजुषा
ध्वर्यवं चक्रे ऋग्भिर्होत्रत्वमंजसा॥ उद्गात्रत्वं चकारासौ सामभिः सर्वसंम्मतः॥७॥ ब्राह्म्यमेवा
करोद्विप्रोथर्वभिः सुसमाहितः॥ एवं चातुर्विधं कर्म कृत्वा मान्यो बभूव ह॥८॥ मंत्रैर्युक्ता पुरा

तेनसंहिताविविधाकृता॥ यज्ञार्थंब्राह्मणंप्रोक्तंयोगार्थंयदरण्यकं॥१०॥ पैलंशिष्यंमहाबुद्धिमृ
ग्वेदभेदधारकं॥ वैशंपायनमेवंसयजुषांभेदधारकं॥११॥ जैमिनींसामवेदस्यपारगंप्रचकारह॥
अथर्वधारकंविप्रंसुमंतुंमुनिसत्तमः॥१२॥ तेनपंचकृताभेदाऋग्वेदस्यमहात्मना॥ षडशीति
तथाभेदायजुर्वेदस्यवैकृताः॥१३॥ शाखानामेकसाहस्रंसामवेदस्यवैकृतं॥ अथर्वणस्तथा
भेदानवकृताविवेकिना॥१४॥ पुराणमेकरूपंवैशिष्यायप्रददौमुनिः॥ रोमहर्षणसंज्ञायसू
तायनम्ररूपिणे॥१५॥ पुराणस्यकृतोभेदाअष्टादशमहात्मना॥ पुराणोपपुराणाख्याद्विवि
धासंहितास्मृता॥१६॥ ब्राह्मंचवैष्णवंपाद्मंशैवंभागवतंतथा॥ भाविष्यंब्रह्मवैवर्त्तंमार्कंडेयंच
वामनं॥१७॥ आग्नेयंवायवंमात्स्यंवाराहंकौर्ममेवच॥ लैंगंगारुडकंस्कांदंब्रह्मांडंचप्रजापते॥
॥१८॥ अष्टादशपुराणानिकथितानिविशेषतः॥ तथैवोपपुराणानिकथयामिप्रजापते॥१९॥

गाणेशंनारदीयंचनारसिंहंचकापिलं॥नांदिकेयंचवारुण्यंदौर्वाससमथांबकं॥२०॥कालिकेयंच
मारिचमौशनसंचभार्गवं॥सानत्कुमारकंचैवकौमारंचप्रजापते॥२१॥माहेश्वरंचसौरंचपाराश
र्यंचमौद्गलं॥अष्टादशपुराणानिकथितानिष्ठमासतः॥२२॥धर्माधर्मव्यवस्थार्थंचक्रेभारतमु
त्तमं॥एतत्सर्वंसजग्राहव्यासात्सूतोमहामतिः॥२३॥एतानिगाणपत्यानिज्ञातव्यानिविचक्षणैः॥
अन्यानिचेतिहासानिगणेशस्तुतिकानिवै॥२४॥श्रुत्वासुवचनंतस्यमोहितामुनयःपुनः॥ऊ
चुःसूतंमहाप्राज्ञंसंशयच्छेदनायते॥२५॥शौनकाद्याऊचुः॥कथंसूतशिवादीनांपुराणानिम
हामते॥प्रोक्तानिगाणपत्यानिवदसंशयमुक्तये॥२६॥तेषांवचनमाकर्ण्यसूतःसर्वार्थकोवि
दः॥जगादतान्महाबुद्धिःसंशयच्छेदनंवचः॥२७॥सूतउवाच॥गणेशस्यस्वरूपंयत्पंचभाव्या
सभाषितं॥ज्ञातव्यंमुनिशार्दूलास्तेषांभेदंवदाम्यहं॥२८॥आद्यंब्रह्मपुराणंयद्गाणपत्यंप्र

कीर्त्तितं॥निर्गुणोगणपस्तत्रवर्णितोब्रह्मवाचकः॥२९॥हृदयेषुजनानांवैबुद्धिप्रकाशकारकः
॥तदेवतस्यरूपंतध्यायतेत्यागिनःप्रभुं॥३०॥आकारादिविहीनंतत्सदासाक्षिमयंपरं॥मनो
वाणीविहीनेनज्ञातव्यंन्यासभिर्मुने॥३१॥तंध्यायंतिमहाभागाचतुर्विधाश्चयोगिनः॥संन्या
सिनोहृदिस्थंवैगणेशंबुद्धिचालकं॥३२॥अन्यादंतेपुसणंयत्ब्रह्मांडंगणपस्यतत्॥तत्रौंका
रमयाकारःसगुणोवर्णितःप्रभुः॥३३॥जगद्विहारकारीसपंचधाप्रबभूवह॥प्रणवःप्रणवाका
रोगजाननउदाहृतः॥३४॥अकारौंकारकौचैवमकारोनादआबभौ॥बिंदुःपंचविभज्यात्मानं
नाखेलंकरोतिसः॥३५॥जगदाकाररूपेणस्थितंविघ्नेशमादरात्॥ध्यायंतिजगदात्मानंप्रण
वाकृतिलक्षणं॥३६॥वेदादौतंविजानीत्यंस्मरंतिकर्मसिद्धये॥ब्रह्मांडाकारविघ्नेशःसगुणःपरि
कीर्त्तितः॥३७॥तथैवोपपुराणेषुगाणेशमाद्यमंजसा॥पुराणंतद्गणेशस्यभिन्नमूर्त्तिधरस्यच॥

अंतेसोपिनसंदेहोवेदांतेषुविशेषतः॥४५॥यआदिःप्रलयांतेसतिष्ठतिसर्वसम्मतं॥६

द्वि॰खं॰

मु॰पु॰
८४

सगुणंजगदाकारंनिर्गुणंबुद्धिचालकं॥तयोर्ज्ञानप्रसिद्ध्यर्थंमूर्त्तिमंतंस्तुवंतिते॥३९॥गजवक्त्रादिचि
न्हैश्चचिन्हितंगणनायकं॥भजंतेभावयुक्तास्तमंत्रादिनामहर्षयः॥४०॥तस्योपासनमात्रेणसगुणं
निर्गुणंतथा॥सुलभंप्राप्यतेब्रह्मयोगिभिस्तापसोत्तम॥४१॥आंत्यंमौद्गलमेतच्चयोगशांतिमयंपरं
॥तत्रविघ्नेशमाहात्म्यंयोगाकारंप्रकीर्त्तितं॥४२॥सगुणंनिर्गुणंब्रह्ममूर्त्तिरूपधरंमुने॥त्रयाणां
योगरूपंवैमुद्गलेनप्रकाशितं॥४३॥योगिनःशुकमुख्यास्तंप्रभजंतियथातथं॥योगेनाभेदसं
ज्ञेनवर्णाश्रमविवर्जिताः॥४४॥तस्मादादौगणेशस्यपूजनंसर्वसम्मतं॥तस्मादाद्यंतभावेषुपुरा
णेषुगणेश्वरः॥४५॥पंचमंमध्यरूपंचगणेशस्यमहात्मनः॥कलांशेनप्रसंख्यातंनानारू
पधरम्मुने॥४७॥विष्णुशिवादिभेदैश्चखेलतिसगजाननः॥तेषांमध्येपुराणानिव्यासेन
कथितानिवै॥४८॥तस्मात्सर्वपुराणेषुगणेशस्यैववर्णनं॥कथितंनात्रसंदेहोव्यासेना

रामः
८४

मितबुद्धिना ॥४९॥ इदं पंचविधं रूपं गणेशस्य महात्मनः ॥ यो जानाति नरः सोपि मोहहीनो भविष्य
ति ॥५०॥ चतुर्विधं गणेशस्य पूजनं कथितं सदा ॥ सर्वारंभेषु सिद्धीनां दायकं भक्तिकारिणे ॥५१॥ मू
र्त्तिपूजनमेकं च द्वितीयं प्रणवात्मकं ॥ तृतीयं बुद्धिदं चैव शांतिरूपं चतुर्थकं ॥५२॥ अत आदौ जना
केचिद्ग्रंथेषु ब्रह्मरूपकं ॥ पूजयंति स्मरंति वा सर्वसिद्धिप्रदायकं ॥५३॥ केचिद्बुद्धिप्रदं देवं हृदि
स्थं संस्मरंति वा ॥ सर्वादौ सर्वसिद्धीनां दायकं विघ्ननायकं ॥५४॥ केचिदोंकाररूपं तं स्मरंति पूज
यंति वा ॥ पूजयंति द्विजेंद्राद्याः सर्वादौ गणनायकं ॥५५॥ केचिन्मूर्त्तिधरं देवं पूजयंति स्मरंति वा ॥
सर्वादौ गणनाथं च ज्ञातव्यं शास्त्रसम्मतं ॥५६॥ अत आदौ तदा मध्ये सर्वांते सगजाननः ॥ शोभ
ते योगरूपेण शांतिदो भक्तवत्सलः ॥५७॥ ब्रह्मणा बोधितो व्यासो गाणपत्यः प्रतापवान् ॥ गणे
शप्राप्तिकामार्थं नानाभेदं चकार सः ॥५८॥ वासनाछेदनार्थं च जनानां योगसिद्धये ॥ शिवादीनां पु

राणानिक्रमार्थंवर्णितानिवै॥५९॥एतद्व्यासस्यमाहात्म्यंकथितंसकलंभवेत्॥यःशृणोतिनरोभ
क्त्यापठतितस्यसर्वदा॥६०॥ ॥इतिश्रीमदांत्ये॰श्रीव्यासमाहात्म्यंनामचतुस्त्रिंशत्तमोध्यायः॥३४॥
॥ ॥मुद्गलउ॰॥व्यासस्यापिसुतोजज्ञेशुकःसाक्षाच्छिवःस्वयं॥तपसाराधितस्तेनयोगिनांसशि
रोमणिः॥१॥शुकोगर्भाद्विनिःसृत्यपपालसंगभीतितः॥संगेनज्ञानभंगोवैजायतेविषयात्म
नां॥२॥तंगच्छंतंसमालोक्यव्यासोपिधावतोभवत्॥बोधयन्हेतुभिर्वाक्यैर्नानाक्रममयैःसुतं
॥३॥तिष्ठतिष्ठमहायोगिन्शृणुमेपरमंवचः॥प्रथमंब्रह्मचर्यंचततोगार्हस्थ्यमंजसा॥४॥ततो
वनाश्रमःप्रोक्तस्ततःसंन्यासआदरात्॥क्रमेणसेवितारातेतदायोगःसुसिध्यति॥५॥अन्यथा
सहसाकृत्वायोगभ्रष्टोनरोभवेत्॥अथवाभ्रष्टभावेननारकीधर्मनाशतः॥६॥अतोमनो
जयार्थंत्वंक्रममार्गंसमाचर॥अंतेयोगिंद्रसंसेव्योभविष्यसिनसंशयः॥७॥सहसामाचरत्वं

वैसागंपरमदुस्तरं॥मनश्चंचलभावेनपतिष्यसिनसंशयः॥इत्यादिविविधैर्वाक्यैर्व्यासेनबोधितः
सुतः॥संगस्यैवभयाद्योगीनबुबोधशुकोमुने॥९॥व्यासोपिभाविनंज्ञात्वाययौस्वस्याश्रमंस्वयं॥
गणेशंमनसाध्यात्वासंस्थितश्चिंतयान्वितः॥१०॥एतस्मिंनंतरेतत्रब्रह्मास्वयमुपागतः॥तंप्रण
म्यशुकस्यापिवृत्तांतमवदन्मुनिः॥११॥ततस्तंप्रत्युवाचाथब्रह्माचिंतांसमाकुरु॥शुकोनभवि
ताशंभुर्भ्रष्टोवैनात्रसंशयः॥१२॥एवमाश्वास्यतंव्यासंतस्यपूजांप्रगृह्यसः॥ययौस्वभवनंब्र
ह्माव्यासश्चहर्षितोभवत्॥१३॥शुकःसनर्मदातीरेसंस्थितोयोगसेवया॥सर्वत्रब्रह्मभावेनाचिं
तयन्ब्रह्मशाश्वतं॥१४॥संप्रज्ञातोष्टधातेनसाधितोवेदमार्गतः॥असंप्रज्ञातयोगेषुसंस्थितोयो
गिसत्तमः॥१५॥तत्रशुकेश्वरःसाक्षाच्छंकरस्तिष्ठतिप्रभुः॥शिवेनहृदिसंस्थेनबोधितोबादरायणिः॥
॥१६॥तेनगुरुर्विहीनोयंशुकोयोगंसमभ्यसन्॥योगभूमिक्रमेणैवासाधयद्योगमुत्तमं॥१७॥स्व

तोत्थानात्मकं ब्रह्मसाधयित्वा विधानतः॥ परतोत्थानकं तेन प्राप्तं सांख्यं महात्मना॥१८॥ तत्र ब्रह्मणि सं
सक्तो योगाभेदेन केवले॥ बभ्राम पृथिवीं सर्वां विदेहो सौ महामुनिः॥१९॥ ब्रह्मसांख्यं निराधारं दृष्ट्वा सं
शयवानभूत्॥ तदर्थं जनकं सोपि ययौ हर्षसमन्वितं॥२०॥ जनकेन तथा सांख्यं विदेहं कथितं परं
॥ तेन संशयहीनश्च जातो वैयासकिः प्रभुः॥२१॥ सांख्यबोधस्य नाशः स्यात् तं दृष्ट्वा विस्मितो मुनिः॥
विचारमकरोच्चित्ते योगभावेन भावितः॥२२॥ बोधेनोत्थानकं जंतोर्जायते नात्र संशयः॥ बोधही
नेन योगेनोत्थानं नास्य भवेत्कदा॥२३॥ ब्रह्मयोगमयं प्रोक्तं तत्रोत्थानविहीनता॥ उत्थानं विद्यते नै
व ब्रह्माकारं प्रवर्त्तते॥२४॥ सांख्यं ब्रह्मविदेहत्वादुपाधिवर्जितं मतं॥ न मुख्यं शांतिदं प्रोक्तं योगींद्रै
र्योगचिंतकैः॥२५॥ व्यासेन वेदशाखाश्च कृता भिन्ना महात्मना॥ पुराणानि विभिन्नानि कृतानि स
र्ववेदिना॥२६॥ अहं तं शरणं यामि तातं शांत्यर्थमादरात्॥ स एव सर्ववित्साक्षाच्छांतिदाता भविष्य

no. 109 Maudglaya Pûrâṇ
Puran in Sanskrit.
Ist. canto complete,
2nd. canto 86 pages.
in bad condition.